चारु-चरित-चर्चा

(सद्वृत्त-साधना-सरणिः)

रचयिता :

कविरत्नम्, डॉ० श्यामदेवः पाराशरः, शास्त्री,

ऐम्० ए०, पीऐच्० डी०, ऐम्० ओ० ऐल्०,

(PES) Rtd.

२२३-हरिनगर, होशियारपुर (पञ्जाब)

—: उपकारभाराङ्गीकारः :—

अस्या रचनाया विशुद्धरूपेण मुद्रापणे डॉ० मुनीश्वरदेव-डॉ० दामोदर झा-डॉ० गिरीशचन्द्र ओझा-महाभागैः भूयः साह्यं सम्पादयद्भिर् भृशमुपकृतोऽहं क्रियासमभिहारेण तेभ्यो धन्यवादान् वितरामि । ततोऽपि प्राक् साधुवादभाजनं संस्थानस्याऽस्य निदेशकः श्रीभास्करन् नायर-महोदयः, येन प्रस्तुत-प्रबन्धस्य प्रकाशने पुष्कला प्रेम-प्रसाद-परम्परा प्रादुष्कृता । पर्यन्ते च पञ्जाब-भाषा-विभागस्य निदेशकाः, सहायकनिदेशकाः, तत्सहायकः श्री प्रेम पाल-शर्मा चेति सर्वेऽपि कृतज्ञता-प्रकाशनार्हाः येषां सर्वतोमुखत्वात् स्तुत्यं साहित्यं सर्वदा सौलभ्यं समभजतेति समेषामेषां सतां सततं कौशल्यं कामयानः :—

श्यामदेवः पाराशरः

आमूलचूलमालोचि श्रीश्यामदेव-पाराशरेण प्रणीता प्रस्तुतार्यचर्या वर्या 'चारु-चरित-चर्चा' । माधवेन मधुरिम्णा सुधासोदरेण स्वादिम्ना च सम्प्लुता, सौशब्द्य-सौभाग्य-संस्कृता, साहित्य-सौहित्य-सम्पादिनो सैषा काचन रोचना रचना सन्ततं संस्कृतसेविनां सचेतसां सतां सुतरां स्वान्त-सन्तोषाय सम्पत्स्यत इति सम्मनुते— मुनीश्वरदेवः, व्याकरणाचार्यः, M.A., Ph.D., (Reader), साधु आश्रम, होशियारपुर ।

काव्यकौशलजुषा पाराशरोपाह्व-श्रीश्यामदेव-विदुषा विरचितां 'चारु-चरित-चर्चा' इति यथार्थाभिधां संस्कृतरचनां वीक्षं वीक्षं परमां मुदमावहामि । कविरयं गद्ये पद्ये च समानमेव काव्यकौशलं कलयतीति रचनाया अस्याः सरसा स्थाने स्थान एकमेवाक्षरमावर्त्तयन्तो, अनुप्रासाद्यैरलङ्कारैरलङ्कृता, प्रवाहमयी संस्कृता वागेवात्र साधीयः प्रमाणम् । पञ्चतन्त्रादिवत् कथान्तर्गत-कथाभिरेवा-हिंसासत्यादि-सच्चारित्र-शिक्षणपरो विषयोऽप्यस्याः किमपि वैशिष्ट्यभागिति न स्यात्तिरोहितं पाठकानाम् । कृतयेऽस्यै साधुतरायै श्रीपाराशरमहाभागा भूयोभूयः संस्कृतप्रणयिनां साधुवादार्हा इति संस्तौति—

वीरेन्द्रशर्मा
शास्त्री, व्याकरणाचार्यः,
M.A., Ph D., (Reader), साधु आश्रम, होश्यारपुर ।

प्रदायि प्रीति-प्रमृतम् प्रबन्ध-प्रणेत्रा
प्रज्ञाविना पाराशरेण
श्याम-देवेन।
१६.२.१९८४

—चारु-चरित-चर्चा—

(सद्वृत्त-साधना-सरणिः)

रचयिता :

कविरत्नम्, डॉ० श्यामदेवः पाराशरः, शास्त्री,
ऐम्० ए०, पीऐच्० डी०, ऐम्० ओ० ऐल्०,
(PES) Rtd.

२२३—हरिनगर, होशियारपुर (पञ्जाब)

भाषा-विभाग, पंजाब सरकार
के अनुदान से प्रकाशित

सर्वेऽधिकारा ग्रन्थकृदायत्ताः

प्रकाशक :—
कविरत्नम्, डॉ० श्यामदेवः पाराशरः, शास्त्री,
ऐम्० ए०, पीऐच्० डी०, ऐम्० ओ० ऐल्०,
(PES) Rtd.

२२३—हरिनगर, होशियारपुर (पञ्जाब)

मार्च, १९८६

प्रथमं संस्करणम्——१०१०

मूल्यम् 75/-रु०

(1) प्राप्तिस्थानम्—
वी० वी० आर० आई०, साधु आश्रम, होशियारपुर (पंजाब
(2) डॉ० श्यामदेव पाराशर, २२३—हरिनगर, होशियारपुर

मुद्रक : वी० वी० आर० आई० प्रैस, साधु आश्रम, होशियारपुर ।

प्रस्तुत-परिकथा-प्रबन्ध-परिचयः

इह तावत् काव्य-करण-कौशल्य-हीनेषु दीनेषु दयालूनां हृदयालूनाम्, साद्गुण्य-सौमनस्य - संसारे सर्वदा संवसतां सताम्, सर्वथा साहित्य - सौहित्य-सुहृदां सुकुमार-हृदाम्, सदसत्सिद्धि-संस्तुत-सूक्ष्म-संविदां विदां च सामोदाय विनोदाय, पृथिव्यां परमां प्रख्याति प्राप्य परत्र पुण्यप्रसूतं परमं पदं परिप्रेप्सूनां पथ-प्रदर्शनाय पातक-प्रणाशनाय च, स्वतः सौशब्द-सुभगत्व-समुपेता एताः पुरस्कृत-पुरातन-प्रथाः, परिष्कृत-पुण्यपथाः कथाः काश्चित् सख्याताः परं प्रख्याताः कथन-कौशल्येषु तुल्येषु स्वकुल्येषु, काश्चित् सौहार्द-सहितैः हितैः सङ्कल्पिता जल्पिता वा, काश्चित् सामान्यैः सम्मान्यैर्वदान्यैर्वा सृष्टा दृष्टा वा समीप-सम्प्रसारे संसारे, काश्चिद् इतश्चेतश्चेतःप्रादुर्भूता वा कल्याणाकूताः प्रभूताः, काश्चित् प्रवर-पुरुष-प्रवचन-पवित्रेषु पत्रेषु विषयविशेष-परिमलिताः मिलिता इति सङ्कलिताः।

अपि च सर्वतः सासूयैः सुतरां समुपेक्षितायाः सुरसरस्वत्याः सततं स्वान्तेन संसेवने समुत्सुकेन, संसारे सदा सदाचार-साद्गुण्य-सर्वङ्कष-सौजन्य-सम्प्रसार-स्पृहयालुना, सत्त्वसम्पन्न-सुदृढ-सौहृदय-सूक्ष्मसूत्र-सन्निबद्ध सकलं स्वदेशं सन्दि-दृक्षुणा, संस्कृत-समुपासकानां सूरीणां सार्वभौमिकं संरक्षणं स्यादिति सर्वदा समीहमानेन, मानवमात्र-मैत्रीमङ्गलमोद-मनोरथ-मतिना, लेशतोऽपि लुप्त-लक्ष्मीलाभ - लोभलालसेन, विशेषतो विष्वग् - वरणीय - वृत्तवैभव - विवर्धन-वाञ्छिना, प्रणय - पवित्रित - प्राभृतप्रदान - पेशल - प्रकृतिना, पौरपरिषत्-प्रशस्ति-प्रतिष्ठा-पारितोषिक-प्रमाणपत्र-प्रभृति - प्रतनु-पदार्थप्राप्ति-पराङ्मुखेण, परितः पारस्परिक-पावनप्रेम-पुरस्कार-पक्षपातिना पदपरिपाटी-प्रसादेन परम-प्रीति-प्रदायिनीं, पीयूषपूर-परिप्लुतां, प्रौढिम-पूजितां, पुरातनीं प्रबन्धपरम्परां प्रस्तुतकाले प्रायेण पङ्गुतां प्राप्तां प्रेक्ष्य पञ्चापप्रान्तेऽपि पुनः परिपोष-प्राणयितां प्रेप्सुना, पूज्यपण्डितप्रवर-पादपाथोज-पुष्पन्धयेन प्राणायि पुस्तकमिदम् :—

प्रश्रयिणा
पाराशरेण

सादरं समर्पणम्

स्नेहिनः सर्वभूतेषु,
देहिनः प्रशमस्य च ।
दमिनः करणानां च,
क्षमिणः शमिनस्तथा ॥१॥

स्वामिनः सद्गुणालीनां,
जगत्कल्याण-कामिनः ।
वेदिनः शास्त्रसाराणां,
शिष्य-शङ्का-विभेदिनः ॥२॥

चरितार्थयतो नाम,
वसुधायाः स्वसत्तया ।
चरिष्णोः सच्चरित्रस्य,
मण्डितस्य महत्तया ॥३॥

पालिनः सुरभारत्याः,
सौम्य-स्मेरास्य-शालिनः ।
रागेण रहितस्याऽलं,
त्यागेन सहितस्य च ॥४॥

परीक्षितस्य पुण्येषु,
दीक्षितस्य दयाविधौ ।
पूतस्य सत्त्वसंस्कारैर्,
दूतस्य शान्तिवादिनः ॥५॥

दृशा दयास्पृशा लोक-
क्लेश-कलमष-नाशिनः ।
श्रीमन्निगमबोधादि –
तीर्थाभिख्या-प्रकाशिनः ॥६॥

पाराशर्येण पूज्यस्य, परम-प्राभृत-प्रभः ।
पाणि-पाथोजयोः प्रीत्या, प्रबन्धः प्रस्तुतोऽर्प्यते ॥७॥

* कथाऽनुक्रमणी *

अहिंसा परमो धर्मः (१) पृष्ठ १
सत्यं वद (२) ,, ६
स्तेयं हेयम् (३) ,, २५
संयमः (४) ,, २६
परिग्रह-परित्यागः (५) ,, ३८
विश्वात्मनि विश्वम्भरे विश्वेश्वरे विश्वासः (६) ,, ४४
सदात्मा महात्मा (७) ,, ५२
धर्मपालनम् (८) ,, ६५
धर्मो रक्षति धार्मिकम् (९) ,, ७९
धर्मार्थं पतङ्ग-वृत्तिः (१०) ,, ८६
पदप्रतिष्ठा-परिपालनम् (११) ,, ९७
मिथ्याडम्बरः (१२) ,, १००
सौहार्द-निर्वहणम् (१३) ,, १०४
अप्रतिमा प्रियतमा (१४) ,, १०९
सत्यं सख्यम् (१५) ,, ११८
त्यागस्तपस्या च धनं द्विजानाम् (१६) पृष्ठ १२३
मातृभक्तो विष्णुगुप्तः (१७) ,, १३१
आचार्यदेवो भव (१८) ,, १३६
दानस्य महिमा न माने (१९) ,, १४६
साह्यं प्राणपणेनापि (२०) ,, १५१
सर्वस्व-समर्पणम् (२१) ,, १५७
औदार्यं महतां धनम् (२२) ,, १६६
दीने दया-दर्शनम् (२३) ,, १७५
हृदयोदया दया (२४) ,, १८८
क्रूरलीलाः कृपाशीलाः (२५) ,, १९९
करुणा-वरुणालयः (२६) ,, २०७
परसम्प्रदाय-सहिष्णुता (२७) ,, २२०
सहिष्णुता (२८) ,, २२६
आत्मविक्रयः (२९) ,, २३२
एकतानता (३०) ,, २४३
सत्यं संसार-स्वरूपम् (३१) ,, २५१

चारु-चरित-चर्चा—

शुभ-शंसा

प्रसन् गुरु-गदग्रामं, ग्राहयन् गुणगौरवम् ।
गर्जद्-ग्राहग्रहान् गाढं, गणेशो गलहस्तयन् ।। १ ।।

गैर्वाणीं गर्वितैः गर्ह्यैः, गालितां गह्वरे गिरम् ।
गीतो गौरी-गिरीशाभ्यां, गोपायतु गजाननः ।। २ ।।

आग्नेयैर्मनुभिर्[1] जवेन जगतां जाड्यं हरन्ती परं,
सौरैः सान्द्रतमं तमो मनसिजं दूरं दलन्ती द्रुतम् ।
आस्तीर्णं धियि वारुणैः करुणया निर्णेजयन्ती मलं,
वन्द्या विश्वजनीन-विश्वविषया वाणी वरा वैदिकी ।। ३ ।।

धारणा-ध्यानयोर्धाम, ध्वस्त-धीध्वान्त-धूमिकम् ।
ध्रुवं धर्मधनं धन्यैः, ध्रियतां धीर-धूर्धरैः ।। ४ ।।

व्याधिव्यूह-विषालु-वृक्ष-विपिन-व्यापत्ति-वैश्वानरः,
विद्या वश्यविधायिनी विषयिणां[2] विस्मापनी वास्तवी ।
वज्रं विश्वविमुक्तिवर्त्म-विषम-व्याघात-विध्वंसने,
विष्वग् वस्तु विलक्षणं विजयते वृत्तं विदां वैभवम् ।। ५ ।।

अहिंसा परमो धर्मः (१)

१. अस्ति स्म पुरा मरुप्रदेशे सूर्यजन्यानाम् सुख्यातसौजन्यानाम् राजन्यानाम्, वेश्मनि वेश्मनि विष्ठित-वीरलोकम् स्तोकम्, सर्वतोऽर्बुद-पर्वत-विभाज्यम् राज्यं विजयपुरं नाम ।

तत्र सुकुमार-स्वभावः, प्रथित-प्रभावः, कृपाकरः, वीर्यवतांवरः, नाना-नय-निष्णातः, दिने दिने दीनदानावदातः, द्विषद्दावदहनः, सत्सखि-सचिव-सूचनसहनः, प्रजापीडापहर्त्ता, ध्रुवधैर्यधर्त्ता, द्विष्टेषु दृढदण्डः,

---

१. मन्त्रैः । २. इन्द्रियाणाम् ।

च्युतचरितेषु चण्डः, दमेन शमेन क्षमया रमया च संस्कृतः, मत्सरेण मदेन मान्द्येन, कोपेन कपटेन कन्दर्पेण चाकलुषीकृतः, तालप्रांशुः, तेजसा तिग्मांशुः, ककुप्कूलङ्कषकीर्त्तिः, मुग्धिममण्डितमूर्त्तिः, कीर्त्तिसिंहनामधेयो नरनाथः शासनं चकार।

२. एकदा तस्य प्रतिवेशिना पृथिवीपालेन समं साम्राज्यसीमा-सम्बन्धिनो वृक्षविशेषविभवबहुलस्य विशालस्य विपिनस्य विषये विवादो ववृधे। दुर्दान्त-दन्तिदलेन, विपुलवीरबलेन, बाहुवीर्योल्लासिना प्रति-वासिना पार्थिवेन तत्साम्राज्य-सीमानः समन्ततः समवरुद्धाः। तदुपलक्ष्य प्रकृत्या करुणाकरोऽपि कीर्त्तिसिंहः समरस्यापरिहार्यतां पर्यालोच्य दीन-दयालुनामकं पृतनापतिं प्रतिपक्षि-प्रमथनाय प्रेरयामास। विधिवशात् स सेनानीः जैनोऽजायत। जैनसम्प्रदायानुसारित्वात् सुतरां सौम्यस्वभावः सन्नप्यसौ सेनानीः स्वकर्त्तव्यनिष्ठः, वरूथिनी-विनयनपटिष्ठः, विश्वविक्रान्त-वरिष्ठः, नरेशादेशं प्रति च दृढभक्तिरभूत्।

३. वैरि-व्यूह-विमर्दाय सन्नद्धया सेनया साकं प्रयातुं प्रस्तुते पृतनापतौ, प्ररूढातङ्कः शोशूयमानाशङ्कः कर्णसिंहो युवराजो रहसि व्यचिन्तयत्—महाराजेन पूज्यपादेन जनकेन जैनं जनं सेनास्वामिपदे प्रस्थापयता साम्राज्याहितसहितो विहितः प्रथीयान् प्रमादः। जैनस्तु मञ्चमत्कुणेऽपि मृते म्लानः, शोणितवर्णं निर्वर्ण्यापि च ग्लानः सञ्जायते। कः सम्पर्को जैनस्य प्रहरणेन रणेन विदारणेन च वैरिणाम्। नियतो नः पराजयः, प्रत्यासन्नश्च प्रजापरिक्षयः। आः! कष्टं प्राज्यम्, समाप्तं साम्राज्यम्। तदुक्तम्—

वीक्ष्य वैभवविध्वंसं, विपत्तौ विकलीकृतः।
विविधाभिर्विशङ्काभिः, विद्वानपि विधूयते॥ १॥ इति।

४. इत्थङ्कारं भविष्णुना विधिविप्लवेन विह्वलीकृतोऽसौ युवराज-स्तूर्णतरं पितरमुपेत्य प्रणतिपुरस्सरं प्रोवाच—पूज्यपितः! यद्यपि मन्द-मतिर्नाहं नयनिपुणो दीर्घदर्शनश्च, न च साम्राज्यस्थितिं सम्यगवैमि, तथाप्यनागत-व्यसनविभीषिका मुखरयति मां वास्तवत्वव्याख्यान इति प्रागेवानुकम्पनीयः क्षमां भिक्षमाणोऽयं बालः। जानन्त्येव श्रीचरणा यज्जैनो नः सेनानीः। जैनानां च विशेषतोऽहिंसैव परमो धर्मः। तथात्वे कथं नामाऽसौ कातरान्तःकरणः करुणाभरणः सेनाध्यक्षो वैरिवृन्दवधरूपां विहिंसां विधास्यति। स तु लोकानां ललाटेषु लग्ना लोहितलेखा

लक्षयित्वैव लघुतया प्रपलायिष्यते पृतनायाः पार्ष्णिप्रदेशं प्रति। हन्त! अशक्य-निवारा हारिः, कुशलशाली चारिः। तदाह—

कातरो नतरां जेताऽरिचक्रं वाहिनीपतिः।
मन्देन पोतवाहेन क्व तीर्णो वाहिनीपतिः॥ २॥ इति।

५. नितान्तं क्लेशाक्रान्तं तं स्वैरं सान्त्वयन् महाराजः कीर्ति-सिंहोऽचकथत्—आयुष्मन्! सत्यं सेनापतिः जैनः, परमधिकारज्यैष्ठ्येन सेनाध्यक्षपदमारूढः सर्वथासौ न स्वकर्त्तव्यपथाद् विचलिष्यति विषमाया-मप्यस्यां वेलायाम् इति द्रढीयान् मे प्रत्ययः। तथापि शौवस्तिकविपद्-विनिपातविशङ्कितं चेत्ते चेतः, त्वमपरं पदातिपुञ्जं सादिसैन्यं च समादाय स्वयं सेनापति-पुरोगमायाः पृतनायाः पृष्ठप्रदेशे व्यूहविरचनां विधाय पृतनापतेः प्रधनप्रवृत्तिं प्रतिपालय। प्रमाद्यति पृतनापतौ पलायनप्रवृत्ते चाग्रानीके पुरः प्रसर्पता त्वया सेनाग्रगेण भूत्वाऽऽक्रन्दनीयमविलम्बं वैरिबलम्। यदुक्तमभियुक्तैः—

साध्यसम्पत्तिसन्देहे, सति सूक्ष्मेक्षिकाजुषा।
विधिमेकं विधायापि, व्यवस्थान्या विधीयते॥ ३॥ इति।

६. तदुपश्रुत्य युवराजः अयमेव क्षेमङ्करः पन्थाः इत्यभिदधानः प्राप्ताशीः कृतस्वस्त्ययनो यथोक्तनिर्णयानुसारेण सैन्यसमूहेन समं समरस्थलीं सम्प्रापत्।

तस्य रणाङ्गणोपसर्पणात् प्रागेव प्रारब्धं रौद्रं युद्धम्। अनीकनायकेन दीनदयालुना प्रोत्साहितया सेनया विद्युद्वेगेनाक्रान्ता भयभ्रान्ता विवर्णवदना वैरिवरूथिनी सूदित-साहसा समजायत।

७. तत्र सम्प्राप्तेन तेन युवराजेन किमप्यनिर्वचनीयं कौतुकमालोकि यद् वाहिनीपतिः दीनदयालुः स्ववाजिनो वल्गां वदनेन बलवद् गृहीत्वा रोषरूषितो रौद्ररूपः करयोः कलिताभ्यां करवालाभ्यामुभयपार्श्वयोः विद्वेषण-बलवीथीः विध्वंसयन् विद्युद्वद् विष्वग् बम्भ्रमीति। कदा कम्पितः कृपाणः कदा च कर्तिता कृपणस्यारातेः कन्धरेति कालेनैव कालः कलयितुमशक्यत।

८. तस्मिन् दिने प्रत्यूषात् प्रारभ्य सायंसमयावधि वधकवद् दीन-दयालुनाऽतन्द्रालुना सङ्ख्ये सङ्ख्यातीता द्विषो मृत्युमुखं नीताः, भीताश्च शिष्टा द्विष्टाः प्राणपरित्राणं प्रेप्सवः प्रधनपदं परित्यज्य पश्चात् प्रधाविताः। सदर्पेणापि समर्पितो दीनवदात्मा स्वप्राणान् रिरक्षिषुणा प्रतिपक्षिणा।

तत् समस्तं स्वयं साक्षात् समीक्ष्य सुतरां सुखितो युवराजो राजधानीं प्रत्यावृत्य यथावृत्तं पितुः पुरतो न्यवेदयत् ।

९. प्रत्यर्थि-पराजय-प्रवृत्तिं परिश्रुत्य परितः प्रीताः प्रजाः । सुमस्तवैः संस्कृताः, सर्वतः सूनसारसंमिलित-सलिलसेकैः सुरभिताः, सभाजनाय सज्जिताः सेनासमागम-सरणयः । विश्वतो बधिरिमाणं वितेनुः विविधानां वंश्यादिवाद्यविशेषाणां विरावाः । विशिष्टं वेषं वसाना विद्यालयवत्सा वृन्दशो बहुविधां विजयपुरबलविजयविरुदावलीमुज्जगुः । निर्भर-नन्दा नाट्ये निष्णाता निलये निलये ननृतुः नागर-नार्यः । मुदितमानसत्वाद् मेलितमूर्तिभिः मानवैः महेऽस्मिन्नुपाह्रियन्त मिथो मोदकमुखानि मृष्टान्नानि ।

१०. रिपुञ्जयेन पुरोगेण पृतनापतिना प्रसाधिता प्राप्ता प्रत्यर्थि-पराजय-प्रसन्ना सेना । परमप्रीताभिः पुरस्कृतपृथिवीपालपुत्राभिः पथः पार्श्वयोः पङ्क्तिषु पर्यवस्थिताभिः प्रजाभिः, पृतनापतिप्रमुखाणां प्रवीराणां पुष्पप्रकर-प्रकिरणैः, परिमलितानां पयसां पटवासानां च प्रसारैः प्रवर्तितम-मन्दमभिनन्दनम् । प्रादायिषत पार्थिवेन प्रत्यर्थि-प्रमथनेभ्यः प्रत्येकं पृतना-प्रवीरेभ्यः प्रचुरप्रकाराणि पारितोषिकाणि, परमपदप्राप्तिपिशुनानि प्रमाण-पत्रप्रभृतीनि च । विशिश्रमिषुणा सेनाध्यक्षेणादिष्टा प्रशिष्टाः शिविरं शिश्रियुः शूरश्रेण्यः ।

समाप्ते सैन्यसभाजने संयाते च सभा-जने सद्यो रजन्यजनि ।

तदनु साक्षात् स्वयं सेनापतेस्तथाविधं कृपाणाभ्यां कृतमरिचक्रे कर्मालोक्य कीदृशोऽयं जैनः ? इत्यङ्कुरितकौतुको युवराजः कर्णसिंहो विकल्पव्यपनोदाय सेनापतेः सदनं समाससाद ।

सेनानीः स्वसंवासे सुखं स्थितः सङ्गतैः सुहृत्सार्थैः समनुपृष्टः समराद् विभीतानां वैरिणां विद्रवस्य, विजयपुरवीरवरेण्यानां विक्रमस्य च वार्त्तां विस्तरेण वर्णयन् बभूव ।

अत्रान्तरे युवराजः कर्णसिंहोऽपि सेनाध्यक्षमुपेत्याभिवाद्य च कृतोचित-सत्कारो व्याजहार—'तात ! एका कलुषितविवेका बलवती विशङ्का वर्तते मे मानसे । सापनेया कृपाशीलेन भवता' इति ।

सेनापतिः प्राह—'का सा वत्स ? कुतश्चाङ्कुरितासौ' ? इति ।

१२. सोऽब्रवीत्—शूरशिरोमणे ! निसर्गतो मृदुमनसां जैनानामभिजने जनुरजनि भवतः, अहिंसावादित्वाज्जैनाश्च जीवजात-ज्यानये किञ्चिदपि क्रौर्यं कर्त्तुं न क्षमाः । परं जैनेन भवतापि भवता प्रहरणपाणिना प्रधने प्रतिपक्षप्राणप्रणाश-प्रतिपादनेन तादृशं भृशं भयावहं प्रलयप्रतिकाशं दृश्यमुपस्थापितम् यादृशं नृशंसेन शौनिकेनापि दुश्शकं दर्शयितुम् । एवं च मत्या हत्यापरायणः प्राणिदुःखदादी कथमहिंसावादी श्रीमान् ? कुतश्च पुंसां प्राणहरको न नरकोपयायी भवान् ? स-मायः स एष सम्प्रदायः, परमार्थमुषः सर्वथा श्रीजुषः । यदुक्तम्—

१३. वधकैर्बर्करादीनां वधो यद्वद् विधीयते ।
निर्घृणैः सैनिकैस्तद्वन् नराणां मारणं रणे ॥४॥

किञ्च—प्राज्ञैः प्रतिनिधिः प्रोक्तः पुरुषः परमप्रभोः ।
पीडनं तेन पुंसः स्यात् परमेशस्य पीडनम् ॥५॥ इति ।

तदाकर्ण्य सौम्य-सुकुमारमतिः सेनापतिः मुक्तमानः स्मयमानः प्रोवाच—प्रिय बाल ! नैतत्तथा यथा भवानाह । सर्वथा जैनोऽहम् सत्यश्च मे सम्प्रदायः । स्वेन सम्प्रदायेन सम्बद्धो धर्मः अन्यः, स्वाधिकारेण सम्बद्धश्च धर्मः अन्यः । तत्र प्रथमस्य धर्मस्य स्वीयेनैव जीवनेन सम्बन्धः द्वितीयस्य च निःशेषेण देशेनेति प्रथमो गौणः द्वितीयश्च मुख्यः । स्वधर्मरक्षार्थमेव सैनिको वेतनरूपेण धनमधिगच्छति राजकीयकोशात् । अत एवासौ राज्यरक्षार्थं प्रहसन् प्राणानपि परित्यजति, न च प्रधने पराङ्मुखतां प्रयाति । मयाप्यद्यावधि राजकोशाद् यद् वेतनवित्तं वित्तम् तन्निष्क्रयस्याद्यैव दैववशात् समयो मयोपलब्धः । सैनिकस्य यत् कर्त्तव्यम् यश्च तस्य प्रधने प्रधानो धुरीयो धर्मः, तस्यैवाद्य पालनं मया व्यधायि । न कोऽपि मे परिपन्थी । तत् कुतो नु हिंसायाः पापस्य प्राप्तेर्वा पर्यनुयोगः ? यदि हि कातर इव नाहमयोत्स्ये तदा प्रयोजनमन्तरैव भूयसीं भृतिं भुञ्जानः कर्त्तव्यपथात् परिभ्रष्टः, प्रतारक इव परपिण्डाद इव च प्रगाढं पातकपात्रमभविष्यम् । नास्ति पापाजीवनात् परतरा कापि हिंसा ।

१४. अपि चाहिंसाव्रतशीलो भवन्नहं यदि विग्रहविमुखोऽभविष्यम् तदा परिपन्थिना नः प्रजानां प्रध्वंसनात् प्रादुर्भूतः प्रथीयान् पापपर्वतः परम्परया मय्येवापतिष्यत्, ममैव हि स्वाधिकार-धर्मनिर्वहणस्य तद्धिसामूलत्वात् । अतो न्याय्यकर्मनिर्वहणे न कापि हिंसा । सत्यं स्वरूपं तु हिंसाया अन्यदेव । तथा हि—

तत्र व्यवस्थापितधर्मसारैः स्मृतिशास्त्रकारैः मनसा वाचा कर्मणा वा परप्राणिनः पीडनं हिंसेत्याख्यायते, तदभावश्चाहिंसा। तेन प्राणधारिणो मारणमेव न परन्तु दुरालापो द्वेषबुद्धिश्चापि न हिंसाया व्यतिरिच्यते। एवं मनोवाक्कायकर्मभिः प्राणिनोऽल्पपीडनेऽल्पा, अधिकपीडने चाधिका हिंसा। पीडनतरतमत एव हिंसायास्तज्जन्यस्य पापस्य च तारतम्यम्।

१५. सैषा हिंसा कदाचिन्मनोविनोदाय लोकैः विधीयते लक्ष्यसिद्धये मृगयादिरूपा, कुक्कुट-वर्तिर-भेडयुद्धादिरूपा च। मनोमोदायैवासज्जन्ते जनाः कन्दुकक्रीडाबाहुयुद्धादिरूपासु खेलासु। परं पर्यन्ते पराजयपीडितं प्रतिपक्षिणं प्रेक्ष्य परं प्रसीदन्ति प्राप्तजयाः पुमांसः। सेयमपि सूक्ष्मेक्षिकया परीक्ष्यमाणा हिंसैव। अद्यत्वे त्वेतादृशी हिंसा 'असभ्यता' इति मन्यते। अत एव खेलावसाने खेलकाः परस्परं पाणिपरिमर्शं विदधति। तदिदं 'ईदृशी हिंसा मानवाय न रोचते' इति तथ्यमभिव्यनक्ति। विरला एव तादृशाः पुरुषा ये प्रतिद्वन्द्विनं पराजित्य पीड्यमानं च तं प्रेक्ष्य न प्रयान्ति प्रमोदम्। तस्मात् सभ्यत्वमभीप्सुभिः सर्वथा हेया सेयमपि हिंसा।

१६. कर्हिचिदनिच्छतापि अनवधानवशाद् या हिंसा सञ्जायते सापि हिंसाकोटिमाटीकते। प्रमादेऽपि हिंसा प्रच्छन्ना जायत इति वास्तवं विवेचनं व्यनक्ति। सा चैषा हिंसा वस्तुविशेष-राशीकरणेऽक्षिलक्षीक्रियते। मनुष्य आत्मनो मानवान्तरेभ्योऽर्हत्तमत्वसाधनाय वा सुखसम्प्राप्तिरूपस्वार्थहिताय वा तान्यपि विविधानि वस्तूनि पिण्डीकरोति यानीतरैरधिकतरमपेक्षितानि जायन्ते। वणिजान्नेन भरिता भाण्डाराः क्षुधितानामधनानां श्रूयन्ते हाहाकाराः। एतेनेदं सिद्धम् यदुचितेन प्रकारेण सत्यानुसारेणापि च सङ्गृहीतान्यपि वस्तूनि विना हिंसां न कोऽपि रक्षितुं क्षमते। एतद्दोषदृश्वान एवोदाराः शास्त्रकाराः अपरिग्रहव्रतस्योपयोगित्वमुद्घोषयन्ति। तस्मादहिंसामार्गानुयायिनाऽमायिना स्वपार्श्वे रक्षणीयानामपेक्षितानां वस्तूनां कापि सीमा निर्धारणीया। इष्टा चेदात्मोन्नतिः सा सीमा अनुक्रमं स्वैरं स्वैरं ह्रसिमानमानेया। एतेन न केवलं व्यक्तिविशेषस्य परन्तु समस्तस्य समाजस्य सुस्थितिः सम्पद्यते। अत एवापरिग्रहस्य परां काष्ठां प्राप्तेन तीर्थङ्करेण भगवता महावीरेण वसननिवसनमपि विसर्जितम्। परिग्रहपरिमाणस्य अपरिग्रहस्य च सूक्ष्मतमं रहस्यं विजानद्भिर्महर्षिभिस्तु—'परमोच्चावस्थां प्राप्तेन योगिना तु मस्तिष्के बहुलानां वैदुष्यविचाराणामपि सङ्ग्रहणं सर्वथा समुत्स्रष्टव्यम्' इति निरणायि।

यतो हि पाण्डित्यप्रदर्शनेऽपि सूक्ष्मरूपेण परपीडनभावना निगूहिता तिष्ठति।

१७. सामान्यो मानवस्तावद् 'वस्तुविशेषसङ्ग्रहणस्य हिंसया कः सम्बन्धः' इति न जानीते। पटपरिधानपरित्यागिनां विरागिणां दिगम्बराणां मुनीनां जीवनं त्वपरिग्रहस्याहिंसया साक्षात् सम्बन्धं व्यावहारिकरूपेण प्रत्याययति। परमार्थतो हिंसा अहिंसा च मनसि वर्तेते। यो मनसा हिंसां परित्यजति स एव वास्तवोऽहिंसकः। शल्यचिकित्सया पीडयन्नप्यातुरं पुरुषं पशुं पक्षिणं वा वैद्यो न दोषभाग् भवति। मनसि हिंसाभावनाऽभावाद् न हि सा हिंसा। परं तदेव कर्म परोत्पीडनभावनया केनाप्यन्येन, द्वेष-विशेषादि-विवशेन वैद्येनैव वा विधीयते चेत् परिगण्यते प्रत्यक्षा हिंसा। तस्मात्तथा यतनीयं यथा मनसि हिंसाभावना सर्वथाङ्कुरितैव मा भूत्। एष निष्कृष्टोऽर्थो यदजानानैरस्माभिः काचिद् हिंसा स्यादपि चेत्, परं मनसि हिंसाया भावना न जायेत, न सा हिंसा। यदि सर्वेऽपि जनाः कृतसङ्कल्पा मनसो हिंसाभावनापरित्यागिनो जायेरन् तदा समेषां सजीवानां समृद्धिसिद्धिसम्पन्नत्वात् सुखसौभाग्यस्वरूपं स्वस्ति स्यात् सर्वसामयिकं समन्तात् संसारे। अत एवाख्यातम्—

साम्राज्यं चेदहिंसायाः, स्याद् दुःखदुर्दशा-लयः।
जायेत चैष संसारस्त्वरया त्रिदशालयः॥ ६॥ इति।

१८. अपि चाहिंसा तावदलौकिकी विश्ववशीकारविद्या। यो मनोवाक्काय-कर्मभिरहिंसाव्रतमनुपालयति स परमो योगी। न तेन कोऽपि वैरायते परो वाऽपरो वा प्राणवान्। तत्सान्निध्यमुपेतास्तु पशुपक्षि-प्रभृतयोऽपि परस्परप्रतिपक्षतां परित्यजन्ति, का कथा विवेकजुषां मानुषाणामित्यनुवर्त्तनीयाऽहिंसाव्रतवर्त्तनिरिहत्यमामुष्मिकं च श्वःश्रेयसमाशंसमानैः। तदुक्तमहिंसाया गरिमाणं गायता—

१९. समृद्धाः सन्ति संसारे, सभ्यता याः समन्ततः।
मूलस्तम्भायते ऽहिंसा, तासामन्तर्निगूहिता॥ ७॥

अपि च—

धर्मस्य या मता मूर्त्तिः सत्यास्तेयादिरूपिणी।
मेरुदण्डायते ऽहिंसा, तत्र बीजोपमा ध्रुवा॥ ८॥

किञ्च—

गरिमा गीयते यावान्, प्राणदानस्य धार्मिकैः ।
तावानेव ह्यहिंसायाः, शिष्टैः संस्कृतिमार्मिकैः ॥ ९ ॥ इति ।

तस्माद् भ्रान्तिमूलं वैह्वल्यं भवतश्चिरञ्जीव ! नाहं जैन इति । न खलु जैनेन सर्वास्वप्यवस्थासु क्रूरेण क्रियमाणो मर्षणीयोऽत्याचारः । संस्थापित-सुकृतासुकृतमर्यादैः पूज्यपादैः पराशर-प्रमुखैर्महर्षिभिस्तु प्राण्यन्तर-परिरक्षणायाततायिवध-विधानमप्यनुमन्यत इति समदसमाराधने समस्तं समञ्जसं सम्पन्नम् । यथोक्तां हिंसां निन्दद्भिर्नयनिपुणैः निर्मलं निःश्रेयसं न्यगादि—

२०. **पुष्टा यत्रापि हिंसैषा, दुष्टा स्यात्तत्र सभ्यता ।**
रुदितं महितानां च, मुदितं चाहितात्मनाम् ॥ १० ॥

किञ्च—

नेदयद् दुर्गतिं, द्रोहं मेदयज्जनमानसे ।
हिंसा-राज्यं ध्रुवं नैव सुचिरं रुचिरं भवेत् ॥ ११ ॥ इति ।

चिरजीविन् ! न जातु जानीते विनीतोऽपि भवान् किं हिंसाहिंसाकर्म, किञ्च जैनधर्मस्य मर्मेति भूयः शीलनीयानि शास्त्राणि इति ।

२१. पुनः प्रहसन् पृतनापतिः विनोदवचनं व्याजहार—युवराज ! युद्धे निस्त्रिंशेन निहता अहिताः, निस्त्रिंशो मय्यधीनः, अहं च राजाधीनः । किञ्च जयपराजययोः फलमपि राजैव भुङ्क्त इति हिंसाया वा पापस्य वा परिणाममपि स एव परिजानातु । स्वधर्मनिर्वाहकेण, हेतिहस्तेन मया तु पार्थिवप्रतिनिधिना भूत्वा नेत्रे निमील्य प्रहताः प्रतिरोधिन इति परमपूज्यं पृथिवीपालमेव परमार्थं पृच्छेतिशम् ।

सत्यं वद (२)

१. पुरा प्रोद्यत-परशु-प्रासासिभिः सुनेत्रवासिभिः कृतो राजाभिद्रोहः। पट्टाधिकारिणा प्रापितः पृथिवीपालः प्रहरण-पाणिभिः प्रभूतैः प्रहरिभिः परिपालितं प्रच्छन्नं निरापदं पदम्। प्रचुर-प्रकोप-परवशैः प्रजापुरुषैः प्रदीपितेन पावकेन भस्मीभूतानि भूयांसि भूप-भवनानि। पाटित-पटाः पातिताः पृथिव्यां परितोऽपि पृथ्वीपतेः प्रभुत्व-पताकाः। प्रत्यपकारं प्रकटयतां पदे पदे पुञ्जितानां पुंसां प्रस्तर-प्रघातैः प्रायः परिमृदिताः पार्थिव-प्रासादस्य प्रवेश-प्रतिहार-प्रग्रीव-पक्षकाः। प्रबलैः प्रकोपिभिः परित्रासिताः प्राण-परिरक्षणाय पलायिताः पुरात् प्राज्याः प्रजापस्य पूरुषाः। लुण्टिता लोलुपैः लोकैः निर्भरं नैके नरनाथ-निधयः। प्रचण्डैः पाणिपाद-पाषाण-प्रहरण-प्रहारैः पञ्चतां प्रापिताः प्रमुखाः पार्थपक्षपातिनः पौराः। कर्ण-कुहर-कदर्थनां करोति स्म कर्कश-कण्ठानां कोपिनां करालेन कोलाहलेन करम्बितं कातर्य-क्लेशितानां कुलीनानां कटुकं करुणाक्रन्दनम्।

२. सहसा समुपायातेन सादि-सैनिक-सङ्घातेन समन्ततः संयमिताः समस्ताः साम्राज्य-संविधान-समधिरोहिणो राजद्रोहिणः। प्रशासन-परिवर्तनाय प्रारब्धस्य प्रकोपस्य पूर्णतयाऽसफलत्वाद् दारुणो दण्डोऽदीयत द्रोहिभ्यः। प्रत्यहं परितः प्रगृह्य पङ्क्तिषु प्रतिष्ठापिताः प्रचुराः पुरुषाः प्राहण्यन्त प्रजाप-प्रचोदितेन परुष-प्रकृतिना परशुपाणिना पृतनापतिना।

३. एकदा समरसिंहाभिधः पञ्चदशवर्षदेशीयः प्रकृत्या सुकुमारः कोऽपि कुमारः प्रमापणाय प्रापितानां पौराणां पङ्क्तौ प्रतिष्ठापितः। अथ पुनः पुनः परीक्षित-पातकिततिः पृतनापतिः तत्र मञ्जु-मुग्धमुखं उदेष्यद्-यौवनकालं बालं विलोक्य विलुप्तरोषः सुतरां सानुक्रोशः समजायत। उक्तं च—

४. स्वभावतो मुग्धतयाऽनरालं, बालं विलोक्यात्र न को मनस्वी।
आत्मेतिकर्त्तव्यवशात् कठोरो, घोरोऽपि सन् कारुणिकत्वमेति ॥१॥ इति।

पुनरसौ स्नेह-संसृष्टया दृष्टया विलोकयन् व्याजहार'—वत्स! क्षमां याचसे चेत् प्रचण्डान्मृत्युदण्डात् प्रियान् प्राणान् परित्रातुं प्रभवसि'

इति। परं कुमारः कदाचनापि क्षमायाचनां नान्वमन्यत। तदा तदवस्थमपि प्रसन्नाकारं धैर्याधारं गाम्भीर्यागारं कुमारं वारं वारं वीक्षमाणः सविस्मयः सेनास्वामी समुदाजहार—'बाल! दिवसावसानपर्यन्तं तेऽवकाशः प्रदीयते। कामतः परिजनैः प्रणयिभिः सखिभिश्च सम्मिल्य समुपस्थानीयम्' इति।

५. 'तदुपलभ्य सुनिश्चितं संस्थिते समये समुपस्थास्यामीति समनुष्ठित-समयः स समरसिंहो बालः केवलायाः मातुः मेलनाय प्रायासीत्। गत्वाऽसौ गेहेऽजस्रास्रासारैः मलीमसमुखीं मूर्छितां मातरमालुलोके। यतो हि—

न दुश्चिकित्सो दयितस्य भेदो, खेदो न वस्त्वन्तरहानिजश्च।
परं जनन्याः सुतविप्रयोगो, रोगो गरीयान् शमितुं न शक्यः ॥२॥ इति।

अथासौ शीतल-सलिल-सीकर-सेकैः व्यजन-चामर-समीरैश्च तां प्रत्यागत-चेतनां विधाय विनय-विप्लुतां वाचं व्याजहार—'मातः! अहमायातः' इति।

६. तदनन्तरमात्मनः वार्धकावलम्बस्य केवलस्य तनूजस्य मुग्धिमसदनं वदनं विलोक्य, 'दिष्ट्याऽपरिक्षत-प्राणस्य सूनोः नूनं क्षान्तोऽस्यापराधः स्यादि'ति च विचार्य, परां प्रीतिं प्रापत् प्रसविनी। अश्रुकुण्ठकण्ठी सा पूर्वं पुटीकृताभ्यां पाणिभ्यां परमात्मानं पुनः पुनः प्रणत्य, पश्चात् पुत्रस्य मूर्ध्नि आघ्राय, तमूरुदेशे समुपवेश्य च चलित-चेतना चुलुम्पन्ती चिरं चुचुम्ब। पुनश्चास्वान्त-सन्तोषात् करकङ्कतिकया तत्कुन्तलपालीं प्रसाधयन्ती, विलोचन-वारि-बिन्दुभिश्च समाप्लावयन्ती, परमं प्रेमाणं प्रादुश्चकार। सीमितस्य सम्मेलनसमयस्य समाप्तेः सामीप्यं समीक्ष्य सेनाध्यक्ष-समक्षे समनुप्राप्तेः संविहितं समयं च संस्मरन् सत्यसन्धः समरसिंहः सन्निवर्तनाय सद्यः सज्जः समजायत। अथ वास्तवीं विकटां विपदमविजानाना जननी जगाद—'पुत्र! कुत्र जिगमिषसि?' इति। निशम्येदं निरन्तरं निःस्रुतनयननीरो वीरो बालः सुतरां स्वान्तं संस्तभ्य प्रसविनीं प्रत्यवोचत्—'अम्ब! प्रद्योतनास्तमन-पर्यवसानो मेऽवकाशः प्रादायि। सम्प्रति प्राणदण्डप्राप्तये पृतनापतेः पार्श्वे प्रयामि। परमेश्वरस्ते प्रतिपालकः' इति।

७. एवं पौनःपुन्येन प्राञ्जलि-प्रणाम-पुष्प-पुरस्कारैः पूजितायाः प्रसविन्याः प्रतीकारस्य प्रतिवचनस्य च प्रतीक्षां परिहरन्नसौ निभृतं निकेतनान्निर्गत्य संस्थापिते समये सेनापतेः समीपं सविनयं समुपेतः।

'असौ बालः समरसिंहः सर्वथा न सन्निवर्तिष्यते' इत्यभूत् पृतनापतेः प्रबलः प्रत्ययः। यतो हि—

उत्कोचदानैश्च मृषाभिधानैः, प्रतारणैश्चेतरकारणैश्च।
अपुण्य-नैपुण्यमुपेत्य भूयः, प्राणान् पुमांसः परिपालयन्ति ॥ ३ ॥

किं च—

अयत्नतो बान्धवबन्धनानि, शक्यानि हातुं च धराधनानि।
परन्तु को मृत्युमुखं मनुष्यो, विशेद् विजानन् वद वास्तवत्वम् ॥४॥ इति।

परमेवम्प्रकारेण व्यवहारेण तस्य तादृशेन सत्येन च सेनानीः तथा तीव्रं प्रेरितः परितुष्टश्च प्रजातो यथा तेन तदानीमेवासौ प्रकृष्टात् पातकात् परिमोचितः। तदनन्तरं भूयो धन्यवादान् वितीर्य, प्रणति-पुरस्सरं प्रयियासुं तं बालं प्रति ससौजन्यसेकं प्रणयातिरेकं प्रादुष्कुर्वन् पृतनापतिः प्रोवाद—'पुत्र! किङ्कृते क्रियते कृतज्ञता-ज्ञापनम्? किमहं पशुना पञ्चास्येनापि समानो नास्मि येन प्रमुखे प्राप्तापि पृषत-पत्नी-परित्यक्ता?' इति।

९. बालोऽवादीत्—'कथमेतत्?' इति।

योधमुख्य आचख्यौ—'श्रूयताम्। अस्ति उदीच्येषु जनपदेषु शाकलकोटाभिधानं पुरातनं पत्तनम्। तत्सकाशे काशकुशादिपिनद्धे विपिने कदाचित् शाद्वलमाश्रित्य मृदुलानि दूर्वादलानि चरन्ती रोचनलोचना काचन काञ्चनाङ्गी नाम कुरङ्गी यूथात् परिभ्रष्टा समभूत्। तीव्रं तपदिने मध्यन्दिने सा तृषातुरा तपस्विनी प्रसन्नप्रकृतिः पानीयपानाय पार्वतेय-पादप-परम्पराभिः परिवृतां पुष्करिणीं प्रति प्रातिष्ठत। पुष्करिण्याः पूर्वप्रतीरपरिसरं प्राप्तैव पृषत्पत्नी पन्थानं प्रतिरुध्य प्रतिष्ठितं करमालि-किरण-कनक-केसर-कलापं, जाङ्गल-जीवजात-जक्षणाय जृम्भिणं, ज्वलज्जिह्मजम्भजिह्वं, गुरुगर्जितैः कम्पितकाननं पञ्चाननं प्रैक्षिष्ट। कालमिव करालं केसरिणं निर्वर्ण्यैव निश्चलचरणा मरणशरणा हरिणी काञ्चनाङ्गी उत्पातवाताघातान्दोलितेव लता विपुलवेपनवपुष्मती प्रति-क्षणमीक्षणाभ्यां क्षरदस्रासारा निश्चलताराऽनिष्टनष्टचेष्टेवाजायत। यतो हि—

पञ्चतां पुरतः प्रेक्ष्य, पशुः पक्षी पुमानपि।
प्रपद्यते परां पीडां, पुत्रादि-प्रेम-पाशितः ॥ ५ ॥ इति।

अथ क्षुत्क्षामः सृक्करणीं परिलेलिहन् पशुपतिः पृषत्पत्न्याः पुरस्तादुपेत्य प्रोवाच—'कुरङ्गिके ! कुतः क्रन्दसि ? किमात्मानं सदास्थायिनं समभिजानासि ? मुदितं वा रुदितं वा सवेदनं विनिवेदनं वा तव गतार्थम्। सर्वथाऽपरित्राणास्ते प्राणाः। सम्प्रत्येव निहत्य त्वां बुभुक्षां प्रतिकरिष्यामि।' इति।

तदाकर्ण्य कम्प्र-कण्ठ-कुहरा क्रोशन्ती कुरङ्गी कथमप्यकथयत्—'काननाथ ! नाहं निधनदराद् रोदिमि। यस्य जनिमा तस्य हि मरिमाऽपरिहार्यः। परं कृतज्ञाहं प्रणतिपूर्वकं क्रियासमभिहारेण धन्यवादांस्ते विदधामि यत् प्रभविष्णुना त्वया सम्भाषणकृपा कृपणायां मयि प्रादुष्कृता' इति। यदुक्तम्—

पाणिपाद-परामर्शं, प्राज्यं प्रेम-प्रकाशनम्।
मन्यते महतो मन्दो, दयां दत्तं च दर्शनम्॥ ६॥
संलापसमयं प्राप्य, प्रकृष्टैः प्रभविष्णुभिः।
दुर्बला दलिता दीनाः, कलयन्ति कृतार्थताम्॥ ७॥ इति।

११. चिन्ताचक्रमारूढाऽर्धमूढा पृषती पुनः प्रावादीत्—'पशुपते ! न क्लेशलेशमपि मनसि मन्यसे चेदेकामपरां मे प्रार्थनामुरीकर्त्तुं रोषरहितोऽनुक्रोशसहितो भव' इति।

सिंहः समुदैरयत्—'अरेरे ! रुरुरमणि ! त्वर्यतां तावत्। कथय किं कामयसे। क्षुत्क्षामोऽहं क्षणमपि क्षेपं क्षन्तुमक्षमः' इति।

पृषत-प्रेयसी प्रोवाच—'पशुपते ! प्रसूतो मे प्रथमः पृथुकः। मुग्धोऽसौ तृणान्यपि जग्धुं न जानीते। तमेव स्नेहिनं देहिनं अदिमानं मन्थरधावकं शावकं सन्ततं विचिन्तयन्ती नितान्तं व्याकुलतां वहामि। कृपयाऽल्पकालाय देयो मेऽवकाशः येनाहमात्मपोतमन्तिमं पयोधरपानं कारयेयम्, लीलालासन-लम्पटं लोललोचनं लालनीयं तमात्मपोतं लोलया लिहीय, समर्पयेयं च तं सहदुःखसुखाभ्यः स्निग्धाभ्यः स्वसखीभ्यः। इदं सपदि संविधाय भवत्सविधे सुनिश्चितं समायास्यामि' इति।

मृगेन्द्रेणागादि— 'प्रियकप्रिये ! पुष्कलं पटिमानं प्रकटयसीति प्रतिभाति। परं परिजानीहि यन्मां प्रतारयितुं नतरां प्रभविष्यसि। यद्वा तद्वाऽस्तु, पाणिज-पञ्चकस्य पार्श्वे प्राप्तं प्राणिनं सर्वथा नाहं त्यक्ष्यामि' इति।

१२. काञ्चनाङ्ग्या कथितम्—'विपिन-विनायक ! विश्वसितु भवान् । सत्यं साक्षीकृत्य कथयामि यत् प्रेयांसं पृथुकं पयः पाययित्वाऽकाल-क्षेपेण प्रत्यासत्स्यामि' इति ।

शपथ-शतानि श्रुतानि केशरिणा कुरङ्गकान्तायाः। स किञ्चित् करुणाक्रान्ते स्वान्तेऽचिन्तयद् यद् एकदिवसावसान उपवासोऽपि स्याच्चेत् किं मेऽपचीयेत । अद्य पृषत्प्रेयस्याः प्रतिश्रव-परमार्थः परीक्षणीयः। मन्ये धन्येयं न बहुल-वेला-व्यतिक्रमं विधास्यति' इति । तदाहुः—

सम्पर्किणां स्नेहसुखं समृद्धेः, सार्वत्रिकं स्वस्ति च सन्त्यजन्तः ।
प्राणप्रहाणेऽपि परं प्रसन्नाः, पुण्याः प्रतिज्ञां परिपालयन्ति ॥८॥ इति ।

अथासौ वनराजो वातायु-वनितायाा वचनमभिमन्यमानोऽवादीत्—'अस्तु, कुरङ्गाङ्गने ! याहि यथाकामम्, परं परैः प्रतारकैः पापपुरुषैः प्रेरितयापि त्वया प्रत्ययभङ्गो नतमां विधेयः। वेलाविलम्बं विवर्जयन्त्या विनिवर्तनीयम्' इति ।

१३. ततो मृगेन्द्रानुमता तथ्याग्रहग्रहिला सा काञ्चनाङ्गी व्रतती-व्रात-भुण्ट-कण्टकास्तृतं स्वावासमाससाद । प्रियतरं पोतमुपेतायास्तस्या नैराश्य-शोक-शङ्का-लक्षणाभ्यां सुतस्नेह-सन्ताप-चक्षणाभ्यामीक्षणाभ्यां सुतराम-स्रासारः सुस्राव। सा सपदि शावकदेहावलेहं प्रारभत । तदुपलक्ष्य प्रणय-पीडा-परवशः पेशल-प्रकृतिः पोतकः प्रसविनीं क्रन्दन-कारणमप्राक्षीत् । यदा प्रसविन्येदं प्रत्यवादि यत् सा पञ्चास्य-पार्श्वे प्रत्यावर्तन-प्रतिज्ञां प्रवर्त्य प्राप्ता, तदा पृथुकः प्रोवाच—'मातः! अहमपि त्वया सहैव यास्यामि' इति । उक्तं च—

प्रयान्तीं प्रमुखे प्रेतपतेः प्रेक्ष्य प्रजायिनीम् ।
प्लावितः पुष्कल-प्रेम्णा पृथुकः परितप्यते ॥ ९ ॥ इति ।

१४. अत्रान्तरे तस्या वातायु-वनिताया वेदना-बहुलां वार्तां विनिशम्य व्याकुला व्यवहारविदग्धा अपराः पृषत्प्रियाः पञ्चास्य-पार्श्वे प्रयाणात् तां प्रतिषेद्धुं पुनः-पुनः पुष्कलं प्रायतन्त । तास्तां तीव्रतम-तर्काधारैः प्रबल-प्रमाण-पुरस्कारैः परमार्थपथात् प्रच्यावयितुं प्रैरयन् । किन्तु काञ्चनाङ्गी कुरङ्गकान्ता नितान्तशान्ता क्लेशलेशमप्यनाविष्कुर्वाणा पशुपति-तर्पणाय प्राणपणार्पणाय स्थास्नुसङ्कल्पा तूष्णीं तस्थौ। सत्त्व-संस्कार-सौभाग्य-सम्पन्ना सा पाप-प्रधावनं प्राणिनां पावनं परमार्थपक्षं

प्रमुखलक्षं मेने। अत एवोक्तम्—

पातयन् पर्वताग्राणि पादपालीश्च पाटयन्।
परितः प्रणदत्पूरं प्लावयन् पयसां पतिम्॥ १०॥
प्रभञ्जनः परिप्रेप्सुः प्रलयं प्रवहेत्, परम्।
परमार्थपथात् पुण्यः प्रच्युतो न प्रजायते॥ ११॥ इति।

ततस्तया कृपणः स्वपोतः पराभ्यः प्रणयपेशलाभ्यः पृषत्प्रेयसीभ्यः प्रतिपादितः। परं यदाऽसकौ सिंहसमीपं समुपेता तदा पोतोऽप्युत्पुच्छं द्रवन्नुच्चैःकारं चीत्कारं च परितः प्रसारयन् दारयंश्च दृषदामपि हृदयानि मातृ-मृगेन्द्रयोर्मध्ये समस्थात्। एतदालोक्य काञ्चनाङ्गी केसरिणमचकथत्—'पशुपते! प्रत्यावृत्ताहम्। कृपणेऽस्मिन् मे कुणके करुणा करणीया कारुणिकेन त्वया। सम्प्रति यथाकामं मां प्राश्य प्रशमय पक्वाशय-प्रदीप्तमशनाया-कृशानुम्' इति।

१६. तच्छ्रुत्वा पञ्चास्यः प्रियकप्रियायास्तस्याः सत्यनिष्ठया परमं प्रसादं प्रपन्नः प्रोवाच—'अयि मङ्गलमयि! हरिणरमणि! यः सर्वात्मना सत्य-स्तम्भं समवलम्ब्य स्थितः, तस्य कुतोऽपि लोके शोकशल्यमकौशल्यं वा नैव सम्भवति। सत्यविवर्जितेनासत्यतर्जितेन वा किमनेन नो व्यर्थजीवितव्यसनेन। साम्प्रतं स्वैरं स्वान्त-स्नेह-सर्वस्वेन स्वेन सुतेन सत्रा ससुखं समीहितं स्थानं समुपयाहि' इति। उक्तमपि—

द्रवन्ति दृषदो ऽपि द्राक् तीव्र-तत्त्वार्थतेजसा।
सौम्य-संस्कार-साधूनां का कथा चेतनावताम्॥ १२॥

किञ्च—

सत्यं मनोमलिनिमानमपाकरोति,
पारत्रिकीं हरति भीतिमथो इहत्याम्।
सद्वृत्त-सार-सुभगं सुखदं च सत्यं,
सम्प्रत्ययं हि तनुते सततं समाजे॥ १३॥ इति।

तस्मिन्नेवान्तरे समस्त-संसार-सदसन्नित्य-कृत्यनियन्ता भगवान् धर्मदेवः साक्षादाविर्भूयाऽभाणीत्—'काञ्चनाङ्गि! स्वपोतेन सह स्वर्लोकाधिकारिणी संवृत्तासि सम्प्रति सत्य-सम्भरणात्। सोऽयं सिंहोऽपि संसर्गात्तव वृजिनविवर्जितो जितोत्तमलोको जातः' इति। अत एवोदीर्यते—

सम्बन्धात् सत्यसन्धस्य पापीयानपि पूयते।
लोहोऽपि लगुडे लग्नस्तोये तरति तूलवत्॥ १४॥ इति।

१७. तदनु प्रणय-पुष्कलता-प्रदर्शन-पूर्वकं पृतनापतिः पुनः प्राभाषत—'वत्स ! न खलु तत्सत्यं साधीयः स्वस्तये च सम्पद्यते येन जीवजातस्य जातु ज्यानिर्जायते । अत एवेन्द्रियबोधन-रोधनोऽक्रोधनोऽपि तपोधनो विकट-विपिनवासी द्विजन्मा देवदत्तो निर्वृति-निरस्ते, नानानिकार-निलये निरये निपपात' इति । बालोऽवादीत्—'कथमेतत्' ? इति ।

१८. स आह—'व्यतीतानि बहूनि वर्षाणि यदा पञ्चाम्बुप्रदेशे स्वर्णभद्रा-शतद्रुसरित्— सङ्गम-स्थली-सकाशे, सकाशेषीका-खदिर-वदरे, केसरि-कोल-काकोदरादि-क्रूरजीव-दरे, असुलभाहारे निरन्तरे कान्तारे कोऽपि सङ्घालय-निवासी, तेजसा समुद्भासी, देवदत्तो द्विजातिस्तीव्रं तपोऽतप्यत । तस्य सन्निधावेव शिवशर्म-शशिशेखराभिधेयौ, पूजापाठ-प्रभृति-प्रवणौ, मिथः श्रुति-शास्त्रकथापावितश्रवणौ, लङ्घन-शोषितशरीरौ, कृतकुशकाण्ड-कुटीरौ, संयत-मानसौ वैखानसौ चापि न्यवसताम् । समेऽपीमे सत्त्व-साद्गुण्य-सम्भूषिताः सरित्-सङ्गम-सलिले सदा-स्नायिनः सन्ध्या-स्तवन-सन्तर्पणादि समाचरन्तः सुखमयं समयं समयापयन् । वेदविहितेन विधिना सततं सुकृतानि सञ्चिन्वानाः स्वप्नेऽपि ते परपुरुष-पशु-पक्षि-प्रभृति-प्राणिनां पीडन-पराङ्मुखतां प्रादुश्चक्रुः । क्रमेण तेषां त्रयाणां तापसानां प्रलम्भ-परिवर्जित-प्रवृत्ति-प्रभवा प्रख्यातिः परितः प्रदेशं पुरेषु पल्लीषु च प्रससार ।
तदुक्तम्—

तर्जन्तस्त्रिविधं तापमनुक्रोशस्पृशा दृशा ।
स्तोतव्याः स्युः समस्तानां धार्मिकाः सत्यमार्गिकाः ।। १५ ।। इति ।

१९. एकदा केऽपि कुकर्मशूराः क्रूरास्तस्कराः कांश्चिद् धार्मिकान् धृतधनान् धन्यानध्वन्याननुसरन्तो देवदत्ताश्रममुपागमन् । प्राप्यैव प्राकारस्य पार्श्वे परस्वापहारिणः पर्णशालायाः प्राच्यां पूजार्थं पुष्पप्रचयाय प्रतिष्ठासुं पप्रच्छुः शिवशर्माणम्—'महात्मन् ! कस्यां दिशि गता विपुलपोटलिकाः पीना अध्वनीनाः ?' इति ।

तदाकर्ण्य निर्वर्ण्य चायुधधारान् मार्गस्थमारान् घोराकारांश्चोरानसौ दीर्घदर्शी मुग्धिम-मण्डितं म्रदिम-मधुरिम-मन्दिम-मिश्रं वचो व्याजहार—'अये सन्तः ! पुरातनोऽयं पन्थाः । प्रभूताः पथिकाः प्रयाताः प्रयान्ति प्रयियासन्ति प्रयास्यन्ति च । सामान्येन समन्ततः संसारे सर्वे स्वैरिणः सारणिकाः सन्ति । को जानीते जगति को जनः कुत्र जिगमिषति । गमागमौ प्रयायिनो मायिनो हरेर्हस्ते वर्तेते' इति ।

२०. तस्य तादृशं भृशमप्रकाशं प्रहेलिका-सङ्काशं प्रसारित-तत्त्व-ज्ञानपाशं वचनं निशम्य 'विचलित-बुद्धिरयं स्यात्' इति मत्त्वा मृषा सन्देह-दोलाधिरूढा मूढा मलिम्लुचाः परतः प्राप्तमाप्तमिव मन्वानाः शशिशेखरं पर्यप्राक्षुः— 'माननीय महामुने ! कां ककुभं याता महार्घ-व्यञ्जना महाजनाः ?' इति ।

सोऽपि नीचानां रजनीचराणां समायमभिप्रायं जानानो जगाद—'अरे जिज्ञासासक्ता भक्ताः ! ये अक्षिणी वीक्षणे क्षमेते ते वदितुं न विजानीतः, या च जिह्वा वचन-व्यापारे बलवती सालोकनकर्मण्यनलङ्कर्मीणा । तत् किं कुर्यां कृपणोऽहम्' इति ।

२१. अथ तस्यापि तापसस्य विज्ञान-विषमं वचनं विनिशम्य त्वरातुरत्वात् तीव्रं तापिताः हस्तैः मस्तकं परामृशन्तः पापपरिपाका वराका लुण्टाकाः 'आः ! दैवोपहताः कुत आपतिता वयम्, वातुलानां वा बालिशानां वा वसतिरियम्' इति मिथो मन्त्रयमाणा दूरदेशे दृश्यमानं दिव्यदर्शनं देवदत्तं द्रुतमुपगम्याऽपृच्छन्—'सत्त्वात्मन् स्वामिन् ! सर्वथा समधिगत-सत्यसारस्य सत्यसन्धस्य सत्यसंरक्षणस्य च सत्यस्वरूपत्वात् स्वस्तिमती सुभगा ते सरस्वती । स्वप्नेऽपि नातथ्यं कथ्यं त्वयेति समस्तः समाजः समाख्याति । तत् कथय कामाशामाश्रिताः वाणिजिकाः पथिकाः' इति ।

२२. एवं परस्वापहारिणां प्रचुर-प्रशंसा-परिप्लुतां वाणीमाकर्ण्य चलाचलचेता देवदत्तो निर्णिनीषुः नेत्रे निमील्याचिन्तयत्—'परमार्थतः पर्णशालायाः पार्श्वतः पूर्वप्रदेशे गुल्मगहने गूढाः पणिकाः पथिकाः । यदि परिमोषिणः प्रति परमार्थं न प्रवदामि तदा पापपात्रतां प्राप्नोमि । सत्यं हि सुनिश्चितं सर्वस्वं समेषां सांसारिकाणाम् । तथा हि—सत्यमेव तत्पुरुष-तोषणम्, तदेव तथ्यं तीव्रं तपः, तदेव तुङ्गस्त्यागः, तदेव तर्पणी तितिक्षा, तदेव तमस्तन्द्रातिरोधानम्, तदेव त्रिविध-तापतान्ति-तिरस्करणम्, तदेव त्रासताडनं तिग्मं तन्त्रम्, तदेव तृष्णातर्जनं तारकं तीर्थम्, तदेव धुरन्धरो धर्मः, तदेव धैर्यधनधारणम्, तदेव ध्रुवं ध्यानम्, तदेव धिक्कारधावनम्, तदेव धूर्त्तता-ध्वंसनम् अमृतमृतं स्मृतम्, सतोऽपि मरणं मिथ्याचरणम्, इति नाहं न्याय्यं तत्त्वार्थं तिरोधास्यामि' इति । तदाहुः—

सुरसद्म-समानेत्री सत्यता, सरला सृतिः ।
सौभाग्य-स्वस्ति-सम्भूतिः सुखोदर्का समाहृता ।। १६ ।।

अपि च—

मूलस्तम्भायते सत्यं धर्म-हर्म्यावलम्बनम् ।
स्रस्ते सत्ये च सत्येषोऽशेषो धर्मोऽपि नश्यति ॥ १७ ॥ इति ।

२३. एवङ्गते स्वार्थं सिषाधयिषवो मलिम्लुचास्तु मुकुलित-लोचनं मुद्रितमुखं मननमग्नमेनं मुनिमालोच्य—'विप्रवरेण्य ! सत्यसन्धाः साधकाः सत्य-समुदीरणे न वेलाविलम्बं विदधति । विद्वद्वृन्दवृन्दारक ! अनुचिता चलचित्तता न च रोचते सङ्कोचस्त्वयि तापसे' इत्यादिभिः शालीनता-शिशिरैः श्लक्ष्ण-शैली-श्रवणीयैः शब्दशतैः शश्लाघिरे । उक्तं च—

स्वार्थ-संसिद्धये स्निग्धां, सौम्य-सौमुख्य-सम्भृताम् ।
विदग्धा वञ्चने वाचं, वदन्ति व्याज-वेष्टिताम् ॥ १८ ॥ इति ।

२४. तत्पश्चात् पण्डितेन देवदत्तेन पाणिना प्रदर्शिते पथिकानां पणिकानां पिधान-प्रदेशे, प्रसह्यचौराः प्राणपरित्राणाय पादयोः पतित्वा पुनः पुनः प्रार्थयमानान् पुटितपाणीन् परिदेवन-परायणान् समर्पित-सम्पत्-पोटलिकानपि तान् 'प्राणन्त एते परित्यक्ताश्चेत् पृथिवीपाल-पार्श्वं प्राप्य प्रसभ-परिमोषण-परमार्थं प्रकाशयिष्यन्ति' इति भूयोभाविभयाद् निष्करुणं निजघ्नुः । यतो हि—

मिमृक्षन्ति स्वपापानां, चिह्नानि व्यभिचारिणः ।
घातिनोऽनृतशीलाश्च, ये परस्वापहारिणः ॥ १९ ॥ इति ।

एवं निष्पापानामापणिकानां प्रमापण-कारणतामुपेतो हिताहित-विवेकविकलः सत्यैकपक्षपाती तपस्वी देवदत्तः प्रेत्य चिरकालाय नरके निपपातेति परम्परा-प्राप्तः पुराणः प्रवादोऽत्र प्रमाणम् ।

२५. तत्त्वतः सत्येन मङ्गलमयी मधुरा मोदमादकता मिलति, मानसो मलिनिमा मूलतो मरीमृज्यते, शीलं शक्तिशालितां श्रयते, विष्वग् विश्वासो विवर्धते, प्रयाणात् प्रागेव पुण्या परलोकपदवी पूयते, कुलिश-कर्कशः कालकल्पः क्रूरोऽप्यरिः कोमलतां कृपालुतां च कलयति । अपरं च—यो हि मनसा वाचा कर्मणा च समस्तेषु समयेषु सकलासु च स्थितिषु संसार-सागर-तरणिं सत्यसरणिमनुसरति तस्य सत्यसङ्कल्पस्य सरस्वती सिद्धा सञ्जायते । स यद् विचिन्तयति वा ब्रूते वा तत् तथैव पर्यवस्यतीत्यनिर्वचनीयः कोऽपि महिमा सत्यस्य ।

२६. परमार्थ-पवित्रितेन प्रवचनेन पशु-पक्षि-प्रभृतयोऽपि प्रेरिताः प्रभाविताश्च प्रजायन्त इति पदे पदे प्रख्याताः पौराणिक्यः परिकथाः

परिपुष्णन्तीति सर्वदा सर्वथा सोम्य ! सत्यं समवलम्बनीयम् । तथा च चेयं चेत् चित्रं चतुरस्र-चारु चारित्रम्, जेयं जीवने जम्भं जम्भं जनजक्षणं जिह्मं जगत्, गेयं गृध्यसि गोष्ठीषु गुणगाथागौरवम्, धेयं धर्मधारि-धीरधूर्धरेषु धन्यं ध्रौव्यम्, पेयं पातकपीडा-प्रतिरोधि पावनं पुण्यपीयूषम्, स्थेयं सौजन्य-सारसुभगं स-हसं सुखेन सह संसारे, हेयं हेलया ह्रेपणं ह्लादहन्तृ ह्रास-हेतुकं मुषितमानं मृषाभिधानम्, स्मर्याश्च दिनचर्यास्वार्य-वर्य्या निरवद्यसत्त्वाः सत्यवद्या आद्या हरिश्चन्द्राद्याः ।

२७. अपि च सखे ! सत्सङ्कल्प-सुम-सौरभ-सम्पन्नेव सूनृता सरस्वती सुतरां सुधास्राविणीव स्रोतस्वती सर्वतः समाजे स्थास्नु सुखं सन्तनोति। मनाङ् मोदाय वा विनोदाय वाऽप्युदीरितमनृतं स्थेयसीं मृषोक्ति-प्रकृति-मङ्कुरयति । नीचैर्निर्दिष्टमिष्टं कथानकमप्याहृतानकं सत्यस्यामानं महिमानं ख्यापयति । तथा हि—आसीत् पुरा पञ्चनदप्रदेशे विश्वविस्तृतयशोगन्धः सत्यसन्धः कोऽप्यपापः प्रजापः । तन्नगरे प्रत्यहं प्रभूता दैन्यावधूता वनवासा दासाः, कलास्वप्रवीणाः क्षीणा ग्रामीणाश्च विविधं वस्तुजातं विक्रयाया-नयन्ति स्म । सायं-समयावधि यदपि शस्तं वाऽशस्तं वा वस्तु केनापि न क्रीतमजायत तत् समस्तमसौ सत्यव्रतः करुणावृत्तिः जगतीपतिः सेवकान् सम्प्रेष्य स्वयमक्रीणात् । सेयं प्रात्यहिकी तस्य सत्यप्रतिज्ञा समभूत् ।

२८. एकदा दिवसावसानसमये साक्षाद् धर्मदेवोऽपि विप्रवेषं परिधाय पत्तने पणनाय निस्सारं वस्तुसम्भारं पेटके प्रणिधाय पृथ्वीपाल-प्रतिज्ञा-परीक्षणहेतोः पण्यशालायां पणयितृ-पङ्क्तावुपविवेश । परं केन क्रेतव्यं तादृशं तुच्छमभव्यं द्रव्यम् । अथ सम्प्राप्ते सायं-समये यथापूर्वं पार्थिव-प्रेरिताः परिजनाः पत्तनपण्यवीथीषु परिभ्रमितुं प्रारब्धाः । नगरे विक्रयाय लोकैः यानि वस्तून्यासन् समानीतानि, विक्रीतानि तैस्तानि समस्तानि । केवलं विप्रोऽसौ पेटिकां पुरतः प्रणिधायोपविष्ट आसीद-वशिष्टः । परितः पर्येषणपराः पृथिवीपति-परिचराः क्षिप्रं तं विप्रं समुपेत्याप्राक्षुः—'भगवन् ! भवतः पण्यं न क्रीतं केनापि ?' इति ।

२९. स प्रत्यवोचत्—'न हि' इति । भूयो भूमिभृतो भृतिभुजः भूसुरं पप्रच्छुः—'विक्रयाय किमानीतमस्यां पेटिकायाम् ? किञ्चास्य मूल्यम् ?' इति । विप्रः प्रत्यवादीत्—'अस्यामवकरनिकररूपं दारिद्र्यं वर्तते मूल्यं चास्य रूप्यकसहस्रम्' । इति ।

निशम्येदं नरनाथानुचराः प्रहसन्तः प्रोचुः—'को नु मन्दमतिर्वराकः काकः काकिणीकं क्रेष्यतीममपार्थं पदार्थम् ?' इति । ब्राह्मणो बभाण-

'अस्तु, अस्ततमिदं वस्तु न कोऽपि क्रेष्यति चेद् नियतं निशि निजनिकेतनं नेष्यामि' इति। अथ परिश्रुत-पदार्थपणाः कृपणाः कर्म्मकराः कालक्षेपं परिहरन्तः सत्यरतिं पृथ्वीपतिं प्रत्युपेत्य यथावृत्तं निखिलेन निवेदयामासुः।

श्रवणेन्द्रियेण तदुपलभ्य जगतीपतिः जगाद—'मा नामासौ तद् वस्तु वासतेय्यां स्ववसितं प्रति नयतु। यत् किञ्चिदपि मूल्यमधिकं वा न्यूनं वा प्रदाय नूनं क्रेतव्यं तद्' इति।

३०. ततः पृथ्वीपाल-प्रेषिताः परिजनाः पुनः परावृत्य पुरस्कृत-प्रचुरसम्मानं तमग्रजन्मानं प्राहुः—'पेटिका-पदार्थस्यार्घ-रूपेण रूपकशतत्रयीं गृहाण' इति। भूदेवस्तु तद्वस्तुविषये 'रूप्यक-सहस्रात् काकिणिका-कणिकामप्यल्पतरां नितरां नाङ्गीकरिष्यामि' इत्यभिधाय प्रेष्य-प्रोक्तं प्रत्याचख्यौ। राजानुजीविनः रूप्यकाणां पञ्चशती-पर्यन्तमपि पण्यं प्रदातुं पुनः पुनः प्रार्थयन्त, परं विप्रः प्रकटितपूर्वाशयं शयं विसृतविशदवालवितानं मूर्धानं चान्दोलयन् सर्वथा नान्वमन्यत। तदनु केऽपि कोपिनः कर्म्मकरा महीपसमीपमागत्यागादिषुः—'देव! तस्य पेटिका-पदार्थस्य नाणकमपि मूल्यं नानुकूल्यं भजते। रूप्यकाणां पञ्चशतानि प्राप्यापि न तं दित्सते स तेजोमूर्त्तिः द्विजातिः। एवङ्गते न तद् द्रव्यं क्रेतव्यमिति समस्तानां सम्मतं मतम्, इति।

३१. पार्थिवः प्रोवाच—'नेदमुक्तं युक्तम्। सत्या मे सन्धा। प्राप्तेऽपि प्राणद्वैधे नाहं सत्यं सन्त्यक्ष्यामि। तस्माद् यावन्तमपि विभवं विप्रप्रवरो वाञ्छति तावन्तमेव तस्मै वितीर्य क्रेतव्यं तद् द्रव्यम्। कर्णेन्द्रियेण तदुपलभ्य मुक्तमायैः निरुपायैः भूभुजो भुजिष्यैः वेलाविलम्बं विहाय विप्रप्रवराय रूपकसहस्रं प्रदायाऽपार्थः स पदार्थः क्रीतो नीतश्च भूपालशालाम्। दारिद्र्य-रूपमभव्यं तद् द्रव्यं निर्व्याजेन सन्तोषितसमाजेन महाराजेन सप्रसादं प्रासादे निभृतं न्यधायि।

३२. अवसितो दिवसः, रजनिरजनिष्ट। सम्प्राप्ते स्वापसमये पृथिवी-पालो विश्रामवेश्मनि कृतानेककलाऽऽकल्पं कलापतिकल्पं तल्पमध्यासीन एव विविधैः विभूषणैः वसनैश्च विद्योतमान-विग्रहां मञ्जु-मञ्जीर-शिञ्जितैः काञ्ची-किङ्किणी-क्वणितैः चारु-चपल-चाल-चरण-चेष्टितैः, चञ्चलाञ्चल-चोलचेल—चमत्कारैः प्रत्यङ्ग-परिष्कृत-पुष्पप्रकर-परमपटवास-परिमलै-श्चाकर्षणशीलां तरुणीं वरवर्णिनीं, दण्डदीपिकाभिः दूरं द्योतमानाद् द्वाराद् बहिर्यान्तीमद्राक्षीत्। आलोक्यैव तां कुतूहलाकुलो लोकपालः पर्यप्राक्षीत्—'कासि कल्याणि!' इति। वदनं व्यक्तवेदनं व्यावर्तमाना सा सुन्दरी

निरादरोदरमुदारमुत्तरमदात्—'प्रिय पृथ्वीपते ! पद्माहम् । धर्माधारः सत्यसारश्चासीति सदा सदने ते सानन्दं निवासमकार्षम् । परमिदानीं दारिद्र्यं ते मन्दिरे प्रविष्टम् । दारिद्र्याधिष्ठिते मन्दिरे नेन्दिरा प्रतिवसतीत्यद्य भवद्भवनात् प्रव्रजामि' इति । भूभर्त्ता बभाषे—'भगवति ! यथा रोचते भवत्यै' इति ।

३३. कतिपयकालकलानन्तरं क्षितीश्वरो द्वाराद्वारादपक्रामन्तं सौम्याकारं कुमारं कञ्चिन्निरूप्य चकितचेताः पप्रच्छ—भद्र ! कस्त्वम् ? कुत आयातः कुतश्च व्यपयासि ?' इति । तेन चारुणा रुषा चारुणाक्षेण निष्करुणेन तरुणेन प्रासादस्य पुरतः परावृत्य प्रोक्तम्—'देव ! 'दानम्' इति मेऽभिधानम् । धर्मधरः सत्यतरश्चासीति सुचिरमुषितमपारसुखसारे प्रशमाधारे तवागारे । साम्प्रतमसाम्प्रतमिहावस्थानम् । पद्मा तव सद्मापहाय यत्र गता तत्रैवाहं प्रयामि, पद्माभावे हि कथङ्कारं भवान् दानं विधातुमलम् ? ततः क्ष्माप आललाप— 'यथा मन्यते भवान्' इति ।

३४. तदनु पुनरेको वपुष्मान् वयस्थो निजनिवासान्निर्गच्छन् नृपेण न्यरूपि । पृष्टश्चासौ तेन—'कोऽसि ? कुत उपेतः किमर्थं चापयासि ?' इति । स प्रत्यवोचत्—'सदाचारोऽहम् । सत्यव्रतस्य ते विगतावसादे प्रासादे विपुला वेला व्यतियापिता । सम्प्रति सदनात्ते लक्ष्मीदानाभ्यां कृतं प्रस्थानम् । तेनाहमप्यपयामि । यतः सम्पदभावे कथं नाम भवानुदारं सदाचारं संरक्षितुं प्रभविष्यति' इति । महीपोऽमन्त्रयत—'यथाऽभिरुचितं ते' इति ।

३५. तदनन्तरं भूय एकं युवकममन्दं मन्दिरादपक्रामन्तं प्रेक्ष्य पार्थिवः पप्रच्छ—'को भवान् ? किङ्कृतेऽत्रागतः कुत्र च याति ?' इति । स प्रत्यवादीत्—'यशः इति मे व्यपदेशः । सत्यस्वभावो धर्मधुर्यश्चासीति चिरदिवसं तव समावासे निवासमकार्षम् । परं भवतो भवनादिन्दिरा दानं सदाचारश्चेति सर्वाण्यप्यपगतानि । तदभावे भवतो यशः कथं स्थास्यति ? अतोऽहमपीतस्तत्रैव यामि यामिमे दवीयसीं पदवीमुपेताः' इति । नरनाथो निजगाद—'अस्तु, यथाभिमतं ते' इति ।

३६. तत्पश्चादपक्रामन्तमेकं लावण्यनिधानं नवयुवानं प्रेक्ष्य पृथ्वीपालः पर्यप्राक्षीत्—'कस्त्वम् ? कुत इत आगतिः केन च निमित्तेन विरतचित्तेन प्रस्थीयते ?' इति । तीव्रं तापितेन तेन लपितम्—'सत्यमिति विश्वगेयं मे नामधेयम् । धर्मात्मासीति निशान्ते तेऽनिशं निवासो व्यधायि ; परन्तु परित्यज्य ते प्रासादं पद्मा, दानं, सदाचारः, यशश्चेति सर्वाणि सम्प्रति

सम्प्रतिपन्नानि ससम्मानं क्वाप्यधिष्ठानम्। अतोऽहमपि जामिं प्रति व्रजामि' इति। भूभर्त्राभाणि—'तव कारणादेव देव! मया त्विमे समेऽपि देवाः समुत्सृष्टाः। तव त्यागस्तु नाकारि कदापि मयेति कथमसंस्तुत इव, अकृतवेदीव, हृदयहीन इव, कृपाकृपण इव च सुचिर-स्नेहासक्तं भक्तं मां निरुपायमपहाय व्यपयियाससि? मया प्रजा-पुरुषोपकाराय सत्या सन्धाऽकारि यद् यदि कोऽपि नरो नगरे विक्रयाय यत् किमपि वस्तु समानेष्यति सायङ्कालावधि च तत् कोऽपि न क्रेष्यति तदा तदसंशयमहं क्रेष्यामि। अद्यैको द्विजातिः किमप्यपार्थं दारिद्र्यरूपम् अभव्यं द्रव्यं विक्रेतुं प्रातरायातः। न क्रीतं तदानीतं वस्तु केनापि। किन्तु दिवसावसाने सत्य-संरक्षणायैव मया विक्रेत्रे विप्राय रूप्यकसहस्रं प्रदाय क्रीतं तत्। तदुपरि परिकुपितया पद्मया समुपस्थाय वाणीयमभाणि यद् 'भवतो भवने दारिद्र्यवासो जातः, तस्मान्नाहं स्थास्यामि' इति।

३७. एतस्मात् कारणान्मन्दस्य मे मन्दिरादिन्दिरादयो नितान्तं तान्तस्वान्ता निष्क्रान्ताः। एवं लक्ष्मी-सहितैरहितैः रहितोऽपि हि तैरनवहितोऽहं केवलं भवद्बलमवलम्ब्य धैर्यं स्थैर्यं चानुभवामि' इति। तन्निशम्य सत्येनावादि—'पुण्यात्मन्! यद् भवता मत्कृते समस्ता इमे निरस्ताः तन्नाहं व्यपयास्यामि' इति। एवं प्रोच्य प्रतरां प्रीतः प्रत्यावृत्य प्रासादं प्रविवेश सत्यदेवः।

स्वल्प-समयात् समनन्तरं 'यशः' इत्याख्यो युवा प्रत्यावृत्य पृथ्वीपतिं प्रत्युपेयाय। पार्थः पप्रच्छ—'कस्त्वं कुतश्चागतः?' इति। स आह—'यशोऽहम्। सत्यं त्वयि विराजते। यत्र सत्यं समावसति तस्मिन्नेव संवासे सर्वथा सन्निवसामि। कामं कोऽपि सदाचारो दानशीलः कमला-कृपापात्रं च स्यात् सत्यं विना सत्यं स्थास्नु च यशो न सम्भवति। अतः यत्र सत्यं तत्रैवाहं स्थास्यामि' इति। पार्थिवेन प्रावादि—'यथाह भवान्' इति।

३८. तत्पश्चाच्चपलचारः सदाचारः कृतस्मितसंकेतः समुपेतः। भूपो रूपोपेतं तमापादमस्तकं निरूप्य परिचिन्वान इव पर्यन्वयौक्षीत्—'को भवान् किङ्कृते चायातः?' इति। सोऽब्रवीत्—'साधु-सौजन्यसारः सदाचारः किलाहम्। यत्र सत्यं वसति तत्रैव मे वसतिः। भवतु नाम कोऽपि दानशीलः श्रीलश्च भूवलये, परं सत्याभावे सदाचारो नो सम्भवति। सत्याधिष्ठानमसीत्यत्रैव स्थास्यामि' इति। विशाल-भुजान्तरालेन भूभुजा धीरमुदीरितम्—'ओम्' इति।

३९. तदनु दानाभिधानो युवकः सम्प्राप्तः। पार्थो यथापूर्वं तमप्यप्राक्षीत्—'कस्त्वं केन निमित्तेनात्रायातः ?' इति। तेनाख्यातम्—'दानं ममाह्वानम्। सत्यं त्वयि विराजते। यत् सत्यस्याधिष्ठानं तदेव मेऽधिष्ठानम्। विपुलयापि लक्ष्म्या सम्पन्नो न हि कश्चित् सद्भावेन विना दानव्यवसाये प्रवर्तते। अतः सर्वथा स्निग्धेन सत्येन सत्राऽत्रैव संवत्स्यामि' इति। जगतीपतिर्जगाद- 'यथा भवते रोचते' इति।

४०. अत ऊर्ध्वं तारहाराद्यलङ्कारभार-झङ्कार-हारिणी, लोकोत्तर-लवणिमधारिणी, चारु-चञ्चल-चारिणी लक्ष्मीस्तत्राभ्युपागता। प्रतिपलं प्रतिनव-प्रभापुञ्ज-पिञ्जरिम-पिहित-पार्श्वप्रदेशां तां प्रेक्ष्य पृथ्वीपतिः प्रश्नयाञ्चकार—'देवि ! कासि केन निमित्तेन चेहायाता ?' इति। साह—'सैवास्मि लक्ष्मीः। त्वयि सत्यं तिष्ठति। भवतो भवने यशः सदाचारो दानं चेत्येते सर्वेऽपि सखायः प्रत्यावृत्ताः। तस्मादहमपि प्रत्यागतास्मि' इति। महीपो मन्त्रयामास—'भगवति भार्गवि ! अत्र तु जघन्यमधन्यं च नैर्धन्यमित्यपराभिधेयं दारिद्र्यं दीव्यति, तत्कथन्तरां भवती भूयोऽभव्ये भवने प्रभविष्यत्यवस्थातुम्' इति। लक्ष्मीः प्रोवाच—'चारुचरित्र ! मङ्गलमित्र ! पुण्यपवित्र ! महामते ! पृथिवीपते ! यद्वा तद्वा सम्पद्येत, सत्यं विसृज्य नाहं स्थातुमलम्' इति। राजाऽव्याजं व्याजहार—'यथा भवत्या मनो मन्त्रयते' इति।

४१. ततः परं तत्र साक्षाद् धर्मराजस्तस्यैव विप्रस्य रूपमास्थायाविर्बभूव। पार्थः प्रश्रय-पुरस्सरं पर्यप्राक्षीत्—'कस्त्वं किङ्कृते चायातः ?' इति। धर्मराजो निजगाद—'देही धर्मदेवोऽहम्। मयैव विप्र-रूपिणा रूपक-सहस्रमादायाऽदायि ते दग्धं दारिद्र्यम्। परं परास्तोऽहं सत्य-साहित्यं समुपेत्य त्वया। प्रबलया परमार्थ-प्रतिज्ञया प्रीतस्ते वर-प्रदानाय प्राप्तोऽहम् ! कथ्यतां किं ते काङ्क्षितं क्रियेत ?' इति। भूभुजा भणितम्—'भगवन् ! भद्रङ्करणं भवद्दर्शनमेव भविष्यति भूरिभाग्यभाजां कृते पुरस्तात् प्रदत्तः प्रवरो वरः, उपचारनिर्वहणमात्रं विहितो वाग्व्यापारः। तथापीदमस्तु—

४२. **सदा सन्तु सदाचाराः, स्वस्ति-सम्पत्सुखाः समे।**
समन्तात् सत्य-साम्राज्यं, संसारे च समेधताम् ॥ २० ॥ इति।

एतेन सिद्धमिदं यद् यत्र सत्यं तत्र समस्तं शस्तं समस्ति। स्तोकसमयाय सम्पत्-सन्त्याग-सदाचारादि-स्वल्पत्वसत्त्वेऽपि सर्वथा नाकुलैर्भाव्यम्। सत्ये स्थेयसि सत्येव सम्पूर्णं स्वयं सन्निवर्तिष्यते। किञ्च :—

सम्पदाद्यभावेऽपि न जातु ज्यानिर्जायते । सत्याभावे त्वैहिकमामुष्मिकं चाशुभमुपचीयत इति कल्याणकामिभिरुपादेयं सत्यं न च हेयम् ।

तदुच्यते सत्यासत्यसम्बन्धिसूक्तिसारः सङ्ग्रहेण—

वैद्यसूचीव सत्या वाक्, करोत्यादौ तु वेदनाम् ।
असत्यं च वचो मोहि, प्रोक्तं सौगन्धिकं विषम् ।। २१ ।।

कृपणः कौशलं कृत्वा, कोऽपि कौशेय-कीटवत् ।
वमन् वक्त्राद् व्यलीकानि, स्वयं तैरवरुध्यते ।। २२ ।।

सत्ये वज्रमय-स्तम्भे, क्षिप्तोऽसत्य-परश्वधः ।
प्रहर्त्तुः प्रायशः पाद-प्रच्छेदाय प्रजायते ।। २३ ।।

योऽसत्यामघटेनेमं, भवाम्भोधिं तितीर्षति ।
तस्य भावि समीचीनमद्यश्वीनं निमज्जनम् ।। २४ ।।

निकेतो निर्मितो नाके, मृषावादो मरीचिका ।
स्वादिम्नः सहकारस्य, मन्दारेऽपि च मार्गणम् ।। २५ ।।

मृषोद्यमंहसां मूलमात्मानं कुरुतेऽबलम् ।
पुनः ज्ञातं परैः पश्चाल्लज्जायै तच्च केवलम् ।। २६ ।।

यथाभ्रस्य च भूर्जस्य, पत्रान्निर्याति पत्रकम् ।
एकस्मादनृतात् तद्वत् सम्भवत्यनृतान्तरम् ।। २७ ।।

असत्य-गोपनायाऽन्यदसत्यं पुनरुच्यते ।
तदर्थमिष्यते चान्यद, हन्तानर्थपरम्परा ।। २८ ।।

येन जन्तुरसत्येन, सत्यं निह्नोतुमीहते ।
शल्यायतेऽशुभोदर्कं, तदत्राथ भवान्तरे ।। २९ ।।

असत्यं सूयतेऽसूयां, विश्रम्भस्य विलोपनात् ।
अहो ! तेनाभिजायन्ते, शङ्किनः स्वजना अपि ।। ३० ।।

असत्यवादि-संसर्गात्, सत्यमप्येत्यसत्यताम् ।
मलीमसं भवेद् गाङ्गं, प्रणाले पतितं पयः ।। ३१ ।।

।। इति ।।

स्तेयं हेयम् (३)

१. तत्र योगाङ्गेषु यमपरिभाषां प्रपञ्चयता तत्त्वदर्शिना महर्षिणा भगवता पतञ्जलिना मनोवाक्कायकर्मसु अस्तेयप्रतिष्ठाया निर्भरं गरिमा गीयते। सत्यां हि तस्यां सर्वरत्नोपस्थानलक्षणस्य फलस्य नैयत्येनोपलब्धेः। किं नामास्तेयमित्यपेक्षायामुच्यते —

२. इह तावददत्तादानं, स्वेच्छया परपदार्थोपादानं वा स्तेयमित्याख्यायते ज्ञानविज्ञाननिष्ठैः शिष्टैः। तच्च मनोवाक्कर्म-रूपाधिष्ठानभेदात् त्रैविध्यं भजते। तत्र संसारसम्बन्धबन्ध-प्रबन्धमुच्छिद्याऽपवर्गमार्गमारुरुक्षुणा नारायणचरणस्मरणानुरक्तेन भक्तेन पुरस्तात् तत् त्रिविधमपि स्तेयं हेयं भवति। अस्मिन् भेदत्रयाभिधेये स्तेये मनस उपक्रम्य कर्मावधि अनुक्रमं पापपरिमाणेऽपि तारतम्यं जायते। तथा च मनसा तास्कर्यस्यानुष्ठाने ध्याने वा यावत् सत्त्वविघातकं पातकं सम्पद्यते, ततो भूयस्तरां वाचा विधेये स्तेये। ततोऽपि भूयस्तरां निरस्तधर्मणा कर्मणा चुराऽऽचरणे। अन्ये तु विलोमतो दुरित-तारतम्यं मन्वते। अस्तु, तत्र केऽपि पापाशयाः दुराशया कस्य चनापीतरस्य नरस्य विशिष्टं वस्तु चोरयितुं कृतानल्पसङ्कल्पाः सम्पद्यन्ते, परञ्च विधिवशात् सावधानत्वाद् वा स्वामिनस्ते तत्राऽन्धकारबालवृद्धाऽबलान्ध-वधूसान्निध्यं वा वैजन्यं प्रतिपालयन्तोऽपि यदि वस्तुविशेषस्य चोरिकामाचरितुं नावसरमासादयन्ति, तथा सत्यपि तदा पारमार्थ्येनेहितपदार्थाप्राप्तावपि विश्वव्यापिनः सर्वसाक्षिणः प्रभोः दृष्टौ मुमुषिषूणां पापपङ्कोपलेपः प्रपद्यत एव। एवं वाचापि वाऽऽचारमुत्क्रम्य परपदार्थापहारेऽत्रायशस्वी सत्य-स्तेनक इव एनस्वी सञ्जायते। तत्र वस्तुतोऽन्यवस्तुविशेषविभवादि-स्तैन्यविधाने त्वस्ति संहितासंविधाने प्रचण्ड-दण्डनियमः। अत एव हि प्रचुर-दुराचारचोराधाराः कारागाराः। इत्थमेव वाङ्मात्रेणापि तास्कर्यं कुर्वाणः कोऽपि शक्यते दण्डयितुं दण्डधाराधारेण सर्वकारेण। मनसाचरिता तु तस्करता साक्ष्याद्यभावाद् दुरालक्ष्यान्यजनेक्षणाद्यक्षैरिति मनसा चोरिकां विदधानः पुमान् न कथमपि दण्डभाक् सम्भवति न्यायदृशा समाजे। परं निरतिशयन्ययाकर्त्तुः भुवनभर्त्तुः सृष्टि-संहर्त्तुः कर्त्तुमकर्त्तुमन्यथाकर्त्तुं चेशस्य परेशस्य दृष्ट्या तु मनसा मोषकः

कृष्णकर्मा पापिष्ठ इति दण्ड्यते काककुक्कुरादियोनिषु निपातितो जननान्तरेषु, आधिव्याधिभिश्चात्रैव ।

३. वास्तविकी वा वाक्कृता वा चुरा स्थूलेति स्थूलस्य स्थूलेन स्थूलं दण्डनम् । मानसिकं स्तेयं तु सूक्ष्ममिति सूक्ष्मस्य सूक्ष्मेण सूक्ष्मं दण्डनम् । तस्मान् मनसा वाचा कर्मणेति त्रिविधस्यैव स्तेयस्याभावोऽस्तेयमिति स्थितम् ।

कथं नाम साऽस्तेयप्रतिष्ठा स्यादिति विषये समनुश्रूयते पुरातनमेकमुपाख्यानम् :—

४. अस्ति विश्वप्रशस्तिषूत्कीर्तितस्य भारतस्योदीचीनेषु सर्वकालीनादीनेषु, समृद्ध-सकलसस्यसम्पदेषु, जनपदेषु कदापीतिभिर्नाभिभूतः, पञ्चनदप्रदेशाङ्गभूतः, स्वदेशदौर्भाग्य-ध्वान्तद्रावणदीपो द्वीपो नामोद्देशविशेषः । विद्यतेऽद्यापि तत्र भवनमिवाखण्डलम् मण्डलं वैदुषी-गरिमगेयं पट्टपुराभिधेयम् । तस्मादुत्तरस्यां दिशि, सर्वदा स्वसम्पदा पञ्चनदप्रदेशपालकस्य, हिमालयबालकस्य शिवालकस्याद्रेः हृदयं निर्दयं विदार्य समतलामिलां प्रविष्टा, शिलोच्चयोच्चप्राकार-कारागारमोचितेव फेनमिषोपहासिनी, निःशेषप्रदेशविशेष-वैभवालोकनोल्लासिनी, पुञ्जित-पार्थिव पापपङ्कप्रक्षालनाय लालसिनी पाथोधिनाथमिलनोत्कलिका-लोलकल्लोललासिनी, परितो हरित्सु हरितिमभरिततीरतरुव्रततिव्रातविकासिनी, तरलतरतरङ्गकरतालगद्गदनादविलासिनी, देशदुष्कृतदौर्भाग्यद्वेष्यदलोज्जासिनी, तपनोपतापिततृषितपान्थसार्थ-सुखदायिनी, विशालशैल-शिलाशतोत्पाटनापराधभीतेव द्रुतयायिनी, विहारस्थली दीनमीनानेकभेकभयकरमकरनिकरलीलायाः, भालप्रसाधनपट्टिका द्वीपमही महीलायाः, तोयशीतिम्ना कृषककेदारसन्तापं गलहस्तयन्ती, दर्शनोपस्पर्शनैः पूर्वापरकल्मषकुलमोषिणी, हिमालयशैलमाला-धेनुदुग्धधारेव प्रदेशपरिपोषिणी, द्रावितरजतप्रवाहप्रतीकाशा, विपुलोपकारपरम्परा-पूरितप्रदेशाशा विपाशा नाम्नी निम्नगा ।

५. तस्या निदिध्यासन-योगासनोपासनानुकूले, धीरसमीरतरलतरतरङ्गान्दोलितलतापतत्पुष्पपूले, मृदुल-दुकूल-तूलतुल्यवालुकामूले, शीतले कूले, सामन्दानन्दं विश्वतो विहरन्, समाहरन् सुरभीणि सपर्या-सुमानि, एकदा कदाचारविरहितो हितो जगज्जन्तूनां, तितिक्षुरितरमन्तूनां, परात्परेशाराधनैकधनः, विमानितोऽप्यक्रोधनः, सदा स्मेरमुखः, सत्समाधिसुखः, अश्रान्तोपांशुजपेषत्स्फुरदधरः, प्राणिमात्रेऽप्यनुक्रोशधरः, चारुचर्यः, आर्यवर्यः, पाराशर्यः, तृतीयाश्रमी, तपःश्रमी, शमितकामः, स्वात्मारामः,

कृपारामो नाम विप्रः विधिविधानाद् धनधान्यरतेः, नियुक्तानेकवैतनिकततेः, कस्यापि क्षेत्रपतेः नातिदीर्घयामं रसालारामं समाजगाम।

६. एतस्मिन्नेवान्तरे तत्प्रान्तरे सस्यकर्मकरेषु, निम्ननरनिकरेषु, कृशबलेषु कृषीवलेषु च भूमीस्वामी स्वामीश्वरतां ख्यापयन्नपि विधिवशात् तत्राययौ। स च चीरितचीरं, पांसुपूरपूरित-शबलशरीरं, कृतानशनक्षामं, कृपारामम् आपादमस्तकं निपुणं निरूप्य, प्रवासी कोऽप्यायासी कर्म्मकारो वा भारहारो वाऽयमिति विचार्य समवधार्य च किञ्चिच्चेतसि जातोदयां दयां दर्शयन् स्मयशीलोऽपि स्मयमान आह स्म—'ओ! ए! कुतोऽमुतो मृदुमन्दामोदमादिपवनेऽत्रोपवने ससुखं मुखं समुन्नमय्य रङ्कस्त्वं विशङ्कं परिक्रामसि। किमपि सशर्म कर्म चिकीर्षसि चेदद्यप्रभृति केकिकोकिलकुल-कलगानेऽस्मिन्नुद्याने पादपाली-पाली मालो हाली वा भूत्वा समयं गमय मया नियुक्तः। विशेषतो मयाऽद्यत्वे सार्वकालिको मालिकोऽपेक्ष्यते' इति।

७. प्रायः पूर्णकामेन कृपारामेणापि प्रभुपाठापचितिसमुचितं सरित्सिक्तविविक्तस्थानं तदुद्यानं विज्ञायारामस्वामिनोदाहृतं त्वरितं स्वीकृतम्।

विटपि-वाटिकाया विविधेषु व्यापारेषु व्यापृतस्य तस्य सर्वकालं चालं नारायणानुध्यानपरायणस्य, मोदमयाः कतिपयाः दिवसा अवसानं गताः।

८. एकदा विहार-विलासमतिरारामाधिपतिः द्वित्रैः मित्रैः सत्रा तत्राययौ। स चानुक्षणं वृक्षरक्षण-विचक्षणं कामं तीक्ष्णातपश्यामं कृपारामं कतिपयानि माकन्दफलान्यानेतुमादिदेशोपवनेशः। कृपारामोऽपि पार्श्वप्रदेशपादपस्य विटपान् विधूय भूयः करण्डपिण्डितानि, पीतिम-परिणतानि, नीरनिर्णिक्तानि तानि सुन्दराणि कियन्तिचिदाम्राणि नम्रतया तेषां पुरतः प्रणिदधे।

९. परस्परं प्रचुरपरिहासपरायणाः प्राघुणा अप्यहम्पूर्विकया एकैकं फलमादाय चूषितुं प्रारभन्त। हा! हन्त! अत्यन्तमम्लत्वयुक्तमिदं शुक्तमिदम्, इत्युदीर्य च तत्कालं परिवदद्भिरुपवनपालं, दन्तशठाभिभूतैः, प्रभूतनिःष्ठ्यूतैः, सीत्कार-स्वानतानपानैः, किटकिटायमानैः, कुञ्चिता-नननासैः, आविष्कृतकृतककासैः, समस्तैस्तैः सममेवास्तानि तानि निरानन्दानि माकन्दानि। ततस्तैः सोल्लुण्ठमुपहसद्भिः सद्भिरभ्यागतैराम्रेडितया-ऽरुन्तुदया वक्रिमकरम्बितया च वाचातिवेलमुपालब्धः स आरामस्वामी रुषा परुषाकृतिस्त्रिशिखां भ्रुकुटीं कुटिलामातत्य निर्भरं निर्भर्त्सयन्

अविरामं निकामं स्मयमानं कृपारामं न्यगादीत्—'अरे! मौढ्यावतार कर्म्मकार! अत्र वसतः सततस्तेऽहानिकरस्य बहून्यहानि समतीतानि, न चाऽधुनाऽप्यसाधुना त्वयाऽवेदि कस्य विटपिनः फलान्युत्कटं शटानि कस्य चेष्टानि मिष्टानीति'।

१०. एवं स्वामिगर्जिततर्जितोऽपि जितात्मतयाऽवामः पालितारामः कृपारामः, मधुमधुरिममिलितैः, निरस्ताऽस्मितैः, मन्दस्मितैः, कुसुमनिकरमिव विकिरन् विश्वतो व्याजहार रोचनं वचनम्—'मुधा क्रुधाऽन्यथापथगामिन्! स्वामिन्! प्रभवता भवताहं सोत्साहं रसालारामरक्षणे नियुक्तोऽस्मि। श्रीमता नियुक्तिक्षणे फलभक्षणे तु मेऽधिकारो नतमां प्रादायि। सविशेषं भवदादेशमन्तरा यथाकामं भवदारामस्य फलान्यास्वादयितुं कथमहमशक्ष्यम्। आस्वादनं विना च खट्ट-मिष्टादि-सम्प्रधारणा केन प्रकारेण नाम त्रैकाल्येऽपि सम्भवति। स्वामिनः स्वीकृतिमन्तरेणादत्तादायी व्यवसायी मायी किल किल्विषी तस्करो जायते। येन केनापि रूपेण चाचरिता तस्करता सुचरितरहितं हि तं विदधाति। चारित्रहीनता चात्र दयनीया दीनता परत्र च निरयशरणं मरणम्। श्रूयतां च सौजन्यानुस्यूता, पुण्यपूता, प्रभूतानुभूता साकूता प्राचां वाचा—

११. क्षोदिमानं च प्राग् दैन्यं, स्तैन्यं सन्तनुते हृदि।
ततो भयं महाऽशान्तिमश्रान्तं चोभयं प्रभो! ॥ १ ॥
सदा दरं भृशं तन्वद्, लघयच्च सदाऽऽदरम्।
स्वान्ततोऽपि ततो हेयं, स्तेयं कल्याणकामिना ॥ २ ॥
साक्षात् क्रौर्येण चौर्येण, विभवो को भवे भवेत्।
वित्तं वै श्रमशौर्येण, वित्तं शर्मशुभावहम् ॥ ३ ॥
जितं चोपार्जितं राज्यं, प्राज्यं भौमं च वैभवम्।
मुख्यशः पुञ्जिता मुद्रा, क्षुद्रा स्थास्यति भूतले ॥ ४ ॥
मेदिन्यां मेदयत् पुण्यं, मोदयच्च विनोदयत्।
अस्तेयस्य प्रतिष्ठानं, अधिष्ठानं शमश्रियाम् ॥ ५ ॥
स्वं लुण्टित्वाऽन्यलोकानां, स्वं मया वेश्म सम्भृतम्।
मोमोत्तीति मुधा मुग्धो, मन्यमानो मलिम्लुचः ॥ ६ ॥
लोलुभो जातु जानाति, नातिजाल्मः स यन्मया।
मुषित्वाऽद्य मुदा हा! ऽर्थं, दाहार्थं सञ्चिता चिता ॥ ७ ॥
चोरिका पापगेहस्य, मोरिका नात्र संशयः।
गौरवं हि तयापन्नं, रौरवं प्रापयिष्यति ॥ ८ ॥

चुरामाचर गर्वेण, खुराघातैः खनावनीम् ।
धुरामाधेहि पापानां, दुरापा दुर्गतिर्न ते ॥ ९ ॥
रम्याणि हर्म्याणि तथाऽम्बराणि, वराणि संवीक्ष्य मलिम्लुचानाम् ।
महीयसस्तांश्च महीयशस्यान्, वदन्ति बालाश्च विदन्ति दीनाः ॥ १० ॥
अत्यल्प-मात्राण्यपि वैभवानि, पाणिद्वयायास-समुद्भवानि ।
स्वादूनि शीतानि सुधामयानि, भवन्ति निर्धूत-भवामयानि ॥ ११ ॥ इति।

१२. इत्थं सुधाधारा-किरत्कारुण्य-करम्बितैः, मृद्वीकामधुरिम-म्रदिममिलितैः, शिक्षाकलितैः ललितैः वाग्विलासैरुल्लसितचेताः, कृत-दुरालाप-पापः किलाहमिति जातानुतापः, शोधित-बोधितमतिः, विटपि-वाटिकापतिः 'नायं सामान्यः पादपपालको मालिकः, अपि तु तपोनिष्ठो मुनिवरिष्ठो भवतीति सम्प्रधार्य, पादपयोजातप्रणिपातपुरस्सरं तं भूयो भूयः क्षमामभिक्षत। गद्गदगिरः श्रद्धाश्रुकिरः, मुकुलितकराः प्रादुष्कृता-दराः परेऽपि मन्त्रमुग्धा इव लोकोत्तरचारुचरितं तं सहर्षं दर्शं दर्शं धन्य-मात्मानममन्यन्त।

१३. परेद्यवि च परेऽपि श्रुतनानाऽवदानाः, श्रद्धोदितबहुमानाः, नितान्तमुल्लासिनः, निकट-नगरग्राम-वासिनः, हरतग्रस्त-रुचिररत्नरुक्मरजत-पट्टपटप्रायोपहाराः, पुटितपाणि-पदपातप्रणामप्रकटित-प्रचुरपूजोपचाराः, बाल-वृद्ध-वधूवर्गसमेताः समुपेताः निष्कामं कृपारामम्। स तूज्झितवैभवानु-रागः, त्यागैकयागः, पञ्चेन्द्रिय-दमनायोधनः, तपोधनः तादृशं भृशं प्रातः सायं जनसमुदायं तपश्चर्यान्तिरायं मत्वाऽलक्षित एव सदेशाद्रि-प्रपात-सञ्जात-संसिक्तं विविक्तं विपिनं विवेश। तत्र च प्रायेण परमार्थ-प्रतिपादक-पुण्य-पुराण-पारायण-परायणः, निभृतं नुतनारायणः, साधकसमुदायं समया समयाकरोत्।

१४. एवं पुण्य-परम्परा-परास्त-समस्त-प्रापञ्चिक-पापरोगाः, आचारपारदृश्वनां पुरोगाः नाचरन्ति चेतसापि दृढतरीकृत-भवबन्धनां, पुनरावर्त्तननिबन्धनां, लुब्धप्रियां चौर्यक्रियाम्। जातरूप-रूप्यरत्नानि त्वकृतयत्नानि लुठन्ति निःस्पृहाणां तेषां कल्याणास्पदयोः पदयोः। तथा चाभाणीदं वाणी-भूषणैः—

श्रियं यस्तु प्रियं वस्तु, मत्वा मत्तोऽनुधावति ।
पतेत् पातकगर्तेऽसौ, हतः टङ्काहतस्तया ॥ १२ ॥
यस्तां स्वप्नेऽप्यनायस्ता-मुपेक्षेत पराङ्मुखः ।
इन्दिरा मन्दिरं तस्य, स्वैरं स्मेराश्रयिष्यति ॥ १३ ॥

स्तेयं ततो हेयमिदं हृदापि, गेयं गिरा नाम जगन्नियन्तुः ।
पेयं श्रुतिभ्यां च कथामृतं यत्, मेयं स्वयं ते भवितैव दासी ॥ १४ ॥ इति ।

स्तेयं स्वापतेयं वर्धयतीति कथयन्ति काकाः चार्वाकाः। परमार्थतः तद्धि दिने दिने मनोबलं तनयति, नयति नितरां कृशिमानं मानम्, पुष्णात्यमानं पाप्मानम्, तनोति च तिरस्कार-सहवासं संत्रासम् इति ।

संयमः (४)

१. अस्ति काश्मीर-सदेशे 'लद्दाख'-व्यपदेशे प्रदेशे, शैल-शिखर-शोभी, कृतसङ्घाचार-प्रचारः, भिक्षु-शिक्षादीक्षागारः, कोऽपि बौद्धविहारः। तत्र बलवद् वश्य-विषयिवर्गः, विहित-विश्व-वैभव-वासना-विसर्गः, कात्स्न्येन क्षपित-काम-कोपादिकाऽऽमयः, करुणामयः, प्राणिषु प्रणय-प्रदर्शन-प्रकृतिः, मानस-म्रदिम-मण्डित-मुग्धमुखाकृतिः, विविधविद्याविभासितस्वान्तो भदन्तः श्रीकान्तो नाम प्रत्यवसत् । तपस्तेजसा समुद्भासिनस्तस्य पञ्चान्तेवासिनः समजायन्त ।

एकदा पर्यवसिताध्यापनकार्यः स आचार्यः श्रीकान्तः तानन्तेवासिनो रहस्यप्राक्षीत्—'भद्रमुखाः ! वर्षेऽस्मिन् चतुर्मास्यां वर्षावासः कुत्र करणीयो भवद्भिः ?' इति । तदुक्तम्—

चतुर्मास्यां न कुर्वन्ति, स्थिरावासं कुतोऽपि ये ।
भवन्ति भिक्षवो नूनं, जङ्गमास्ते भुजङ्गमाः ॥ १ ॥ इति ।

२. तत्रैकेनाभाणि—'भगवन् ! भक्षणाय-भ्रमद-भूरि-भीम-भोग-भुजग-भवने वने' इति । द्वितीयेन व्याहारि-'महाराज ! नूनं नीहार-निकर-नीकाशे, विलङ्घिताकाशे, विरल-प्रकाशे, दुर्लभप्राणिसमाजे, नगराजे कैलाशे' इति । तृतीयो जजल्प—'जितात्मन् ! जनित-जीवजात-दरे, काश्मीर-कान्तारोदरे, क्रूर-केसरि-कन्दरे' इति । चतुर्थेन कथितम्—'त्रिगुणातीतात्मन् ! तीव्र-तपत्तपने, तृषा शुष्यल्लपने, परोक्षच्छायातरौ मरौ' इति। पर्यन्ते प्राप्तः पञ्चमस्य बलभद्र-व्यपदेशस्य वारः। स हि सङ्घशरणाश्रयणात् प्रागतिकामुकः, कुलटा-गामुकः समजायत । तस्य बहवो वर्षाः तस्या वेश्याया वेश्मनि व्ययिता बभूवुः या काश्मीराणां कोणे कोणे कथान्तरेषु कुमारैः कीर्त्यमान-काय-कामनीयका 'कनकाङ्गी'-त्यभिख्यामभजत । पश्चाच्चेतसि सत्वोद्रेके विवेकेऽङ्कुरितेऽसौ सौभाग्यवान् वस्तुतो विस्मृत-विषय-विलास-वासनः, पुण्य-पुरुषोपासनः, कृत-करण-शासनः,

समाप्ताविद्या-स्वापः, परास्त-पापः संवृत्तः। ततो गुरुणा परीक्षितस्य दीक्षितस्य, क्लृप्त-केशस्य कृत-काषाय-वेशस्य च तस्य संयमः शमः विरक्तिरेकतानता च नतरां लेशतोऽपि शिथिलतामुपेता। अतो विशेषतस्तं नामग्राहं निजगादाचार्यः—'भद्र! बलभद्र! पुत्र! त्वया कुत्र ?' इति।

३. स प्रत्यवोचत्—कामकर्षण! अहकं मासचतुष्कं यावत् कनकाङ्गी-वारवधू-वसिते वसतिं विधित्सामि' इति।

तदाकर्ण्य तत्सहाध्यायिनो मिथः कर्णे कथनं प्रारेभिरे। कश्चिदकथयत्—'एष महामन्तुः जन्तुः जन्मचतुष्टयं यावत् तस्मिन्नेव पूति-पाप-प्रणाल-पङ्के पतितः प्रतिवत्स्यति, का कथा चतुर्णां मासानाम्' इति। अन्यो मन्त्रयते—'कथमयं पापमयं पन्थानं परित्यक्तुं प्रभुः' इति। परः प्राह—'नैष बन्धुः बन्धकीं कनकाङ्गीं वेलाविलासिनीं विस्मरिष्यति स्मरोत्सुकः' इति। इतर उदैरयत्—'अहो वत! पुनः पल्लवितः प्राक् पाटितोऽपि पाताल-प्रक्षेपकः पातकपादपः' इति। यदाहुः—

४. **क्रूराः केसरिणः केचिद्, वन्या व्यालाश्च वारणाः।**
शक्यन्ते शासितुं शूरैः, दुर्दमो हन्त! दर्पकः॥ २॥ इति।

अथ निसर्गत एवातिधीरो गम्भीरोदाराशय आचार्यस्त्वचिराय विचार्योच्चारयामास—'तथास्तु' इति।

काश्मीरेषु श्रीनगर-नाम्नि नगरे नग-रेखापरीते काचन कनकाङ्गीति यथार्थनामधेया लासिका वारविलासिन्यासीत्। तस्या बलभद्रे परमार्थ-पूता प्रीतिरभूत्। तं विना सा क्षणमपि क्षपयितुं नाक्षमत। परं विलास-विमुख-वृत्तिः बलभद्रो यदा पल्यङ्क-पार्श्वे प्रसुप्तां तां परित्यज्य पलायिष्ट तदा तदासक्तमानसा न सा पक्षपर्यन्तं पानीयमपि पपौ। विरह-विकला, विस्मृत-विग्रहवेशा, विलुलितकेशा, बाष्पबिन्दून् विकिरन्ती कुररीव करुणाक्रन्दना शश्वद् दण्ड-दीर्घानुच्छ्वासानुदवमत्। निरन्तरमन्त-र्बहिश्च पर्याप्तं व्याप्तं तस्यैव रूपं निरूपयन्ती सा कदाऽधित्यकाधूमिका-म्लायदिनं दिनं वीतम्, कदा मानिनीमुच्यमानमृषारोषः प्रदोषः प्राप्तः, कदा सकललोकक्लमहरा विशदप्रहरा रजन्यजनि, कदा कलकूजित-शकुनि सङ्घातं प्रभातं समायातम्, कदा सरसी-संस्पर्श-सुखसीकरासारः, सार्व-कालिक-सुम-समूह-सौरभ-सम्भारः सुकुमारः समीरः तस्या मलिनिमानं भजमानां कुन्तलपालिका-मालिकाम् उत्तरीयांशुकजालिकां च चलाचलां चकार, कदा धौत-धरा-धराणां धाराधराणाम् अङ्कुरित—मदनोन्मादा नादा रोदसी व्याप्य दिगन्तेषु विश्रान्ताः इत्यपि नाज्ञासीत्। बहुधा बोधित-

याऽपि नाबोधि तया स्वो वेश-संस्कारः, न वेश्मव्यापारः, न वाग्व्यवहारः। अहो! प्रेम-प्रौढत्वम्, अहो! कन्दर्प-कौतुकम्, अहो! विप्रयोग-वैवश्यम्।

५. यदुक्तम्—

कुकूलानलनीकाशो विश्लेषो वल्लभेन यः।
स बालानां विशेषेण बाधनाय विजायते॥ ३॥ इति।

अद्य स एव देवदर्शनो बलभद्रस्तापसवासाः चतुर्मासवासरावसायाय वासाय तस्याः संवासमुपेतः। चिरविरहव्यथिता सद्यो मन्मथ-मन्थान-मथिता, कृशाङ्गी कनकाङ्गी काक्षेक्षणैः प्रेमपरम्परां प्रदर्शयन्ती तस्मै स्वागतं व्याजहार। तदनन्तरं सा बलभद्रस्य वास-विस्तरादि-व्यवस्थां विधाय तस्य मनोमोहनाय मरुमरीचिकामायान् विविधोपायान् विदधे।

६. सा नर्त्तकी नितरां पुरुष-प्रकृति-परीक्षण-परिज्ञान-पेशलाऽभूत्। अतः बलभद्रस्य परिचर्य्या-परया तया त्वरया पर्यज्ञायि यद् 'मम पारप्रदर्शक-प्रतनु-पेशल-परिधानाभिचारः, कर्णयोः सिक्त-सुधासार-झङ्कारः, सोऽयं सौवर्णालङ्कारभारः, प्रसून-परिमल-पांसु-पटवास-परिष्कारः, विविध-विलास-विकार-व्यञ्जनो व्यवहारः, विश्ववशीकारो वाग्व्यापारः, कामकेलि-कलाकौशल्यकल्पितो ऽङ्गहारश्च सर्वथा बलभद्रं वशीकर्त्तुं नालम्भूष्णुः। निष्फलारम्भः किलैष मे दम्भः। सकलमिदं मामकीनं कौतुकं त्यागिनो ऽस्य चित्तं मत्तोऽधिकतरं पराङ्मुखतां नेष्यति' इति।

७. एवं सम्प्रधार्य प्रियतमरतया तया चतुरतयाऽवतारितानि सकलान्यलङ्करणानि, परित्यक्तं प्रत्यङ्ग-प्रसाधनम्, शुभ्रिमशोभमानायाः शाटिकायाः प्रत्यहं प्रारम्भि परिधानम्। किञ्च कनकाङ्गी किङ्करीव व्यासक्ता, विस्मृत-विश्रमा, बलभद्रस्य वरिवस्यायां बलवद् व्यापृता बभूव। एवं विहितेऽपि मिलितमाये पटूपाये व्यवसाये, बलभद्रं सुतरां स्थिरस्वान्तं निरूप्यैकदा निभृतायां निशि निराशावेश-विवशा वेशवनिता तस्य पादयोः पतित्वा प्रोच्चैः परिदेवनं प्रारेभे। अत एवोदीरयन्ति धीराः—

८. **पुरुषांस्तु पराजेतुं, प्रमदाभिः प्रयुज्यते।**
पारेरक-प्रतीकाशं, पुष्कलं परिदेवितम्॥ ४॥ इति।

एवम्प्रकारेण तां व्यथा-विह्वलामबलां विलोक्य बलभद्रः स्वान्त-सान्त्वन-सम्पादनीं, सुधासारस्राविणीं सरस्वतीं समुदीरयति स्म—'देवि! द्राघीयस्या ते दुःखासिकया दृढं दोदूयते मे मानसम्। मत्कृते समर्पितं त्वयारूढयौवनं जीवनम्, समुत्सृष्टाः सुलभयोगा भोगाः, स्वीकृता सरलता, तथा तिरस्कृता तरलता। किं किं नाऽहितं सहितम्? किं किं च न

महितं रहितम् ? परं मुहूर्तमात्रं मनाङ् मनसा विचारय, किमेतन्मात्रं प्रयोजनं जन-जीवनस्य ? किं वनिता विलास-वस्त्वेव वर्तते ? तस्मात् वपुषि विद्यमानं वनितात्वं त्वं विस्मृत्यात्मनि विद्योतमानं जननीत्वं प्रत्यभिजानीहि। स्त्रियाः सत्यं सुभगं च स्वरूपं 'जननी' इत्यस्ति। सा स्त्री समस्तां संसृतिं जननीत्व-स्नेह-सुधासेकैः सन्तर्पयितुं समवतरति स्वसः! कनकाङ्गि!' इति।

६. पवित्रं पुण्यं च प्रेम न खलु विलास-वासनां वहति, प्रत्युत हृदयं वासना-विरहितं विदधाति। कनकाङ्ग्याः प्रेमापि पावनमासीदिति तस्या वासना-वह्निस्तु बलभद्रस्य सपाटीरोशीरनीर-शिशिरैः शिक्षाशब्दैरेव शमितः। प्रणत-सीमन्तया तया वल्लभस्य बलभद्रस्य पादौ पाणिभ्यां परिगृहीतौ। ततः पौनःपुन्येन प्रार्थितेन तेन दया-दम-दीक्षितया तया पावितं जीवितम्।

१०. प्राप्तं पर्यवसानं मासानां चतुष्कम्। बलभद्रवर्जमशेषाः शिष्या आचार्यमुपसेदुः। ते वारविलासिन्याः समावासे मासचतुष्कावधि विहितावासस्य बलभद्रस्य वृत्तविषयेऽभद्र-बुद्धयो विविधं सम्भावयन्ति स्म, परं प्राप्तस्य तस्य विष्वग् विकीर्ण-मरीचिमालं विशालं भालम्, सौम्यत्व-संयम-स्वास्थ्य-सदनम्, गूढ-गाम्भीर्य-गौरव-गुणगाथा-गदनम् वदनं च विलोक्य सर्वे सतीर्थ्याः तूष्णीं तस्थुः। विश्व-वृत्तान्त-वेदिनाचार्येण चासौ सकाशे स-काशेक्षुतृणकल्पितेऽत्युत्कटे कटे समुपवेष्टुमादिष्टः। तस्मिन् प्रशम-प्रसन्ने, आसन्नासनासीने मात्सर्यमुत्ससृजुः मुषितमानाः सतीर्थ्याः।

११. प्राप्ते परे परिवत्सरेऽन्यतमो गौतमो नामान्तेवासी शासीन्द्रियाणामस्मीति मानी, आचार्यचरणयोरुपस्थाय प्रार्थयामास—'महाराज! चतुर्मास्यामस्यां कनकाङ्ग्या वेश्याया वेश्मनि वस्तुं वाञ्छामि' इति।

आचार्य आचचक्षे—'आयुष्मन्! अनर्होऽसि त्वमिदमसिधाराव्रतम्' इति।

दुराग्रह-ग्रहेण-गौतमेनागादि—'यहि कुलिश-कर्कशकरकण्टकस्य केशरिणः कन्दरस्योदरे दरितेन नाभावि तर्हि केसरि-कमनीय-कृशकटिः कृपणा कुलटा किं करिष्यति। तेन तस्याः तपस्विन्या लास-विलास-निवासेऽपि ध्रुवं धीरतां धातास्मि। किं कर्त्तुं प्रभवति प्रभञ्जनप्रहारः पर्वतपतेः ?' इति।

१२. एवं शिष्य-निर्बन्ध-निघ्नेनाचार्येणानिच्छतापि तप्यमानमानसेन तदुक्तमन्वमोदि।

तदनन्तरं गुरवे प्रणति-पुष्पाञ्जलिं पुरस्कृत्य प्राप्ताशीः पौनःपुन्येन प्रबोधितो गौतमः पक्षाभ्यन्तरे कनकाङ्ग्या भव्यं भवनमुपाययौ। सा कनकाङ्गी सम्प्रति लासिका नासीत्। सरलसामान्य-सज्जायाः, संयत-समस्त-समीहितायाः तस्याः समयः तपोमयः समतिचक्राम। साभ्यागतं नवीनं मुनिं मनोयोगेनाभ्यनन्दत्। तया तस्य सुखसाधनसहिता विहिताऽवस्थान-व्यवस्था।

१३. यद्यपि कनकाङ्ग्यां सम्प्रति माध्वीकमादकाः, मानवानां मानसेषु जनिताप्लावा हावाः, मोदकानि कानिचित् करणवशीकरणकारणानि, मदखण्डनानि मण्डनानि च नासन्, तथापि तन्वङ्ग्यास्तस्याः तडित्ते-जिष्ठायाः तनोः लोकोत्तरं लवणिमानमालोकयन्नेवाङ्कुरित-मीनकेतनः, लुण्टितचेतनः स तत्याज त्रिसन्ध्यां तपस्तत्परताम्। एवमनुदिनम-सह्यमदनोद्रेकः विलीनविवेकः स एकदा रहसि कनकाङ्गीमङ्गसङ्गाय प्रार्थयत। तन्निशम्य शमिनो बलभद्रस्य शिष्या कनकाङ्गी दीप्ताङ्गी महसा, सहसा सविस्मया समजायत। नैसर्गिकेण नर्त्तकनारी-नैपुण्येन नागर-नीतिनिर्णये नितरां निष्णाता साह—'किं न जानासीदं यद् द्रविणदासी जायते पाण्याङ्गना, तेनाहमपि धनहार्या भार्या भवामि। अतो यदि त्वं नेपालेश्वरात् कमनीयं काञ्चन-कार्म्मिकं कौशेय-कम्बलमानोय मे दास्यसि, तदाहं दाहं ते शमयितुं यथोक्तमाचरिष्यामि' इति।

१४. एवम्प्रकारेण तया पेशल-प्रज्ञया प्रेरितः परमार्थपथात् परिभ्रष्टः, मदनोन्मादवशंवदो मुनिः, निरन्तरालेषु करालेषु क्रव्याद-सञ्चारेषु कान्तारेषु, भ्रमद्-भीम-भल्लूकभरेषु धराधरेषु, तीव्र-तपनतेज-स्तप्तधरणिषु सरणिषु च क्षुत्तृड्भ्यां पीडितः परिबभ्राम। उक्तं च—

कोटि-कण्टक-कीर्णेषु, विषमेषु पथिष्वपि।
सञ्चरन्ति सुखं बालाः, विषमेषु-वशंवदाः ॥ ५ ॥ इति।

तत्पश्चात् प्रचुरेण प्रयत्नेन नेपाल-पृथ्वीपालात् कामितं कौशेय-कम्बलं प्राप्य जङ्घालजवेन प्रत्यावर्तत।

१५. अथ कनकाङ्ग्या प्रस्तुतं कम्बलमुपेक्षा-प्रेक्षया पाणिभ्यां प्रगृह्य तेन पांसुपूर्णौ पादौ प्रोञ्छितौ, पातितश्चासौ पटच्चरवद् मलाविले पङ्किले प्रणाले।

हन्त! कृतप्राणपणेन, दूरदेशभ्रमेण, प्रथीयसा परिश्रमेण चोपा-र्जितस्योपायनस्य तादृशं भृशं असम्भाव्यमानं विमानं वीक्ष्य, कोपकषायि-ताक्षः, भ्रूभङ्गभीषणभालश्चाभाणीद् मुनिमहाशयः—'महामूढे! मदारूढे!

सानवधानं रत्नरूपं परिधानं, पूति-परीत-जम्बालजाले पुरप्रणाले प्रक्षिप नूनमनूनमदक्षीवा रूपाजीवा, शिलाघटितमदयं हृदयं वहसि' इति।

१६. तदाकर्ण्य तदा कनकाङ्गी व्यञ्जितविषादम्, तीव्रतर-तारना रोचनरचनं प्रतिवचनं प्रादात्—'मुनित्व-मानिन्! यथोचितं चित्तं समा पुरस्तात् प्रेक्षस्व, यत् त्वं महार्हं चारुतममात्मनश्चरित्ररत्नं कुत्र प्रा प्रवृत्तोऽसि। प्रणाले प्रास्तं प्रशस्तं परिधानमिव परं पूर्वप्रकारेण पृथ्वी पार्श्वतः पणकप्रभृतिप्रदानेन परतो वा, पुनः प्राप्तुं प्रभवसि, न परं प्र चारित्रं प्रत्यावर्तयितुम्। सुमना-सुम-सुरभि-सौभाग्यं सकृत् म्लानि प्रयातं चेत्, न सम्भृतं भवति भूयो भ्रातः'! तस्मात् संयमनीय आत्मा संयमः सत्पथः स्वास्थ्य-सत्त्व-संवर्धने, सुतरां सुखः सेतुः संसार-साग सन्तरणे।

१७. अनेन प्रकारेण तपस्विन्याः कनकाङ्ग्याः सयुक्तिभिरुक्ति बलवदाधूतं, परिपूतं भूतं मदनाभिभूतं मुनेर्मनः। विलुप्तः प्रबलसन्ता पापः तमःस्वापः, जागरितो जातः सत्त्वोद्रेकः सविवेकः।

अथासकौ सकपोतहस्तं मस्तमवनम्यावादीत्—'महनीये! मातः मर्षणीयो महापातकिनो मूढस्य मे मन्तुः। दीनोद्धारिणी पापापहारिणी भवसि न व्यभिचारिणी' इति। उक्तं च—

उत्पथप्रतिपन्नं यः, पथि पूते प्रवर्त्तयेत्।
तं गुरुं चारुचारित्रं, मित्रं वा को न मन्यते॥ ६॥ इति।

१८. वीता चिराच्चतुर्मासी। प्रत्यागतो गुरुगेहं गौतमः। ते प्रणति-पुरस्सरमाचार्यचरणयोरुपस्थाय दुःखदादी कुत्सितादिः, शुभान्त समीचीनो वृत्तान्तः साकल्येन समाख्यातः।

ततः परं परमतापसेन प्रोक्तं गुरुणा—'सौम्य! कल्याणकामि परमार्थपथाध्वनीनेन दीनेन संयमिना मनःस्थैर्याय प्रमदानां प्रेक्षणमपि परि हरणीयम्। अतएव पथप्रदर्शकाः प्रत्नाः परिव्राजकाः प्रवदन्ति, य संयमिना मुनिना महिलाया मृन्मय्यपि मूर्त्तिः न द्रष्टव्या न स्प्रष्टव्या दूरापेता कथा नार्या निकटनिवासस्य, कदाचित्तस्याः क्षणं निरीक्षणम परिणामे पुष्कलायामङ्गलाय कल्पते। तदुक्तं कथोपकथकेन केनचित्—

१९. वीक्ष्य वैतनिकीं बालां, वाणिजस्य वपुष्मतीम्।
बभूव व्याकुलो वर्णी, वासनाया वशंवदः॥ ७॥ इति।

गौतमेनागादि—'गुरो! किमीयं किंस्थानकं च कथानकमिदम्' इति। आचार्य आचचक्षे—'अस्ति प्रचुरप्रजम्, प्रतोलीषु पदे-पदे परिकल्

मान-प्रचुरप्रकार-पादत्रप्रमुखपरिधानम्, पञ्चनदप्रदेशे प्रधानम् ऐलधाना-ऽभिधानं पुरातनं पत्तनम् । आसीत् तत्र विदेशेष्वपि वर्धिष्णु-विसृत-विविधव्यवसायः सम्पत्सपर्यासत्क्रियाभिः साधु सन्तोषयिता सतां संन्यासिनां च, वर्धनो विद्याविशेषविशारदानाम्, बहुवित्तो 'वीरबल' इति विश्ववित्तो वनिताविधुरो वणिग्वरेण्यः । तस्य मन्दिरेऽतिमानुषेण मञ्जिम्ना मण्डिता कापि 'सर्वाङ्गसुन्दरी'-नाम सेविका समजायत । एकदासौ विधिविलासाद् वाणिज्य-व्यापारविशेषविवशो विदेशं प्रति प्रतिष्ठा-सुरभूत् । परं केनापि कविकुलकीर्तनीयेन कामनीयकेन कृतालङ्कारा किशोरी किङ्करी कस्य नरस्य निकेतने न्यस्येतेति निरन्तरया चिन्तयाऽसौ निशि निरन्तरं निद्रा-नन्दं नागात् । तन्नये नगरे नेदृशोऽदृश्यत कोऽपि ना यस्य निशान्ते निक्षेप्तुं शक्येत सा दिव्यदेहा दासी । उक्तं च —

२०. **रसिकस्य न कस्यास्यं, लालाक्लिन्नं प्रजायते ।**
नताम्राम्रलतां प्रेक्ष्य, पक्विमैः पीतलैः फलैः ॥ ८ ॥
चलाचलं करोत्येवं, स्वान्तं शान्तं विलोकिता ।
बाला चकासदारुण्या, तारुण्यात्ततनूलता ॥ ९ ॥ इति ।

इत्थं चिराय विचारयतस्तस्य निगमानन्दो नाम ब्रह्मचारी संन्यासी स्मृतिमुपारूढः । स तं नगरनदीनिकटनिवासिनं भिक्षाशिनं जितेन्द्रियं साधुमुपेत्य प्रार्थयत—'भगवन् ! दासी-न्यासीकरणाय, क्लेशहरणयोः, शरीरिणां शरणयोः श्रीचरणयोरुपस्थानस्य साहसमाचरितम्' इति ।

२१. पूर्वं प्रत्यादिश्यापि पणिकस्य प्रार्थनां, पुनः पुनः प्रेमाणं पुरस्कृत्य प्रोक्तेन, प्रथमाश्रमिणापि परिव्राजा प्रतिपन्नं परिचारिकायाः परिरक्षणम् । तथा कृते तदाश्रमे सेवा-श्रमेऽविरतं निरतासीत् सदा सा दासी । निगमानन्दोऽपि 'मा भूत्तपः-प्रत्यवायभूतस्याहितस्य दर्शनम्' इत्याश्रमेऽपि नित्यदा नतनयनो वसन-व्यवहित-वदनो व्यापारविशेषेषु व्यापृतो बभूव । यतो हि—

गवाक्षरूपाक्षपथाच्च्युतानि,
प्रायः पदार्थ-प्रतिबिम्बकानि ।
मन्ये मुनीनामपि मानसानि,
कियत्तु कुर्वन्ति तरङ्गितानि ॥ १० ॥ इति ।

२२. एकदा द्विभूमस्याश्रमस्योर्ध्वकक्षागवाक्षनिक्षिप्तवदना दीना दासी किमप्यालोकमानासीत् । तावदेव विधिविलासाद् वटादि-विटपि-वाटिकायां वायसादीनां वयसां विरावं विनिशम्य वर्णिना निगमानन्देनोन्ना-

मितमाननम्, व्यलोकि च तस्या मोहिन्या मदिरामिव मनोमदनं चारु रुचिर-रदनं मुग्धं वदनम्।

एवं सकृदेव तां लावण्यदेवताम्, देहिनीमिव हालां बालां नयनाभ्यां निपीयाऽसौ परमेश्वरस्थाने विश्वतो व्याप्तां तामेव विलोकयन् विदेह इव विसस्मार स्नान-ध्यानान्नपानादिकमपि। स सर्वदा उपविष्टो वा संविष्टो वा प्रचलन् वा प्रबुद्धो वा प्रद्युम्नेन प्रेर्यमाणां, प्रनृत्त-परायणां तामेव परिचारिका-पुत्तलिकां प्रैक्षिष्ट। यस्मात्—

२३. **शलाकाः पिल्पिले पङ्के विशन्त्यन्तः सुखं यथा।**
न पक्वे तपसा चित्ते, तथैव स्मरसायकाः॥ ११॥ इति।

कियत्कालानन्तरं कन्दर्प-कदर्थितः किङ्कर्त्तव्यविमूढोऽसौ शास्त्रि-शिरोमणेः पण्डितप्रेष्ठस्य 'प्रभुपाद'-पाराशरस्य पार्श्वं प्रापत्, प्रचचक्षे च परिचारिका-प्रेक्षणात् प्रारभ्य पञ्चेषु-पारवश्यात् प्रध्वस्तप्रज्ञस्यात्मनः पूजापाठप्रभृति-प्रस्मरण-पर्यन्तमुदन्तम्। स च तं परशुपुरे परिकल्पित-कुटीरस्य 'प्रणवानन्द'-नाम्नः प्रवयसः परिव्राजकस्य पार्श्वं प्रेषयामास।

२४. अथासौ पर्येषणपरायणः पथिकान् परिपृच्छन् प्राप्तः परशुपुरम्। नैष्ठिकं निगमानन्दं निरीक्ष्य प्रणमन्तः पौराः प्रोचुः—'स्वामिन्! त्यागी तापसः, ब्रह्मविद्याविशारदश्चारुचरितश्चासीति जानन्ति जानपदाः, तत् किमिति कदर्यं कुत्सितचर्यम्, धर्मध्वंसन-धृष्टं शिष्टैर्वि-सृष्टम्, मन्दं प्रणवानन्दं पुरप्रतोलीषु परीक्षमाण आत्मानमुपहासास्पदतां गमयसि। तमुपस्थाय प्रायः परिवादपात्रतामेव प्राप्स्यसि। यदुक्तम्—

पौराः पश्यन्ति पापस्य, प्रेमिणं चापि पापिनम्।
पितरौ प्राघुणं पुत्रं, प्रेष्यं च प्रतिवेशिनम्॥ १२॥ इति।

२५. तदुपलक्ष्याशाहीनो दीनो निगमानन्दः पुनः प्रभुपादस्य पार्श्वं प्राप्तः। सोऽपि तन्मुखाद् ब्रह्मविदो विषये लोकवादं सविषादं निशम्य भूमिं स्पृष्ट्वा कर्णौ पस्पर्श। तस्यैव च महात्मनो मुहुर्महिम्नां मर्म्माण्याख्याय निगमानन्दं तत्रैव प्रेषितवान्।

तत्र गतेन पूर्वापेक्षयापि परतरः प्रणवानन्दस्य परिवादः पर्यश्रावि परं सम्प्रति सम्प्रतीतेन निगमानन्देन पूजास्पदस्य प्रणवानन्दस्य परिव्राजः पापापहरणेन साक्षात्करणेनात्मानं कृतार्थयितुं कृतोऽनल्पः स्थेयान् सङ्कल्पः पदवी-पुरुषान् परिपृच्छन्नसौ प्रणवानन्दस्य पर्णशालायाः पार्श्वतः प्रापत् तत्र च कुटीरद्वारादविदूरे बर्हिषां विष्टर उपविष्टम्, वर्चस्विनं वयोवृद्धम् तत्सकाशे चाहितां चारु-चित्रचषकसहितां लोहितां काचकूपीमालुलोके।

ततः पुटितपाणिः निगमानन्दः 'ॐ नमो नारायणाय' इति नामित-निटिलं निगद्य, निकटे समुपविवेश । प्रणवानन्दोऽपि प्रणयपुरस्सरं विनीतस्य तस्य यथोचितमातिथ्यं विधाय प्रचुरप्रकारं भगवद्भक्तेः, शुभशीलस्य, विभव-विलास-वैराग्यस्य, वरिवस्यायाश्च प्रशस्यं रहस्यं व्याचख्यौ ।

२६. तद्वाचमाचम्य प्रगाढं प्रभावितो निगमानन्दो नितान्तं नम्रतया न्यवेदयत्—'भगवन् ! भवतो विपुलं ब्रह्मविद्यावैशारद्यम्, त्याग-तीव्रा तपस्तेजस्विता, विशिष्टा च विषय-विष-विसर्ग-व्याख्यान-बुद्धिः, तत्किङ्कृते कादम्बरीकाचकूपीं, पेशलं पानपात्रं च पार्श्वतः प्रणिधाय परि-व्रज्या-प्रतिकूलं प्रभावं प्रादुष्करोषि ? एतेन प्रतिष्ठा-पात्रस्य परिव्राजक-प्रवरस्यापि पूज्यपादस्य परिवर्धतेतरां परिवादः पौरेषु' इति । उक्तं च—

सुधीः साधु-स्वभावोऽपि, सर्वसौभाग्य-सम्भृतः ।
लम्पटो लक्ष्यते निन्द्यैः, साधनैश्च प्रसाधनैः ॥ १३ ॥ इति ।

२७. प्रतिश्रुत्येदं प्रणवानन्दः प्रणिजगाद—'नालम्भि कुम्भ इति कुतोऽपि कर्वट-कोणस्थादवकरकूटादाकलितेयं कृपणा काचकूपी, प्रक्षा-लितायां च तस्यां पानीयमपूरि । एष च लाक्षया संयोजितः शकलित-शरीरः शरावः पयः-पानाय प्रणिहितः' इति ।

निगमानन्देन न्यवेदि – 'परमेते कृतान्यथासङ्केते, दूरतो दृष्टमात्रे पानीयपात्रे एव वचनीयतायाः कारणभूते । किमपि कथयन्त्यकारणं कुत्सयन्तो लोकाः । कुतो न परत्र प्रक्षिप्येते एते भ्रामितजने भाजने ?' इति । यदाह—

२८. **येन लोके सुधीर्गर्हामनर्हामधिगच्छति ।**
वस्तु तेनास्ति तत् त्याज्यं वस्तुतोऽर्घ्यमपि ध्रुवम् ॥ १४ ॥ इति ।

दिव्यदृष्टिः प्रणवानन्दः प्रत्यवोचत् – 'महात्मन् ! एतदेव निमित्तं यन्मया काचकूपी-कपालौ कुटीरे निहितौ । कदाचारः कुत्सितश्चास्मीति विश्वतो विख्यातत्वादेव न कोऽपि मामुपैति पुमान् । एवं व्यग्रता-बाधाविरहि-तस्य, सर्वथा सांसारिक-संसर्ग-समुज्झितस्य, सततं सृष्टिस्वामिनः समाराधने संसक्तस्य च मे समयः संयाति । अपि चार्य ! परिव्राजकाचार्य ! विचार्यताम्, यदि मे परिख्यातिः परितः प्रदेशे प्रसरेत्, तदा किं ममापि पार्श्वे कश्चित् सार्थवाहः सुमुखीं सेविकां न नाम निक्षिपेत् ? न च निर्निद्रस्यैव निशा निर्गच्छेयुः ममापि ? अहो ! प्रतिष्ठापेक्षया भूयस्तरां हितावहत्वं वचनीयतायाः' इति ।

२९. तन्निशमनानन्तरं निगमानन्दः 'सर्वथा सर्वसाक्षी परिव्राडयम्' इति परया श्रद्धयोपेतस्तत्पादयोः पतित्वा चिरं चक्रन्द ।

इत्थं मनोवाक्कायकर्मभिः संयमशीलाः जितकामलीलाः महात्मानो रेतो-रक्षणेन न केवलं बलं वर्धयन्तः सानामयं समयं गमयन्ति संसारे, किन्तु काल-कालेऽपि स्थिर-स्वान्ताः सन्तः ससुखं सत्स्वरूपेण सृष्टि-स्वामिना सायुज्यं समुपयान्तीत्यैहिकमामुष्मिकं च स्वस्ति सञ्जायते संयमेनेति ।

परिग्रह-परित्यागः (५)

१. प्रायशः प्रयाताः पञ्चाशत् परिवत्सराः । पञ्चाप-प्रान्तान्तः-प्रतिष्ठिते पट्टपुराख्ये पत्तने कोऽपि पौराणां पूजापात्रं 'पूर्णानन्दपुरी'-नामकः परिव्राजकः प्रत्यवसत् । असौ तीव्रत्यागमूर्त्तिः, विश्वव्यापारविरतवृत्तिः, विलुप्तविषयवासनः, कम्बलैकवसनः, तपताम्पतिरिव तेजस्वी, तनूकृत-तनूस्तपस्वी, प्रकृत्या द्वन्द्वरहितोऽपि मा भूदासक्तं रक्तं वा क्वापि चेत इति नैकत्र स्थास्नुरूपेण न्यवसत् ।

असौ दिवा दूरदेशदेवालयद्वारि, पल्लीपार्श्वपान्थालये वा प्रतिष्ठितोऽथ नैकधा निर्जने नगरनिकटे न्यग्रोधस्य नीचैः, किं वा कृषकैः कुशकाशकाण्डादिकल्पितायां केदारकोणकुट्याम्, निर्भयं निद्रितो निशां निनाय ।

२. स एवं नित्यं कर्हिचित् काननकूपकुटीरे, कर्हिचित् तडाग-तटिनीतीरे, कर्हिचित् पुरातन-प्रासाद-प्राचीरे, कर्हिचिद् वृक्षवाटिकाक्षेत्रे, नेत्रे निमील्य, निरन्तरमन्तरेवैकाक्षरं जपन्नुपासनामयं समयं गमयन्नभूत् ।

बहुधासौ विपिने वा विजने वा विहरन् विटपिनां वल्लीनां च पत्रपुष्पप्रभृतिपर्यशनेन पिचण्डपूर्त्ति प्रकुर्वाणः, पल्लीषु पुरेषु च पुम्भिः प्रदत्तैः, पथिषु प्रतोलीषु च पतितैः पटप्रभृतिभिः पदार्थैः पर्यतृप्यत् । पुरुषेषु पशुषु पतत्रिप्रमुखेषु च प्राणिषु परमेश्वरस्य प्रतिबिम्बं पश्यतस्तस्य न कोऽपि वयस्यो वा विद्वेषी वा बभूव । तदुक्तम्—

३. पुरस्तात् पार्श्वयोः पश्चात्, प्रस्तुतं परमेश्वरम् ।
पुंसु पक्षिषु पश्वादौ, प्रीत्या पश्यन्ति पण्डिताः ॥ १ ॥ इति ।

एवं प्रदेशपरिसरे पर्यटन्नेकदासौ निर्भरनीरदनिर्घोषे प्रदोषे प्रान्त-प्रख्यात-महनीयमहीसुरं 'अहियापुरं' नाम ग्राममुपाजगाम । तत्र चैकस्य देवालयस्यान्यतमां नातिविशालां शालां प्रविश्य, शृङ्खलित-द्वारपक्षः, प्राणावरोधदक्षः, संयमिताक्षः समाधिस्थो दिवसत्रयावधि न बहिः निश्चक्राम । दिवसे-दिवसे देवालयायायिनो भक्तधुरीणा ग्रामीणास्तु

'प्रकोष्ठं प्रविश्य परिव्राट् पुनर्न निर्गतः' इति पूजाकारिणो मुखादकर्ण्य 'क्वचिन्माभूद् ब्रह्मभूयं गतो महात्मा' इति नितान्तं चिन्ताचान्तास्तदधिष्ठितं प्रकोष्ठद्वारं वारं वारं कृतमुष्टिप्रहारं कम्पयामासुः।

४. पूज्यः परिव्राजकप्रमुखस्तु तं प्रबलं कलकलमाकर्ण्य भग्नसमाधिः कथमप्युत्थाय कपाटमुद्घाटयामास। तदीयं तिग्मांशु-तेजिष्ठं प्रसाद-सदनं वदनं विलोक्य मोहितमानसाः श्रद्धावन्तोऽभिधावन्तोऽहम्पूर्विकया पुनः पुनः प्रणेमुः प्रकोष्ठस्य पुरतः प्रतीक्षमाणाः पुमांसः।

परिव्राजः पूजनाय परमप्रीत्युपेतेषु समवेतेष्वेतेषु भूयसा भक्तिभावभरितः, चारुचरितः, प्राणिमात्रे करुणाकरः, पण्डितप्रवरः, दैवलेखकललामः श्रीराधेश्यामः 'न जाने सोऽयं सौम्याकारः, समुत्सृष्टसंसारः, आत्मशासी संन्यासी कियतो विशालात् कालाद् अनासादिताहारः' इत्यालोच्य सपदि स्वसदनमाससाद। तत्र च प्रकृत्यैवातिविनीतया वनितया परिकल्पितं, वातामद्राक्षायोजनं क्षीरभोजनम्, मधुराम्लादिरसरञ्जनं विविधं व्यञ्जनं च कृतमार्जने भाजनेऽह्नाय निधाय पुनः देवालयमुपेयिवान्। तत्र च कोष्ठकोणे कम्बलैकवसनम्, हारिहसनम्, सुखासनासीनम्, लोकोत्तरानन्दलीनम् तमेव पूर्णानन्दपरिव्राजमुपव्रज्य भोजनाय निमन्त्रयामास।

५. स तु विश्वविमुखः सुतरां रहितरसनासुखः, पण्डितेन तेन प्राभृतीकृतान् प्राशनीय-पदार्थानेकीकृत्य पात्रे स्वयं सुभृशेन सलिलेन सम्मेलयामास, सकलं सर्पिः-स्नेह-सैन्धवादि-स्वरूपं स्वादिमानं चालं चालनीकृताभिः करशाखाभिः निश्चोतयामास। एवङ्कृते नीरसं दालि-तण्डुलकणादिकं परिशिष्टं प्राशितं निर्द्वन्द्वेन पूर्णानन्देन। तदाहुः—

६. सन्त्यज्य संसार-सुखानि खानि,
स्थिरात्मना येन वशीकृतानि।
क्षीरे च नीरे किमु तस्य भेदः,
तिक्ते च सिक्ते मधुनाऽदनीये॥ २॥ इति।

एवम्प्रकारेणान्वाहिक-व्यापारेणातिक्रामत्सु द्वित्रेषु दिवसेषु कोऽपि खज्ञानचन्द्राभिधानः,प्रभूतविभूतिनिधानः जैनः पण्याजीवः समुत्सृष्टसांसारिक-स्नेहस्य, दिव्यदर्शनीय-देहस्य, द्वन्द्वातीतस्य, नितान्तं विनीतस्य पूर्णानन्दस्य परिव्राजः सान्निध्यमुपेत्यात्मानं कृतार्थयितुं तत्रागमत्।

७. स तस्य परिव्राजकप्रवरस्य प्रायो दिगम्बरस्य जीर्णं शीर्णं च केवलं कम्बलं विलोक्याविलम्बमङ्कुरितदानमतिः निजनिकेतनान्नव्यं भव्यं कोमललोमकं च कम्बलमानिनाय। पश्चात् पार्श्वे उपविश्य पुटित-

पारिणः विनीतवारिणः परिव्राजं प्रति प्राह— 'महाराज! दुर्बलः कम्बलः भद्रङ्करणानां श्रीचरणानाम्। मयि करुणां कुर्वाणैरत्रभवद्भिः त्वरितं त्यक्त्वेमं प्रतिनवः पारदेशिकः सुखस्पर्शश्च कम्बलः प्रतीष्टव्यः' इति।

८. विहासी संन्यासी व्याजहार—'प्रियङ्कर! अवितथं कथितं सदात्मना त्वया जर्जरो मे कम्बल' इति। परं परदेशीयः त्वदीयः किमेष मेषकम्बलो नित्यदा नव एव स्थास्यति? किं त्वं प्रत्याययितुं प्रभवसि यन्नायं जर्जरतामुपैष्यति? अपि च दयालो! किमुचितमिदं यत् सख्याय समुपेते कस्मिंश्चित् मृदुहासिनि नवे मानवे पुरातनो दृढसौहृदः परिह्रियेत? तस्मान्नीयतामयं कम्बलः। यः कम्बलो दशवत्सरेभ्योऽविरतं मया धार्यते तस्मिन् विद्यमाने सर्वथाऽपरो मया प्रत्येष्टुं नेष्यते। एतेनैव ममेष्टसिद्धिः सञ्जायते। प्रचुराणां पदार्थानां परिग्रहो न केवलमात्मनः परन्तु परेषामप्यापदां पदं सम्पद्यते। अतएव धीरैर्धर्मधुरीयैरभिधीयते—

९. परिग्रहैः पदार्थानां पिण्डिताः पापपङ्क्तयः।
नयन्ति निरयं नूनं दार-दारक-सोदरान्॥ ३॥ इति।

इत्थङ्कारं दैन्येऽप्युल्लासिनः संन्यासिनस्तादृशीं त्यागशीलतामपरिग्रहप्रकृतिं चालोच्योपजात-भूयिष्ठनिष्ठः श्रेष्ठी वाष्पाप्लुतविलोचनः क्षणं यावद् वाचंयमोऽतिष्ठत्। पुनः परिग्रह-प्रादुर्भूतं पापं परिणामं परिज्ञातुं प्रेरितोऽन्तरात्मना प्रोवाच— 'स्वामिन्! प्रत्यक्षतो मङ्गलफलोदयेन परिग्रहेण कथं नामाऽपायः सम्भाव्यते? कथं च संसार-व्यापारसंसिद्धिः' इति।

१०. तदुपश्रुत्य पूर्णानन्दः परिग्रह-परित्यागाय प्रेरयन् पुरातनीं परिकथां प्रोवाद—'भद्र! एकदा वियच्चूडा-चुम्बिनाम्, चर्वणाय चटुलित-चण्डचञ्चूनां चिल्लानां चक्रस्य कर्णकदर्थी तारश्चीत्कारः समाकर्ण्यत। किङ्कारणोऽयं कोलाहल इति जिज्ञासुना भगवता दत्तात्रेयेणोपरि निरूपितम्। एकश्चिल्लः परैः परःशतैराक्रमकामैश्चिल्लैरन्वस्रियत। वराकश्चिल्लो वियति विदूर-विसर्पणव्यायामेन बहुलं व्याकुलो बभूव। स्वल्पसमयात् समनन्तरं सहसा पार्श्वपरिवर्तिनश्चिल्लाः प्रवेगेण पृथ्वीं प्रति प्राधाविषुः, यतश्चिल्लेन चञ्च्वा चिरात् प्रबलं परिगृहीतं पिशित-शकलं पृथिव्यां प्रास्तम्। ततः शङ्काशून्योऽसौ शकुन्तः शान्त्या शाखिनः शिखरशिखायां निषसाद। पिचण्ड-पूर्तिपर्यन्तं पर्याप्तं पिशितं प्राश्य पुनः पिशितस्य परिग्रहेण परैः प्रचुरं पीड्यमानः पतत्री परित्यागेनैव प्रमोदं प्राप्त इति भगवता दत्तात्रेयेणाऽसौ गुरुरूपेण प्रतिपन्नः।

११. परमार्थतः परिग्रह-प्रवृत्तिरेव पुरुषाणां प्रायशो मानसिकीनां वेदनानां निदानम्। वर्तमानकालिकीमात्मनः स्थितिं सञ्जानाना अपि लोका आत्मानं मृत्युञ्जय-कल्पं मत्वा भविष्यच्चिन्ताक्रान्ता अनपेक्षायामपि वस्तुविशेष-वसु-सङ्ग्रहणे सुतरां संसक्तिस्वभावाः सन्दृश्यन्ते। प्रतारण-प्रभृतिना पापेन प्रकारान्तरेणापि वा पूगीकृतानां पदार्थानां प्रयोगेऽनीशा अपि ते परैस्तेषां कुञ्चितेनाक्ष्णा क्षणाय निरीक्षणमपि न क्षमन्ते।

१२. हन्त! हन्त्रीयं पुण्यप्राणानां परिग्रह-प्रवृत्तिः परमेश्वरपद-प्राप्तिपथमपि प्रतिबध्नाति, विचालयति चालं चेतसः स्थास्नुताम्। तथा ह्यनुश्रूयते—पुरा रूपनगरे कस्यचिद् वणिग्वरेण्यस्य विशालमुत्तालं सुन्दरं मन्दिरमासीत्। तस्याधस्तात् कस्यापि धार्म्मिकस्य चर्म्मकारस्य क्षोदीयसी विपणिः बभूव। स तत्र चर्मकर्मविदधानो मधुरिमागारैः, भक्तिसुधासारैः, तारोच्चारैः गानप्रकारैः दिग्देशानपि शीतलयन् वशीचकार।

१३. भवनस्योपरि परिस्तृते सुकुमारतरे विस्तरे शायी मायी पीवरः पण्याजीवः सम्पत्ति-सम्बन्धिन्या सन्ततयाऽशान्त्या चिन्तया चाक्रान्तो नितान्तं सन्तापितं जीवितं व्यतियापयति स्म। परं चर्म्मकारस्य परमात्म-प्रीति-परीतैः गीतैः तस्य परितापपीडोदयं हृदयं कर्पूर-पीयूष-पूरेणेव प्रलिप्तं परमं प्रमोदं प्रापत्। अतः प्रीतेन पण्याजीवेन चर्म्मकाराय पारितोषिक-रूपा रूप्यकाणां पञ्चशती प्रादायि। तदर्पितं रूप्यराशिं निरूप्यैवासौ नितरां ननन्द। ततः प्रभृति 'इयं रूप्यकाणां पञ्चशती कदा कथं च सहस्रतां यास्यति' इति सन्ततचिन्तया चर्म्मारस्य चित्तमश्रान्तं सम्भ्रान्तम-जनिष्ट। युक्तमुक्तमभियुक्तैः—

१४. परिग्रहाय वस्तूनां, तृष्णा या सोत्तरोत्तरम्।
मन्दं मेदस्वितामेति, दुरन्ता चक्रवृद्धिवत्॥ ४॥ इति।

अनयत्त्यां द्रविणैकीकरण-रणरक-शरणस्य तस्य शयनाशन-श्वसनादिकमप्ययथातथं संवृत्तम्। अपाकाद् व्याधिभिर्बलवद् बाधितं बलिष्ठं वपुः। भग्ना भगवद्-भक्ति-भजनभावना। गञ्ज-गौरव-गणनाग्रहेण ग्रस्तानीव गतानि गणेश-गिरिधर-गिरीश-गौरी-गुणगान-गर्भाणि गीतानि। न्यगादि च नीतिनिष्णातैः—

सम्पत्सङ्ग्रहसंसक्ताः, स्वकान् सर्वान् सखींस्तथा।
स्वात्मानं चापि संसारे, विस्मरन्तीति विस्मयः॥ ५॥ इति।

१५. तदन्तरे प्रासादोपरि परिष्ठितेन वणिजा यदा पञ्चषाणि दिनानि यावच्चर्मारस्य भगवद्भक्तिभरितानि पीयूष-परीतानि गीतानि

नार्कर्णितानि तदा पर्य्येषणापरेण तेन परिज्ञातम् यच्चर्मकारोऽपि तैः
चिन्तामयेन महाऽऽमयेनाऽऽक्रान्तो जातः, येनासौ स्वयं तोतुद्यमानो बभूव
अत एवाभाणि वाणी-वैभव-विभूषणैः :—

सोऽयं परिग्रहो नाम, व्याधिः साङ्क्रामिको मतः ।
विश्वतो विद्यमानानां, यो विसर्पति बुद्धिषु ॥ ६ ॥ इति

१६. इत्थं परिग्रहप्रवृत्तिरेव प्रभूतानामनर्थपरम्पराणां कारण
यातीति परिग्रहस्यैवापरं नाम 'दुःखम्' इति ।

सैषा सम्पदेषणापरपर्याया सङ्ग्रह-प्रवृत्तिः जनसमुदायरूपे समा
संवसतो मनुजस्य मनस्याविर्भवति । अपि च बहुधा दुर्भिक्षादि-विवि
विपदापन्नोऽपि पुमान् सङ्ग्रहशीलः सञ्जायते । सामान्येन तु मान
कालान्तरीय-प्रमोद-प्रख्याति-प्रभृति-प्राप्ति-रूपायाः लोकैषणाया हेतोरेवा
काधिक-पदार्थ-परिग्रह-प्रवृत्तिः प्रेक्ष्यते । परमेषा परिग्रह-प्रवृत्तिः परिणा
दारुणानां कारणानां कारणतामुपयाति । तथा हि— परिग्रह-प्रवृत्तेः पुं
प्रतिक्षणं चेतः तस्कर-त्रासात्तोतुद्यते, राजकीयकरविभाग आगस्कृतमिव
वक्रिम-विकृताभ्यां विलोचनाभ्यां वीक्षते । लक्ष्मी-लाभ-लोलुभाः परिज
अपि प्रायेण तं प्रति प्रलम्भपूर्णं प्रेमाणं प्रथयन्तः परिचर्य्यासु प्रवर्तन्ते
नासकौ निर्भरं निरामयं निद्रानन्दमपि निर्विशति ।

१७. परिग्रह प्रवृत्ते पुरुषे पञ्चत्वं प्राप्तेऽपि तत्परिगृहीताः पदार्थ
पुत्रपत्नी-प्रमुखाणां परिजनानां परस्परं कलहाय कल्पन्ते । परमार्थतो य
कौशेय-कीटः स्वमपरिमाणं गरिमाणं ख्यापयितुमात्मानं परितस्तन्तुतं
तनोति । कालान्तरे च सैव तन्तुततिस्तस्य प्राण-प्रणाशिनी प्रजायते । तथं
परिग्रह-प्रकृतिः पुरुषोऽपि पार्श्वे पुञ्जितानां पदार्थानामेव हेतोः प
मोषिभिः परैः परिजनैर्वापि परिपीड्यते प्रणिहन्यते वा । तदेवोदीरय
धीराः—

१८. **वित्तानि सङ्गृहीतानि, हितानीत्यल्पमेधसाम् ।**
जामातृभिर्विभज्यन्ते, संसारान्ते विहासिभिः ॥ ७ ॥ इति

किं नालोकि यत् सततं सर्वतः सम्पतन्तीभिः सरघाभिः सा
सङ्गृहीतं सुमासवं प्रसभं परिमुष्णन्ति परे । सैव स्थितिः सम्पदां स
यिनां सम्पद्यते ।

प्राणिमात्रभरणपरायणाया अन्नपूर्णायाः प्राणेश्वरो भवन्नपि क
कालो महाकालो भगवान् भूतेश्वरो दिगम्बरः करकलितकर्परश्च 'परि
प्रकृतिः परिहरणीया' इति प्रथयति ।

१६. पुराण-प्रकरणेषु पदे-पदे प्रख्यात-प्रतिष्ठेन महर्षिणा लोमशेन यत् पुनः-पुनः प्रेरितेनापि पौरुहूतं परमं पदं परिहृत्य प्रदेशात् प्रदेशं पर्यभ्रामि तदपि पदार्थेषु परित्याग-प्रवृत्तिं प्रबलतया प्रमाणयति। उदचारि च चारुचरित्रैश्चतुरैः—

—युग्मकम्—

पदार्थान् प्रचुरान् माति, समस्ते दिवसे तुला।
परं सायं स्थितिस्तस्याः, औषस्येव प्रजायते॥ ८॥
विविधैः वस्तुभिस्तद्वत्, पणायन्तोऽपि संसृतौ।
सन्त आजन्म जायन्ते, परित्यागप्रवृत्तयः॥ ९॥

अपि च— कूपान्निर्याय नीरेण, प्रायः पूर्णमुदञ्चनम्।
पूरयन् कलशानेव, स्वयमभ्येति रिक्तताम्॥ १०॥
एवं महात्मनां नूनं, नानाकर्माणि कुर्वताम्।
परेषां पोषणायैव, सङ्ग्रहाय न जीवनम्॥ ११॥

२०. किञ्च—पूर्वोच्छ्वासस्य नो वातो, वान्तो यावद् विजायते।
अपूर्यस्तावदुच्छ्वासो, द्वितीयः सर्वथा भवेत्॥ १२॥
दृष्टान्तः शाश्वतः सोऽयं, परमात्म-प्रदर्शितः।
'परिग्रहः परित्याज्य', इति प्रेरयतीव नः॥ १३॥ इति।

तदाकर्ण्यातीव प्रीतः पण्याजीवः 'सम्प्रति वैराग्यबुद्धिरपि परिव्राट् कालान्तरे कमनीयं कोमलं च कम्बलं किल स्वीकरिष्यति' इति सम्प्रधार्य स्वैरं कम्बलं परिव्राजकस्य पृष्ठप्रदेशे कोष्ठ-कुड्य-कीलके समालम्ब्य प्राप्ताशीः गृहान् प्रति न्यवर्तिष्ट।

२१. प्रयाते परित्याग-प्रकृतौ परिव्राजक-प्रवरे देवालयमागामुकैः लोकैः स एव नवः कम्बलो नागदन्ते ऽवलम्बमानो व्यलोकि।

एवं 'येन दयामयेनाद्यादायि स परेद्युरपि किं न प्रदास्यति?' इति प्राणवतां परिपालके परमेश्वरे प्रगाढ-प्रत्ययाः तथा तृष्णात्यागिनो महीयांसो न खलु प्राणान्तेऽपि प्राप्ते परिग्रहप्रवृत्तयो जायन्ते। कथयन्ति च— 'कष्टकरी काञ्चन-कीर्त्यादि-कामना मनागप्यामुष्मिकाय कल्याणाय न कल्पत इति परित्याज्या प्रचुर-पदार्थ-प्रचयन-प्रकृतिः। अपरिग्रहो हि मन्यते मूलं मानवमात्रमाङ्गल्यानां मान्यैः मनीषिभिः इति।

विश्वात्मनि विश्वम्भरे विश्वेश्वरे विश्वासः (६)

१. पाञ्चाल्याः चिकुर-चीराकर्षण-प्रयासान्ते, व्रीडाविस्मयाक्रान्ते सुतरां सम्भ्रान्ते, परिश्रान्ते, शूत्कार-श्वासिनि, पश्चाच्च प्राप्ताः दुःशासने, परापर-प्रमोदवर्जितो भव्याऽभव्य-तर्जितो विसर्जितोऽजा कौरव्यादि-सभ्यसमाजः। तद्विषय-वार्ताव्यतिकरेणैव व्युष्टा व विभावरी विश्वेषां विष्वग् विषय-वासिनाम्।

अथ दुःसह-दीर्घ-शोचना, सन्तत-रुदितोच्छून-लोचना, म्लानि मिलित-मञ्जुवदना, दैन्य-वेदना-सदना, निर्भर-नैराश्य-सहिता, द्रुप दुहिता, सर्वतः सन्त्रस्ता, विस्रस्ताशेषवेषा सती सती सतीव्रक्लेशं विवे स्वनिवेशम्।

२. सा तत्रैकतो निरन्तरं निर्निमेष-नयननलिनम्, अमलि मुद्रित-मनोहारि-मुखम्, सागर-गम्भीर-धीरस्वान्तम्, भाविसम्प्रहा संहार-चिन्तयाचान्तमपि नितान्तं शान्तम्, नीतिविदां वरम्, पीताम्ब हरिं विलोक्य अजस्र-किरदस्रनिकरा, सहिक्कितोच्छ्वसिता कृतोपा म्भारम्भं वचो व्याजहार—'प्रिय मधुसूदन! त्वं दीनानां सहायहीना पराधीनानाम् आत्मनीनानाम् अन्येषां च सर्वदा सर्वथा सङ्कटेषु संव संविधत्स इति सन्तस्तव वास्तवं स्तवं तन्वन्ति। मां तु विशेषतः सत्य सन्धस्त्वं स्वयमेव स्वकां स्वसारमिव लालनीयां पालनीयां नित्याहितहि स्नेहितां च समुद्दिशसि तेषु तेषु कथान्तरेषु। परमद्य दिने लोकमर्या भङ्गाऽभीरुणा, सभ्यैरप्यक्रुष्टेन दुष्टेन दुःशासनेन सभासद-समूह-सम्मु खलीक्रियमाणां मामनुपस्थायोपेक्षाबुद्धिं प्रपञ्चयतः, सर्वसमर्थस्य, विश्व व्यापिनः, सर्वसाक्षिणश्च क्व गतमभूत्ते दीनबन्धुत्वम्, द्राग् दुर्बल-दु दलन-दीक्षितत्वं च? कुररीमिवामन्दाक्रन्दां सर्वतोऽसहायां हा! परित्रातुं भ्रातापि नायातः, का नामेतरा ततोऽधिकतरा तपस्विनी दुर्भ भगिनी सम्भवति व्याज-व्यञ्जित-बन्धुतादि-व्यवहारे, विलुप्तसारेऽस्मि संसारे। मृताहमनादृता। आः! अधरयन्तो धीरताम्, व्रीडयन्तो वीरता प्रथयन्तः कृपा-कार्पण्यम्, कथयन्तः क्लैब्यम्, अवज्ञात-कौल-कौलीन आत्मग्लानि-विलीनाः, घूका इव मूकाः, कुण्ठित-कीलितोत्साह

साहाय्यमपहाय पाञ्चाल्या: पञ्चापि प्रिया: ह्रिया पञ्चतां प्राप्ता इव तस्थु:। श्वसना: श्वसुरा अप्यसुरा इव विलुप्तसत्त्वा वक्रिमवदना बभूवु:। आर्या आचार्या: प्रस्मृतात्मकार्या नयने निमील्य नूनं निरुपाया निष्क्रान्ता निलयाद् इति। यतोह्युक्तम्—

३. **पापजन्यं जघन्यं चानर्हितं गर्हितं च यत्।**
तत् प्रकृत्यैव शालीना दिदृक्षन्ते न सज्जना:॥ १॥ इति।

तस्यास्तादृशीं विशेष-क्लेश-करम्बितां वाणीमाकर्ण्य निर्वात-निष्कम्प-नीरद-निश्चलचेता: स्वैरं स्मयनो मुरारि: सुकुमारया मिलित-मधु-धारया गिरा तां सुतरां सान्त्वयन् समभ्यधात्— 'भगिनि! सर्वथाऽलीकाऽकारणा च तव विचारणा धारणा च, यत् कृतागसं मां व्यावर्णयसि। सत्यं साक्षिकं स्वीकृत्य समीचीनं मामकीनं वचनं शृणु। कात्स्न्र्येन विश्वास-विरहितया त्वयाऽनन्यभावेन नाहमाहूत: पुरस्तात्। तथा हि—

४. विगीतैरविनीतैरपमानार्थमुपानीतायां त्वयि सभायाम् प्रीतात्मीयजनहासने दु:शासने वचनीयावचनीय-व्यापार बद्धपरिकरे, पूर्वं त्वया 'लोकलज्जा-धिग्वाद-दरात् कोऽपीह नानादरं मे विधास्यति' इति चेतसि व्यचारि। न चाहं लेशतोऽपि संस्मृत:। परस्तादुपास्येषु प्रशस्येषु नमस्येषु च सदस्येषूपाहितविश्रम्भया त्वयेदं चिन्तितं यदिमे प्राज्यं पूज्या: विधीयमानं ममावमानमसहिष्णव: तर्जयिष्यन्ति वर्जयिष्यन्ति चामर्षिणं केशकर्षिणं धर्षिणम्' इति परं कालान्तरीय-दारुणरणस्य दुर्वारत्वात् त्रपाक्षेत्रेषु जातेषु तेषु नतनेत्रेषु, दुष्टेन द्विष्टेन प्रबलं पाणिना परामृष्टेऽपि च शाटिका-पटान्ते, कल्याणिनि! न विचारितो हं न चाकारितोऽहं त्वया। तदनु प्रथमं 'पञ्चसु पञ्चास्य-प्रतिमेषु विश्वविदितावार्यवीर्यगाथेषु प्राणनाथेषु, शिष्टेषु चोपविष्टेषु सत्सु कोऽपि मे प्रतिष्ठा-प्रविलोपाय न प्रभविष्यति' इति पूर्णप्रत्ययया त्वयाऽभावि। परं परस्तात् तानपि निस्त्राणान् निष्प्राणान्, विस्मृतजायान्, मलीमस-मुखच्छायान्, निरुपायान् स्वयमप्यसहायान्, कार्मुकीकृतकायान् तथा जडप्रायान् प्रेक्ष्य, विषम-वनवह्नि-विपन्नयेव, बहुल-व्याल-विकराल-विजन-विक्षिप्तयेव, विपुल-वीचिवार्धि-वारि-विभ्रम-विध्वस्तयेव च त्वया स्तोकमपि नाहं स्मृति-मुपानीत:।

५. परत उपरताशया निकट-प्रतिष्ठा-विनाशयाऽपि केवलमात्मबल-विश्वासया त्वया शयद्वयेन दृढमाबद्ध: शाटिका-कटिबन्ध:। परञ्च

बलीयसा विद्वेषिणा प्रक्रान्ते ते लज्जापटाकर्षणे, क्रमेण शनैः-शनैः शिथिले पाणि-प्रग्रहे, एकपद एव बन्ध्यतामुपेयुषि च तवात्मपरित्राणपौरुषं, पूर्णतया प्रलुप्ताशयाऽस्मानं मुषिताभिमानमवेदीः । सहसा पाणि-प्रग्रह-प्रच्यवे पतयालौ च परिधाने, त्वयाऽबलया सर्वतोभावेन मय्यात्मानमर्पयित्वा यावदेव 'हे दीननाथ! पाहि' इति सखेदं निर्भर-निर्वेदं चोदाहारि, तावदेव ते वासुदेवः स वासोरूपतामुपेतः प्रतिष्ठा-परित्राणाय। अयि मङ्गलमयि! अहं तु चीरहरणादपि प्रागचिरादेव शाटिकाशतान्यादाय विकटेऽस्मिन् सङ्कटे निकटे तवाप्रकटेनाकारेण तवाहूर्ति प्रतीक्षमाणोऽभूवम् । यदा त्वयाऽपरत्र प्रत्ययं परित्यज्य सर्वथा मय्येव परित्राण-व्यापारो न्यस्तः तदैव ते दैवमनुकूलयन् साहाय्यमकार्षम्। अतो लेशमात्रमप्युपालम्भपात्रं मा मा मन्यस्व' इति ।

६. अथ कृतवेदितां प्रकाशयन्ती पाञ्चाली प्रावोचत्—'समीचीनमाचष्टे भवान् भगवान्। नाभून्मे मनसि सर्वसमर्थे कर्त्तुमकर्त्तुमन्यथा कर्त्तुं च प्रभवति भवति पूर्वं प्रत्ययः। प्रोक्तं च प्राग्भिर्यत् परमार्थतो विपत्पीडा-परिहार-प्रकारः परमपदप्राप्तिपथ-प्रारम्भश्च परिपूर्णतया परमेश्वरे प्रत्यय एव इति।

पुनः परमः प्रभुः पीताम्बरः पाञ्चाल-पृथिवीपाल-पुत्रीं परिबोधयन् प्रावोचत्—'सुभगे! भगिनि! नैराश्याक्रान्ते तव स्वान्ते पूर्वं तु स्तोकोऽपि समाश्वासो मयि तथा नाभूद् यथा भोगानन्दपूजाकारिणः' इति ।

७. सा पप्रच्छ-'कथमेतत्'? इति। श्रीकृष्णोऽचकथत्—'कोऽपि भगवद्-भजन-भावनो भिक्षुः प्रदेशेषु पर्यटन् पुरा द्वापरे पट्टपुरं पत्तनं प्रापत्। तत्रासौ वापीतटनिकटे दिवसद्वयावसायाय संवासाय किञ्चित् सुन्दरं देवमन्दिरमुपाजगाम। तत्रत्यो देवलकस्तमाचख्यौ— 'संन्यासिन्! यथासमीहित-समयावधि ससुखं संवसतु सुरसदनेऽस्मिन् भवान्। परमत्र प्राशन-पदार्थ-व्यवस्था सर्वथा नास्तीति भोजन-संविधा स्वयं कापि करणीया भवता' इति। तदुक्तम्—

विस्मृत्य सर्वथात्मानं, भक्तो विश्वम्भरेण चेत्।
अद्वैतमाप्नुयाद् नूनं, स्यात् स विश्वम्भरः स्वयम् ॥ २ ॥
नश्वरे प्रत्ययो लोके, नेश्वरे शाश्वते परम्।
यस्य भिक्षुर्बुभुक्षुः सः, कस्मै किं दातुमीश्वरः ॥ ३ ॥

तथा च— देवलः केवलः शश्वत्, प्रभोः पार्श्वे वसन्नपि।
गुणांस्तस्य तु नादत्ते, स्वयं त्वश्मत्वमश्नुते ॥ ४ ॥ इति।

८. परिव्राजकः प्रोवाच—'पूजाकारिन्! प्रोक्तोऽस्मि ते प्रतिवेशिना यदहं प्रत्यहं पञ्च रोटिकास्ते प्रदास्यामि' इति। प्रतिमा-पूजकः प्रावोचत्—'तर्हि समस्तं समञ्जसम्। सम्प्रति सुतरां वीतचिन्तेन भाव्यं भवता। यतो हि सत्यसन्धोऽसौ मे प्रतिवेशी' इति।

तच्छ्रुत्वा निर्विण्णचेताः दूरमुच्छ्वासी काशीवासी संन्यासी स्वासनमुन्नमयन् निजगाद—'धर्मात्मन्! नेदं स्थानं मे संवासोचितं रुचितं च। न चापि त्वं देव-सेवा-समुचितः। यतो हि परमेश्वरस्तु विश्वम्भरः। स समेषां स्वोपासकानां सदा पालन-पोषण-प्रवृत्तो योगक्षेमं वहतीति नात्राल्पोऽपि विकल्पः। तस्मिन् क्षुल्लके प्रतिवेशिपुरुषे ते पूर्णः प्रत्ययः, न तु सर्वसमर्थे परमपुरुषे। किं परमेश्वरः प्राकृतपुरुषप्रतिमोऽपि प्रत्येतव्यो नास्ति? त्वं तु तुषार-तुल्य-तोषण-तोयायाः तटिन्यास्तीर-तरङ्ग-ततिषु तरन्नपि तीव्रं तप्तः तृषितश्च, निराश्रय-नैराश्यनाशनस्य, निःसीम-नन्दन-निधानस्य नारायणस्य निकेतने निवसन्नपि नितरां नास्तिको निरस्त-निष्ठश्चासि। परम-प्रभोः प्रतिमां पाषाणप्रतिमां त्वं बुध्यस इति तर्कयामि। त्वयि चन्द्रचूड-तुल्योऽपि विश्वेश्वरे विश्वासो न विद्यते यः परमेश्वर-पूजके पूर्णतयाऽपेक्ष्यते' इति।

९. पूजाकारी पप्रच्छ—'कोऽसौ चन्द्रचूडः कथं च तद् वृत्तम्'? इति।

परिव्राजकः प्रोवाच—'आसीत् पुरा प्रतीच्यां प्रचुर-प्रख्याते परशुपुरे कारुण्यकर्मा देववर्मा' इति नामधेयः कोऽप्यपुत्रो महामतिः महीपतिः। विधिवशादेकदासौ मधुमेह-व्रणविशेषवाधितो वाढं व्याधितोऽजायत। चतुरैश्चिकित्सकैश्चिरादुपरचितोपचारोऽपि नायमनामयमियाय। पुष्कल-प्रयत्न-पर्यन्ते निर्भरं निराशैः निखिलैरधिगत-वैद्यविद्यापारैरगदङ्कारैः मिथो मन्त्रयित्वा निरणायि यदमुकलक्षणधरस्य नरस्य रक्ताशयः पित्ताशयश्च यदि लभ्येत तावदेव देव-दारुण-दुःख-दमनं भव्यमौषधीयद्रव्यं निर्मातुं शक्यते, नान्यथा' इति।

१०. उपलभ्य देशाधीशादेशं परितः प्रतीची-हरितः प्रदेशान् परि-मार्गणपरायणैः पार्थिव-परिजनैः प्रापि कोऽपि कृपण-परिवारस्य प्रेप्सित-विलक्षण-लक्षणोपेतः पृथुकश्चन्द्रचूडो नाम। अपरेऽपि भूयांसो भ्रातरो बभूवुस्तस्य वराकस्य बालकस्य। पितृभ्यां प्रचुरं प्रतिदानस्वापतेयं प्राप्य पृथ्वीपतेः प्राण-परित्राणहेतोः प्रादायि प्रमापणायासौ। उपनीतो विनीतो बालश्चन्द्रचूडः प्राणाचार्याणां प्रमुखे, उक्तश्चोपयुक्त इति।

ततः पुण्यप्राणेन प्रजापरित्राणेन कृपाशीलेन प्रकटितलीलेन पृथिवीपालेन पृष्टा धर्माधिकारिणः 'किमिदं गुण्यं पुण्यं वा न वे'ति। तैर्निभृतं निरणायि यत् पृथ्वीपतेः प्राण-परिरक्षणाय प्रजासु पञ्चषाणां पुरुषाणां विषादने वा व्यापदनेऽपि वा विहिते नापकारी न पापकारी जायते जगतीपतिः' इति।

११. नियतेऽनेहसि माङ्गल्ये मुहूर्त्ते वैद्यानां व्यवस्थानुसारेण बालश्चन्द्रचूडो महीपमुपानीयत। कृतेष्टाराधनाः सज्जितसाधना उलूखल-मुसल-धारिणो रोगहारिणोऽप्युपविविशुः। कृतोऽपि निष्कोशो निस्त्रिंशो निर्भरं निर्मृज्य नभसि नीत्वा निर्धूय च निस्तब्धो निहितो नरेश-निदेश-निघ्नेन नृशंसेनापि निहन्त्रा। नितरामनुकम्पी कम्पीव चान्तरात्मनि कियद्धीरो वीरश्चायं बाल इति निर्णिनीषुः भूभर्त्ता तस्य प्रतीकारं वदनविकारं च प्रत्यैक्षिष्ट।

विषाद-बहुलेऽप्यस्मिन्नवसरे विशङ्को वालो विहायसं विलोकयन्नुच्चैः जहास। तन्निरूप्य नरनाथः तरवारि-धारिणं वधकारिणं प्रहार-व्यापाराद् वारयन् भूयः पृथुकं, पप्रच्छ— 'प्रिय-पुत्र! कुतो न्विदं व्यञ्जितौदास्यं प्रसन्नास्यं हास्यम्?' इति।

१२. तदुक्तमुपयुक्तम्— प्राप्तेऽन्तकाले तु मलीमसं मुखं,
न जायते कस्य च तायतेऽसुखम्।
तदापि यः स्यात् पुरुषः प्रसन्नः,
वेद्यः स वै विश्वपतिं प्रपन्नः॥ ५॥ इति।

अथ तेनावनीशेन तथानुयुक्तो बालश्चन्द्रचूड आचचक्षे— 'महाराज! यस्या वंशविभूतेः प्रसूतेः परिरक्षणाय पितरौ प्राणानपि परित्यजतः, सैव प्रसूतिस्ताभ्यां वात्सल्य-विधुराभ्यां वधविधानाय वर्करवद् विक्रीता वसु-विलोभात्। सत्यैकपक्षैः विहित-व्यवहाररक्षैः न्यायदक्षैः धर्माध्यक्षैरपि दीनस्य दोषहीनस्य मे निहननं समीचीनं शास्त्रानुसारमुचितं तर्करुचितं चावाचि। यः पृथिवीपतिः प्रकृत्याः परिपालकः पिता प्रोच्यते सोऽप्यात्मम्भरिर्भूत्मा धीरधुरन्धराणां धराधीशानां धर्म-धोरणीमवधीरयन् प्रजास्वन्यतमस्य वाच्यता-विरहितस्य विशुद्धस्य वराकस्य बालकस्य वधकेन व्यापादन-विधानं यथान्यायमनुमन्यते। ईदृश्यां विवशायां दशायां विषमायां कोऽपि विकल-करणोऽशरणश्च परिपालन-प्रेप्सया कं प्रपद्येत? कस्य पुरतो विनिवेदयेद् वेदनां दूनो दीनः? विधि-विधुरो दुर्विधोऽहमपि तथा-विधां दुरवस्थामास्थितोऽस्मि। सम्प्रति विश्वात्मानं विश्वेश्वरमभिलक्ष्य

व्योम वीक्षमाणेनाहासि व्यचारि च मया यत् 'हे सृष्टि-स्वामिन्! समालोकिता सकला लोक-लीला, इदानीं तेऽपि विलक्षणो व्यापारो वीक्षणीयः, किं करिष्यस्यन्तकेनोत्तोलितस्य तलवारेः ?' इति। विश्व-वशीकारविद्या वै विश्वेश्वरे विश्रम्भः।

१३. तथा चोक्तम्—विहाय संयान्ति यदा स-मायाः,
स्वकाः सखायश्च समे सहायाः।
तदा विपन्नस्य नु कोऽस्ति जन्तोः,
त्राता विनेशं परलोक-गन्तोः॥ ६॥

तथा च—न लोके प्रसरच्छोके यस्य कश्चन जायते।
शम्भूस्तस्याभिभूतस्य रक्षी पक्षी च जायते॥ ७॥ इति।

तदाकर्ण्य 'क्षन्तव्यो मेऽपराधो वत्स !' इत्यादिभिः वचनैः नैकशः क्षमां भिक्षमाणः क्षमानाथः स्वस्तिमुखः स्वमौलेः मुकुटमवतार्य किञ्चित् काञ्चनमयैः मेचकैश्चिकुरैः रुचिरे चूडाले तस्य मस्तके निभृतं निदधे। नैवमेष निस्त्रिंशो भूय उद्यंस्यति, पालयाग्येनानेन च प्रजा इति प्रवदन् महीप-मुद्राङ्कित-मुष्टि कनककोशं कमनीयं कृपाणं तस्य कक्षे स्व-कराभ्यां बद्ध्वा 'समानां सहस्रं सुखानि सेवमानो जीव्याज्जगज्जेता प्रकृति-परित्राता प्रभु-प्रत्ययो नवो नृपतिश्चन्द्रचूडः' इत्युच्चैस्तरामुच्चारयामास।

१४. तदाहुः— दैवं यदेशः कुरुतेऽनुकूलं,
स्यात्तावदंहोऽपि विलूनमूलम्।
भयावहं यत् किमपीह शूलं,
तूलं भवेत्तच्च तथा दुकूलम्॥ ८॥ इति।

परिव्राट् पुनः प्रोवाच—'पूजाकारिन् ! त्वत्तस्तु प्रभावती प्रगाढं प्रभु-प्रत्ययिनी प्राजायत' इति। स आह—'कृपालो ! कथय कथं तस्याः कथानकम्' इति। परिव्राजावाचि—'अस्ति सदा सञ्जायमान-सैन्य-संनिवेशे पञ्चाम्बुप्रदेशे ग्रामकः सुनेत्र-नामकः। पुरा महापुराकारेऽस्मिन् खेटके शूरसिंहो नाम नरनाथः परमेश्वर-प्रत्ययी भगवद्-भक्तो बभूव। तस्यैका भूयो भगवद्-भजनानन्दिनी सुन्दरी नन्दिनी समजायत। नृपतिना निभृतं निरणायि यद् विश्वम्भर-विश्वस्तां शस्ताङ्गीं सुकृत-सौजन्यां धन्यामिमां कन्यां तस्मै प्रदास्यामि यो लावण्योद्भासी विषयोपहासी धर्मोल्लासी करणशासी विशेषतो विश्वेश्वर-विश्वासी तत्त्वतस्तीव्रत्यागी वैभव-विरागी च जायेतेति। परं प्रचुर-पर्येषण-परेणापि पार्थिवेन प्रेप्सितः पुत्री-परिणेता न प्राप्तः। जाता विंशतिवर्षदेशीया जाता। एकदा

महीपेन कश्चिन् मुदित-मुखो निर्द्वन्द्वो निर्लोभः त्यागात्मा तपस्वी तरु निरञ्जनानन्दो नाम निर्वर्णितः। वसन-विहीन-वपुषो वपुष्मतस्तस्य धिकारे किमपि वस्तु नास्ति स्म। पृथिवीपतिस्तं परमेश्वर-प्रतिमायाः पु नितान्तं निष्ठया निमीलितनयनं नमित-निटिलं च न्यरूपयत्। देवावास निष्क्रामन्तं तं प्रजापतिरप्राक्षीत्—'पुत्र! कुत्र ते निकेतनम्?' इति। आह—'अम्बरावरणा धरणिः' इति। प्रजापः पप्रच्छ—'कस्ते साधन-समू इति। युवकोऽवादीत्—'नारायण-चरण-करुणैव ममोपकरण-सम्भरण इति।

पार्थेन पुनः पृष्टम्—कुमार! कथङ्कारं कालं कलयसि? इ तेनोक्तम्—'यथा कामयते कमलापतिः' इति।

१५. एवं तस्य कथोपकथनैः सुतरां सन्तुष्टेन नृपेण निरणा यदेष विश्वेश्वर-विश्वासी विश्व-वैभव-विलास-विरत-वृत्तिश्च वर्त यादृशं पुण्य-परायणं पुत्र्याः परिणेतारं प्रेप्सुः परितः परीक्षमाणोऽभू कृत्स्नशस्तादृश एव प्रेप्सितः प्रेषितः परम-प्रभुणा' इति।

कृत-सम्बन्ध-निर्बन्धेन भूभुजा स्वसुतायाः त्याग-विरागादि नगणेयान् गुणान् वर्णयित्वा तेन सह व्याजविरहितेन विधिना विव विहितः।

भूमिभृतो दुहिता दयित-सहिता विपिने वटविटपिनमेकमशिश्रिय तत्र सा वट-कुटस्य कोटरे मार्त्तिके पान-पात्रे निहितं स्नेह-रहितं सैन्ध सहितं रोटिका-शकलमेकमालुलोके। कौतुकाकुलिता चाऽपृच्छत् 'प्राणेश! कस्य हेतोः प्रणिहितेयं रोटी?' इति।

१६. नवयुवकेनावादि—'प्रिये! रजनी-भोजन-प्रयोजनाय र रक्षितोऽभूदयमंशो रोटिकायाः' इति।

तन्निशम्य नितान्तमन्तःसन्तापिता राजदारिका रोदितुं प्रक्र निराशा भूत्वा च पितृ-निकेतनं प्रतिनिवर्तितुं सज्जा सञ्जाता। तदुप वेदना-निवेदनं विदधानेनेव तेन तरुणेनाख्यायि—'मया तु पूर्वमेवेदमं यद् विलासोल्लास-बहुले भूप-भवने लालिता पालिता च त्वं मत्तु कृपण-कुल्येन साकं चिराय जीवन-वेलां वर्त्तयितुं न प्रभविष्यसि अत एवोक्तम्—

> **भूयिष्ठ-धन-धान्यस्य, ध्रुवं मान्यस्य दारिका।**
> **वृता दीनेन बोद्धव्या, छुरिका मर्म्म-दारिका॥ ९॥** इति

१७. प्रजाप-पुत्री प्रावोचत्—'नाहं दुःसहेन दरिद्र-दशा-दुःखेन मुक्ताशा मातृ-मन्दिरं यियासामि। मम त्विदमनुभूय भूयस्तरां दोदूयते चेतो यद् भवतो भगवति विश्वम्भरे विश्वासो नितान्तं न्यूनतामुपेतः। अत एव तु परेद्यवि किं प्राशनीयमिति चिन्ताचान्तेन लोभवता भवता रोटिकांशो रक्षितः। अहमद्यावधि एतस्मात् कारणादपरिणीताऽभूवं यत् कोऽपि परात्पर-प्रभुप्रत्ययी पतिः प्राप्येत। प्राज्यं पर्येषण-प्रयासं प्रतिपद्य मम पित्राऽविगीतो मनोनीतो भवान्। मया त्विदं तर्कितं यत् चिरात् प्रार्थन-प्रतिपालन-परायणाया मे प्राणनस्य परिपूर्णः परमो मनोरथः, परं भवतस्तु रोटिका-शकल-परिमाणोऽपि विश्वात्मनि विश्वासो न विद्यत इति तीव्रं दुःखायते नैराश्योपेतं मे चेतः। अत एवोक्तम्—

विश्वव्यापिनि विश्रम्भो, यस्य कात्स्न्र्येन जायते।
सम्मुखे तस्य नायाति, दीनता न च हीनता॥ १०॥ इति।

अथासौ वल्लभाया उन्मुद्रितान्तर्लोचनं तर्करोचनं वचनं निशम्याऽत्मनस्त्यागस्य तुच्छतरत्वादपत्रपा-पात्रतामुपेतः सशङ्कातङ्कमाचचक्षे—'प्राणेश्वरि! तत्त्वतो गर्हितं भीरुता-भरितं दुरितमाचरितं मया। किमस्य पातकस्य प्रायश्चित्तं प्रतिविधीयेत?' इति।

जगतीपति-जाता जगाद—'न किञ्चित् प्रायश्चित्तम्। उभयोरेकतरं रक्षणीयं क्षणेऽस्मिन्, अहकं वा रोटिका-खण्डकं वा' इति।

एतया सत्य-समवेतया वाचाऽन्तरुद्बोधित इव शोधित इव चासौ तरुणस्त्वरितं तत्याज तां सकरोटीं रोटीम्' इति।

१८. यदुक्तमभियुक्तैः—

पूर्यते कलशो रिक्तो, न तु प्रागेव सम्भृतः।
तस्मात् त्यागो विधातव्यः पूर्णतां प्रेप्सुना पुनः॥ ११॥

किं च— **सञ्चिन्वन् सुखसामग्रीं, दर्शयन् दीर्घदर्शिताम्।**
धृष्ट-धुर्यो न धिग् धत्ते, प्रत्ययं परमे प्रभौ॥ १२॥
यः खलीक्रियते दीनो, ह्न्ताद्यश्वीन-चिन्तया।
परब्रह्मानुरागी स्यात्, त्यागी चासौ कुतः पुमान्॥ १३॥ इति।

परिव्राजकः पुनः प्रोवाच—'पूजाकारिन्! येनोदरदरीधरं देहमदायि दायिना, सोऽदनायापि दास्यति दीनाय। योऽदाद् ददाति च स परेद्युरपि प्रदाता समस्तसम्पत्-समर्पिता परमपिता विश्वम्भर इति।

२०. एवमनन्यमनाः पूर्णप्रत्ययवान् यः तवास्मीति विश्वात्मनि विश्वेश्वरे साकल्येन स्वं समर्पयति, दीनो ग्राह-गृहीत इव गजः

सकृदपि च 'प्रभो ! पाहि' इति प्रार्थयते, तं परिपात्येव परात्पर परमेश्वरः' इति ।

अनयत्त्र्या 'निपाने वा निपातय प्रेप्सितं पदं वा प्रापय' इति नि चिन्तयता यथार्जुनेन स्वकीयस्य स्यन्दनस्य वाजिनां वल्गाः भगव श्रीनन्दनन्दनस्य पाणौ समर्पिताः, प्रापि च प्रबल-प्रत्यर्थि-प्रमथन प्रमोदप्रदः पुण्यः परिणामः, तथैव यः स्वजीवनरथं विश्वात्मने विश्वेश्वरा समर्पयति, निःसंशयं तस्य कल्याण-निधानं पर्यवसानमिति द्रुपद-दारि याश्चन्द्रचूडादेस्तथा न कं कथानकं प्रदर्शयति पावनं पुण्य-प्रव पन्थानम् इति ।

सदात्मा महात्मा (७)

१. अस्ति समस्त-संसार-संस्तुतः, सस्य-सम्पत्संयुतः, शश्वच्छात्रव वित्रासनः, शौर्य-गौरवगाथासूल्लासनः, दैन्य-दुःखोज्जासनः, भूयः-सौभाग्य भोगोपासनः, भूगोल-देशचित्रोद्भासनः, हिमाचल-सवेशः पञ्चनद-प्रदेशः तत्राम्नाय-मर्ममार्गणमग्न-महामान्यमनीषिमण्डले, मण्डले होश्यारपुराभि ऽभिख्येयो वर्तते अहियापुरनामा ग्रामाधानः । तस्मिन् सदेशेषु प्रदे परिव्राजक इव पर्यटन् सात्मीभूत-सारल्यः, सौम्य-साधु-स्वभावः, सौज सत्यस्वरूपः, सर्वदा स्मेरास्यः, मृदु-मधुर-मितभाषी, प्रायः प्रातः-प्रदो परमेश्वर-पूजा-प्रवणः, विविध-वराऽवर-वर्ण-विनत-व्यक्ति-वशवर्ति-वयस्य शौच-शौर्य-शिष्टत्व-शोभितः, शुभ-शालीन-शीतल-शीलः, दुर्दैव-दलित-दुर्ग दुःख-द्रावण-दयादृष्टिः, दारुण-दुर्दान्त-दर्पित-दुर्जन-दमन-दीक्षितः, मल्ल विद्या-विचक्षणः, शरणागत-रक्षणः, सतत-सर्वजन-साह्य-सम्पादन-सज्जित पुष्ट-प्रत्यङ्ग-परिणाहः, प्रथम-प्रेक्षण-प्रादुर्भूत-पुरुपराक्रम-प्रभाप्रभावः, साध साधु-समाहार-समाऽऽचारः, सिंह-सङ्काश-समुन्नत-स्कन्धसारः, सात्त्विक हारी, सदाचारी कश्चिद् ब्रह्मचारी कुतोऽप्यागत्य विधिविलासादेकस्मि देवावासे वसतिं व्यधात् ।

२. स समस्मिन् समये परमेश-प्रतिमा-पूजार्थं पुष्प-पत्र-पुञ्ज-प्रचय परायणः, प्राङ्गण-पादप-पतत्-पर्ण-पूग-पांसु-प्रभृति-परिमार्जन-प्रोक्षण प्रक्षालन-प्रवृत्तो वा, मज्जन-भजन-यजन-भोजनायोजन-भाजन-मार्जना विविध-व्यापार-विशेषव्यग्रो वा नितान्तं शान्तस्वान्तः, ऐकाग्र्येण मुहु

मानस-मन्त्रमनन-मुद्रितमुग्धमुखश्च लोकैरालोक्यत । तदाहु :—

—युग्मकम्—

सदैव देवदेवस्याराधकाः सत्यसाधकाः ।
चर्चकास्तद्गुणौघस्य श्वासोच्छ्वासेषु चार्चकाः ॥ १ ॥
नेत्रगोचरतामत्र चरतां यान्ति कर्हिचित् ।
हन्त ! दैवानुगुण्येन पुण्येनैव महात्मनाम् ॥ २ ॥ इति ।

३. अतः प्रत्यहं पीत-प्रभु-प्रतिमा-पाद-पीयूष-बिन्दवो हिन्दवो वा अननुमत-देवमूर्त्ति-स्तवना यवना वा, नगरौकसो वा ग्रामिणो वा, श्रद्धयाऽऽबद्ध-शय-कुशेशयद्वयाः प्रणमन्तस्तं भृशमादरस्पृशा दृशाऽद्राक्षुः, पाणि-पीडन-प्रमुखेषु प्रशस्त-पर्वसु प्रणयपुरस्सरं प्रभूत-पक्वान्न-पात्र-पट-पणक-प्रभृति-प्राभृत-पदार्थ-प्रदानेन च प्राज्यं पर्यपूजयन् । वशयन्ति वै विश्वं बलवत् सौजन्य-सौमुख्य-संस्कृताः सन्तः ।

४. सोऽप्युपायन-रूपेणोपायातं समस्त-वस्तु-सङ्घातं तस्मिन्नेव दिने सन्ध्योपासनार्थमासीनेषु दीनेषु सहाय-हीनेषु दूराध्वनीनेषु मिष्टेष्टप्रसाद-प्राप्ति-प्रतिपालकेषु पुर-प्रतिवेश-बालकेषु च व्यभजत । एवं सन्तत-सन्तुष्ट-सकल-समाजस्य, विगत-बाह्य-व्यापार-व्यवहार-व्याजस्य, वासना-बीजविरहाद् विश्व-विषय-विजयकारिणः तस्य ब्रह्मचारिणः सुखमयः समयः समयासीत् । सोऽनुदिनं ब्राह्मे मुहूर्त्ते समुत्थाय प्रागेव सूर्य-समुदयात् स्नान-सन्ध्योपासन-सम्पूजनाद्यं सम्यक् सविधि समापयत् । संवृत्ते सवितृ-समुद्गमे समागतान् जनानपि स्नान-सन्ध्याद्यर्थं सुकुमारया गिरा सम्प्रेरयति स्म । तरुणांश्च मल्लयुद्धार्थं समुत्तेजयन् देवभवन-प्राङ्गणनिकटे बृहत्-पाटेऽक्षवाटे स्वयमेव व्यायाम-विधिविशेषानशिक्षयत् । तदनु कृताभिषेकान् विहित-वरिवस्यान् गृहगामिनो व्यायामिनो युवकान् निकट-नगर-ग्राम-वास्तव्यैरुप-हितं सिता-सहितं हितं गव्यं पयोऽपाययत् । इह तु व्याजरहितं परहितं केवलं सतामीहितम् ।

५. स्थिते मध्याह्ने न्यग्रोधच्छायायां निपाननिकटे कुशकाशकटे सुखासनासीनः सर्वाधीनः परोपकारपरो व्रतिवरोऽसौ विविध-व्यापारिणां संसारिणां बाह्यं साह्यं समातिष्ठत ।

कश्चित् तमुपेत्य ब्रूते—'ब्रह्मचारिन् ! कल्ये मे कृषिकर्मकारकस्य दारकस्य जन्मदिनं समुपस्थितम्, कृपया मुक्ताचूर्ण-मोदक-साधनेन साहाय्यं सम्पादय ।' इति । अन्यः सहसा समागत्य समुदीरयति—'महाराज ! घासन्यासार्थं गोलः कण्डोलः सदने न विद्यते, तदुपकल्पय । इमा भवद-

भिहिताः निहिताः तनुशिखास्तूतशाखाः' इति। तदानीमेव स्कन्धस्थापित-सपादचतुष्काष्ठः परः प्रणाम-प्रणय-पूर्वकं प्रार्थयते—'पूज्यपाद! दौर्भाग्याद् भग्नो ऽद्य नो मञ्चकः, परश्वः पञ्चकारम्भः' ततः प्रागेव वयनमपेक्ष्यते। सज्जीकरणेन करुणां कुरु।'

६. एवं यो यो यद् यत् साहित्यं सौहित्यं च समीहते त्रैकाल्येऽपि प्रतिदानमनपेक्ष्य तत्तन्निःस्वार्थभावेन प्रीतचेताः सोऽपि सर्वथा सम्पादयन् सदा सर्वेषां सुखासुखसहचरः समजायत। यतो हि —

गामुका ब्रह्मभूयं ये, श्रेयः सर्वत्र कामुकाः।
सुपात्रे वा, कुपात्रे वा, नृमात्रे समदर्शिनः। ३॥
तन्मतेन क आत्मीयः, परकीयश्च को जनः।
का जातिः का कुजातिर्वा, कोऽधनः को महाधनः॥ ४॥
कार्यं मत्वाऽत्र सापायं, निर्भरं लाभलिप्सया।
सदा लोकोपकारेण, समयं गमयन्ति ते॥ ५॥ इति।

७. विशाले शीतकालेऽसौ सुन्दरस्वरूपे मन्दिरकूपे स्नानासक्तानां देवभक्तानां, दन्तवीणावादिनां विषादिनां वसनावासविहीनानां दीनानामध्वनीनानां च दहनद्वारेण शीतार्त्तिसमापनाय, तोयादितापनाय च ग्रामत्रय-स्वामिनः, प्रभूत-विभूति-प्रभुतोद्भूतमानस्य, यवनप्रष्ठानस्य शिंशपादि-पादपेभ्यः काष्ठानि बलिष्ठत्वात् प्रचण्डेन लोहदण्डेनैव भित्त्वा न तु निशितधारेण कुठारेण, करपत्रेण वधत्रेण दात्रेण वा छित्त्वा, अहरहराहरति स्म। यदा रक्षिपुरुषा रुषा परुषाणि वचनानि व्याहरन्तरतमिन्धना-हरणादनुवारं न्यवारयन् तदा स्वव्यापारव्यापृतः स प्रहसन्निव धीरो गंभीरया गिरागादीत्—'रे! अहं शीतभीतानां वराकाणां लोकानां परित्राणार्थं काष्ठानि नयामि न तु स्वार्थसम्पादनाय। अपसरत मत्पार्श्वतः। अपरथा पादपादवरुह्य सर्वानपि साधु सरलयिष्यामीति।' समयानुसारं सारं मनोविकारं चोपदर्शयन्ति हि साध्वाचाराः।

८. अथ तेऽपि ब्रह्मचर्य-व्रतस्य तस्य विभीषिकाजननं बृहद्बलीयः संहननं, विशेषेण महामृगस्येव शुण्डं मांसलकाण्डं सलोहदण्डं प्रचुरप्रचण्डं दोर्दण्डं दर्शं दर्शं दरिताः द्रुत्वा दिक्शरणमशिश्रियन्। सर्वदा च सम्पदा मानिनः स्वामिनः सकाशे वर्णिनो बलादिन्धनादानं विवदन-वेदनाद्यं च विन्यवेदयन्।

९. अथैकदा विधिवशात् प्रातः प्रचुर-परिचरपरित्रातः प्रवर-पुरुष-प्रेष्यव्रातानुयातः पदातिः स एव क्षेत्रपतिः तत्प्रदेशप्रधानः प्रष्ठानः क्वचिद्

विधेय-विशेषवशवर्ती तद्देवालय-प्राच्यपथेन प्रचलन् पादप-पातृ-पुरुष-संयोगस्य, काष्ठकर्त्तनाभियोगस्य स्वयमनुसन्धित्सया परमार्थ-प्रतिपित्सया च प्रथमाश्रमिणः पार्श्वे प्रापत्। प्राघुणपूजाकारी ब्रह्मचारी तु सपरिचारकं नमस्कारकं च तमभ्यागतं गदितस्वागतं विगतवसनावरणादिप्रपञ्चे पार्श्वपतिते मञ्चे स-सत्कारस्नेहं समुपवेश्य तत्पानाय प्रत्यग्रं पयः उपानयत्। परमुदितात्ममहीयस्त्वमानः स प्रष्ठानः 'तुच्छतरो नरोऽयं परमाणु-माणव' इति मानसे मन्यमानस्तेन प्रणयपरम्परा-प्रकटन-पुरस्सरमपि प्रत्तं पयः विविधैर्व्याजविशेषैः प्रत्यादिक्षत्। ब्रह्मचारी तु पुनः पयः-पात्रं प्रेम्णा पुरस्कुर्वन् प्राह—'वीरखान। पीयतामिदम्। यदाहं प्राप्तावकाशस्त्वत्सकाशमेष्यामि तदा त्वयापि प्रसह्याहं पयः पाययितव्यः। त्वं महीस्वामी महाभागश्चासीति न विशेषतः पयःपानाय बाध्यसे, अपितु वयस्य! अत्र तु समेभ्यः समागतेभ्यः समानरूपेण समानं पानाय दुग्धमेव दीयते। अपरं चेदं पयः त्वत्प्रजया प्राभृतीकृतमिति त्वयैव वितीर्णं विजानीहि। तन्निरातङ्कशङ्कं निपीयताम्। नात्र दोष' इति।

१०. एवं स्फुटवादिना दुग्धदादिना तेनानुयुक्तो मुषितमृषा-मानः प्रष्ठानः रमयमानः परित्यक्त-परिशङ्कं पयोऽपात्। पुनः प्रस्थानात् प्राग् व्रतिनो व्याजविधुरेण व्याहारेण वैबुधेनेव वरीयसा व्यवहारेण प्रेमप्रसाद-परिप्लुतया प्रकृत्या च प्रचुरं प्रभावितोऽपि प्रष्ठानो नैष्ठिकं प्रत्यब्रूत—'ब्रह्मचारिवर्य! भवाननुदिनं दारूणि मद्द्रुमेभ्यो बलाद् व्यवच्छिद्याहरति, सगर्हमनर्हं सर्वथा न समुचितं रुचितं चैतत्। किं न स्मर्यते दारुण-दण्ड-दुःखाधारः सर्वकार-कारागारः?' इति।

११. एवम्प्रकारेण कियत्कुपितस्य तस्य विनयविवर्जितं तीव्रतर्जितं विस्फारित-विलोचनमरोचनं वचनमाकर्ण्य किञ्चित्-कुटिल-भ्रकुटी-विकट-निटिलतटो विसृष्ट-वाक्काटव-कूटोऽपि ब्रह्मचारी भूयो भूस्वामिनं निर्भरं निर्भर्त्सयन्नभाणीत्—'धिक् त्वाम्, अरे रे! मया त्वज्ज्ञेनाज्ञायि यत् त्वमौदार्यशाली शालीनशीलो वित्तवान् विशिष्टः शिष्टश्चासि। अलीकं तत्। तत्त्वतस्त्वं तु काञ्चिदचिन्तितां किम्पचतां प्रपञ्चयन्नात्मनो निष्किञ्चनत्वं प्रादुष्करोषि। नैवं विपणा कृपणा अपि वा व्यवहरन्ति। ईदृक्षं क्षोदिमोक्षितं महिममोक्षितं, दैन्यदिग्धमस्निग्धं दौष्ट्यदग्धं जाड्यजग्धं मुग्धं वचस्त्वद्-वदनादुद्गीर्णं नतरां शोभते। किमहं स्वार्थसिद्ध्यै काष्ठान्याहरामि? कृतमज्जनानां ते प्रजाजनानामुष्णेतरसमयोपनीतात् स्फीतात् शीतात् परित्राणाय प्रत्यूषे पावकः प्रज्वाल्यते, न जातु मा तु

शीतिमा लगति सौम्य!' इति। अकुतोभया भवन्ति खलु व्यक्तवाचः पुण्यशीला इति।

१२. इत्थं विविध-विस्पष्ट-वाग्वर्षिणि व्रतिनि सेवक-समूह-सम्मुखे सवैलक्ष्यस्मितः प्रष्ठानः सत्यसारल्य-संसिक्तैः सूक्तैः सुतरां सुखित-स्वान्तः सत्वरं समुत्थाय प्रणय-प्रदर्शन-पूर्वकं प्रणम्य प्रथमाश्रमिणं प्रहसन् 'नूनमेष देवतात्मा पारमेश्वरः पूरुषः' इति समवधार्य रक्षिजनांस्तर्जयन् न्यगादीत्— 'यथाकामं समूलमुन्मूलयेद् द्रुमानयं सत्यस्वरूपो महात्मा, न च क्वापि काष्ठाहरणान्निषेध्यः। अस्य सत्त्वोपपादिता स्पष्टवादिता निस्तारल्यं सारल्यं च नितान्तं स्वान्तनैर्मल्यं व्यनक्ति' इति। तदाहु :—

सत्य-सारल्य-सौम्यत्व-संस्कृतानां सदात्मनाम्।
स्वभावः सत्त्वसम्पन्नः, स्वतां सर्वत्र सिञ्चति॥ ६॥
महितानां दृशैतेषां, मोहिता अहिता अपि।
समर्पयन्ति सर्वस्वं, स्वजनैः सहिताः सुखम्॥ ७॥
जीवनं जातु जानन्ति, लोकस्यैव हिताय ते।
सर्वात्मनाऽत एवैतैः, शिवतार्तिर्हि तायते॥ ८॥ इति।

१३. एकदा स्थिते सायं-समये मयेदं सुखमयं दृश्यमदर्शि यत् प्राङ्गण-विहारी ब्रह्मचारी देवमन्दिर-द्वारमुन्मुद्र्य, परितः प्रमार्जन-प्रोक्षण-प्रोञ्छनाद्यं संविधाय, धूप-वर्त्ति-स्नेह-सर्पिः-संविधां समनुतिष्ठन्, सन्ततं सम्मुख-स्थितां श्यामलाश्ममयीं मोहनीं मधुराधिपतेः मधुसूदनस्य मधुरां मूर्त्तिं साक्षात् स्निग्धं सखायमिव मन्यमानः, प्रतिवचनं चाऽलभमानोऽपि तेन मञ्जु-मूर्त्तिमता माधवेन मुहुर्मुहुः प्रेम-प्रमोद-पीडा-परिपूरिताः विविधा वार्त्ताः कुर्वाण आसीत्।

पुनर्योगनिद्रित इव किञ्चित् संस्मृत्य सपदि परमार्थ-प्राकृत-पुरुष-प्रतिमं परमेशं परिजानन्, तस्य पाषाणपिण्डं प्रति परां प्रेम-प्रवणतां प्रकटयन् प्रावादीत्—'ओ! रे! विविधवस्त्वास्वाद-लोलुभ! उदरम्भ-रेस्तव भोगाय अद्यास्वाद्यं खाद्यं न विद्यमानं मत्सविधे' इति।

१४. ततो गुडपिण्डीं पाणौ प्रगृह्य पुनः पुनः वंशीविभूषितं वासुदेव-विग्रहं प्रदर्शयन् सखेव सखायं सामोदं समुदैरयत्—'ओ! ए! पश्येदं गुडमेवाद्यं विद्यतेऽद्य ते प्रसादाय मत्सविधे। प्रत्यहं पयः-पेटक-पिष्टक-पूपिका-प्रमुखान् प्रचुर-परिमाणान् पदार्थान् प्राश्य प्रथिमानं प्रापि पिचण्ड-स्तावकीनः। साम्प्रतं ज्ञास्यसि किं किमश्नुवते वराका दरिद्रायका लोकाः। इदानीं 'दीनबन्धुः' 'दीननाथः' इत्यादीनि नानाविधान्यभिधानान्यन्वर्थतां

भजिष्यन्ते च भवतः। नूनमनुदिनमदनाय ते मोदनानां मोदकानां दानाय मया समयः कृतो न वर्तते यत्तुन्दिलस्य तव स्वार्थ-संसिद्धये कञ्चिद् वराकं याचनाय यायाम्। नित्यं ते कृत्यं तावदेतत्। त्वया तु प्रेष्ठ-पदार्थ-प्राशन-प्रकृतिः प्रायः परिपक्वतां प्रापिता। नायं नर्मालापः। वास्तविकं वच्मि। नास्ति शस्तं वस्तु स्वादीयस्त्वत्कृते ऋते गुडात्। त्वं त्वङ्ग! वैकुण्ठ! वैकुण्ठ इवासि व्यवसाय-विमुखः। न रोचते चेत्ते गुडः समीहितामितरां शालां याहि या हि ते हिते रता। सर्वथा पाषाण-परुष-प्रज्ञः प्रस्तरो मृन्मयो वा माधवो मा भूः। कच्चिदार्त्तां मद्वार्त्तां सावधानमवधारयितुमपि प्रयत्तम्? मित्र! मदुक्तिर्नान्यथा मनसि मन्तव्या, अनलङ्कर्मीणोऽहमत्र। संशेते चेत्ते चेतः स्वयमुत्थाय प्रेक्षस्व' इति।

१५. इत्थं साक्षात् सजीवितमिव विश्वव्यापिनमपि विग्रहवन्तं विष्णुं मर्मवेदिनमिव वयस्यं वीक्ष्य विविधाः सदसत्स्वरूपाः स्वान्तःसम्भूताः स्वीयाः सुखसन्तापसाक्षिकाः कथाः, सन्त्यज्य सङ्कोचं स्वैरमचकथत्, उपालभत चोच्चैरुच्चारिताभिरुच्चावचवचनरचनाभिः।

१६. एतस्मिन्नेवान्तरे सहसा स-हसा काचिज्जरती जोषिता समुपेत्य चक्राकार-चित-मोदकमालं विशालं पित्तल-स्थालम् पूरित-प्रचुर-मात्रं गोपयः-पात्रं च पूजाकारिणः श्रीब्रह्मचारिणः पाणिपयोजयोः प्रणिधाय प्रावदत्—'देव! परुत् मया परमेश्वर-प्रमुखे पुनः पुनः प्रार्थन-पुरस्सरं पणो व्यधायि—पौत्रो मे प्रजायेत चेद् उपयाचित-रूपेण पञ्चसेटकमितानि वेसन-लड्डुकानि उपायनी-करिष्यामीति प्रस्तुतकाले पौत्र-प्रसूति-पूरित-परीप्सायाः परं प्रीतायाश्च मे प्राभृतमिदं प्रभु-पाद-पाथोजयोः' इति निगद्य निम्न-निटिला च नारायणं नमस्कृत्य प्रभु-पाद-पीयूष-प्रसादमास्वाद्यासाद्य च साह्लादा सद्यः सदनं प्रति प्रायासीत् पलिक्नी।

१७. ब्रह्मचारी तु मुहुर्मधुमर्दनमूर्त्तिमुद्दिश्यामन्त्रयत्—'अरे! रे! नटवरनागर! करुणा-सागर! नमस्य वयस्य! कदाचन मे परुषवचन-रचनया सत्यमेव न जातं रुषाक्रान्तं ते स्वान्तम्? पुष्कलं प्रतारण-पेशलप्रज्ञोऽसीत्यद्यावेदि मया। स्वयंमेव सम्प्रेर्य वयोवृद्धां वनितामेलाक्षो-दामोदितानि मोदकानि मोदकान्यानायितानि। जगत्त्रितयत्राण! गृहाण, प्राप्तं पर्याप्तं खाद्यमास्वाद्यम्। सित-सिता-सम्पृक्तमनीरं क्षीरं च। प्रीयतां व्यपनीयतां च सम्प्रति पापः स्वान्तसन्तापः' इति। सत्यं यत् सखेव साक्षात् संसारसाक्षी संशृणुते सतां सरल-स्वान्त-सम्प्रसूतानि प्रेमपरिपूतानि वचनानि इति।

१८. एवं सत्त्व-समाविष्टस्य सत्यात्मनः सरलस्वभावस्य च तस्य नैष्ठिकस्य सतः स्वान्त-सहसा सहसा समाकृष्टा इव स्वतः समस्ताः सम्पत्समवायाः समुपातिष्ठन्। यतो हि—

सवेदनं प्रभोरग्रे, कुर्वन्नात्मनिवेदनम्।
एतीहितानि निर्वृत्या, सहितानि हितानि सः॥ ९॥
आलम्बनं ददात्यन्यः कृत्वा किञ्चिद् विलम्बनम्।
स्मृतोऽनन्यमनस्केन, परमेशस्तु तत्क्षणात्॥ १०॥
ऐकाग्र्यमवलम्ब्येशं, स्मरतां सर्वदा सताम्।
योगक्षेमं वहन्नीशः, स्वयं यातीह दासताम्॥ ११॥
प्रेम-प्रसारेण पुरस्कृतानि, व्याजस्य बीजेन विवर्जितानि।
वचांसि लोकाननुरञ्जयन्ति, परं परेशस्य मनो जयन्ति॥ १२॥ इति।

१९. अन्यदा स्थिते भीष्मे ग्रीष्मे मानव-मात्रमङ्गलमतिः परेश-पूजा-परिचरणरतिः स व्रती व्यपगताराधकगणे मन्दिर-प्राङ्गणे तृण-तलाची-समासीनः परिहितकौपीनः केनचिन्निष्किञ्चनेन वानाय दत्तस्य मञ्चकस्य स-वानं सन्धानं विदधान आसीत्। अतर्कितमेव कोऽपि भूयसा भीतो विनीतो द्राघीयसः शूत्कारविकासान् समुच्छ्वासान् वमन् विपुलवेपथुः पलायमानः पुटितपाणिः पुरुषः प्रविश्य प्राह— 'कारुणिकवर्णिन्! परिपाहि प्रपन्नस्त्वामहं करुणाभरणं शरणम्। निवर्तय मे मरणम्। अमी लागुडिका जिघांसवो गुण्डका दुर्दान्ताः कृतान्ता इव समनुव्रजन्ति माम्' इति। तस्य विचलद्वर्णां वाणीमाकर्ण्य वैकल्य-विकृत-वर्णं वदनं च वीक्ष्यापि व्यापृत एवात्मव्यापारे ब्रह्मचारी शनकैरवोचत्— 'क्षेपीयः प्रविश वर्णिनः द्वारपक्षामन्तःकक्षाम्, कुरु चात्मरक्षां कपाटपिधानेन' इति।

२०. विहिते च हिते तदभिहिते, अनुपदं चपलचाराश्चत्वारो बलीयांसो लम्पटाः समुपेत्य ब्रह्मचारिणं सगर्हमनर्हं च सम्बोध्याहुः—'रे पिचण्डिल! साधो! क्वासौ मलिम्लुचः? निर्भयो निशि नित्यमस्मत्सस्य-स्तेयी सोऽद्य मध्याह्नेऽपि धान्यलवनो दृष्टमात्रो द्रुततरं द्रवन् त्वन्मन्दिर-मुपाश्रितः। तत् त्वर्यताम् अर्प्यतामचिरेण रात्रिञ्चरश्चोरः। अद्य यष्टि-मुष्टि-निघातैः, पाद-प्रतल-पातैः, केशाकर्षणैः घर्मघर्षणैश्च तं परलोक-पथिकं प्रतिपादयिष्याम' इति। एवमाविष्कृतोत्कटाभिमानं सगालिदान-जनितोत्तापं शापालापं विदधानेषु यातुधानेष्विव मूर्त्तेषु धूर्त्तेषु तेषु क्षान्तिं शान्तिं च विवृण्वन् वर्णी सागरगम्भीरो धीरो मनागपि मनोम्लानिमा-मानमनाविष्कुर्वाणः प्रेमाणं च प्रपञ्चयन् प्रावोचत्—'प्रेयांसः! स्नेहि

गेहिनः ! रहयित्वा रोषावेशं कुरुतोपोपवेशम्। पिबत परमेश्वर-प्रसाद-पाद-पीयूषम्। पुनः प्रकृतिस्थाः प्रकृतमनुसरिष्यामः। उच्यते चानूचानैः—

२१. **पीत्वा प्रेम्णा प्रभोः पूतं, पीयूषं पादपद्मयोः।**
प्रसादं प्रतिपद्यन्ते, पुमांसः प्रास्त-पातकाः॥ १३॥ इति।

तदा तदाकर्ण्य ते त्वमर्षातिशयावेशविवशाः, सन्तोऽपि शशाः मृषा-मृगेन्द्र-मदोत्कटत्वमात्मनि मन्यमानाः, वन्य-वारण-विलास-विडम्बिनो व्रतिनो बलवैभवमजानानाः, उच्चैरुच्चावचावाच्यवचनरचना-प्रतोदसञ्चोदनाभिस्तं सविशेषं क्लेशयितुमकामयन्त। परं सुतरां सौम्य-सुकुमार-स्वभावः स्मेर-मुग्ध-मुखमण्डलो ब्रह्मचारी तुषार-शीतयाऽभीतयाऽनुक्रोशस्पृशा दृशा तितिक्षामिव दिक्षु निक्षिपन् क्षणं वाग्यतोऽतिष्ठत्। तदुक्तं नीतिनिष्णातैः—

२२. **तोतुद्यमानान्यपि पापशीलैः,**
स्थास्नूनि तिष्ठन्ति सतां मनांसि।
न शूकराणां दशन-प्रहारै-
श्चलन्ति कूटानि कुलाचलानाम्॥ १४॥ इति।

पुनरसौ नैष्ठिकः प्रावोचत्—'सहस्वन्तः ! सन्तः ! रिपुरूपं रोपितात्मदोषं रोषमपास्य जोषं मिथ्या-मद-मोह-मोचनं मे रोचनं वचनं शृणुत। किमस्य सत्त्वहीनस्य दीनस्य स्तेनस्य सन्ततं सन्ताडनेनापि। नूनं दुःख-दारिद्रय-दूनोऽयमनाचारां चुरामाचरति। कुतोऽन्यथा कोऽप्यार्यवृत्तः कुलकलङ्किनीं कलुषकुत्सितामीदृशीं वर्तनीमनुवर्तेत। भवादृशां शक्तिशालिनां एवंविधे मानुषमशके कृतः कोपः, प्रादुष्कृतश्च पराक्रमातिशयः किं कीर्त्तये कल्पेत ? अपरं च यद्यप्येष घोरः सस्यचोरः कुत्सनीयः तथापि साम्प्रतं सकल-लोक-क्लेशहरणं भगवच्छरणं समुपेत इति वत्सलत्वाद् देवदासेन मया प्राणपणेनापि पालनीयः। अतो नाहं तं भवद्धस्तयोः समर्पयितुमलङ्कर्मीणः। सोऽयं वराकः पापपरिपाकः पुनरायति-काले कदापि तास्कर्यं नाचरिष्यतीति विश्रब्धा भवन्तु भवन्तः। स्वयमेवाहमुत्सन्नधर्मं तमुत्पथप्रतिपन्नं साधु सम्बोध्य सौजन्यपथाध्वन्यं संविधास्ये। न्यगादि च नीतिनिपुणैः—

२३. **त्रासादरातेरितरस्य वाऽत्र,**
यथा कथं वा शरणागतानाम्।
प्राणान् प्रदायाप्यभिरक्षणं यत्,
स्वभावसिद्धः स किलार्यधर्मः॥ १५॥ इति।

अतः शम-शीतलान्तःकरणाः क्षमाभरणाः भवन्तो भवन्तः सम्प्रसाद-सहितं यथासमीहितं यान्तु ।' एवं निशम्यापि धर्म-न्याय-नियन्त्रि तन्मन्त्रितं 'परमार्थतः प्रवञ्चन-प्रवचन-प्रपञ्चः प्रचुरं पटीयानेष पुण्य-पुरुष-परिच्छद-प्रावृत' इत्यलीक-सम्भावितवर्णि-वृत्ताः संवृत्तास्ते धूर्त्त-धूर्वहाः ।

२४. सहसा तेष्वेवान्यतमः प्रतमां तमः-प्रकृतिः मान्यं तं सामान्य मानवं मन्वानः पुरतः पराक्रम्य परुषोक्तिपूर्वकं प्रभातीय-धीर-समीर-श्लक्ष्ण-शिशिर-शीलस्य ब्रह्मचारिणो मस्तके चण्डेन दण्डेन दृढं प्राहरत्। तथाऽभिहिते विहितेऽपि च पाटीरोशीर-शीत-विनीत-हृदयो दयोदयोऽसौ प्रतीकार-लिप्सा-विमुखः पुनस्तांस्ततोऽपसर्तुं प्रार्थयत । परं विधि-विपर्ययात् प्रत्यासन्न-पापपरिपाकः कदर्यकाकः कोऽप्येकस्तेषु पुनः प्रहाराय लगुड-मुदयच्छत् । तस्मिन्नेवान्तरे परमयतिना व्रतिना तेन हस्तेन परामृश्य पूर्वाघात-क्षतात् क्षरत् क्षतजमुदीक्ष्य पुनः—'ओह ! इदं त्वस्रमजस्रं स्रवति' इत्यनुच्चैराचक्षाणेन, सद्यः समुज्जृम्भमाणामर्ष-प्रचलप्राणेन, भूरि-भुग्न-भ्रुकुटी-भीषण-भालेन, ज्वलदङ्गाराकार-दृग्-द्वितयोद्गीर्ण-जिह्म-ज्वाल-जालेन, दृढदन्त-दंशदशादिव प्रभूतावधूताधरेण, बल-विडम्बि-बल-विक्रम-धरेण, तेन कार्शानवं नवं किमपि तेजस्तन्वता सहुङ्कारं पूर्वमेव पूर्वपार्श्वे पतितः पृथुपरिमाणः, तरुण-मल्ल-तल्लजोत्तोलनपाषाणः खेलायतेव हेलया समुद्यम्याक्षीणस्य, प्रधन-प्रवीणस्य, धूर्त्त-सार्थ-धुरीणस्य, विकटनिटलतट-मभिलक्ष्य क्षिप्रं प्रक्षिप्तः । नियति-नियोगात् स पाषाणो वेगवशाद् भिन्दानो मार्ग-मध्य-विष्टम्भं, मल्ल-संरम्भं, दारवं महास्तम्भं, लक्षस्य प्रतिपक्ष-स्यास्पृशन्नेव गात्रं वितस्तिमात्रं भूमौ निखातः सञ्जातः । पुनः ब्रह्मचारिणा चारिणा समुत्क्षिप्तां तैलवर्णविलिप्तां यष्टिं दृष्ट्वा सपदि पाद-प्रहारपातेन मञ्चस्य बाहुमुन्मुच्य तेनासावाक्रामकः सहुङ्कारमेकवारं मेदस्विमांसे दक्षिणांसे सरभसमाहतः । तत्कालमेवोपजाताघातविशिष्ट-कष्टवशाद् विप्रकृष्ट-भ्रष्ट-यष्टिः, सम्भ्रम-सम्भूत-सम्मुख-स्फुरदसत्य-स्फुलिङ्गः, सर्वतः सञ्चलत्सकलसृष्टिः, स्रस्त-समस्त-स्कन्धबन्धः, तीव्र-ताडनोदिततिमिरान्धः, प्रलम्बमान-भुग्न-भग्नभुजः, रीढकरूढरौरवरुजः शव-शीत-शून्य-शिथिलशरीरः, स्तोक-स्रवदस्र-प्रसारसिक्त-चोलचीरः—हा मातः! हा भ्रातः! हा यातः ; मृतोऽहम्, रक्षत रक्षतेत्यनुक्षण क्षैण्येनाचक्षाणः चक्रभ्रमं भ्रमित्वा भूमौ भ्रष्टः । केन सह्यो वीर्यवत् कोपाक्रमः ।

२५. क्रमेणैकैकेनैव एवम्प्रकारेण प्रचण्ड-प्रहारेण कुट्टिताः सर्वेऽप्यागन्तवस्ते जन्तवस्त्रुटितोत्तमाङ्गा, स्फुटितटङ्गा लङ्गाः, प्राप्ताऽपराङ्गभङ्गा वा अमन्दाक्रन्दकोलाहलाकर्णन-समवेतेन, बाल-वृद्ध-वधूवृन्द-समेतेन, ब्रह्मचारिपक्षपातिना, नानाजातिना, कुतूहलाकुलेन, लोकसङ्कुलेन, सविषादैः धिग्वादैः न्यक्क्रियमाणाः कण्ठागतप्राणाः प्रोच्चैः परिदेवनैः पितृ-पुत्र-पत्न्यादि-परिजनैः, विविधवादैः दायादैः वा ग्लास्नुभिस्त्रस्नुभिश्च समुपेत्य खाटलोटिताः कृतास्ते त्वरितं ततोऽपानीयन्त ।

२६. परेद्यवि स्वजनरक्षितैस्तैः गत्वा न्यायालये कृतोऽभियोगः कौतुकावहः समजनि समेषां जनानाम् । निशम्येमं वृत्तान्तं सम्पत्सुखसागरा नागराः, अक्षीणा ग्रामीणाः, वरीयांसः कनीयांसः, प्ररूढाऽकरुणास्तरुणाः, अनुभव-समृद्धा वृद्धाः, परेऽपि च भूयांसः पुमांसः, साक्षिरूपेण सामर्थ्यानुरूपेण विभवेन, केवलेन बलेन, प्रकारान्तरैर्वा सकल-लोक-कल्याणकारिणो ब्रह्मचारिणः साहाय्यं संविधातुमचीकमन् । परमात्मैक-प्रत्ययः प्रकृत्यैवानुदितस्मयः पावनावदानः स्मयमानः स तु सधन्यवादं तानेवमशंसत्—स्नेहधराः ! समानुभूतिकराः ! भक्तिपराः ! नराः ! सदाचारैरुदारैः भवद्भिः प्रादुष्कृतो मयि निर्भयः पुण्यमयः प्रेमातिशयः, प्रकाशितः स हितः स्वात्मनो मनोरथः, व्यक्तीकृतं च धन्यमभिजनजन्यं सौजन्यम् । कृतज्ञोऽहं भवताम् । परं परात्परं कर्शित-क्लेशं परमेशं परित्यज्य नाहं कुतोऽपि साहित्यमपेक्षे । केवलः सर्वसुखदायी विश्वमायी मे निरपायः सहायः । स सृष्टि-स्थिति-संहार-सम्प्रयोगी, समस्त-संसृति-सत्यासत्य-सदसत्संविधानसाक्षी साक्षादत्र संवसति साकं मयका । तस्मादुत्तमं तमेव हृदि कलयन्नेकलोऽहं न्यायालयं प्रतिपत्स्ये । न तत्रापेक्ष्यन्ते मृषोद्यप्रवर्तनशीलाः केऽपि वाक्कीला' इति ।

२७. गच्छति काले क्रमेण होश्यारपुरस्थे मुख्ये मण्डल-न्यायालये निर्णयार्थं समुपस्थितः सोऽभियोगः । तेषु दिवसेषु प्रायेण यातायातसाधनानां धनानां वाऽसद्भावात् पद्भ्यामेव स्थानात् स्थानान्तरं संयान्ति स्म सकला लोकाः । ब्रह्मचारी चाप्यहर्निशमुपांशुजापो ऽपापो ऽनालापो ऽध्वनि दृषद्-दृढ-बन्धे स्कन्धे प्रचण्डं दारुदण्डं निधायाधिकरणं प्रत्ययासीत् ।

२८. अथानुपूर्व्येण कलह-कारणाभियोग-विचारणे प्रक्रान्ते प्रशान्ते च समवेत-सामाजिकजने, न्यायाधीशो ऽभियोगिन आद्योपान्तं वृत्तान्तं श्रावयितुमादिशत् । तेऽपि तथानुयुक्ताः शङ्काविमुक्ताः यथावृत्तं श्रावयन्तः प्रान्ते च—'अनेन द्विरदसारेण दानवाकारेण साधुना तापसेन प्रबल-पातः लगुडाघातैरस्माकं साकं मस्तकैः भुजादीन्यङ्गानि प्राप्तभङ्गानि विहितानि ।

पृथिव्यां पतिता अपि वयं पुनः पुनः प्रताडिता अनेन जनेन' इति रोरुद्यमान
विविधं वितथा विग्रह-बाधा व्याख्यायात्मनिवेदनमकार्षुः।

२९. तदा वर्णिनो विशालं भालं तिग्मांशु-तुलित-तेजस्ताम्रं कश्म
नितान्तं शान्तं स्मयमानं चाननं निशाम्यान्तरेव प्रभूतं प्रभावितो धर्मा
धिकारी तमभिलक्ष्यादरोदरमवादीत्— 'महात्मन्! अपि नाम सत्यम्
यदिमे वादिनो व्याहरन्ति? निशम्येदं तथ्यं कथ्यं किमप्यस्ति? प
महाराज! क्व ते वाक्कीलः क्व च सपक्ष्याः साक्षिणः' इति।

एतस्मिन्नेवान्तरे एकलो निश्छलो ब्रह्मचारी होश्यारपुरं गतः
इत्युपलभ्य तदनुरक्ता भक्ताः नैके नगरनिवासिनश्चापि चपलं पलाय्य व्रतिनः
साहाय्यसम्पादनाय समवेताः न्यायालयमुपेताः।

३०. ब्रह्मचारी तु सहज-सौम्य-स्वभावो धीर-गभीर-वीरात्मा पीयूष-
पूर-पूरितया वाचा परिमल-परिमिलितान् पुष्पप्रकरानिव परितः प्रकिरन्
प्रेमपूर्वकं प्रत्यवोचत्—'सदयहृदय! धीमद्धुर्य-धर्माध्यक्षमहोदय! एभिः
सज्जनैरीषदूनं नूनं सत्यमाख्यायि! अहन्तु सद्यः साद्यन्तं सत्यं समुदा-
हरामि। यच्च साक्षिवाक्कीलादिविषये श्रीमता समुदीरितम् तद्विषये
निवेदनमिदं यत् किमहं वितथं वदामि यत् साक्षिणोऽपेक्ष्यन्ते। किञ्च
वाक्कीलास्त्वसत्यं सत्यं सम्पादयितुं तद्विपरीतं वा विधातुमलोकयोजनैः
जनैर्नियुज्यन्ते। मया तु तन्नेष्यत इत्युभयमपि न व्यवस्थापितम्।
यत्त्वेभिरभाणि—'वयं ब्रह्मचारिणा बहुलं वितुन्नाः' इति, तन्न। पराक्रम-
प्रागल्भ्य-प्रामाद्यधराणां, पुनः-पुनः परुष-प्रवाद-प्रतोद-प्रणोद-पराणां चैषां
जनितनिकारेण लगुडप्रहारेण शीघ्रं शीर्णात् शीर्षात् शोणितं गलं प्रति
निरर्गलं गलत् प्रत्यवेक्ष्य प्रत्येकं एको मञ्चबाहुप्रहारः प्रादायि मया।
पतिताः प्रभूत-वेदनया परिदेवनपरायणाः समेऽपीमे। शार्दूल-शब्दिना
शृगालानां गलितं गर्वगौरवम्, विलीनो दीनो दुरालापः, उड्डीनं च पीनं
पराक्रम-प्रदर्शनम्' इति।

३१. तदनन्तरमभियोगिनोऽभिलक्ष्य नैष्ठिकेन न्यगादि—'रे रे
गेहेशूराः! किमिति सम्प्रति 'आम्' इत्यभिधाय मदुक्तं नानुमोदध्वे?
तदा क्षोभवतां भवतां पुष्कल-प्रलपनानि लपनानि किमिति साम्प्रतं
स्यूतानि भूतानि? लपत, एकैक एव लगुडो लग्न आसीन्न वा? इति।

३२. तदनु धर्माध्यक्षमभिलक्ष्योदैरयत्—'महाभाग! तत आरभ्यैते
वीरमानिनः 'अस्माभिः ब्रह्मचारी तीव्रं ताडितः' इति परितः पुर-पल्लीषु
प्राकृतपुरुषेषु-प्रसारित-पुरु-प्रलम्भ-प्रवादाः, मुक्त-मनुष्यत्वमर्यादाः, निकृष्ट

धृष्टा न दृष्टाः पुनर्मया। अन्यथा समेषामेषां सत्पथानयनं विशेषविनयनं च व्यधास्यत। नूनं न्यूनताऽरिष्टानिष्टा तद्दिनेऽवशिष्टा। महाशय! लोकाक्रुष्टा विशिष्टा इमे दुष्टाः। पृच्छत्वत्रभवान् भवानिमान् तथात्र विद्यमानान् माननीयान् मानवान्। प्रतिदिनं पुरुषान् प्रमदाश्च परिपीडयन्तो न कुतोऽपीमे दुश्चरिता दरिता भवन्ति। अस्तु, तदा तु रक्षिताः क्षितावालुठन्तो दयावता दैवेन, परमद्य लब्ध्वा विस्रब्धा एते दौर्जन्यामया मया स्वपुरं प्रत्यावर्त्तमाना मानापनोदाय पुनः पथि प्रचुरं प्रताडनीयाः। महास्पद! मा नाम भवद्भिरिमे शासनीयाः स्युः, परं शाठ्य-गौरव-गर्व-गदाः मौखर्य-मान्द्य-महोन्मदाः, मदाहतिभिस्तूल्लाघतां यास्यन्त्येव। गुरुरेषां गुरुर्दण्डः। महामते! एतेषां सस्यचौरोऽपि भूय आहूय जनसमाजं समया स मया—'महामूढ! मुञ्च मलिम्लुचताम्' इति साधु सम्बोधितः। उक्तश्च पुनः—'भो भूरिभौतिक-भोग-भ्रम-भूताभिभूत! भविष्यति भद्रमभीष्टं चेद्, भगवन्तं भूतभावनं भजस्व। स दाता सदा ते भृशं भव्यं भोजनं दाता। तत्कृपयैव सकला लोका अशन-वसनादिकमुपलभन्ते। तत्किङ्कृते मुधा चौरिकामाचरन् पापानि पूगीकरोषि? इति धिक्कार-निकार-शोधन्या प्रभूत-पूतचेतसा च तेन तदानीमेव आप्राणोत्सर्गात् प्रतिज्ञातः पातकपरित्यागः। धर्माधिकारिधुरन्धर! यद्यप्येषां सस्यचोरः स घोरः पापीयानित्यवश्यं कर्कशं कश्य आसीत् तथापि भूयस्या भीत्याभिभूतो देवभवने भगवच्छरणं प्रपन्नः भगवच्चरण-शरणागतः कथङ्कारमीदृशैरशिष्टैः दुष्टैः दण्ड्यः स्यात्। अथ चासावात्म-परित्राणाय 'पाहि प्रभो!' इत्याम्रेडयन् मां प्रार्थयत। अतः सर्वथा व्यथावान् वत्सवत् स मया तत्क्षणे रक्षणीय आसीत्। 'अहमेनं स्तेनं स्वयमेव दृढं ताडयिष्यामी'ति मुहुर्मन्त्रिता अप्यनियन्त्रिता इवैते मामेवावाच्यवचनैश्चिरमतूतुदन्। तस्मिन्नेवान्तरे योऽयं लङ्कटङ्को वादी विद्यते, तन्निकटस्थेन द्वितीयेन साहसिकेन सहसाऽहं दृढलगुडमुद्यम्य तीव्रमुत्तमाङ्गे ताडितः। तदवस्थेनास्वस्थेनापि च मया हसता सता तदुपेक्षितम्, प्रार्थिताश्चेमे प्राञ्जलिना ततोऽपसर्तुम्। परं प्ररूढपीडेन मया यदा पाणिना परामृश्य मूर्ध्नः क्षतजं क्षरदीक्षितम् तदा सोऽयमेवाततायी दुःखदायी विशालया शिलयाहतोऽपि प्राक्तनपुण्य-परम्परा-विधेयेन भागधेयेनैवाक्षतो रक्षितोऽभूत्। अपरथाऽस्य मदक्षीवा ग्रीवा भग्ना भुग्ना समपत्स्यत' इति। स भूयो वादिनोऽभिलक्ष्य सौम्यसौमुख्यमुपदर्शयन् सहस्तेङ्गितं न्यगादीत्—'अरे! युक्तमुक्तं मया वीरमानवाः! न वा?' इत्युदीर्य वीर्यविशिष्टः शिष्टः स वाचंयमतामुपैषीत्। सत्यसम्प्लुता स्पष्टवादिता परिणामसुखो वशीकारमन्त्रः।

३३. एवं सत्यसन्धस्याऽकुतोभयस्य च तस्य सुललितां सारल्य-संवलितां कूटाऽसृष्टां वैतथ्याऽस्पृष्टां सुस्पष्टामधृष्टां च वाग्धोरणीमाकर्ण्य समधिगताखिलव्यवहारसारः सत्यासत्य-निर्णयकारः स धर्माध्यक्षो वर्णिनो देदीप्यमानदिव्यदेह-दर्शनेन प्रागेव मोहित इव स्तम्भित इव वशीकृत इव किञ्चित् कुञ्चितकषाय-दृष्टिः वादिनः सम्बोधयन्नवादीत्— 'भो भो वृथा व्यवहार-हठाः ! शठाः ! श्रुतोऽवधारितश्च मयादितोऽन्तं यावन्महाभोगो-ऽभियोगो यौष्माकीणः। प्रहरणपाणिभिः युष्माभिः व्रतिनो वेश्म प्रविश्य तं व्रणितं विदधानैरक्षम्योऽपराधो व्यधायीति मोषका इव दोषकारिणो भूयो दण्ड्या यूयम्। स्वसदनस्थो ब्रह्मचारी त्वात्मत्राणाय कृताततायि-वधोऽपि नियतं न्यायदृशाऽदण्ड्य एव समपत्स्यत। युष्माभिर्विधिं विधूय कृतः कामचारः। तन्नेष्टं चेत् कारागारप्रयाणं, प्रियतरं पुत्र-पत्न्यादि-परित्राणं, कामितं च कुलकल्याणम्, प्राग् व्रतिनः पावन-पादयोः पतित्वा पुनः पुनः क्षमां याचध्वम्, पश्चात् प्रतिज्ञापत्रमपि सदाचरणसम्बन्धि लिखित्वा प्रत्ययार्थं प्रदेयम्। नो चेत् निरालोकाऽस्तोकशोका श्रमकर्मजाला बन्धनशाला प्रतीक्षते युष्मादृक्षान् निकृष्टान् धृष्टान्' इति। स्मर्यते च :—

३४. सत्ता-सहायाः सुतराममायाः, सत्यैकनिष्ठाश्च गुणैर्गरिष्ठाः।
वचोविलासैः प्रियताधिवासैः, विमोहयन्ति प्रसभं जगन्ति ॥१६॥ इति।

एवम्प्रकारेणानन्यमनस्कः परमेशोपासकः, स्वाभाविक-सत्य-सारल्य-संस्कृतः, सर्वत्र सर्वदा समादृतः सत्त्व-संवृतः सन्, समेषां सम्मोहितानीव स्वान्तानि स्वायत्तानि संविधत्ते। अस्य महात्मनो मनोबलेन प्रसह्य प्रणोदित इव प्रभुरपि परं प्रसन्नः तस्मै समस्तानि योगक्षेम-लक्षणानि समीहितानि स्वयमेव समर्पयति। प्रायः परोपकार-व्यसनिनस्तस्य सद्भावेन प्रबलान्तः-प्रभावेण, निष्पापेन प्रतापेन च कुलिश-कर्कश-हृदया दया-दाक्षिण्यविरहिता हिताधायिष्वपि कृपणाः पणादानोदित-संकल्प-विकल्पाः स्वार्थसाधनैक-सङ्कल्पाः दानवकल्पा अपि मानवाः मुञ्चन्ति मृषा मानम्, मिलन्ति अदिमानम्, विन्दन्ति वशंवदताम्, विजहति च दुर्जनताम्। तथा च सदसत्-समप्रेक्षा वादि-प्रतिवादिष्वनधिगतान्यतरपक्षा वैतथ्य-वास्तवता-विवेकदक्षा धर्माध्यक्षा अपि तस्य सदात्मनो मनोऽभिप्रायेण प्रायेण तीव्रेण तपस्तेजसा वा द्रुतं विद्रावित-हृदया दयाकृत आनुकूल्यं भजन्त इति। वर्णिनो वास्तविकं वृत्तवर्णनमत्र बलवत् पुण्य-पथ-प्रदर्शनं निदर्शनमिति।

धर्मपालनम् (८)

१. अस्ति समस्त-प्रशस्ति-पात्रभूतस्य ; स्वर्लोकलक्ष्मीसम्प्रसूतस्य ; प्राज्य-पूज्य-नानकादि-नानागुरुपादपद्मपरिपूतस्य ; दैन्य-दृढमुष्टितादि-दूषणानभिभूतस्य ; भारतभू-दुर्गद्वारविश्रान्तस्य ; दुर्दान्त-द्वेषणदलदलन-दक्षवरविक्रान्तस्य ; शतद्रु - विपाशादि - शीत - शम्बर - शुचिस्वान्तस्य ; समन्तात् सस्यसम्पत्कान्तस्य ; पञ्चाम्बुप्रान्तस्य धवलधारा-सकाशायां पूर्वाशायां सीमापालकः शिवालको नाम दारुगन्ध-खदिर-वदरादि-द्रुम-समुच्चयः शिलोच्चयः। तस्योपत्यकायां पट्टुपुरव्यपदेशः प्रदेशः प्रतिष्ठितो वर्तते।

पुरा देवमातृकेऽस्मिन् प्रदेशे पुरुष-पशु-पक्षि-पादप-प्रमुखाणां प्राणतां प्राक्तन-पातकपुञ्ज-पारवश्यात् ; प्रकुपिते पर्जन्य-प्रेरके प्रथमपूजाप्राप्तिण्य-मरप्रवरे पुरन्दरे, अनावृष्टि-मूलको दुष्कालः करालः समजायत। धर्ममूला हि वृष्टिः। जातासु धर्मपराङ्मुखीषु प्रजासु निरतिशय-न्याय-नियोक्ता परमेश्वरस्तासु प्रचण्डं दुर्भिक्षदण्डं निपातयति।

२. बहुमत्सरे व्यतीते वत्सरेऽतिकरुणाभिभूतेन पुरुहूतेन एतावती करकासारसंसृष्टिः वृष्टिर्विहिता यद् वसुमत्यां वापितानि सर्वत्रापि तानि बीजान्यङ्कुरितानि भूत्वा विगलितानि मिलितानि च मृत्स्नायाम्। साति-वृष्टिस्तु यथा कथञ्चिदनेकापत्सहिता सहिता, परमैषमस्तने जलदकाले तु वारिवाहवाहिनीवाहको वासवो व्यस्मार्षीद् यदत्रापि किञ्चित् कृपादृष्टिः वृष्टिः सृष्टि-सुखाय संविधेया। इहापि प्रदेशे प्राणिनः प्रतिवसन्ति येषां दीनं जीवनमपि जीवनाधीनम् इति।

३. यस्मिन् वारि-बिन्दुवर्षाशंसा जायते स आषाढश्चिरादन्तरीक्षं निरीक्षमाणानां क्षितिक्षितां व्यतिगतः। साम्प्रतं तु सर्वदा सतत-सलिला-सारस्रावणः श्रावणोऽपि शुष्क एव पर्यवसितप्रायः। विपणीषु वेश्मसु चावसन्नमन्नम्। केदारेषु गोप्रचारेषु च हन्त ! दिगन्तपर्यन्तं कुश-कास-हरितादि-घास-हरितिमा नादृश्यत। चिक्लिशेषाः प्रायेण पुष्करिण्यः का कथा गाधजलाधाराणां कृपणानां कासाराणाम्। वापीनां कूपीनां च प्रचुरपङ्कमेव पानीयं पिपासा-प्रशमाय-प्राप्यत परितः पल्लीषु पुरेषु च। तादृशमपि तोयं तिग्मांशु-तीव्रतापात् तिलशः तनिमानं तन्वत् कियत्कालावधि लोक-कल्याणाय कल्पिष्यते। वाटेषु वाटीषु, कुलायेषु

निलायेषु, कान्तारेषु केदारेषु, श्मशानेषु खलाधानेषु, धराधरेषु परिसरेषु चत्वरेषु छत्वरेषु चोपरतानां पतत्रिणां पतिताः पञ्जर-पुञ्जाः पर्यदृश्यन्त क्वचित् काक-कङ्क-कीर-केकि-कोक-कलविङ्क-क्रौञ्च-कायाः, क्वापि कपोत-कोकिल-कलिङ्ग-कौशिक-कोयष्टि-कबन्धाः, कुत्रचित् कृकवाकु-कालकण्ठ-काष्ठकूट-करोटिकाः, कुत्रापि च्युताः चट-चिल्ल-चातक-चकोर-चक्रवाक-चञ्चुचयाः अरालस्य कालस्य, विकरालस्य चाऽकालस्य अवार्यवीर्यं प्रथयन्ति स्म। को जानीते कियन्तः पशवः प्रमीताः, कति च तीव्राशनाया-कङ्कालकायाः मन्दा निष्पन्दाश्च मन्दमुपायान्तं पाशपाणिं स्वच्छन्दं प्रत्यैक्षन्त।

४. एतयापदा श्वापदाश्चतुष्पदाश्चान्ये वन्या उदन्यादूनाः पलाय-मानाः प्रान्तं परित्यज्य पुष्कलपानीयान् प्रदेशान् प्रापन्। पालिताः पशवः तृणतोयादेरभावाद् गृहमेधिभिर्मुक्तबन्धा अप्यन्धा इव गेहस्नेहाः देह-दौर्बल्याच्च म्लायन्मुख-मिलित-मक्षिका-मशकमण्डलाः, शोक-शुष्क-श्वासाः, विधूत-कर्णनासाः विषादाततपादाः शनैः शनैः शब्दायमानास्तत्रैव व्यचेष्टन्त। कान्दिशीका लोका लोकायता इव जाता उपालभमाना परमात्मानं कामतो यथालब्धैर्वाहनैः, केऽपि च प्रणत-पृष्ठ-पिनद्ध-पोटलिका-पेटिकाः पद्भ्यामेव पुत्र-पत्न्यादि-परिवारसमेताः त्यक्तनिकेता प्रदेशान्तराण्युपेताः। प्रतिदिशं पर्जन्याभावजन्यं वैजन्यं अन्यदिव दृशा-ऽस्पृश्यं दृश्यं प्रादुष्करोति स्म। पिप्पलप्रभृतीनां पादपानां पत्राण्यपि पुंसां परमान्नतां प्राप्तानि। निशीथ एवाहम्पूर्विकया पानीयानयनाय निपानमुपगच्छतां पदे पदे परस्परं पुरुषाणां पुरन्ध्रीणां च कलहाः समुदपद्यन्त। कुन्त-काष्ठ-कुठार-करवालकराः तस्कराः सस्यसङ्ग्राहिणां गृहिणां कोष्ठागारान् असारान् अपावृत्तद्वारांश्च निरीक्ष्य निराशा न्यवर्तन्त। भैक्ष्याभावाद् बुभुक्षयैव भक्ष्यमाणा भिक्षवो विक्षोभिताः तनुतनवः तापस-ततयः त्यक्तत्राटकाः तुलिततुम्बाः तीर्थतीरानत्वरन्त। महामूल्यानपि प्राङ्गणेषु प्रतोलीषु पदवीषु प्रपतितान् पदार्थान् कोऽपि न प्रैक्षिष्ट। कनकविनिमयेनापि कणिकं न कश्चिददित्सत। पांसु-पूरित-पूति-पिहिताः सन्ताप-सन्तताः समन्ततः करीषङ्कषा शोषयन्तः शरीराणि व्यावर्तित-विटपिव्राता वाता ववुः। चाकचक्येन जनित-रुचि-वीचयः सिकतास्थली-मरीचयः सर्वतोऽकालभीताया भुवो वेपथुमिव पिशुनयन्ति स्म। दुर्भिक्षव्यसनं कीदृशं दारुणं दुःखकारणं प्राणिनां मारणं च जात-मितीदानीमपि येन केनाप्यनुमातुं शक्यते। प्रदेश-पीडा-प्रशमाय प्र

पृथिवीपालस्य प्रजापालन-प्रविभागात् प्राशनपान-पदार्थ-प्रतिविधानम्। सर्वतः समागामि सेवासम्पादनाय समितिभिः। व्यधायि धन्यैः धनधान्य-धारणैः विविधं व्यवस्था-विधानम्। अभ्यगामि विदेश-नरेशानामपि साह्यसहानुभूति-सन्देश-समूहः। परं प्रतप्ते पिष्टपचने पतितानि पानीय-पृषन्ति परिताप-प्राचुर्यस्य प्रसारायैव प्रपद्यन्ते न तु प्रशमाय। विद्यतेऽद्यापि विष्वङ् नीरधिनीलं विमलं व्योममण्डलम्। न परिदृश्यते पुष्प-पक्ष्मपरिमाणोऽपि पयोधरः। स एव दुर्दान्त-दुर्भिक्ष-दानवस्याकारः, स एवापारः प्राणभृतामनाहारः, स एव प्रतिपदं पुरुष-पशु-पक्षि-प्रमारः, स एव विविध-व्याधि-विस्तारः, स एव दीनानां हीनानां क्षीणानां चास्रासारः।

५. सम्भूताः प्रभूताः पुरुहूताय प्रत्त-प्रधानभागाः, उपहारी-कृतच्छागाः स-त्यागा वृष्टियागाः। विहिता हिता दैवज्ञादिष्ट-सदिष्टयोगाः तन्त्र-मन्त्र-यन्त्रादि-प्रयोगाः। साक्रन्दसहस्रैः जीवानामस्रैः सिच्यमानां मेदिनीमुदीक्षमाणाया अपि द्यु-देवतायां नैष्ठुर्यक्षेत्राभ्यां नेत्राभ्यां नतरां निपपात नीरम्। नाकनाथः सकृदमर्षितो न हर्षितो न वर्षितोन्मुखो जातः। एवं विधे दुर्विधे उत्पात-व्राते दृढ-दुःखमये समयेऽन्नदानं जिघृक्षूणां भिक्षूणां दशा परवशा जायत इति ते तु संन्यासिनो वा वनवासिनो वा प्रागेव दण्ड-कमण्डल्वाद्युपकरणसमेताः मण्डलान्तराण्युपेताः। परं तत्रापि केचिद् हठिनः कठिनान्तरा जायन्ते। तेष्वेवैकः शान्तनुपुरनामके ग्रामके रचितावासो वज्राङ्गबलीदासो नामोदासीनः साधकः साधुः सङ्कटेष्वपि स-हसिकः साह-सिकः, कुत्राऽपि न पलायितः। सकुटजावारं तदुटजद्वारं साम्प्रतिकेष्वपि व्यसन-वासरेषु बुभुक्षा-व्याकुलानां कृते कल्पद्रुमकल्पमकल्पत। तपदिने मध्यन्दिने सीतारामयुताय वातसुताय नैवेद्यं निवेद्य, यथापूर्वं प्रणिहित-रोटिकाद्य-प्रभूताद्य-सम्भारं भाण्डागारमुपेत्य स साधुरुच्चैःस्वरेण निर्विशेषं सकलान् लोकान् प्रसाद-प्राप्तये समाह्वयत्। तस्यां वेलायामशनायावन्तो यावन्तोऽपि ये केऽपि जना भोजनायागच्छन् ते नितरां तृप्ता एव न्यवर्तन्त। प्रायस्त्रीणि शतानि जनानां तत्र प्रत्यहं भोजनं लेभिरे। अस्य रुद्राक्षहारिणः पिशङ्गजटाधारिणः परपीडापहारिणः पार्श्वे इयद्भारः कुत आहारः समायासीदिति कोऽपि जनो न जानीते स्म। एकदा कश्चिद् विपश्चित् त्यागी तापसस्तमपृच्छत्— 'अकामिन् स्वामिन्! कुत इदमायात्यन्नं सम्पन्नम्?' इति। स प्रत्यवोचत्—'वीतराग-महाभाग! एष त्रिभुवनरक्षणसक्षणः परिहृत-प्रत्यूहव्रातः श्रीवातजातः किमर्थमत्रासने राजते विराजते? जीवनाधारेषु केदारेषु सस्यं न समुत्पत्स्यते चेद् बुभुक्षिता

क्षिताधिवासिनी अनवसर एव कालकोपभाजनतां जनता यास्यति। पर
पवनपुत्र-पूजा-प्रसक्तानां भक्तानां कृते हठं विहाय विहायसा वृष्टिरवश्य
विधेया' इति।

६. एतादृशेन प्रभुप्रत्ययेन, भिन्नभवभयेन, दयामयेन, स्फुट-वादिना, सर्वप्रसादिना तेनावधूतेन सडिण्डिमघोषं सर्वेऽपि निकटनगरादि-निवासिनो निर्विशेषं नरा नार्यश्च निमन्त्रिताः पर्णशाला-विशालाङ्गने समा-गन्तुम्। 'नियतं गवेषितः कोऽपि निरपायो, वृष्ट्युपायोऽनेन भक्तिरसपायिना-ऽमायिना महात्मनेति श्रद्धाजुषां पुंसां हृदयेष्वङ्कुरिता अशीयस्याशंसा। परं यदा दिवसावसाने वर्षाशयोल्लासिनो विष्वग्वासिनो मारुतिमन्दिर-सम्मुखे समवेतास्तदा प्रोच्चैरासनासीनः स उदासीनः समपृच्छत् सङ्गतांस्तान्—

कोऽप्यस्ति धन्यः किमु धर्मधाता, युष्मत्सु कारुण्य-करम्बितात्मा।
परोपकारप्रवणः प्रदेशे, यः कौशलं कामयते समेषाम्? ॥ १॥ इति।

७. अस्तु, मा भूदपरः कोऽपि धर्मात्मा; स महात्मा स्वयं नु वर्तत एव। सम्प्रत्येवंभूतेऽवधूते पूतात्मनि, निर्व्याजे समाजे चोपस्थिते, स्थिते च सम्मुखमन्दिरे दमित-दानवाविनये पवनतनये को न्वकथ्यमतथ्यं ब्रूयात्। शाटिकाभ्यन्तरे समेऽपि हि नग्ना भवन्ति। परन्तु कोऽसौ जन्तु-र्यो न कृतमन्तुः। सर्वथा धर्मैकरुचिः शुचिव्रतस्तु दुर्लभ एव। तथापि प्रभूत-भावाभिभूतोऽवधूतोऽसौ प्रत्येकं पुरतः पालीषु प्रस्तुतं पुमांसं पिपृच्छिषुरिव प्रैक्षिष्ट। आत्मन्यालक्षितपापा अनालापा नरा उपायान्तरा-भावाद् नम्रनयना न्यषीदन्। उदासीनोऽवधूतः पुनः प्राह—'आदिष्टोऽस्-मिष्टेन भगवता समीरसूनुना यदशेषेऽस्मिन् प्रदेशे एक एव धर्मात्मा विद्यते। तमेव श्रेयोऽधिकरणं पावनचरणं शरणं गच्छत। स एवेममुत्तालं दुष्कालं द्राग् दवयितुं प्रभुः। तस्यैवापमानमस्य विकरालस्य व्यसनस्य निदानम्। अनादरद्वारा दूरं धर्मात्मनो मनो व्यथयन् सर्वथा देवोऽपि न भद्रभाग् भवति। तदाहुः—

८. पुण्यप्रतापास्तु तिरस्क्रियन्ते, पापाशया यत्र समाद्रियन्ते।
नाढ्यैश्च दीना दलिता भ्रियन्ते, तत्रेतिभिः प्राणभृतो म्रियन्ते ॥ २॥

अपि च—

शिवं च शातं च शमं च शश्वद्, धर्मस्य तावत् प्रतिबिम्बमाहुः।
न यत्र धर्मोऽस्ति भवन्ति तत्र, तापाश्च पापानुचरा विलापाः ॥३॥ इति।

'कोऽसौ सौम्यः स्यात्, कैश्च नरैर्निरादृतः कृतः स्याद्' इति सर्वेऽपि सुचिरं चेतस्स्वचिन्तयन्, परं कोऽपि विलक्षणो धर्मकारो वा विहित-तत्तिरस्कारो वा नारोहति स्म तेषां स्मृतिपथम्। एतं हि साद्गुण्योपेतं महात्मानमुज्झित्वा समन्ततोऽपि प्रदेशे परिव्राजको वा याजको वा पूजको वा कश्चिदपि नावर्तिष्ट। अङ्गुलिगण्या आरण्याः, त्रिचतुराः पुण्याचरणचतुराः तपः-समृद्धाः वृद्धाः सिद्धाः, पूजापाठासक्ता भक्ताः तथा समाधिधीराः कल्पितकुटीराः सन्त आसन्। ते तु तीर्थाटनव्याजेनेतः प्रद्रुताः। कश्चिद् विप्रो विपश्चिद् विराड् वणिग् विख्यातो वर्णान्तरजातो वा स्यादपि जञ्जपूकः, परं तादृशः पूतात्मा केनापि कात्कृत इति तु नाश्रावि। अपरं च एतादृशास्तु श्रद्धादृशा स्तुतिभाजो लोकत्राणा धर्मप्राणा न कस्य नमस्या स्युः। साम्प्रतिके भ्रान्तमतिकेऽगतिके विकराले दुष्काले तेभ्यो वस्तुविशेषदान-प्रत्याख्यानं विधिविवशेन दीनदशेन केनचित् कृतं तु सम्भाव्यते। परन्तु केनापि 'निरुपायेण वा निर्मयेण वाऽनीहितेऽपि विहितेऽहिते किमियन्महीयानपराधः स्याद् यस्यानावृष्टिरूप उच्चण्डो दण्डो निरवशेषेण देशेन भोक्तव्यः?' इति।

९. मुष्टि-प्रतिबद्धकासः पुनः प्राह वज्राङ्गबलीदासः—'कृत-करचेष्टेन स्वेष्टेन समीरसुतेन समादिष्टोऽस्मि स्वप्ने यद् धर्मात्माऽसौ इतस्ततो विचेतव्यो याचितव्यश्चैतद्वृष्टि-वैधुर्य-विपद्-वारणाय। इतोऽधिकं न किञ्चिदपि स्पष्टं निर्दिष्टमिष्टेन। प्रायः परोक्ष-प्रवचन-प्रिया हि देवाः। अतस्तादृशो धार्मिकः कल्याणकाङ्क्षिभिः भवद्भिः सर्वैः समन्ततः समन्वेषणीयः। अहमपि तस्य परिज्ञानाय प्राप्तये च प्रगाढं प्रयतिष्ये' इति। सर्वथा परपीडां न सहन्ते हन्तेह महान्तः।

करुणाकारेण केसरिकुमारेण कृतसङ्केतः स धर्मोपेतः कः स्यादिति जिज्ञासते स्म स उदासीनः। यो नास्त्यास्तिकः यस्य च नास्त्यास्था परात्परे परमेश्वरे स तु न सम्भवति धर्मात्मा। ग्रामेवासिनः सङ्गत्यायासिनः सम्यक् परस्परं परिचिताः प्रजायन्ते। वज्राङ्गबलीदासोऽपि प्रायेण प्रत्येकं पुरपल्लीनिवासिनो जनान् जानाति स्म। तेषु यत्रापि प्रत्याशासीत् ते सर्वेऽप्युपगम्य परीक्षितास्तेन। हन्त! द्विजातीनां चेतरजातीनां च मध्य एव धर्मात्मनोऽन्वेषणाभिनिवेशिना मया हरिजनानां वस्तयस्तु वस्तुतो विस्मृता एवेति सहसाऽद्य साद्यस्कः सङ्कल्पस्तद्हृदये प्रादुरासीत्। तत्स्मरण-समकालमेव सम्मतः सतां स तां वसतिं प्रति प्रातिष्ठत।

१०. परिश्रमाधाराणां चर्म्मकाराणां समस्ता वस्तिरसावलि- स्मेतरेतर-संसक्त-वास्तुभित्तिका । परं तत्रैव प्रतोलीपर्यन्ते पृथगेक- द्रेकासालाऽनुत्ताला पर्णशालाऽप्यवर्तिष्ट । तस्यां विहितावासो दीनदासो नाम नितान्तं शान्तप्रकृतिः सर्वजनीनवृत्तिः, सकलेभ्योऽपीतरेभ्यो नरेभ्यो भिन्नरुचिः, शुचिसमाचारः, सारल्य-साधुत्वसारः, समयं गमयन्नभूत् । तदा प्रदेशस्य हरिजनवसतिषु सुकृतासक्ता नारायणानुरक्ताः षट्सप्त भक्ता अविद्यन्त । ते तावत् स्थलेस्वापाः परिहृतपापाः जनार्दनजापाः स्वयम्पाकाः शाकाहारिणः स्वानीतस्यैव वारिणः प्रयोगं व्यधुः । प्रायो देवालयायायिनः प्रभुप्रसादपादपीयूषपायिनः ते तु प्रत्यहं पवनपुत्रोपासकस्य वज्राङ्गबलीदासस्य प्रागेव परिचिता अभूवन् । परं सर्वदा सोऽव्यक्तहासो दीनदासो गभीरधीरत्वात् तेभ्यः पृथक् प्रकृतिरदृश्यत । पाटलाङ्गस्य लङ्गस्य वत्सस्य सेवामेवात्मनो धर्मं शर्मं च मन्यमानोऽमानो भक्त एव निमेषमात्रमप्यवकाशं नालब्ध । गोवत्सहिताय घासार्जने, मार्गाजिरमार्जने, पर्ण-प्रभृत्याहरणे, पूजोपकरण-सम्भरणे, गोष्ठ-कोष्ठ-पान-प्सान-स्थान- संस्करणे चाविरतं निरतस्य तस्य सकलाः कालकला व्यत्यैषुः । सौशील्य- विनतस्य तस्य दीनदासस्य संस्मरन्नेव वज्राङ्गबलीदासः सद्यः प्ररूढाश्रुः समपद्यत ।

११. कर्णाकर्णि किंवदन्तिरियमुपगता यद् दीनदासस्याऽपापो वापः पुत्रस्य पाणिपीडनं प्रतिविधाय पञ्चतां प्रापत् । परपुरुषप्रसक्ता, पुण्यमति-पति-परित्यक्ता, डाकिनीव पातकिनी प्रतिपलं पञ्चेषु-पीडिता- ऽव्रीडिता पत्नी पल्ली-पर्णशालां परित्यज्य पुरं प्रति पलायिष्ट । तदुक्तं धर्मधुरीणैः नयप्रवीणैः—

पत्न्या मतिः शर्मणि चेदधीना, पत्युस्तथा धर्मणि संनिलीना ।
सहस्थितिर्नैव तयोस्तथा स्याद्, न वासुरा-वासरयोर्यथात्र ॥ ४ ॥

किं च—

सम्भाषते याऽन्यजनैः स-हास्या, स्यात् स्वैरिणीभिश्च सदा सहाऽऽस्या ।
सापेक्षते नैव कुलप्रतिष्ठां, लोके वरिष्ठां न च नाथनिष्ठाम् ॥५॥ इति ।

को नाम प्रियः लम्पट-लोलुपानां वंशविख्यातिवैरिणीनां स्वैरिणीनाम् ।

१२. तदवधि एकल एवाधिष्ठितावासः स दीनदासः । चिराच्चाक्षं चर्मणः चित्र-चरणत्राण-निर्माणेन प्राणधारणमकार्षीदसौ । परमद्यत्वे त्वल्पायः प्रायः सञ्जातावसायः सोऽपि व्यवसायः । यदि रक्तरङ्ग-

लङ्गस्य वत्सस्य गणना न क्रियेत तदा कुटीरेऽपभीरेकल आसीदसौ। साम्प्रतमसकौ काननात् काष्ठानि गोमयोपलांश्च समचैषीत्। सुजनोऽलब्ध-भोजनोऽसौ, वट-बदर-बिल्व-बकुल-बब्बूल-फल-फुल्लादिभिरेव जठरपिठरं बरीभर्ति स्म। दीनदासस्य केवली गौरी गौरीतिदग्धयवसेषु दिवसेषु व्यतीतेषु प्रमीता। चाञ्चल्यचारेऽज्ञानागारे कौमारे पदात् पदं प्लवन-पलायन-परायणस्य, परस्तात् पार्श्वपल्लीप्रमुखेण पशुपालकेन परित्यक्तस्य वत्सस्य शितशिले विले प्रविष्टः प्रस्तर-पराक्रमपिष्टः एकः पादः कडत्कृतनादः त्वरितं त्रुटित इत्यनुश्रूयते। वातवेगधावकः स एव गोशावकः प्राप्ताङ्गभङ्गः लङ्ग इति लाङ्गलाद्यनुपयुक्तः संवृत्तः। परकीयमपि परं परं श्रद्धावान् दीनदासः स दैवतमिव सदैव तममन्यत। पूर्वं यदा साधुना संविधानेन स धेनुकामपूपुजत् तदा तु रुचितं समुचितं चाभूद्, यतो हि माहेयी, मातेव महनीया मन्यते मानवैः। प्राज्यं पूज्याः पण्डित-प्रकाण्डा अपि पुटितपाणयः प्रणमन्ति पीवरीम्। गीयन्ते ग्रामे ग्रामे गृहे गृहे गुणगौरवगाथा गवां गुरुभिः। धैनुकाराधनं विदधाना अपि पर्वसु प्रेक्षिताः भूयांसः पुमांसः। किन्तु विकलाङ्गस्य वत्सस्यापचितिः क्षितितले किमाकर्णिता वा वर्णिता वा केनापि? विधिविधानाद् धेनुः माता निधनाधीना जाता। तदनु दीन-दासेन परपरिहृतस्य तस्य वत्सस्य नमस्या समारम्भि। स आख्यत्— 'यदि गौः पावनी देवी वर्तते तर्हि तस्याः शावकः पावकः कुतो न देवः।' इति। यदुच्यते तद्विषये—

१३. क्षीरेप्सया धैनुक-सेवनानि, करोति लोको विचरन् वनानि।
यः सेवते गां तु विहाय कामं, स्वयं स पूज्यो नृवरो निकामम्॥६॥ इति।

रौद्राकाले साम्प्रतकाले कुसुमानि कुतोऽपि नोपालभ्यन्त। तस्माद् धर्मविश्वासो दीनदासो निम्ब-साल-रसालादि-दल-गुम्फितां मालिकां वत्सस्य कण्ठेऽर्पयति स्म। स तस्य चतुरः खुरान् प्रक्षाल्य तदम्भः परित्यक्त-प्रलम्भः प्रत्यय-प्रणय-पुरस्सरमपिबत्। साष्टाङ्गपातं गोजातं नित्यदा प्राणंसीत्। वत्सविसृष्टस्य पलाश-काश-घासस्य कतिपयान् ग्रासान् स स्वयं सोल्लासमखादीत्। वत्सतरस्योपसेवयाऽवसित-वासरावसरोऽसौ वासतेय्यां प्रपन्नायां तस्यैव समीपे वसन-व्यवधान-विरहितायां वसुधाया-मशेत। वत्सो मलं वा मूत्रं वा मुञ्चेच्चेद् मार्जन्या सपदि स तत्पदम-शोधयत्। यदि वत्सो हुङ्कुर्यात् तदा तस्य देहं सस्नेहं पाणिभ्यां परामृशत्। सुकुमारं संवाहयंश्च तन्मुखं सुखङ्करं विभीषिका-विमोचनं चाटुरचनं वचनमुच्चरयामास। अन्तरान्तरा रम्भमाणे च वत्से प्रकामं कल्याणं

कामयमानस्तस्य पीवरां ग्रीवां दोर्भ्यां परिरभ्य परमं प्रेमाणं प्रकटयामास। प्रविशन् निर्विशन् संविशन् दिशंश्च तृणाद्यमाद्यं तमभिलक्ष्य 'युगान्तं यावद् रमस्व मे वत्स!' 'जीव्याः समानां सहस्रम्' इति मुहुर्मुहुरालपत्। दीनदासस्य तादृशं भृशं कौतुकहेतुकं कर्म लोके नर्मकारणतां गतम्।

१४. अनेके केलिकारका दारकाः शिलाशकलानि शलाकाशल्कलानि च तस्मिन्नपातयन्। सामान्या अमान्याः चिकीर्षित-मनोरञ्जना जनास्तं 'वत्सभक्त' इति सम्बोध्यायातयन्। परं दीनदासः कृतमृदुमन्दहासः तदशिष्टमशिष्टमुपैक्षिष्ट।

एकदा कदाचारः कश्चित् सहासं तमुदीरयामास—'दीनदास! विसृज वन्ध्यां वत्सस्य वरिवस्याम्। किमद्यावधि पशुपूजनेनाऽपि केनापि किञ्चित् कामितम्? निशामितं वा त्वया? तत् त्यजेमं गतक्षेमम्। निष्प्रयोजनोऽयं यातु यातुधानावस्थानं वा यत्र कुत्रापि वा यथासमीहितम्? यतो हि— १५. यः साररहितो लोकहितो नैव प्रजायते।
हासहेतुं तथाऽपार्थं पदार्थं तं परित्यजेत्॥ ७॥ इति।

अथ दीनदासोऽनर्हं तं गर्हयन्निव सावसादं जगाद—'रे परसुख-चिन्तापर! मुखर! नैतदस्ति स्वस्तिकृत् ते प्रशस्तिकृच्च कृत्यम् वत्सोऽयं मामात्मीयं मन्यते। आश्रितश्च सुचिरान्मामिति बन्धुवत् प्राणप्रतिदानेनापि परित्राणमर्हति। अपि च—

हसन्तु लोका इह सन्तु कामं, विरोधिनो दैवमुपैतु वामम्।
सुधान्तकालावधि लब्धखेदं, क्षुधा वपुस्तिष्ठतु वा न वेदम्॥ ८॥
कर्त्तव्यमित्येव मनस्सुखाय, फलाभिलाषं सततं विहाय।
शुश्रूषणं नो शरणागतस्य, त्यक्ष्यामि वत्सस्य कृपोचितस्य॥ ९॥

१६. अथ च धर्माधीना आस्माकीनाः पूर्वपुरुषास्तु समाश्रित-मधमयोनिजातं पशुपक्षिप्रभृति-प्राणिजातं स्वार्थनिरपेक्षं आत्मत्यागेनापि पर्यपालयन्। तथा ह्यनुश्रूयते—'कीनाशकुल-संहरणे कृतलीलासंवरणे श्रीकृष्णचन्द्रे, परस्पर-सम्पराये प्रणष्टप्राये यादवान्ववाये सन्तुष्टसकल-समाजोऽपि महाराजो युधिष्ठिरो विश्ववैभवविमुखो गतसुखो भूत्वा सव्यसाचि-सूनोः सुताय सत्त्वसंस्तुताय परीक्षिताय साम्राज्यं समर्पयामास। महामूल्यानि वसनानि विभूषाणि च व्यसृजत्। मौनमवलम्ब्य, विमुच्य वालान्, संन्यस्त-सर्वस्वः कृतप्रास्थानिक-सवनाद् राजभवनान्निर्गत्योदीचीं प्रति प्रतस्थे। सुकुमार-स्वरूपिणी सुन्दरी दारा द्रौपदी, सोदरा वृकोदराद्या अपि तमनुययुः।

१७. समुत्सृष्ट-सांसारिक-सम्पदासङ्गेन, सञ्जात-सकल-साध्वस-भङ्गेन, प्रजाप्रतिरोधवधिरेण युधिष्ठिरेण विविधव्यञ्जनायोजने भोजने मनो नाधायि नापायि नाशायि। विगतविरामः विसर्जितविश्रामः क्रामन् निस्सम्बलोऽप्यात्मबलोऽसौ तुहिनाचले पापप्रच्यावनं पावनं बदरिकावनं व्यत्यैषीत्। तस्य वीरवर्य्याः सोदर्य्याः आर्या भार्या द्रुपद-दुहिता चाप्यनवरतं तमन्ववर्तन्त। समध्यगामि दुर्लङ्घ्यधारः शैत्यागारः सत्पथस्य पारः। प्रारब्धा स्तब्धा तुषारोत्तरीया, वरीयसी, शीतला शैलस्थली। नालोक्यन्त सम्प्रति भूर्जादयो वृक्षा ऋक्षादिका दरीशरण्या आरण्या जनजनितापदाः श्वापदाः परे प्राणिनश्च। सम्प्राप्ता स्वर्गारोहणधरणिः। क्रमेण द्रौपदी नकुलः सहदेवो धनञ्जयश्च नीहारनिकरे निपेतुः। यो यो व्यगलत् स समुत्थातुं नाशकत्। तूल-पूल-तुलिततुहिनस्थले पिल्पिले तस्मिन् प्रदेशे पतितस्य प्राणिनः पुनरुत्थानं सर्वथाऽसाध्यमभूत्। पावनेऽस्मिन् प्रदेशे प्राण-परित्यागिनः पुंसः पुण्यलोक-प्राप्ति प्रतिरोद्धुं कः प्रभुः?। युधिष्ठिरो नातिष्ठत् न च भ्रश्यतो भ्रातॄनुद्दिश्यापश्यत्। स रागद्वेषदवीयसीं स्थेयसीं स्वान्तावस्थां प्राप्त आसीत्। अवसाने भीमसेनोऽपि पतितः परेतश्च।

१८. युधिष्ठिरो यदा स्वर्गारोहणस्य परमं प्रांशुं पर्वताग्रं प्रपन्नस्तदाप्यसौ एकलो नाभूत्। तस्य धनञ्जयादयो भ्रातरः प्रेयसी पाञ्चाली च प्रागेव पतिताः प्रमीताश्च। परमेकः शुनकः तेन समं समवशिष्टः। स सारमेयो हस्तिनापुरादेव स्वैरं तमनुसरन्नासीत्। ततः तुङ्गं शृङ्गाग्रं समुपेते सारमेयसमेते कृपानिकेते धराधिपे युधिष्ठिरे, स्वयं सुरसदनस्वामी सुनासीरः विमानोपविष्टो व्योमवर्त्मनाऽवततार युधिष्ठिराय च स्वागतं व्याजहार। पुनः प्रणय-प्रसाद-परम्परां प्रकाशयन् प्राह स्म— पुण्यात्मन्! संसारे सम्पादितेन ते सुकृत-सदाचार-सौष्ठवेन सङ्क्रीतः स्वर्लोकः सम्प्रति सम्पत् सम्पन्नस्तव। तद् विमानमिदमधितिष्ठतु भवान्' इति।

१९. अथ युधिष्ठिरः सहोदरान् द्रुपद-दारिकां चापि स्वेन साकं नाकं प्रति नेतुं प्रार्थयत। पुरुहूतः पाण्डु-प्रसूतं प्रति प्रोवाच— 'ते तु प्रागेव पुण्यलोकं प्रपन्नाः' इति।

पाण्डुपुत्र-प्रथमजः पुनः प्रायाचत—'एष कुक्कुरोऽपि व्योमयाने मया नेय इति समुपवेशनीयः' इति।

पाकशासनः प्रावोचत्— 'धर्मज्ञ-धुरन्धरो भूत्वापि किमेवमाचक्षसे? कथङ्कारं कुकुरो नाकलोके प्रवेशमर्हति? अनेनापवित्रेण पशुना, शुना मद्दर्शन-सौभाग्य-भाजाऽभावीत्येतदेव पर्याप्तम्' इति।

युधिष्ठिरो व्यजिज्ञपत्—'मय्याश्रितोऽयम् । अथ च मां प्र
भक्ति-हेतोरेव नगरादियद्दूरावधि सहाय इव मया सहायमायातः। ना
परं पापतरं भवति यदाश्रित-परित्यागः। आश्रितोत्सर्जनमसह्यं न रो
मह्यम् । नैकलो जातु विहायेमं विहायसं यियासामि । तदाहुः—

२०. **पात्राणि पापस्य च नश्वराणि, गात्राणि बिन्दन्ति मुहुः सजीवाः।**
धन्यो जनस्तं परमश्नुते क्षणं, यस्मिन् विधत्ते शरणैषिरक्षणम् ॥१०॥ इति

अपि च—

दयामयीभिः फलमाप्यते किं, शुभक्रियाभिर्न हि वेत्ति कश्चित् ।
जानामि, चेच्छ्वानमिमं त्यजेयम्, उद्वेजनीयं निरयं भजेयम् ॥११॥ इति

पुरन्दरः पुनः तर्कसम्पर्कां वाचमुवाच—'पुष्कलैः पुण्यैस्ता
प्राप्यते त्रिपिष्टपम् । पुण्यात्मा चेदयमभविष्यत् कुतोऽधमयोनौ समु
पत्स्यत' इति । युधिष्ठिरो धीरमुदीरयामास— 'निर्जरनायक ! अ
पुण्यार्धमस्मै प्रददामि । सोऽयं सह मया सदैव स-दैवानुग्रहः स्यात्' इति

२१. तावदेव सारमेय-स्वरूपं सन्त्यज्य 'धन्योऽसि, स
जित्सौजन्योऽसि युधिष्ठिर ! सत्त्वभरितेन ते सुचरितेन प्रगाढं प्रीतोऽह
गरिमाणं नीतोऽहम्, अकस्मात् क्रीतोऽहम्' इत्युच्चैराशीर्वादिनं प्रसा
वर्चस्विवदनं स्वस्तिसदनं साक्षाद् धर्मदेवं युधिष्ठिर आलुलोके इति ।

तस्मादाश्रित-परिहरणं तावन्महापापाचरणं मरणमिवापर
शुभोदर्कं लोकादितोऽमुतश्च भ्रंशयतीति तद्विषये नोचितं चिन्तनमपी'ति।

२२. एवंविधानि बहूनि संवृत्तानि तद्वृत्तानि लोकवर्णिता
समाकर्णितानि वज्राङ्गबलीदासेनापि । विलुप्तवर्षे तस्मिन् वर्षे यथ
यथाऽचीयत तपनतापः तथा तथापः समक्षीयन्त । निम्नस्थानाना
निपानानां ह्रसितं सलिलं किल पङ्किलं सञ्जातम् । परमद्यापि व्याप्ति
निरवग्रहेणावग्रहेण दीनदासकूपकस्य पानीयं न ह्रसिमानमानीयत। व्यतिय
वत्सरद्वयं यदा राज्येन हरिजनवसतौ निपानं निखातम् । ततः प्रा
सर्वैः हरिजनैः खेटकाद् बहिर्विद्यमानात् कूपात् पानीयमुपानीयत
दीनदासोऽपि तस्मादुदपानात् सलिलमाहर्त्तुमगमत् । नियतिनियो
तस्यां वेलायां पल्लीपतीनां मदोद्धतमतीनां ठक्कुराणां बीजित-शालिप्रका
प्रचुरपुण्ड्रेक्षु-प्रसाराः केदाराः तदापीन-पानीयेनासिच्यन्त । दीनद
प्रणालपतितं पानीयं नादित्सत, परं स्वोदञ्चनेनोदञ्चितमुदकमजिघृक्ष
तन्निरूप्य राजन्य-सौजन्यरीति-रिक्तः कौलीनादुत्सिक्तः क्षेत्राधी
ठक्कुरः प्रकटित-विकट-भ्रूभङ्गरोषैः परुषवचनोपक्रोशैस्तं तीव्रं तिरश्चका

ततः प्रतिनिवृत्य दीनदासः रात्रिन्दिनं स्वसदने उदपान-निखनने प्रवृत्तः संवृत्तः। आसप्ताहसमाप्तेः सम्पादितनिखनने कूपके सलिलं समुदगात्। राज्यद्वारा हरिजन-हिताय पक्वेष्टका-निपान्-निर्माणात् प्रागस्मादेव कूपकादानीय पानीयमपीयत हरिजनैः। दीनदासेन स्तोक एव भूभागः कर्दम-कुडच-कण्टकैः परिवारित आसीत्। तत्रासकौ कूष्माण्ड-कर्कटी-प्रभृति-बीजविकिरणं विसृज्य यवयवसादिवपनं व्यधात्। आत्मानं धर्मसमानं वत्सं च विहाय सकः कञ्चिदपि नाचिन्तयत्। वत्सस्योदरदरी-भरणम् प्रणयेन परिचरणं चेहत्यं सत्यं नित्यं कृत्यमभूत्तदीयम्। स प्रत्यूषे प्रदोषे चोदपानपानीयेन परिवेष्टित-प्रदेशस्य प्रोक्षणे प्रवणः परं पर्यश्राम्यत्।

२३. तावदेव वज्राङ्गबलीदासस्य मनसीयं स्मृतिरुपारूढा यत् चक्रयानचालकैः पशुपालकैः बालकैः हालिकैः जालिकैश्चोपहसितः, परितः प्रख्यातपावनचरितः, त्वरितः परोपकृतिषु, कृतिषु कीर्तित-कमनीय-कथोऽना-स्वादितकदन्नः, सत्त्वसम्पन्नः, ब्रह्मचर्यविस्मृतविश्वविलासः, परिग्रहाभाव-विहितवैभवोपहासः, हरिजन-परिजनसंवासः, स दीनदासः तत्त्वतो धर्मात्मा। स भृत्यभावं वा वणिग्वृत्तिं वापि तु न विधत्ते यत् कापट्यमुत्कोचदाना-दानादिरूपमधर्मकर्म वाऽनुष्ठातुं विवशः स्यात्। एकस्य पुस्तकस्य पत्राणि परिवर्त्य परिशीलयतापि तेनापाठि यद् 'वृषो वपुष्मान् वृषो भवति' इति। स इदमप्यन्वस्मार्षीद् यद् वीते वत्सरे यः प्रज्ञान-प्रौढिम-मण्डितः पण्डितः श्रीमद्भागवतपुराण-पाठ-प्रवचनार्थं पवनपुत्र-प्राङ्गणमुपैषीत् सोऽप्येव-म्प्रकारामुदारां गिरमुदैरयद् यत् पाण्डव-प्रवर-प्रसूतस्य पृथ्वीपतेः परीक्षितस्य पुरतोऽपि धर्मो बलदरूपेणैव प्रत्यक्षो बभूव। तस्य पुङ्गवस्य पादत्रितयं त्रुटितमासीत्। दीनदासवत्सोऽपि पङ्गुरेव। तस्य पादत्रिकं त्रुटितं नास्ति चेत् किमेतावताऽपक्षीयते। मा भूत् पूर्णो धर्मः, धर्मरूपस्त्वस्त्येव। तमेव वत्सं पर्युपास्ते दैनन्दिनं सानन्दं दीनदासः। तत् समीर-शरीरजेन भगवता हनुमता सङ्केतितो धर्मात्मा क्वचित् स एव न स्यात्' इति।

२४. इत्थमाञ्जनेय-व्यञ्जित-व्यक्तिविषये पूर्वं समुदीयमान-विलीयमानोच्चावचाभासः श्रीवज्राङ्गबलीदासः, उदितश्रद्धातिशयः, श्लिष्ट-शयः शम-शालीनत्वशीलनेनेव शीतलां शोधित-शुचि-महीतलां, शोभमान-शाल्मलिशालां अविशालां पर्णशालामढौकत।

अथ कुटीरद्वारोपान्तमुपायान्तं नितान्तं शान्तं तं महान्तं हृषीकशासकं पवनपुत्रोपासकं परमपूज्यं पुमांसं विलोक्य बहुलं विस्मयारूढः किङ्कर्त्तव्य-

विमूढः समजायत दीनदासः। तत्पार्श्वे तूपवेशनयोग्यः कोऽपि पीठ-पर्यङ्क-प्रभृतिकः पदार्थो नाभूत्। असौ वेपमानवपुः कुञ्चितकन्धरः पुटितपाणि-विष्टब्धवाणिः, विदूरे तिष्ठन् प्रश्रयं प्रदर्शयन् प्रवचनं प्राक्रमत—'महाराज! भवतो दृष्ट्यैवाद्य मे पाविता पर्णशाला, च्याविताः कल्मषजम्बालाः, द्राविताः प्रत्यूहमालाः, धाविता मायाजाला; प्लाविताः पुण्यपादपाल-वालाः। तदुच्यताम्, मुच्यतां शङ्का। कथङ्कारं निष्पणं कृपणं मां कृतार्थयितुमुपेताः करुणाभरणाः श्रीचरणाः? केनामायेनोपायेन नाम भवदीहितं हितं विधाय सौभाग्यभाजनं भवेयं भवे यन्त्रणानुभवे? निस्सन्देहं गतार्थं देहं वहन्तं भृत्यमिमं कृतकृत्यं कर्त्तुमत्रागमायासः कृपावतामत्र-भवताम्। इदं सकुटीरं मे शरीरं त्वतिथिभूते तपः-पुण्यपूते भवति भवत्या-यत्तम्। कृताङ्गाहुतियागेन प्राण-परित्यागेनापि परमेश्वर-प्रतिमस्य भवतः प्रह्लादं कर्त्तुं विषादं चापहर्त्तुं सर्वथा सज्जोऽहम्। दैवाधीनो दीनोऽहमितः परं किमपरं वरं कर्त्तुमलम्। इयानेव देवतात्मन्! मे विभव' इति। तदुक्तम्—

२५. धनं न धर्माचरणस्य कारणं, न चोच्चजातवपि जन्मधारणम्।
यः कोऽपि धर्मं परिपालयेन्नरः, स सर्वथा सत्करणार्हतां वरः ॥१२॥ इति।

परं निपीत-दीनदासानीत-शीतपानीयः अनाश्रवस्तस्य नानाविनय-वचनानां वज्राङ्गबलीदासो दीनदासस्य वत्समेव निरन्तरं निर्निमेषाभ्यां नेत्राभ्यां निरैक्षिष्ट। सोऽधुना द्विवत्सोऽपि वत्सो बलीयान् बलीवर्दो व्यलोक्यत। तस्य गले मङ्गला दलमाला, विशाले भाले धवलो धूलितिलकः पार्श्वतो धूपधूमभूमासीत्। इदं सम्प्रतीयते स्म यत् सम्प्रत्येव समाप्त-सपर्यां सम्प्राप्तोऽयं दीनदासः।

वज्राङ्गबलीदासोऽप्राक्षीत्— 'पुण्य-पूतात्मन्! केन विज्ञापितोऽसि वत्सस्य वरिवस्यां विधातुम्? कुतश्च शिक्षितोऽयं त्वया विस्मापकः पूजाप्रकारः सदाचारश्च?' इति। जन्मान्तरसंस्काराः खलु सदाचाराः।

२६. अथ दीनदासो विनयसारया सुकुमारया गिरा सुधासञ्चार-मधुधारामिव विश्वतो विकिरन् प्रत्यवादीत्—'महाराज! विधिविहित-विघातं दीन-नीचीनजातं लोकन्यक्कारं चर्मकारं मां कथङ्कारं कोऽप्यु-पदेक्ष्यति? लोकान्तरमुपेतो मे पिताऽत्र धेनुपूजनमकार्षीत्। मयापि आकौमारात् तदेवोपक्रान्तम्। अनुभवन् भव-भवन-दुःखदाहं एकदा मुषित-मन्तु-मसीं वाराणसीमगमम्। तत्र प्राज्य-पूजा-पदार्थहट्टे-सुरसरित्-घट्टे सोपानसरणौ संवासिनं विवसनं संन्यासिनं न्यरूपयम्। कोकिल-

कालकायेन भास्वर-स्मेर-मुखच्छायेन, ललाट-लिप्त-रोचनेन लोहित-लोचनेन तेन निःश्रेणि-सरणावेवैकः श्यामलो वत्सः शृङ्खलया सन्निबद्ध आसीत्। तस्य सुरभि-शावकस्य कन्धरायां सुरभि-सुमनोहारा मया विलोकिताः। यदि कोऽपि कल्याणं कामयानः श्रद्धधानः तस्मै पूप-पूरिका-पेटक-लड्डुकादिकोपदानमदात् तदासौ तद्वत्सस्य पुरस्तादस्थापयत्, तद् भुक्त-विमुक्तं च स्वयमखादीत्। यदि शिङ्घित्वा वत्सस्तदत्याक्षीत् तदा प्राध्व-प्रदेशे प्राक्षिपत्' इति।

२७. अथाङ्कुरितोल्लासः स वज्राङ्गबलीदासः सञ्जजल्प—'अहो! किं तपोव्रतावदातेन सम्प्राप्त-सिद्धि-सङ्घातेन तेन वाराणसीवासिना सन्न्यासिना ते प्रकाशितोऽयं पूजाप्रकारः? अपि नाम त्वं तस्य शिष्योऽसि?' इति।

अथ सहजमव्याजं व्यञ्जयन् दीनदासोऽवादीत्—'उदारात्मन्! स तु सदा सदाशयः तूष्णीकोऽतिष्ठत्! अपि च मादृक्षं प्रणष्ट-दिष्टं क्षोदिष्ठं कुकर्मकर्त्तारं चर्मारं कथं स शिष्यरूपेण प्रतिपत्तुं प्राभवत्। अहन्तु हन्तुरंहसां तस्य केवलं प्रेक्षण-पुण्यभाजनमजनिषि। दूरदेशादेव देवरूपं च तमष्टाङ्गीस्पृष्टभूमिः प्रणम्य प्रत्यागमम्। ततः प्रत्यावृत्ते मयि सोऽयमुच्छ्रितकर्णः शोणवर्णः तर्णः। केनाप्यात्मम्भरिणा पापकारिणाऽकरुणेन विकलाङ्गत्वाच्चलितुं प्रायः प्रयासेन समर्थः सर्वथा व्यर्थ इति परित्यक्तो विच्छायः कङ्कालकायः सुदीनाननो दैन्यागारे मे कुटीरद्वारे समुपविष्ट आसीत्। मया च शरणापन्न इत्यन्तरनीयत। अकस्मात् तद्दिन एव मे माहेयी माता पञ्चतां प्रयाता। तावदेवासौ सौम्यो महात्मा मे स्मृतिमुपागतः। मयका चास्य दौर्बल्य-विधुतस्य सुरभि-सुतस्य सेवा समारम्भि। एकदाकर्णिता मया कस्यापि मेधाविनो धावनी मनोमलानाम्, पावनी पापपराणां नराणाम्, सुधास्यन्दिनी सरस्वती यत् सेवैव परमो धर्मः। अधन्येन जघन्यजातिजन्येन जन्तुनाऽमितमन्तुना मया सम्पाद्यमानां सेवां भवादृशो महात्मा वा द्विजन्मा वा नतमां स्वीकरिष्यतीति स्वेष्टवत् सन्ततं सौरभेयी-सूनोः सेवनं समुपाक्रामि' इति।

२८. तदाकर्णनानन्तरं नितान्तं विनीतिमानीतेन सुकुमारमधुरेण स्वरेण वज्राङ्गबलीदासो धीरमुदीरयामास— 'सौजन्यसिन्धो! बन्धो! परोपतापानतितिक्षुः भिक्षुरहम्, प्रभूताधिगताधिसङ्घाताघातः समुपायातः प्रथमवारं तव द्वारम्। त्वां भैक्षं याचे। साधवे संन्यासिने चेन्न प्रदास्यसि नूनमतितरां पापमतिर्भविष्यसि। पुरस्तात् कर्हिचिद् दुरालापेन पापेन

ठक्कुरेण यत् सावज्ञमधिक्षिप्तोऽसि तत् क्षमस्व' इति। यदुक्तम्—

मत्वा वरीयांसमहो! विमूढाः, स्वं जन्तवो मोघ-मदाधिरूढाः।
अनाद्रियन्ते नितरां विनीतान्, महात्मनो ज्ञानिषु सम्प्रतीतान्॥१३॥ इति।

२९. अथ प्रश्रयमुपाश्रयन्नव्यथनं कथनं चकार दीनदासः— 'किमत्रारुचितं संवृत्तम्, किञ्च क्षमादान-समुचितं वृत्तम्। अपरिचिताचाराः चर्मकारा आक्रुश्यन्त एवोच्चजाति-जनितैः जनैः। महाराज! विराड्भिर्वा विप्रैर्वा विधीयमानोऽमानोऽपमानोऽस्मत्कृते वरदान-समानः, अपवादस्तथाशीर्वादः। भूतकालागर्भे निगूढा कथं भवतामनुध्यानमुपारूढा सा वार्ता? मया तु यत् समतीतं तद् विस्मृतिपथं नीतम्' इति। उक्तं चोपयुक्तम्—

स्वयं कृतान् हन्त! परोपकारान्, तथात्मनोऽन्यैर्विहितान् निकारान्।
स्मृतिं नयन्त्येव न पुण्यलीलाः, प्राप्ताः परं सत्त्वमुदार-शीलाः॥१४॥ इति।

समे सुखासुखे तितिक्षूणामुदाराणाम्।

३०. ततः प्राञ्जलिराञ्जनेयदासः प्रार्थयत— 'वृषसेवायाग! महाभाग! विस्मृतं ठक्कुरापकृतं त्वया, न त्वनेन त्वया क्रियमाणसेवेन धर्मदेवेन। अस्यैवाप्तपोषस्य रोषस्य प्रभावादयं निर्दयं जगज्जिगरिषुः विकरालो दुष्कालः सञ्जातः। प्रणतमौलिरहं त्वां प्रार्थयितुं क्षमां च भिक्षितुमुपागतोऽस्मि, यदेतत्प्रदेशीयेषु पुरुषेषु पशुपक्षिषु पादपप्रभृतिषु च प्राणिषु रोषमपहायानुक्रोशो विधेयः। त्वं प्रार्थयिष्यसे चेत् सानुनयमेनं वृषम् वृष्टिरसंशयं सम्भविष्यति' इति विवृत-विविध-विनतिः मङ्गलमतिः वज्राङ्गबलीदासः स्वावासं विनिवर्तितुकामस्तत्प्रतिवचनं प्रत्यैक्षिष्ट।

तदनु दीनदासो मेदिन्यां न्यस्त-मस्तो न्यगादीत्—'महाराज! मत्प्रार्थनया यदि प्रीतः पर्जन्यः परितः प्रदेश-पृथ्वीं पयोभिः प्लावयेत्, विपुला विपद् विपर्यस्ता सती सम्प्रति सम्पत् सम्पद्येत, दुर्भिक्षं द्रुतं दूरं द्रवेत्, प्राणिपरम्परा च पुनः प्राप्त-प्रसादा प्रपद्येत, तर्हि किमिति न प्रार्थयिष्ये। अहमपि तु वारिविरहाद् विकटे व्यापद्-वैश्वानर-विताने विगलितो विश्वतो विलुठन् बलवद्-वेदनां विन्दामि। प्रोक्तरीत्या मा पातकिनमापादयतु मा भवान्, परं श्वोवसीयामाशिषमाशंसताम्' इति।

३१. ततो वज्राङ्गबलीदासस्य प्रतिनिवर्तन-समकालमेव दीनदासो विकलाङ्गस्य वत्सस्य पादोपकण्ठे पुटीकृतपाणिः पृथिव्यामुपविश्य प्रार्थयत—'देव! त्वत्तर्ष-सन्निकर्षा वर्षा। नियमित-जीमूतः पुरुहूतः प्रेष्यभूतस्ते दूतः। विष्णुरिव प्रभविष्णुर्भवान् भूत-भव्य-भवत्प्रभुः, कर्तुं धर्तुं

हर्तुं च जीवजातम्। तत् करुणया कारय वृष्टिम्, रयेण वारय दुष्काल-दृष्टिम्, विष्वग् विस्तारय केदार-कृष्टिम्, दुष्टां दारय विलष्टिम्, प्रचुरां प्रसारय हृष्टिम्, त्वरया तारय सृष्टिम्। स्रवतु सर्वतः सलिलासारः, द्रवतु दविष्ठं दारुणं दौर्गत्यम्, शाम्यतु शश्वत् शोचन-श्वसितं शौष्कास्यम्, निगृह्यतां निर्भरं निर्यद् नराणां नयन-नीरम्, तर्ज्यतां तूर्णं तीव्रस्तृषातापः, श्चोतयतु श्वसनः शोकशमनं श्वःश्रेयस-शैशिर्यम्' इति।

न जानेऽजस्र-स्रवदस्रासारेण नितान्तं नेत्रे निमील्य, नतेन तेन कियन्ति भूरि-भक्तिभाव-भरितानि, प्रत्यय-प्रश्रय-पुरस्कृत-प्रशंसा-परिपूरितानि वचनान्युदीरितानि।

३२. तदन्तरे हृदन्तरेणैकीकृतकरणेन वृषैकशरणेन तेनेदमपि नाज्ञायि यत् कदा समीरस्य सामान्यः स्पदः सहसा स्फीतः, कदा च स्वच्छाशः आकाशः कालकया कादम्बिन्या संवीतः। तेन त्वकस्माद् विस्मेरेण स्मेरेण च तावत् संसक्तहस्तको मस्तको वत्सस्य पुरस्तात् न्यस्तो यदा जीवतर्जनेन तर्पितजनेन घनगर्जनेन समं विष्वग्-विस्तारस्य तिर्यग्-लङ्घितद्वारस्य धारासारस्य विपुलैर्बिन्दुभिः संसिक्तं निर्णिक्तं च तत्पृष्ठं समजायत।

एवम्प्रकारेण सहज-सारल्य-संस्कृतानां, तितिक्षा-प्रशमसम्भृतानां, देश-दुःखासिका-दलन-दक्षाणां, प्राणि-प्रणय-परप्रीणन-पुण्यपक्षाणां, सौम्य-स्वभावानां, धर्मधुर्याणां, भक्तिभाजां महामहिम्नां सात्मनिवेदना वेदनागर्भा वन्दना प्रसभं परमेश्वरमपि प्रेर्य प्रसादे प्रयोजयति। न हि कृतकं जातिद्वैधं धर्मकर्मपरेषु नरेषु सम्पश्यति समदर्शनो विश्वात्मा परमपुरुषः। तेषां पुण्य-प्रवणानां नयनयोरजस्रं स्रवदस्रसहस्रमुदीक्ष्य निर्भरं नोदितं नभोऽपि निश्चोतत इति दीनदासस्य पुण्यप्रधानमुपाख्यानं पारम्पर्योपदेशेन समस्त-प्रदेशेन श्रूयते, इति।

धर्मो रक्षति धार्मिकम् (९)

१. गान्धि-पुरस्सराणां प्रचुराणां प्रयोगपेशलानां पथप्रदर्शकानां प्रबलेन प्रभावेण प्रच्छिन्नाः प्रजाभिः परतन्त्रतापाशाः। गताः गौरवगर्वाः गौराङ्ग-ग्राहगणाः। सम्प्रापि सुखास्वादं स्वतन्त्रता-साम्राज्यम्। स्वायत्तस्य भारतस्य विश्वविख्यातैः नयनिष्णातैः पटेलप्रमुखैः प्रतिबन्धोज्जासकैः शासकैः, एकतापादनाय राजकाधीनानि प्राज्यानि राज्यानि बुद्धिबलेन भारतदेशे विलीनतां नीतानि।

२. सङ्कल्पानुसारेण पञ्चाम्बु-प्रदेशस्य पार्श्वतः प्रतिष्ठितानि पार्वत्यान्यपि राज्यानि स्वतन्त्रसत्तायाः समापितत्वात् समुन्मूलित-साम्राज्य-सीमानि सन्ति नामशेषतामुपगम्य भारतरूपतामुपेतानि। तेषां राज्यानां साम्राज्यसम्बन्धिन्यो धनशालाः, शिष्टा विशालाः सम्पत्तयश्चापि स्वायत्ती-करणीया इति निरणायि भारतशासनेन। कुलिशप्रहारेणेव कृतहृदय-विदारेण तेन समाचारेण भूयांसो भूभर्त्तारस्तेषां पत्नी-पुत्रप्रभृतयः परिजनाश्च सास्रासाराः निरन्तरं निष्ठुरं नियतिं निन्दन्तस्तार-स्वरेण मन्दमाक्रन्दन्। केऽपि विभूतिविलासविनाकृताः, स्वतन्त्रतालाभं पाप-फलाभम् अमन्यन्त, केचिदाङ्ग्लानामपयानं भारतसौभाग्यावसानं वा जनितसन्तापम् ऐश्वरमभिशापं वाऽजानन्। यदुक्तम्—

३. समस्तसंसारसमीहितानि, माङ्गल्यमूलानि सदा हितानि।
वस्तूनि चेत् स्वार्थपराङ्मुखानि, न तु स्वदन्ते कृपणाय तानि ॥१॥ इति।

आसीत् हिमाचल-शैलश्रेणीमध्यवर्ति 'सुकेत'-नामधेयं राज्यम्, यत्र लक्ष्मणसेनो नाम तपोमूर्त्तिः पार्थिवोऽशात्, तदपि भारतेनात्मसात्कृतम्। क्रमानुसारेण केन्द्रीयशासनेनैको दत्तादेशपत्र उच्चपदभागधिकारी प्रति-निधिरूपेण निधिप्रभृतिसम्पत्तेः हस्तसात्करणाय तत्र प्रेषितः।

प्राप्तः प्रतिभूः सुकेतराजद्वारे। तत्र गतेन तेन प्रभापुञ्ज-परिवीत-वदनवारिजः, स्नेह - सौम्यत्व - सारल्यसिन्धुः, नामितनयनो नरनाथो लक्ष्मणसेनः, दौर्भाग्य-दलितेभ्यः दैन्यदूनेभ्यश्चाशनवसनानि वसूनि च वितरन् व्यलोकि। तदुक्तम्—

४. प्रसाधनं किञ्चिदहो ! प्रधानं, मनुष्यतायाः प्रथमं विधानम्।
स्वर्लोकलाभस्य परं निदानं, प्रोक्तं पुराणैरधनाय दानम् ॥ २ ॥ इति।

तेनाधिकारिणा प्रणामपूर्वकं पृथ्वीपतिमुपसृत्य केन्द्रीयशासनादेशपत्रं प्रादायि। पत्रं पठित्वा लक्ष्मणसेनेन सपदि सिंहासनं समुत्सृज्य—'प्रिय-महाशय ! स्वागतं ते। इदं समस्तं सम्पत्-समेतं साम्राज्यं सम्प्रति श्रीमतः' इति स्मयमानेनाभिधाय च कोष-कोष्ठ-कुञ्चिकाः तस्य प्रति-पुरुषस्य प्रसारिते पाणिपुटे प्रणिहिताः। यतो हि—

धर्म एव मतो येषां, मुख्यो माहात्म्यशालिनाम्।
त्रिलोकीं तृणयन्तस्ते, त्यजन्त्यात्मानमप्यहो ॥ ३ ॥ इति।

५. केन्द्रशासन-प्रतिनिधिस्तु पार्थिवं प्रति प्रागेवाङ्कुरितभक्तिः जातानुकम्पो व्यचिन्तयत्—'अहो ! माहात्म्यमुदाराशयस्यास्य महाभागस्य महीभृतः। न मुहूर्त्तमपि विचारितं चित्ते, न मनागप्याधायि हृदयं वित्ते,

न पृष्टाः परिजन-प्रकृतिपुरुषाः, नाख्यायि किञ्चित् परिभवपुषा रुषा, स्वार्थदृष्टचा नाकारि कोऽपि दम्भः, नादायि केन्द्रशासकान्यायितायां कश्चिदुपालम्भः। प्रदेशस्य परैः पृथ्वीपतिभिस्तु परिदेवनपरायणैरिव स्वं साम्राज्य-सम्पत्त्याद्यं समर्पयद्भिः विहिता विविधा व्याजविषयः। बहुभिः वेलाविलम्बं विदधानैः कोशाध्यक्षगणकादि-साहित्येन राजकीयं रत्न-रुक्म-रूप्यादिकं स्वीकृत्य, स्तेनवत् स्थगयित्वा स्थानान्तरेषु स्थापितम्, धन्यैरन्यैः महार्हाणां मौलानां मणिमुक्तादीनां स्थाने कृतकानि काचस्फटिकादीनि निहितानि, प्रचुरैः पार्थिवश्च पञ्जिकापत्रेषु विशिष्टवस्तूनां विवरणानि विकृतानि विहितानि' इति। यदुक्तम्—

६. **नास्तिकानां मते येषां, परलोको न विद्यते।**
चेतस्तेषामधर्मेण, लेशतोऽपि न खिद्यते॥ ४॥
मानिनो मानवा मानं, त आत्मानं च पापिनः।
हन्त! विक्रीय क्रीणन्ति, हेमं क्षेमङ्करं न यत्॥ ५॥ इति।

ततस्तेन द्रुतहृदयेन जातदयोदयेन, सौजन्यनिधिना, केन्द्रप्रतिनिधिना, सिंहासनं समुत्सृज्य निम्नतरासनासीनं लक्ष्मणसेनं समुपसृत्य सविनयं स्वयं समुदीरितम्—'पृथ्वीपते! प्रगाढं प्रीतोऽस्मि पुण्यशीलस्य श्रीलस्य श्रीजुषो दर्शनेन, चरितार्था मे चक्षुष्मत्ता, प्रलम्भ-परिवर्जितेन सुकृत-स्वरूपेण सात्त्विकेन ते व्यवहारेण, सुधासिक्तेन मधुमिलितेन च तव वाग्व्यापारेण तु मुषितमेव मे मानसम्। अतोऽहं स्वयं मन्त्रये श्रीमन्तं यन्मुद्रा-महामूल्य-मणिमुक्तामालाः, सकलां सौवर्णीं सज्जा सामग्रीं, भ्राजिष्णूनि भव्यानि भोजनार्थानि भर्मभाजनानि, शयनासनसम्बन्धीनि चान्यानि महाधनानि साधनानि, स्वैरं स्वप्रयोगाय रक्ष, येन शौवस्तिकं श्वःश्रेयसं शर्म च सुस्थिरं स्यात्' इति। उक्तं च धार्मिकेण केनचित्—

७. **दैवदोषाद् दशां दीनां, दृष्ट्वा कदापि महात्मनः।**
द्रुतं कस्य द्रुतं न स्यादपि वज्रमयं मनः॥ ६॥ इति।

तल्लक्ष्यमुपलक्ष्य लक्ष्मणसेनः स्मयमानेनाननेन सुधारससारां सरस्वतीं समुदैरयत्—'हृदयालो! यत् सत्यम् पुञ्जितैः प्राक्तनैः पुण्यैः प्रचुरं पेशलप्रकृतिरसि। कृतज्ञोऽहं यत् प्रभवता भवताऽनाशंसिताऽकारणा च करुणा मय्याविष्कृता। परं क्षणं विचार्यतामचलेन चेतसा, कस्तावकीनो धर्मः, कस्मिन् कर्मणि च नियोजितोऽसि केन्द्रशासनेन। कर्त्तव्यपथात् प्रस्खलन् न केवलमात्मानं पापपङ्केन प्रलिम्पसि, अपि तु मामपि कदर्याय तास्कर्यकार्याय प्रेरयन् पातकपाताले प्रक्षिपसि। धर्मात्प्रमाद्यन्नधिकार-

पराङ्मुखः सन् किमित्यमानुषमनार्यं कार्यमाचरसि। उक्तं च प्रतिवे-
वसता सता केनचित्—

८. कर्त्तुं कृपावानपि यः कथञ्चित्, सम्प्रेरयत्यन्यजनानघानि।
अघानि तेन स्वयमात्मनात्मा, प्रपित्सुनाऽमुत्र शुभेतराणि ॥७॥ इति।

अपि चोदाराशय! प्राणिनां पालन-पोषण-परायणेन परं प्रसन्ने-
परमेश्वरेण कृपया जनितोऽहं राजकुले, प्रादायि च मह्यं मणि-मण्डि-
मुकुटम् समृद्धशासनं च सिंहासनम्। पर्यवसितोऽद्य तस्य परमेश्वरस्य
प्रसादः। अद्यपर्यन्तं परमप्रभुप्रसादेन पृथिवीपतित्वं प्राप्य येन दण्डिता
परिमोषिणः प्रजापुरुषाः, किमद्य भवद्वचनमनुरुन्धानः स्वयं स ए-
लक्ष्मणसेनः स्तेनः स्यात्? किमहं प्राणान्ते परत्र परमेश्वरपदयोरुपस्था-
'मया स्तेयकर्माप्याचरितम्' इत्यपि वक्ष्यामि? अपि च सौम्य! धुर्यो
धर्मः, उपसर्जनं चार्थकामद्वयम्। न खल्वर्थकामावपेक्षमाणाः पुण्यभाज
स्वप्नेऽप्युत्क्रान्तधर्ममर्यादा जायन्ते। परमार्थतोऽहं परमेश्वरेण प्रजानां
परिपालनाय, समाज-सुख-स्थैर्याय, साम्राज्य-सम्पदां संरक्षणाय च प्रहरि-
प्रस्थापितोऽभूवम्। अद्य ममेतिकर्त्तव्यतायाः भूरिः भारो जातावतारो
भगवत्करुणयैव। तस्मादीदृशस्य कुत्सितस्य कैतवकर्मणश्चेतसि चिन्तनमपि
कल्मषाय कल्पत इति स्वधर्मानुरूपमाचरणीयं चारुचरितेन श्रीमता।
इदमेव रहस्यमाम्रेडयति धर्मप्रधानम् यौधिष्ठिरमुपाख्यानम्' इति।

९. स आह कथं तत्? इति। लक्ष्मणसेनोऽब्रवीत्—सकल-सुख-
सम्पत्-स्वस्थे सर्वतोमुख-समृद्धावस्थे हस्तिनापुरे, प्रतिपक्षिणः पाण्डुपुत्रा-
पणे पराजित्य परमप्रीताः, लक्ष्मीलाभाल्लोकलालनलग्नाः, मान-
मदिरामदमोदमग्नाः कुरुकुमाराः कालातिक्रमं कुर्वन्ति स्म। अ-
एवोक्तम्—

प्राप्तं परोक्षतां प्रेक्ष्य, पञ्चास्यं परिपन्थिनम्।
क्रोष्टारः कुर्वते केलिं, कामं कुञ्जेषु कानने ॥ ८ ॥ इति।

१०. आसीन्निदाघकालः करालः। बाहुल्येन विहित-वसन-
विमोका लोकाः स्थल इव मीना दीना आसीनाः पापेन तिग्मांशुतापेन भृ-
दूयमाना बभूवुः। तपत्रासात् केचिद् विरलकुसुम-कुड्मल-पुञ्जेषु कुञ्जे-
केचित् कृतानेकावसेकोपायासु तडाग-तट-वटच्छायासु, केऽपि सनीरोशी-
गूढगवाक्षेषु कक्षाकक्षेषु, अपरे सम्पादित-शीतपेयपान-प्रतिविधानेषु निपाने-
भूयांसः समायोजित-यन्त्रधारेषु गर्भागारेषु, अनेके रूढ-दूर्वा-गर्भ-द-
शूलमूलेषु कुल्याकूलेषु, बहवो विहित-व्यजनविन्यासेषु निवासेषु, स्थावि-

वा शायिनो वा स्नायिनो वा पायिनो वा बहुलायामान् दिनयामान् यापयन्ति स्म ।

११. कण्टक-कल्पानां कुन्तीकुमाराणां कैतवेन कष्टे कानने प्रेषणात् परं प्रह्लादितेन, सन्तोषित-समाजेन कुरुराजेन, पुरप्रतोलीषु प्रदेशपदवीषु च पदे पदे पथिकानां पिपासाप्रशमाय प्रपाः प्रवर्तिता आसन् । परं परत्र प्रसू-पत्नी-परिवृताः, पत्र-पुष्प-प्रभृति-पदार्थ-प्राशनेन पिचण्डपूर्ति प्रकुर्वाणाः, पथपरिश्रम-पिपासापीडिताः, प्रभाकर-प्रदाह-परिम्लानाः, पाण्डुपुत्राः पुरुष-प्रचार-परिवर्जितेषु, पञ्चास्य-प्रमुख-प्राणघ्न-पशुप्रायेषु प्रान्तरेषु परिबभ्रमुः ।

१२. एकदा मध्यन्दिने प्रचलत्प्रचण्डपवने द्वैतवने पाण्डवाः कृतावासा आसन् । बहूनां वत्सराणां व्यायतताया वेलाया वर्त्तनाय विश्वतो विहरन्तो वराकास्ते प्रतप्तस्य प्रवातस्य पांसुलत्वात् पिपासिता अजायन्त । तृषाकुलं कुलं विलोकमानेन धर्मपुत्रेण पाण्डवराजेन कथञ्चिदेकं तुङ्गतरं तरुमध्यारुह्येतस्ततोऽदर्शि । स दक्षिणस्यां दिशि समीपस्थायिनि स्थले सलिलसत्ताया लिङ्गानि लक्षयित्वा नितरां तृषाकुलं नकुलं नीरानयनाय प्राहिणोत् ।

१३. भूरि भ्रान्त्वा नैपुण्येन निरूपयन् नकुलो निर्दिष्टमिष्टं स्थानं समाससाद । तत्रासौ निर्मलेन शीतलेन च सलिलेन सङ्कुलम्, मोदमान-मीनमण्डल-मण्डितमध्यम्, कूले कूर्दमान-कृष्णसारम्, परोक्ष-पङ्कप्रसारम् कासारं ददर्श । तस्मिन्नुदपाने पानीयपानाय प्रविशन्नेवासौ कुतोऽप्यागतामव्यक्तामिमां वाणीमाकर्णयामास—'महाशय ! जलाशय एष मयाधिकृतः । सर्वथा सलिलास्वादन-साहसं न संविधेयम् । पूर्वं प्रोच्यमानानां प्रश्नानां प्रतिवचनानि प्रदाय पश्चात् स्वेच्छया स्वच्छं पानीयं पानीयम्' इति ।

तीव्रं तृषितत्वाद् धीरो नकुलोऽप्रत्यक्षेण यक्षेणोच्चारितां वाचमवधीरयामास । परं यदा तेन पाणिपुटं प्रपूर्य पानीयपानं प्रारम्भि, तावदेवासौ प्रोड्डीनप्राणः प्रकृत्तइव पादपः पृथिव्यां पपात ।

१४. परत्र व्यतीतायामपि स्फीतायां वेलायां न विनिवृत्तं नकुलमालोक्य व्याकुलमना युधिष्ठिरो नकुल-सहोदरं सहदेवं प्रेषयामास । सरोवर-समीपं समुपेतेन सहदेवेनापि सैव सरस्वती समाकर्णिता—'प्राक् प्रश्नानां प्रत्युत्तरं प्रदेयम्, परस्तात् पयः पेयम्' इति । सोऽपि वाचमनवदधानस्तीव्रतापजन्यया जघन्यया उदन्यया दैन्यमुपेतस्त्वरितं तोयमाचमितु-

कामः क्षामः सन् निष्प्राणो न्यपतत्। अनेनैव प्रकारेण धर्मधारेण युधिष्ठिरेणाचिरेणावहितौ प्रहितौ भीमार्जुनावपि क्रमेण तामेवानागतां गतिं गतौ।

१५. यदा पानीयमुपानिनीषुः कश्चिदपि सनाभिः नाभिगतो युधिष्ठिरम्, तदासौ स्वयं तमेव विकचोच्चावचकल्हारं कासारमुपाजगाम। तत्रासौ सौन्दर्ये सुरसन्निभान् इभानिव बिपुलबलवतोऽनुजान् विपन्नान् वसुधायां पन्नान् वीक्ष्यात्यन्तिकीं यातनामन्वभूत्। स सुधीरोऽपि वीरवरेण्यानां भ्रातृणां विपन्नत्वाद् विवर्णानि वदनानि वारं-वारं विलोकयन् विपुलान् वाष्पबिन्दूंश्च विकिरन्नतिवेलं विललाप। पश्चात् सोऽपि तृषा भृशं कृशाङ्गतां गतः पयः पिपासाञ्चकार। अहो! पाणिपुटेन पानीय-परामर्शात् प्रागेव वकविग्रहो यक्षस्तं तथानुष्ठानाद् वारयामास। परं पाण्डवराजेन 'कस्त्वमसि' इति पर्यनुयुक्तोऽसौ पक्षी यक्षरूपेण प्लक्षवृक्षासीनोऽक्षिलक्षीकृतः। स च तदेवाम्रेडयामास—'महात्मन्! एष निर्मलनीराधारः कासारः सर्वथा मयाधिकृतः, तस्मात् पूर्वं प्रश्नानां प्रतिवचनं प्रदानीयम् परस्ताच्च पानीयं पानीयम्' इति।

१६. नितान्तं तृषा तान्तेनापि प्रशान्तस्वान्तेन युधिष्ठिरेणाख्यायि—'यक्ष! नतरामितरेणाधिकृतं द्रव्यमहमादित्सामि। त्वया सारसं सलिलं प्रागेवाधिकृतं चेद्, अस्तु नाम तत् तवैव, परं प्रकामं पृच्छ प्रश्नान्। प्रयतिष्येऽहं प्रज्ञानुसारेण प्रतिवचनप्रदानाय' इति।

परीक्षण-दक्षेण यक्षेण पृष्टाः प्रभूता गुप्ताकूताः प्रश्नाः युधिष्ठिरेणाञ्जसा समञ्जसानि प्रत्युत्तराणि प्रादायिषत। सम्पादितसन्तोषैः निर्दोषैः युधिष्ठिरस्योत्तरैः मुदितो मूर्धानं धुन्वानो यक्ष आचचक्षे— 'पाण्डवराज! त्वया चतुरतया मे प्रश्नानामुत्तराणि युक्तान्युक्तानीत्यतोऽचेतनेष्वेतेषु भ्रातृषु यं कमप्येकं कामयसे मयासौ जीवयितुमिष्यते' इति।

१७. युधिष्ठिरो विनयमुपनयन्नाचख्यौ—'अयि देव! मयि दयामयी चेत्ते दृष्टिः कनीयांसं कुमारं नकुलमुज्जीवय' इति।

कृतमन्दस्मितेन विस्मितेन यक्षेणावादि—'अरे! शासनसिंहासनहीनं दीनो भूत्वा विविध-व्यथा-विह्वलो वृथा वनेषु विहरसि, पर्यन्ते च त्वत्प्रतिरोधिना सुयोधनेन नूनं प्रधनमाराधनीयम्, तस्मान्मृधे मदिनं गदिनं परम-पराक्रमि-प्रवरं वीरतरं भ्रातरं तत्त्वतो भीमम्, असीमं साहसं वहन्तम्, शूलि-शाक्तीक-शरासनि-शस्त्रि-शूरशिरोमणिम्, वेपित-प्रत्यर्थि-

सार्थम् पार्थं च परित्यज्य, कामयमानः कृपणं नकुलम्, न कुलं त्वं किं निनाशयिषसि ?' इति । पराक्रमप्रधान-साधनानि हि प्रधनाराधनानि ।

१८. धर्मधृतां धूर्धरेण धर्मपुत्रेणावादि—'करुणाशील ! शासित्वं वा वनवासित्वं वा, प्रह्लादो वा विषादो वा, पृथ्वीपतित्वं वा परिचारकत्वं वा, नियतिनियोगाल्लभ्यते, परं पुंसा धर्म उपेयः न तु हेयः। यो धर्मं रक्षति, तं धर्मः स्वयं रक्षति। तस्मान्नाहं धर्ममुत्स्रक्ष्यामि। कुन्ती माद्री च मम मातरौ प्राणेभ्योऽपि गरीयस्यौ। कुन्त्याः पुत्रोऽहं जीवितोऽस्मि। अतः एषा मे मनीषा यन्मातुः माद्र्या अपि वंशविनाशो मा भूत्। तस्या अप्येकः सुतः सञ्जीवितः स्यात्। देव ! नकुलं जीवयित्वा जननीद्वयीं जीवत्तनूजां विधेहि' इति। मुख्यो: गुणः सतां स्वार्थबुद्धिराहित्यम्। उक्तं च—

यावन्तः स्युः दयावन्तः, परेषामर्थसाधने।
तावन्त एव सन्तोऽन्त-क्रूराः स्वार्थविसर्जने॥ ९॥

किञ्च— **अर्थं व्यर्थं तथा कामं, कामं वामं विजानते।**
लोकाय कायमेतञ्च, धीरा धर्म-धुरन्धराः॥ १०॥ इति।

१९. यक्षश्चचक्षे—'धर्मात्मन् ! परां प्रीतिमुपेतोऽस्मि तवैतेनाप्रतिमेन प्रत्युत्तरेण। असुलभास्त्वत्तुल्याः कुल्याः पूतात्मानस्त्रैकाल्येऽपि त्रिलोक्याम्। उपेक्षितौ सर्वथाऽर्थकामौ उदारचेतसा त्वयेति जीवन्तु ते चत्वारोऽपि भ्रातरः। आयुष्मन् ! जनकोऽस्मि ते। प्रेयांसं पुत्रं त्वामीक्षितुं परीक्षितुं च तव धर्मनिष्ठामिहागामि मया' इति।

एवमभिधायाह्लाय धर्मराजेन सात्त्विकममायि स्वरूपमास्थायि। प्रेताः पाण्डुपुत्राः पुनः प्राणनमुपेताः। प्रमोदितः श्रद्धया प्रणोदितः पाण्डवराजः साष्टाङ्गपातं प्रियतातं प्राणंसीत्। सोऽपि चोदस्तेन दिव्यरेखा-प्रशस्तेन हस्तेन श्रेयसां शतानि वर्षन्नविलम्बं वियद्विले विलीनः।

२०. इदमुदीर्य लक्ष्मणसेनः सायं सन्ध्योपासनाय सप्रसादं स्वप्रासादं प्राविक्षत्।

तस्यामेव तमस्विन्यां निर्भरनिद्रानिमग्नो नरनाथो लक्ष्मणसेनः स्वप्ने वर्च्चसा वलयित-वपुषं कलुषमुषं धर्मदेवं वरदेन पाणिनाशीराशीन् विकिरन्तं व्यलोकयत्। प्रोक्तश्च तेन मुदितेन— 'पूतात्मन् ! जितास्त्वयाऽद्याचलेन धर्मबलेन तपोधनैः मुनिजनैरपि दुरापाः, परोक्ष-त्रिविधतापाः, निर्भया मङ्गलमया लोकाः। इह चिराय शान्त्या शातशतानि भुक्त्वा कीर्तिशेषतां गतः प्राप्स्यसि शाश्वतान् विशोकान् पुण्यलोकान्' इति।

२१. इत्थं स्वार्थनिस्पृहाः साधवो व्यसनोपनिपातेऽपि न धर्मसीमानमुत्क्रामन्ति। प्राक्तन-पुण्य-प्रभावात् शुभशीलास्ते यद् विमृश यद् वदन्ति यद् विदधति तल्लोकोत्तरत्वादनुकरणीयं सदातनाय समया निदर्शनायते। वृत्त-वर्त्म-विधायकानां कथानायकानां तेषामेव गीयन्ते गुणगणाः गुणिनां गोष्ठीषु। जानन्ति ते यद् रक्षितश्चेद् धर्मः कि रक्षितं क्षितिक्षिता। अर्थकामौ त्वकामितावपि कामतः सर्वदा दास्यमनुतिष्ठतः। धर्ममूलानि हि सकलानि कल्याणानि।

तस्मात् प्रेक्षावताऽऽत्मम्भरितामुपेक्ष्य शाश्वत-शुभशर्मणि, मानवता-मानमर्मणि, धर्मकर्मणि प्रवर्तनीय आत्मा। अत एवाहुः आहिताचार धर्मशास्त्रकाराः—

धर्मेणानादि मर्यादि, ब्रह्माण्डं सचराचरम्।
धर्मेऽधीनाः प्रवर्तन्ते, सेश्वराः सकलाः सुराः ॥ ११ ॥ इति।

धर्मार्थं पतङ्ग-वृत्तिः (१०)

१. समतीतानि प्रीति-पीडा-परीतानि स्फीतानि शरदां शतानि। प्रायेण पञ्चाशत्सहस्र-परिमितयोधाऽरोधा विजृम्भमाणक्रोधा महाप्राणस्य 'मोहमद-गजनी'-सुरत्राणस्य विविध-वाहादि-वाहना वाहिनी, वाहिनीपति-वेलेव वेगवती विश्वतो वर्त्म-वसतीनां वह्निसाद्-विधानैः विध्वंसं विस्तार-यन्ती वव्राज। तादृशीमपुराणैः धनुर्बाणैः प्रकाशितमरणैः प्रभूतैः प्रहरणैश्च सन्नद्धां नियमबद्धां वरूथिनीं विलोक्य दूरं दरितेन, वैयात्य-भरितेन, कुलकलङ्क-बिन्दुना हिन्दुना, धुरीयेण लवपुरीयेण शासिना मूलत्राणवासिना विलासिना चापास्य चापादि-शस्त्राणि, घासमास्ये न्यस्य दास्यं स्वीकृतम्, समर्पितानि च स्वीयानि सप्ति-स्तम्बेरम-स्यन्दनसमूह-सहितानि समस्तानि सैन्यानि सुरत्राणाय ताभ्याम्।

२. समन्तात् साध्वसं सम्प्रसारयतः सन्ततं संसर्पतश्च सुमहतः सैन्यसमूहस्य सम्प्रयाण-स्वानं समाकर्ण्यैव सरणौ सम्प्राप्ताः स्तोक-सामन्तलोकास्तु परिपन्थिनं पुरतः प्रेतपतिमिव प्राप्तं प्रेक्षमाणाः, प्रोच्च-प्राचीराणि पुराणि परित्यज्य परितः प्रदेशान् प्रति प्रपलायिताः। मरुमही-सीमा-समीपे समुपेतस्य महामदस्य मोहमदस्य पार्श्वे प्रायः पञ्चाशत्-सहस्र-सङ्ख्याः शौर्योन्मादिनः सादिनः, पञ्चसप्तति-सहस्र-परिमिताश्चाने

जातयः पदातयः समपद्यन्त । यदुक्तम्—

३. **श्लाघन्ते श्रद्धया शक्ति-शालिनं शरणं श्रिताः ।**
शुश्रूषन्ते च श्रीमन्तं, स्वार्थिका भयसार्थिकाः ॥ १ ॥

परञ्च— **शोकार्त्तं श्रेयसा शून्यं, शक्तैः शोषितशोणितम् ।**
शङ्कया शिथिलं शीर्णं, शश्वच्च शरणैषिणम् ॥ २ ॥
मित्त्रीयन्ति महात्मानो, मर्त्यमण्डलमण्डनाः ।
ये तेऽत्रैवाभिजायन्ते, यशसा भासुराः सुराः ॥ ३ ॥ इति ।

सति सम्भवे सृति-सम्प्राप्त-साम्राज्यैः सामन्तैः समं सन्धि समातिष्ठन्, सुतरां सम्भुग्नस्वान्तो मोहमदो गज़नी-वासी, पृथुप्रथस्य सोमनाथस्य मूर्त्तिं दिध्वंसिषमाणः जङ्घालजवः सदर्पः प्रतिदिनं प्रससर्प । तदानीमपि निरवशेषः गुर्जरप्रदेशः सागरासन्न इति सुतरां समृद्धि-सम्पन्नः समभूत् । कर्णाकर्णि मुखामुखि च शुश्रुवांस आसन्नभीका मोहमदानीका गुर्जरवणिजां वैभवकथाः । मोहमदो मूर्त्ति-भञ्जनेन मनोरञ्जनेन साकं धर्मवीरो बुभूषुः, तत्सैन्याश्च लोकलुण्टनलौल्याद् लक्ष्मीलाभलालसा नितान्तमन्तरमोदन्त । यदुच्यते लोके—

४. **स्यात् सौभाग्यवती कामं, सद्यो वा विधवा वधूः ।**
कारोस्तु लक्ष्यमुद्वाहे, भाटकं शाटकं तथा ॥ ४ ॥ इति ।

मूलत्राणमध्यवर्तिनं भाटी-प्रदेशं मरुस्थलीं चोल्लङ्घ्य सौराष्ट्रमुपजिगमिषोः मोहमदस्य मार्गे 'गोगामढी'-त्याख्यं क्षोदिष्ठं साम्राज्यमजायत । अगण्येय-गुणागारस्य चौहाणकुलालङ्कारस्य मानिनस्तत्स्वामिनः श्रीगोगावापनाम्नो महामानवस्य शौर्यौदार्य-गौरवगाथास्तेनागन्तुकेभ्यः श्रुतपूर्वा आसन् ।

यदाहुः— **विग्रहे बाहुवीर्येण, विक्रान्ता वैरिवाहिनीम् ।**
विजयन्ते तु वृत्तस्य, वैशिष्ट्येन वसुन्धराम् ॥ ५ ॥

किञ्च— **विश्ववाल्लभ्य - वैदग्ध्य - वैभवेन विभूषिताः ।**
वर्चस्विनो विजायन्ते, वैदेश्येष्वपि विश्रुताः ॥ ६ ॥ इति ।

५. अथ सम्भावित-भाविविपदो मोहमदो नयप्रवीणैःध्वजिनीधुरीणैश्च विधेयविषये विचारविनिमयं विधाय देशधर्मद्वेषिणं व्याजवेषिणं स्वार्थमात्रैषिणं कुलकल्मषकालतिलकं तिलकं नाम भारतीयम्, तेन साकं च सूक्ष्ममतिं स्वसेनापतिं मुहम्मदं श्रीगोगा-वाप-पृथिवीपतये पारस्परिकप्रीतिप्राभृत-प्रतीकं मण्डलमण्डित-महामूल्य-मणिमुक्तामालं विशालं स्वर्णस्थालं प्रदातुं प्राहिणोत् । उक्तञ्च—

प्रणयप्राभृतं प्राहुरुत्कोचप्रतिपादनम् ।
स्वार्थस्य सर्वथा साधनाशया कुटिलाशयाः ॥ ७ ॥

ध्रुवं धर्मं परत्रापि प्रसाद-सहितं हितम्।
ऋतुं काङ्क्षन्ति लोकार्थ-साधनेन धनेन ते ॥ ८ ॥ इति।

६. ततस्तत्प्रचोदितौ तौ प्रदिष्ट-विशिष्ट-शिष्टाचारं राजद्वारं समुपेत्याऽनुवारं विहितनमस्कारं श्रीगोगावापमहोदयं मन्त्रयामासतुः— 'नरनाथ ! गजनी-सुरत्राणो मोहम्मदः स्वसेनासमूहैः सभेतः एतत्प्रदेशपथेन प्रभासक्षेत्रं यियासुः भवतः साहित्यं समीहते' इति। तन्निशम्य तिलकमुद्रित-नवतिवर्षदेशीयो मान-वतामुदार उदाहारः मानवताऽलङ्कारः श्रीगोगावापः प्रकृत्यैवातिशोणाभ्यां विस्तीर्णकोणाभ्यां कोपक्षेत्राभ्यां नेत्राभ्याम् अङ्गारासारानिव विश्वतो विकिरन् गुरुगम्भीरगर्जनया कृत-तर्जनया गिरा-गादीत्— 'रे किम्पाक ! काक ! कुलाङ्गार ! दुराचारचार ! स्वधर्मान्धमतिः तवाधिपतिः साग्रहं भगवतः सोमनाथस्य विग्रहं विभेदयिषुरार्यधर्माऽभियाति प्रयाति। स च मत्तः साहित्यं सौहित्यं च समीहते। त्वं हिन्दुर्भवन्नपि हा ! अपत्रपामपहाय सहायतां तस्य चिकीर्षुरितः समुपस्थितः। अपेहि, गत्वा प्रभासगामिनं स्वस्वामिनमाख्याहि यद् गोगावापः सर्वथा सैन्यसङ्घ-सम्प्रयाणाय स्वसाम्राज्यसरणिं न सम्प्रदास्यति। धिग् धर्मध्वंसकधृष्ट-धूर्धरं, देशद्रोहदक्षं दुष्टं द्विष्ट-दस्युदासं दग्धदूतं त्वाम्'। इत्युदीर्य तेन पूरित-रोचिष्णु-रत्नजालं सौवर्णं स्थालं परस्तात् प्रास्तम्। न ह्यर्थमाद्रि-यन्ते धर्मैकपक्षपातिनः। यतो हि—

७. **सतां स्वधर्म-स्थिर-सौहृदानां, स्वान्तानि सत्त्वेन समाप्लुतानि।**
न सम्पदा स्युः स्ववशीकृतानि, न त्रासनेनापि न शासनेन ॥ ९ ॥

किञ्च—

देहस्य नाशो विरहे धनस्य, संसारिणः सम्भवतीति सत्यम्।
इष्टस्य धर्मस्य परन्त्वभावे, स्यान्नाशिता मानवता बताऽसौ ॥ १० ॥
वित्तं व्यवस्था-विदुरैस्तु वित्तं, त्राणं विपत्तेर्गुरु वारवाणम्।
तेनैव धर्मस्तिलशो ब्रुडन्तं, प्लवोपमः पाति परं भवाब्धौ ॥ ११ ॥ इति।

श्रीगोगावापस्यैकविंशतिः सूनवः, चतुस्सप्ततिः नप्तारः, पञ्चविंश-त्युत्तरशतं च प्रपौत्रा अजायन्त। एतदतिरिक्ता नवशत-सङ्ख्यान्-जिताऽनेक-सङ्ख्यानां शूरशिरोमणीनां लघुपरिमाणा बिभ्राणाऽप्रतिहत-प्रतापम्, अशक्या शक्त्या त्रासयितुं केनापि सेना समभूत्।

८. अवश्यम्भावितया दारुणस्य रणस्य पञ्चदशदिवसावसानं यावत् सन्ततं सर्वतोमुखं प्रतिविधानमक्रियत। दुर्गं सम्यक् स्वस्थं सम्पादितम्। शस्त्राणि शाणितानि रीतिरहितानि च विहितानि महिषमर्दिन्याः महादेवस्य च पुरस्कृतसाधु-साधनं समाराधनं व्यधीयत।

एकस्मिन्नहनि श्रीगोगावापस्य दुर्गाद् दूरतो गजनी - ध्वजिनी-गरिष्ठाजगरवद् विसर्पन्ती, पुनस्तत्प्रदेशे प्रविश्य पराक्रामन्ती प्रभास-प्रतिमुखं प्रयियासुः, प्रणिधिपुरुषैः प्रैक्ष्यत । मोहमदः श्रीगोगावापेन समं समरं समाराधयितुं न समीहते स्मेति सम्भाव्यते। को नाम विष-वैद्योऽपि व्यालविले पाणिं प्रवेशयेत् ।

९. एवङ्गते नन्दीदत्ताभिधानेन पूजाकारि-प्रधानेन प्रोक्तम्—'वाप ! व्यपेता व्यापत्तिः। यवनवाहिनी पुरतः प्रयाति' इति। तदुपश्रुत्य श्वेतं श्मश्रु पाणिना पुनः परामृशन् प्ररूढ-प्रकोप-प्रतापो वापो व्याजहार—'महाराज ! यदवधि नियतापायेषु नः कायेषु लोहितलेशोऽपि शेषो भवति तावद् भूत-भव्य-भवत्प्रभोः भवप्रभवस्य भगवतो भवस्य प्रतिमां प्रध्वंसयितुं न प्रभविष्यन्ति म्लेच्छाः खलेच्छाः । वयमेतेष्वाक्रमणं करिष्यामः। सुतरामक्षोभवता भवता दुर्गमधिष्ठाय सन्तति-समेतानां समस्तानां सीमन्तिनीनां सद्गतिः संविधेया। येन कोऽपि मत्कुलजातो जनो जीवन् न जातु वैरि-वरूथिनी-वश्यतां व्रजेत्' इति। प्रस्मरन्ति हि पुत्र-पत्नी-प्रभृति-परिवार-प्रेमाणं पुण्यप्राणाः पुरुषपुङ्गवाः । तदुक्तमभियुक्तैः—

१०. **धर्मं ये परमं लक्ष्यं, मन्वते मनुजोत्तमाः ।**
विजानन्ति क्षणं तस्य, रक्षणं ते प्रतिक्षणम् ॥ १२ ॥
वधू-बन्धु-वयस्यानां, वृन्दानि वैभवानि च ।
धर्मत्राणाय विक्रान्ताः, विमुञ्चन्ति वसून्यपि ॥ १३ ॥ इति।

सहसा समाकर्ण्यन्त सङ्गर-सज्जा-संसूचकाः साहस-सञ्चारिणो भयङ्करास्तारा भूरि-भेरि-भाङ्काराः। व्यधीयन्त युद्ध-सन्नद्धा निबद्ध-विविध-वारवाणाः सपर्याणाः तुरङ्गा महाङ्गाश्च । ततः सम्पन्न सकल-सज्जनाः सज्जनाग्रेसराः विक्रमक्षीवा उन्नतग्रीवा अशेषाः कौङ्कुमवेषाः, प्रायः एकादशशत-सङ्ख्याकाः प्राप्त-पुण्य-परिपाकाः श्रीगोगावापेनोत्कृष्यमाणाः जरीहृष्यमाणाः धीरा वीरा अवधीरितमरणा रणाभिकाङ्क्षिणः, विद्विष-विनाशकरेषु करेषु कोदण्डबाणान् कृपाणान्, शितधारान् कुठारान्, तीक्ष्ण-प्रभासान् प्रासांश्चादायाऽभिषिषेणयिषवः सपादलक्षसङ्ख्यं प्रबलं गजनी-बलं विध्वंसयितुं वव्रजुः । तदाहुः-

११. **शक्येतोपप्लवाभावे, सम्प्रदाय-समर्थनम् ।**
आसिधारं व्रतं प्राहुः, सङ्कटे धर्मरक्षणम् ॥ १४ ॥ इति।

दुर्गोदरे दारु-भार-विरचितायां, प्राज्याज्यखचितायां चितायां दशवत्सरेभ्योऽल्पतर-जीवितकालान् बालान् सहादाय सैरन्ध्री-संहति-सहिताः

परस्परं प्रमोदमहिताः सकला महिलाः सत्योऽदीनाः सत्यः समासीनाः पश्चात् परमेश्वर-प्रार्थन-पुरस्सरं देश-धर्महितेन लोकमहितेन पुरोहितेन श्रीनन्दिदत्तेनाऽप्रमत्तेन परिक्रम्य प्रदीपितः पावकः। तस्य तरुणस्तनुजस्तु युयुत्सया महाचापेन श्रीगोगावापेन साकं सङ्गराङ्गणं गतोऽभूत्। तस्य पत्नी पुत्रवधूः शिशवश्चेति सकला अपि विकरालासु, ज्वालामालासु, तृणसमान् निपात्यात्मानं भस्मीभावं प्रयाताः। पश्चात् प्रज्वलिते पावके पुटितपाणिः पशुपतिं प्रार्थयमानः प्रवयाः पुरोहितोऽपि पपात। न खल्वास्थां भजन्ते भङ्गुरेषु शरीरेषु धर्मधरा नरवराः।

१२. दुर्गादविदूरे स्थिता विस्मयवाहिनी यावनी वाहिनी केसरवर्ण-वस्त्रान् उद्यतशस्त्रास्त्रान्, विगतभयान् प्रांशुहयान् उत्पातवातरयान् कतिपयान् 'हर हर महादेवे'ति वादिनः सादिनः सम्मुखं समुपागतान् सन्ददर्श। 'अल्लाहू अकबरे'ति गुरु गर्जनमजनिष्ट। हरितशिरोवेष्टनः शोण-श्मश्रुः मोहमदो गजनी गजाधिरूढः प्रवेणी-वारवाणनिगूढः स्वसैन्यानां समुत्तेजनं समन्वस्थात्।

१३. नवति-वर्षदेशीयो वेगवान् वृद्धो वापो विद्युद्वद् विस्फूर्जन् वैरि-वरूथिनी-विध्वंसं व्यधात्। तस्मिन् प्रलय-प्रतिभये समये संशप्तकैरिवात्मानं यियक्षुभिः दुर्दान्तैः विक्रान्तैराक्रान्ता गज़नी-ध्वजिनी अतिवेल-विप्लुत-बुद्धिर्व्यजायत। परमुभयपक्षीय-पृतनयोः परिमाणस्य, प्रहरणाद्युपकरणगणस्य चैतावदन्तरं समभूद् यद् घटिका-द्वय एव निरवशेषाश्चौहानचमूचराः श्रीगोगावापेन साकं नाकं समुपेताः। तैर् असदेषणाद्वेषणस्य दशगुणा योधगणा यमसात् कृताः। यदा यवन-सैन्यसङ्घो मोहमदादिष्टः श्रीगोगावाप-दुर्गं प्रविष्टः तदासौ तत्र प्रभूत-भूति-स्थाने शून्यतानिधाने, दहदङ्गारं भूतिसम्भारम्, प्लुष्टप्रायाणि पिशितपिण्डानि चिता-सीमासु समन्तात् सिमसिमायमानानि, धूम-भूमोद्गमनानि काष्ठखण्डानि, चक्राकार-चारेण व्याप्तगगनम् स्थगितदुर्गाङ्गणम् गृध्राणां प... च ददर्श।

१४. श्रीगोगावापस्यैकः पौत्रः 'सज्जनः' तत्पुत्रः 'सामन्त'श्चेति द्वावेवावशिष्टौ चौहानवंशीयौ। तौ हि मोहमदाक्रमणस्य पूर्वतः प्रवा...नार्थं प्रभासप्रदेशं प्रयातावास्ताम्। प्रत्यावर्त्तमानाभ्यां ताभ्यां प... पलायमानैः पुम्भिः वर्णिता आकर्णिताः विग्रहे स्ववंशीयानां विजे... वीराणाम्, वह्नौ च वधूबालानां वलिदानस्य वार्त्ताः। तन्निशमन-... कालमुदश्रुभ्यामपि ताभ्यां संस्तभ्य स्वान्तं सहसा स्वेतिकर्त्तव्यं निर्णीत...

निगदितमपि नयनिष्णातैः—

विपत्तिशतेऽपि मतिर्न येषां, दोलायते धीरधुरन्धराणाम् ।
तेषां प्रयोगाः फलिनो भवन्ति, नमन्ति तेषां च पुरो जगन्ति ॥१५॥ इति ।

१५. अथ प्रहितङ्गमः 'सामन्तो' वेगवाहिनं क्रमेलकमारुह्य बुबोधयिषया गुर्जरभूमिपतिं भीमदेवमुपेतः, सज्जनश्च जालौरराजं जागरयितुं जवेन जगाम । परं सज्जनेन पुनः-पुनः प्रतिबोधितोऽपि जालौर-जगतीपतिः भीमदेवसेनाभिः समं स्वसैन्यानि समायोज्य मोहमद-चक्रमाक्रमितुं नाचीकमत् । कतिपयेभ्यो दिनेभ्यः प्रागेव तेन तु गज़नी-ध्वजिनीनां प्रभासे प्रयाणाय प्रदेशस्थस्य प्रमुखपथस्य प्रदानं प्रतिश्रुतमभूत्, प्रादायि च तदनुमतिपत्रं प्राप्ताय मोहमद-दूताय । इयमासीद् युक्तियुक्ता तदुक्तिः यद् 'भीमदेवः एतावत् स्वभावेन तिक्तः स्नेहेन रिक्तः सुतरामुत्सिक्तः सञ्जातो यदसौ मादृशान् मशक-शशक-कुल्यान् तथा तृण-तूलतुल्यान् मन्यते । अतः साम्प्रतमासन्नव्यसनग्रस्तस्य विनाशवित्रस्तस्य विहस्तस्य तस्य किन्निमित्तं साहाय्यं संविधेयम् ?' इति । तच्छ्रुत्वा चिन्तानिमज्जनः सज्जनः सतर्कसम्पर्कमप्यशुभोदर्कं तदाचरणं मत्वा सञ्ज्ञापयन्नाचख्यौ— 'महाराज ! प्रतमामसाम्प्रतं साम्प्रतमिदम् । नैष भवतो भीमदेवस्य च मिथो वैमनस्यस्य प्रश्नः । गहनगर्ते महानदावर्ते पतितः धर्मपोतः । तस्माद् विसृज्य पारस्परिकं निरवशेषं विद्वेषं विद्वेषिणां वैदेश्यानां विनाशो विधेयः' इति । तथा चोक्तम्—

१६. स्वार्थनिष्ठाः फलोत्पत्तिं नेक्षन्तेऽदीर्घदर्शिनः ।
कुशाग्रधिषणाः प्रोक्ताः पश्यन्तः फलमुत्तरम् ॥ १६ ॥ इति ।

तथा विनीतेन तेनानुनीतोऽपि यदा जालौर-राजो नान्वमन्यत तदा मुधा कालक्षेपं परिहरन् सज्जनः स्वकं क्रमेलकमारुह्य मोहमद-गज़नी-सैन्यमभिलक्ष्य प्रातिष्ठत । त्रिचतुराणि दिनानि यावद् वेगेन व्रजता तेन मोहमदस्य सन्देशहरः सैन्य-समूह-समेतः सरण्यां सन्तिष्ठमानः सम्प्रापि । तान् सप्तसङ्ख्याकान् सैनिकानेकैकेन कर्कश-कृपाण-प्रहारेण मृत्युसात् संविधाय तद्देहानि दहनाय ददौ । तथा च तेषां साधन-सामग्रीं सम्यक् संवीक्ष्य जालौर-राजस्य धिक्कृत-क्षात्रक्षत्रं स्वीकृतिपत्रम्, शितधारं सन्देशहर-कट्टारम्, अन्तर्हितानि हितानि अनुज्ञापत्रसहितानि हि तानि-तानि राजचिह्नानि चादाय गजनी-सेनाऽभिमुखं प्रययौ ।

१७. तदानीं मोहमद-सेनायां सहस्त्रत्रितयं गजव्रजम्, पञ्चाशत्-सहस्र-सङ्ख्यं धनुर्धरवृन्दमपि समभूत् । त्रिशत्सहस्रेषु क्रमेलकेषु केवलं

द्विदलौदनादिकादनीयद्रव्य-सहितं उदकं निहितमासीत् । इतः प्रागेवा-वदश्वारोह-सन्दोहम्, दुर्दान्त-दन्तावलम्, विपुलं प्रबलं बलं कस्यचनापि सम्राजः सविधे विद्यमानमद्यावधि नाश्रावि ।

अथ लघुलङ्घितलम्बान्तरालः करालः सपत्नकालः सज्जनो दूरादेव विहितोपचारप्रणतिं गजनी-सेनापतिं समुपेत्य पूर्वप्राप्तं गुप्ता-भिज्ञानं प्रादर्शयत् । स च तं मोहमद-गजनी-निकटे निभृतं निनाय ।

१८. पार्श्वोपहित-काञ्चनकृपाणः सुरत्राणः, भूरिभासनं समु-च्छ्रितासनमध्यासमान आसीत् । तं परितः प्रहरण-पटवः करवालकराः चमूचराः परिमण्डलितास्तस्थुः । भाषाद्वयज्ञद्वारा सज्जनेनेदं वञ्चना-व्यक्तखेदं व्याहृतं यद् 'भवतः सन्देशहरः सरक्षियोधवरः, व्यञ्जित-व्याजेन जालौरराजेन परिगृह्य भयङ्कराकारं निशितधारं कुठारं पशुमारं पञ्चत्वं प्रापितः । जालौरराजस्य मरुमहीमहेन्द्रस्य भयावहभल्लस्य रणमल्लस्य च सम्मिलितानि सैन्यानि सम्प्रति समर-समाराधनाय सज्जानि सन्ति' इत्यभिधाय प्रत्यायनाभिज्ञानरूपेण तारं दूतस्य कट्टारं, रोषातिशयेन स्फुरद्दन्तच्छदस्य मोहमदस्य पादयोः पार्श्वे प्रणिदधे । त्रिचतुरेभ्यो वासरेभ्यः परिश्रान्तस्य क्षुधाक्रान्तस्य जाताध्वधूलिस्नानस्य चौहानस्य तस्य चातुरी-चमत्कार-रोचनाभिः वचनरचनाभिः स सुरत्राणः समाश्वस्तः समजायत । धौर्त्यं धूर्त्ते न पापाय ।

१९. अथ सज्जनेन नियताऽभिसन्धान-विधानं आत्मानं जैसलमेर-स्याऽग्रहारिणं सामन्तोपाधिधारिणं ज्ञापयता पुटितपाणिना प्रोक्तम्-'विजित-संसार ! महोदार ! स्पृहयति चेद् भवानहं सरलया सरण्या विंशति-वासराभ्यन्तर एव भवत्सेनाः सोमनाथं प्रापयितुं प्रभवामि । तस्मिन्नध्वनि न धराधरधारोपरोधस्य न च वैरिविरोधस्य तनीयस्यपा-शङ्का । उदारस्य चास्योपकारस्य मह्यमुपहाररूपेण ग्रामशतं मर्कं निश्चेयं प्रदेयम्' इति । निर्विकारेण गम्भीराकारेण तेनैवम्प्रकारेण पृतना-प्रयाण-वर्त्मनि विद्यमानानां, सुखसंस्थानानां करिष्यमाण-विश्रामाणां ग्रामाणां च विस्तरशः परिचयः प्रादायि यत् पृतनापतिः परे प्रामाणिकाः पथ-प्रदर्शका अपि वचनमस्य विश्वास्यं मेनिरे न चोपहास्यमपास्यं च । अत एवोक्तम्—

२०. **निष्पाद्यं नीतिनिष्णातैः यत्किञ्चित् स्वार्थसिद्धये ।**
पितेति खरमप्याहुः समये सति सङ्कटे ॥ १७ ॥ इति

उत्तरेद्युः सुरत्राणः स्वसैन्य-सङ्घस्य सरण्याः परिवर्त्तनाय सेनापतिं समादिदेश। तदादिष्टा भविष्यदनिष्टाऽशिष्टा भृशं हृष्टा सुरत्राण-सेना सरलेन कोलायत-जैसलमेर-मरुमहीमार्गेण गन्तुं प्रावर्तिष्ट। सङ्कल्पितस्य स्वार्थस्य सिद्धिं सम्भाव्य सन्ततं सुखसिन्धुमज्जनः सज्जनः पीवरं बलक्षीवं दीर्घग्रीवमधितिष्ठन् पदे-पदे पथप्रदर्शनव्यापारमन्वतिष्ठत्। आदिन-चतुष्टयाद् यात्रानन्तरं मार्गदर्शकैः प्रक्रान्तः परित्रास-प्रकाशकस्तुमुलः कोलाहलो यत् 'पुरतः पानीयाभावात् पलाशि-प्रत्यक्षता-रिक्ता, प्रावृषेण्यैरपि पयोदैरसिक्ता, सूक्ष्म-सिकता-लोष्ट-सम्पृक्ता, जवनैः पवनैः कराला, विशाला, प्रचण्ड-मार्त्तण्ड-परिताप-खेदिनी, मरुमेदिनी वर्तते। तत्र तु दूरङ्गमा विहङ्गमा अपि गन्तुं नालम् का कथा वराकाणां सीमित-सामर्थ्य-धराणां नराणाम्' इति।

२१. तत्समाश्रुत्य सुरत्राण-सेनास्वामी सालारः सज्जनं समाहूय भूयो भीषयामास। परमसौ प्रमाणपुरस्कृतेन प्रवचन-पटिम्ना पुनस्तं प्रगाढं प्रत्याययन् प्रोवाच—'पृतनापते! नतमां भेत्तव्यम्। इमामेव सरलां सरणिं समवलम्ब्य सपदि सम्पत्स्यते समीहित-सिद्धिः। एकद्वयोः दिनयोः सर्वथा सफलं स्यात् सैन्यसम्प्रयाणम्' इति।

२२. तत्पश्चात् प्रस्थान-प्रदेशं प्रत्यावर्तनायापि पञ्चदिनानि लगिष्यन्तीति सम्प्रधार्य सेनापतिः सोत्साहं पुनः पुरस्तात् प्रचलनाय पृतनामादिदेश। पञ्चमेऽहनि तीव्रं तपदिने मध्यन्दिने नियति-नियोगात् पुरतः पृष्ठतः पार्श्वप्रदेशान् परितः प्रावर्तत प्रायः प्रलय-परित्रासं प्रथयन्, पांसुपूर-पारापार-प्रतीकाशः, प्रजवनः प्रचण्डपवनः। सहसा सोऽयमुत्पात-वातोऽशिवङ्करः हुङ्कार इव शङ्करस्य, रेणुकण-सङ्कीर्णयोः कर्णयोस्तारं शूत्कारं प्रस्तारयन्, उद्धूलनधाराभिरान्ध्यमातन्वन्, परिपूरित-नासं श्वासं नितरां निरुन्धन्, वदन-रदनेषु कर्कश-कृश-कर्कर-किरणैः किञ्चित् कण्टकितं कायं कम्पयन्, मृदा मार्जितदिक्चक्रवालं जगज्जनयन्, भय-भ्रमाभ्यां भटान् भृशं भीषयन्, विलुप्तदिवसकरं वासरं वासुरात्वमनैषीत्। नैदाघी वालुकावाहिनी, विपुलं विस्फूर्जन्ती, व्यात्तवदनेव दानवी वेगेन वरूथिनीं प्रति ववृधे। पौरुषप्रधानः अवधीरितात्महानः चौहानः श्रीसज्जनः सहेलं स्वक्रमेलं पुरतः पदे-पदे तारतम्येन द्रावयन्नासीत्। तस्य पृष्ठतः प्रभञ्जन-चपेटाघातहेषमाणहयम्, मृन्मय-महोर्मिमाला-मोहित-मत्त-मयम्, भ्रान्त-दुर्दान्त-दन्तावल-निचयम्, सचीत्कारभयम्, विवर्धमानरयम्, चिकीर्षितार्यधर्मस्तैन्यम् सुरत्राणसैन्यमधावीत्।

२३. ततः क्षणान्तरेऽस्मिन् प्रान्तरे रोदस्योः जृम्भमाणं कल्पान्त-काल-कौतुकमिवोपतस्थौ। बलवता वात्यावेगेन विश्वतो विक्षिप्तैः सकर्कर-सारैः सिकता-सम्भारैः, पुमांसः पशवश्च सर्वथाऽन्धा इव, वधिरा इव, विकलाङ्गा इव च परिपतन्तो विक्षिप्त-बुद्धयो व्यधीयन्त। कान्दिशीकं तदनीकं ससम्भ्रमं पश्चात् प्रत्यावर्तिष्ट। परं कः प्रतिनवपराक्रमोऽपि प्रभवति प्रलयप्रसारिणा प्रचण्डपवनेन प्रतिस्पर्धितुम्। पलेषु परिश्रान्त-प्रायाः सहस्रशः सैनिकाः, ससादिनस्तुरङ्गा महाङ्गा मातङ्गाश्च सन्तप्ते सिकता-स्रोतसि सन्निमग्नाः, प्राणान्त एव प्रेतखातेषु पातिताः पितृपति-प्रणयपात्रतां प्रापुः। भवभालानल-भीमेन भानुना भास्वरेषु भूभाग-भ्राष्ट्रेषु भृष्टा भण्टाकी-भटित्रभावं भेजिरे भूयांसो भटाः। अवशिष्टेषु नैके निशि दष्टा दुर्दिष्टादिष्टैः विषालुभिः विकरालैः कालैः पीतलैश्च व्यालैः। यवन-वाहिनी-विनाशाय भगवता भवेनैव पार्षदाः प्रेषिता इति प्रत्यभासत।

२४. समं क्रमेलकेन स्वयमपि सिकता-सरिति सञ्जातमज्जनः श्रीसज्जनः सुरसार्थ-सौहृद्यं समाससाद। परं परलोकाय प्रस्थायिनस्तस्य वदनं परया प्रीत्या प्रफुल्लं पङ्केरुहं प्रत्यस्पर्धत, यदेवम्प्रकारेण प्रतिकूले पथि प्रवर्त्त्य परितप्ते पांसुपूरे प्लुष्टा दुष्टा परिपन्थिपृतना प्रापिता प्रेतपदवीम् इति।

सैषात्र समाप्यतेऽनुकरणीय-चरितस्य, प्रातःस्मरणीयचरणस्य, अप्रतिम-प्रतापस्य श्रीगोगावापस्य, पुण्यपथे प्राणपरित्यागिनाम्, परम-पूज्यपादानां तस्य पुत्राणां, पौत्राणां प्रपौत्राणां पुरन्ध्रीणां प्रवीरपुञ्जानां परिजनानां पुरोहित-प्रभृतीनां च पावनी गौरवगाथा।

२५. अयमेव धर्मायात्मयागः, अयमेव विशिष्टो विश्ववैभव-विरागः, अयमेव सत्यः सांसारिक-सुख-सन्त्यागः। इदमेव वीर्यवतां कलं पैत्रम्, इदमेव धर्मकर्म-मैत्रम्, इदमेव जगज्जैत्रम्, इदमेवान्वर्थकं क्षत्रम्, इदमेव पौरुषमेधिकं सत्रम्, इदमेव प्राणता गलेनालिङ्गितं चन्द्र-करपत्रम्।

अद्यापि वीर-गुणगानरतय उत्तरभारतीयाः देदीप्यमानदारुदारुण-दहने देह-दाहिनीनां तासां देवीनां वीरवधूनाम्, कालं केलि-क्रीडनक-कल्पं कलयतां तेषां संशप्तकानां च पौराणीमिमां परिकथां प्रतिदिनं कीर्तयन्तो निरन्तरमश्रुधाराभिस्तेभ्यो निवापाञ्जलीन् वितरन्ति।

२६. बीकानेर-प्रदेशस्थस्य 'भादरा'-ऽवसथस्य निकटे 'गोगामेडी'-कटके संवृत्तस्यास्य त्रैकाल्येऽप्यनुपमानस्य बलिदानस्य महावदानस्य

संस्मरणाय वत्सरे-वत्सरे वर्षतौ भाद्रपदे मासि महीयसी मेला सञ्जायते । सर्वदामुष्मिन् दिवसे वासवोऽपि वृष्टिव्याजेन वाष्पबिन्दून् विकिरति ।

इत्थं धर्मरक्षणबद्धकक्षाः, विपक्ष-तक्षण-दक्षाः, शौर्यशालीन-शीलाः; लोक-लालन-लीलाः, वीरभार्या आर्याः क्रीडन्तः कोपयन्ति क्रूरं कानन-केसरिणम्, करेण कर्षन्ति कालं काकोदरम्, कवलयन्ति केलिकलाः कटुकं कालकूटम्, किमपि कषन्ति कण्ठेन कठोर-करवाल-कोटिम्, क्रामन्ति कोकिल-कुल-कलिलं काशमानं कृशानुम्, कूर्दन्ते करालेषु कुपित-कूलङ्कष-कल्लोलेषु, तुलयन्ति तलेन तीव्रं तडित्वन्तं ताम्रतन्तुम्, शिक्षयन्ति च शरीरशातनीं शंसनीयां शालभीं वृत्तिमिति भणनीयो भवता भ्रातः! भूयो भद्रभावनया ध्रुवो धर्मः। तदुक्तमनुक्रत्यं सत्यमिहत्यम्—

२७. धन्योऽसौ रमणीयोऽसौ, महात्मासौ च मन्यते ।
यस्मिन् वर्णत्रयात्मायं, धर्मो धुर्यो विराजते ।। १८ ।।
संसार-सुख-सामग्री, गन्धर्वनगरोपमा ।
देहं पुष्णाति, धर्मस्तु, स्थास्नुरूपेण देहिनम् ।। १९ ।।

अपि च— एकस्मै रोचते सूपे मरिचं नेतराय तत् ।
लवणं स्वदतेऽमुस्मै, भूयोऽस्मै तन्न सर्वथा ।। २० ।।
एष धर्मो मम प्रेयान्, तवेयन्नास्ति वल्लभः ।
स्थितिभेदात् तवेष्टेन, मानसं मे न मोदते ।। २१ ।।
विश्वेषां बुद्धिवैषम्याद्, एवं वृत्तिविशेषितात् ।
विषयाणां च वैविध्याद्, वैमत्यं तु पदे-पदे ।। २२ ।।
प्रेरयन्ति परं प्राप्तुं, पिपीलानां परम्पराम् ।
पराङ्मुखानपि प्रायः, प्रमूढाः प्रसभं परान् ।। २३ ।।
चण्डैर्दण्डैश्च कोदण्डैः, भीषयन्तो मदोद्धताः ।
ते वाञ्छन्ति यदन्येऽपि, स्युस्सर्वे नोऽनुयायिनः ।। २४ ।।
प्रभुः परात्परस्तुङ्गे, शैलशृङ्गे विराजते ।
पुमांसः प्रेप्सया तस्य, प्रयस्यन्तः प्रतिक्षणम् ।। २५ ।।
संश्रित्य सरणिं स्वां स्वामारुरुक्षन्ति सत्वरम् ।
सरणिः सैव सर्वस्य, 'धर्म'— नाम्ना निगद्यते ।। २६ ।।
स्यात् सत्यः कोऽपि यो धर्मः, कूटस्थं प्रापयत्यसौ ।
तस्माद् वितण्डया कोऽर्थः, को वरः कस्तथाऽवरः ।। २७ ।।

।। इति ।।

पदप्रतिष्ठा-परिपालनम् (११)

१. अस्ति तपन-तीव्र-प्रतापाऽपचय—समीचीनायां प्रतीचीनाया दिशि पदे-पदे दृश्यमानामान-शिलावितान-सिकतिलतलाचलमरौ, पट-पाटन-कण्टक-कुलाकीर्ण-कर्कन्धु-करीरतरौ, नैदाघ-मरीचिका-भ्राष्ट्र-दह्यमान-कुशकाशे, बहुल-वातूलोद्धूलित-सकलाशाकाशे, वीरवर्य-राजन्य सं... जन्योपाख्यानाप्लावितेतिहासे, अहम्मानात्मदान-शरणापन्न-प्राण-परित्रा-णैकविलासे, प्रतिग्राममुदित-सङ्ग्रामात्यन्तिक-शौर्यौदार्यविदाने, सदाततायि-दमन-शमन-कृतोत्थाने, सर्वलोहरत्न-गर्भपर्वावली-पर्वतावली-वलयित-क्षेत्र-सन्ताने, राजस्थाने, पेशल-पाटल-पीतल-श्यामल-धवलोपल-विरचितागारगो-पुरं, धृताशेषप्रदेश-शासनधुरं, जयपुरं नाम महापुरम् ।

२. विद्यतेऽद्यापि तस्य नगरस्य सदेशे समदेशे, आकर इ... रिक्ततायाः, सागर इव सिकतायाः, जनिताध्वन्योदन्यः, दूरशून्यः, क्लेश... प्रवेशः, प्रथीयान् प्रदेशः ।

तत्र बहुल-बालुकाचिति-विरचित-पट-कट-कुटीरः, भूरिभस्म-चारु-चित्र-चन्दन-चर्चित-शरीरः, चमत्काराचारः, सन्निहित-साहसिक-समाहार-किञ्चोदीयमान-पुण्यविपाकः, कश्चिल्लुण्टाकः प्रत्यवसत् ।

३. आसीत् स परिव्राजक इवाग्निवेशः, त्रिपुण्ड्रकलाञ्छित-भाल-देशः, करकलित-जपमालः, लम्बमान-जटाजालः । स पर-स्वाप-हरणे प्रसह्य स्वाऽपहरणमन्वतिष्ठत्, परं प्रायेण समस्तं सञ्चितं वित्तं विभव-विहीन-विकलाङ्ग-वनीयक-बुभुक्षित-वृन्देभ्यो व्यतरत् । स प्रत्यूषे प्रदोषे च नियमेन सन्ध्योपासनं सेन्द्रियशासनं, सर्वपर्वसु सोल्लासमुपवासं चाकार्षीत् । एकैकस्मै तस्य सहचर-दस्युदल-सदस्यायापि नमस्या नितरामावश्यकं समजायत । तदादेशव्यतिक्रमकरः, दुर्वृत्तधरः नियमभञ्जनो वा जन: प्रचण्डं दण्डितो दलाद् दूरी क्रियते स्म ।

४. एकदा दैवदुर्विलासाद् गोणीषु द्रोणीषु चागण्यानि पण्यानि म... हयादि-पृष्ठेषु लर्दयित्वा, प्रोच्चैरुच्चारित-स्वरसप्तक-वितानानि, सतानानि गानानि तन्वानः, वीवधादि-विविध-वैभव-भोग-सम्भवाभिमानः, ग्राहक-... प्रतारण-साधित-स्वार्थः, कोऽपि वणिक्-सार्थः, तेनैव वर्त्मना व्रजन्नासीत् यत्र प्रसह्यापहारकाणां लुण्टाकानां प्रबलं दलं झाट-झुण्टेषु निशित-शित-हेति-सहितं, मौनमास्थायान्तर्हितं समतिष्ठत ।

५. 'अरे रे! पीवाः पण्याजीवाः। मा चलत, मा चलत, तिष्ठत, पदात्पदमपि न पुरः प्रसरणीयम्, अपरथाऽसिधारा-चुम्बित-शिरोधरा धराशया आशयाश-ग्रासतां यास्यथ।' इत्यनुवारं गर्जनपरैः, परितः प्रसारितदरैः सहसा साहसिक-प्रासिकासिकरैः, तस्करैः वसन-विहित-वदनावगुण्ठनं लुण्ठनं प्रारब्धम्।

तत्रैकश्चारुचरित्रो वणिजस्त्रासितस्तेन स्तेनाक्रमणेनाऽक्षुद्रां, पुष्कल-कलधौत-मुद्रां पुञ्जित-सर्वस्वां स्वां पट-पोटलिकां कक्षे निक्षिप्य निभृत-निलये निगूहन-कामनया चपलं पलायमानस्तस्मिन् पट-कुटीरे प्राप्तो यत्र परिहित-परिव्राजक-कपट-वेशः, लुण्टाकमण्डलेशः, चक्र-चल-गुलिका-जालां जपमालां मुकुलिताङ्गुलिनिकरेण करेण कलयन् मनाङ्-मुद्रितेक्षणः, संयताऽक्षैकतानता-लक्षणः, सनिष्ठः आसनासीन आसीत्।

६. तस्य समग्रमेकाग्रं शमाभरणम् अन्तःकरणमान्दोलयन् वणिजो व्याजहार—'निर्व्याज! महाराज! अपार-प्रसारे आपत्पारावारे पतितोऽहम्। लुण्टन्ति बलाद् विश्वं वैभवं घोराश्चोराः धन्यानामध्वन्यानाम्। मयि दयामया भवन्तोऽत्रभवन्तो रक्षन्त्वेतां धनसमेतां मे पोटलिकां स्वसविधे। दुर्घटना घन-घोर-घटासु विघटितासु कालान्तरे नेष्यामीमाम्।' मायिकेन दस्यु-दल-नायकेन तदोदितम्—'निधेहीमां तत्र पश्चिम-पतत्-पतङ्ग-प्रभाशोणे पटमण्डप-कोणे इति। ततः श्रद्धाधारी विश्वासकारी वणिग्-व्यापारी, प्राप्त-सम्पत्परित्राणः, कृतज्ञतामाविष्कुर्वाणः, बहुधा विहित-प्रणामः प्रसादमासादितः स इतः प्रातिष्ठत।

७. कियत्कालानन्तरं लुण्टित-वणिग्-व्यूहे, समुपचित-सम्पत्समूहे, सपदि व्यपयाते, साहसिक-सङ्घाते तथा च अमन्दक्रन्दने, अजस्रास्रासार-स्यन्दने, शोकसदने, दीनवदने, विनष्टार्थे च वणिक्सार्थे, स एवाऽप्राप्तार्था-पहारदुःखदाहः सार्थवाहः स्वं स्वम् आदातुं तामेव कर्पटकट-कुटीमुपेयिवान्।

किन्तु हन्त! तत्काले कट-पट-कुटीरान्तराले निर्भर-निष्ठा-विनीतेनापि त्वरितं त्रासायत्तेन यत्तेन व्यलोकि, तेन विटपीव वेगवता वातेन तत्तनूर्नितान्तमकम्पिष्ट। स हि स्वेद-सलिल-स्नातः, सञ्जात-साधु-श्रद्धाघातः, भूयो-भयोदूढः, किङ्कर्त्तव्य-विमूढः, एकान्ततश्चिन्ताचान्तचेतनः, स्तम्भित इव, जडीकृत-जङ्घाजव इव क्षणं तत्रैव तस्थौ।

८. परिमित-पदान्तरे कुटीरान्तरे लुण्टाकैः प्रसह्यापहृतो विभवो विभज्यमानोऽभूत्। वणिजो वराकः परिव्राजक-परिधानस्य, तस्कर-

प्रधानस्यैव सविधे विधेर्विधानाद् धन-पोटलिका-निधान-स्खलितविषये स
स्वगतं विलापं पश्चात्तापं चाकार्षीत्। तस्कर-त्रास-धरः स वणिग्
स्वैरमलक्षित एव निभृतं तत्स्थानतः प्रस्थातुकामोऽजायत।

एतस्मिन्नेवान्तरे अकस्मात् ततः कृतनयननिपाते दस्यु-
लुण्टाकनायकः पुण्यं पण्याजीवमुच्चैरचकथत्—'केन निमित्तेनात्रागतोऽसि?'
इति। विषादी व्याकुलमनाः बहु-वेपमान-वपुः वणिग्वरो व्याहार्षीत्—
'भवन्निकटे निक्षिप्तं न्यासमादातुमत्रागमम्, परं प्रथीयान् प्रमादो म
व्यधायि कृत्यं चासाम्प्रतम्। साम्प्रतमहमितोऽपसरामि इति। दुः
दस्युदरः कं नाम न कम्पयति।

९. चौराचार्य आचचक्षे—'तिष्ठ, श्रेष्ठि-श्रेष्ठ! त्यक्त्वा
सोल्लासं नय निजं न्यासम्। स वसुविसरः तस्मिन्नेवोत्ताने स्था
केनाप्यपरामृष्टस्तिष्ठति' इति। यदुक्तम् जायन्ते हि चोराणाम
कतिपये नियमाः।

विहस्तो वणिग् विश्वस्तो नास्ति स्म। स साचीकृताभ्यां श
तङ्कक्षेत्राभ्यां नेत्राभ्यामद्राक्षीत्। तत्त्वत एव तन्निक्षेपस्तत्रैव निहितोऽभूत्
जातरूप-रूप्यक-परिपूरितं पटपुटकं प्राप्य परं प्रीतः पुनः पुनः प्रण
प्रजवन-पदः प्रायासीत् स पणिकः। पुत्रप्रसववत् प्रमोदप्रदां प्राहुः प्रन
सम्पत्ति-सम्प्राप्तिम्।

१०. भय-विस्मय-विनय-धराः तस्कराः इत्थङ्कारं नेतारं पप्रच्छुः—
'किमिदमहितं विहितं प्रभवता भवता? एवमवाप्तस्य वित्तस्य प्रत्याव
कियदुचितं रुचितं च कस्मै? को नामापाटव-पेटकः आखेटकः पाश-प
सुवर्ण-हरिणमकारणं करुणः कामतः परित्यजेत्? अपि च—

अनिष्टमिष्टं च विना विचेष्टितं पटेन चोपायनवत् सुवेष्टितम्।
कुतोऽद्य सद्यः स्वयमभ्युपागतं, न वैभवं वै भवता विभक्तम्?॥१॥ इति

११. स्मयमानाननो मृदुमधुरमुदतरत् महामनाः परस्वापहा
पथप्रदर्शकः—'अवितथं कथितं भवताम्, परमसौ पणिकः प्रत्येता परात्
नुरक्तं सत्यासक्तं भक्तं, निर्व्याजं च परिव्राजं मां मत्वा स्वं सर्वस्वं मन्नि
निक्षेपवन्निधाय गत आसीत्। साम्प्रतं तस्य पुरु-प्रह्लादित-परमेशं इम
वेशं प्रत्यङ्कुरितायाः पावनभावनायाः, अकनिष्ठायाः निष्ठायाः, परिव्रा
पद-प्रतिष्ठायाश्चानुक्षणं रक्षणं मे परमो धर्मः। भवद्विचारानुसारि
कदाचारिणा मया यदि तस्य वणिग्-वृन्द-वरेण्यस्य निक्षेपो न
प्रत्यावर्तयिष्यत तदा निरस्तमायाऽऽमये श्रद्धामये तद्हृदये प्राक्प्र

पुष्कलमानम् एतत्परिव्राजक-परिधानं प्रत्यपरिमाणा घृणा जागरिता समपत्स्यत। तथा च श्रुततद्-वृत्तान्ता दिशान्त-विश्रान्ता, नितान्तमशान्ता जनताऽपि, अशेषाः परिव्राजकवेषाः, वराका लुण्टाका भवन्तीति मंस्यते। अतः प्राप्त-पदवी-प्रतिष्ठा-परिरक्षणं पुंसां नित्यकृत्यम्। परमेश्वरस्याऽकम्पयाऽनुकम्पया श्रित-सुकृत-सृतिः इयं मे प्रकृतिः सर्वदेदृश्येव स्थेमानं भजताम्।

१२. उक्तं हि स्वाधिष्ठित-पदवी-मर्यादा-रक्षणमधिकृत्य सङ्कलित-सदाचार-साहित्य-सारैः, धर्मशास्त्रकारैः—

गुरवः पितरश्चान्ये दार-सोदर-दारकाः।
कल्पन्ते देवभूयाय स्वस्वधर्मानुपालकाः॥ २॥
पुत्राणां पोषणं जोषं प्राणार्घेणापि तोषणम्।
पित्रोर्धर्मः गुरोः पुत्रवच्च च्छात्रस्य पाठनम्॥ ३॥
पुत्रश्छात्रोऽपि वा योऽम्बां, देवतामिव सेवते।
गुरुमेवं यथा देवं, स्वधर्मं पालयत्यसौ॥ ४॥
समेऽप्येते स्वकर्त्तव्यात् प्रच्युताः कर्हिचिद् यदा।
तदा मानवता नूनं, मृता मान-वताऽऽदृता॥ ५॥
जनता-मतदानैर्ये, स्थिताः पूजास्पदे पदे।
ते सन्तः स्वार्थिनोऽसन्तः स्वधर्मं विस्मरन्ति चेत्॥ ६॥
या वाटी-रक्षिका वाटी, भक्षिका सैव जायते।
सत्यता सत्यतिक्लान्ता, मरणं शरणं श्रिता॥ ७॥
भृत्यानां भरणं धर्मं, मन्यमाना दयामया।
जायन्ते स्थास्नुरूपेण, स्वामिनः स्वर्गगामिनः॥ ८॥
एवं न्यायेन कायेनाऽमायेन मनसेशितुः।
हितैषिणोऽप्यतो येऽन्ये, सेवकाः सन्ति ते वकाः॥ ९॥
धर्मोऽत्र त्वयका भ्रातः! त्रातः सत्रा त्वरिष्यते।
अनेवं चेत् क्रुधारक्ताक्षं, यमदेवं प्रपत्स्यसे॥ १०॥
आराष्ट्र-स्वामिनो मान्याद्, आसामान्याच्च मानवात्।
स्वाधिष्ठित-पदानां चेत्, प्रतिष्ठां पालयन्तु ते॥ ११॥
धरणीं सर्व - सौभाग्य - धरणीं शमकामिनः।
नाकं मुक्त्वा सुखैः साकं, बतायास्यन्ति देवताः॥ १२॥
रक्षन् महेन्द्रः स्वपदप्रतिष्ठामिष्टे स दिष्टे विदधाति वृष्टिम्।
विरोचनो वा वरुणोऽथ वातो, वह्निस्तथैवं परिपाति सृष्टिम्॥ १३॥ इति।

१३. इदानीं दयादानी भवत्सु यतमः स तमः-प्रसारात् प्रागेव सा दूरं दरितमापणिकममुं प्रापयतु पार्श्व-पुरावासं यत्रासौ यियासुः। भूदेवंप्रायः पुनरन्तरायः क्रोशद्वयान्तरे प्रान्तरेऽस्मिन्निति।

एष एव प्रबुद्ध-विशुद्ध-चेता दस्यु-दल-नेता, कालान्तरे विश्वविश्रु समाज-महितो महात्मा समजायत।

एवं परिपाकोन्मुख-पुरातन-पुण्याः, जीवजातेऽप्याविष्कृत-कारुण्या आलोकित-लोकतत्त्वाः, लोकोत्तर-महासत्त्वाः, यत् किमपि पदमधितिष्ठ तत्प्रतिष्ठा-प्रतिपालनं 'स्वधर्म' इत्येवाकलय्य विदधतीति।

मिथ्याडम्बरः (१२)

१. अस्ति प्रतिदिशमुच्छलद्धर्षे, नीतिनिष्णातजातसङ्घातसङ्घ वेदविद्या-विहितविविधज्ञानविज्ञानोत्कर्ष, भारते वर्षे, द्विषद्दलदहनभ्राष्ट्रे महाराष्ट्रेषु पौरप्रतिष्ठापितपुरुपुण्या गुण्या पुण्याभिधाना राजधानी तत्र गुणिगणग्रहणाग्रहग्रहिलः, सतीत्वसंरक्षणानुगृहीतार्यमहिलः, सौम्य स्वभावो माधवरावो नाम दयादाक्षिण्यरूपो वीर्यशौर्यौदार्यस्तूपो भूपो बभूव तस्य सुधर्माभायां राजसभायां विश्वविश्रुतो विद्वद्वरो रामशास्त्री परम प्रतिष्ठापात्रं सकलमानवमनोहरः समजनि। स न केवलं तत्र मन्त्रि न्यायाधीशपदं चाध्यतिष्ठत् परं महाराजस्य प्राज्यं पूज्यः पुरोहितप्रवरो समपद्यत। श्रीमाधवरावः पेशवा निरेनसा मनसा, श्रद्धाकिरा गिर सधर्मणा कर्मणा च भूयस्तमां तमाद्रियत। एकदा बहूत्सवसंरम्भ वर्षारम्भस्य मृदुदीप्यदिने प्रथम-दिने रामशास्त्रिणः सत्त्वसम्पन्नसौम्य कर्म्मिणी सहधर्म्मिणी नवोत्सवप्रसादे महाराजप्रासादेऽवसाद-समान वर्धापनवितरणवाञ्छया महिषीमुपतस्थे। तत्र महिष्या भुजिष्याः तदं स्पृष्टास्या दास्यश्च महीपमहितस्य महामहिम्नो मानवमुनेः प्रजापूज पात्रस्य महामात्रस्य गेहिनीं देहिनीमिव सौम्यतां तां सर्वसाधारण-सज संस्करणां निराभरणां च दर्शं-दर्शं स्थाने विस्मयविस्फारितविलोच नितान्तमन्तर्वेदनया दैन्यदर्शनदूना अजायन्त।

२. एवं स्थिते ग्लपितलपनाभिर्मन्त्रणया सुप्रतीतं निर्णीतं तद सराजदारिकाभिः परिचारिकाभिः, यद् अद्यैनां बहुवस्नैः वसनैः विवि र्विभूषणैश्चाभिरूपरूपधारिणीमचिराय विधाय राजकीयायां चारुय

चोलायां दोलायां चोपवेश्य सादरस्नेहं तद्गेहं प्रति प्रेषयिष्याम इति। महिष्यानुमतास्ता रामशास्त्रिणः सुव्रतां वनितां नववधूवद् बहुविधविभागैः विभूषाङ्गरागैः विभूष्य दूष्यस्थगुरुगभोलिकां दोलिकां च परिमल-परिमिलितां विधायामन्दमानन्दमविन्दन्। एवं गते :—

चातुर्याचारचेटीनां चेष्टितं चाटुवेष्टितम्।
सापि चाप्रतिरुन्धाना स्मित्वा वाचंयमाऽभवत् ॥ १ ॥
मोहितं महिलानां स्यान् मुग्धानां मानसं यतः।
मण्डनैश्च महामूल्यैरम्बरैर्दीप्रडम्बरैः ॥ २ ॥ इति।

३. तदनु मनाग् भीतां ह्रीतां च तां तस्यां सम्प्रवेश्य सकपोतहस्तं च पादपद्मावभिवाद्य विनीतव्यवहारान् काहारान् 'नयतेमां शुभशीलामस्यास्तरङ्गितराजकेतनं निकेतनम्' इति निर्दिश्य श्रद्धयाबद्धविदायाञ्जलिः पुनः पुनः प्राणंसीत् प्रतिहारीपुञ्जः प्रस्फुरल्लावण्यधारासारा महामन्त्रिदाराः। पूजापात्रतां प्रयान्ति प्राकृताः अपि पत्न्यः प्रतिष्ठितपदे प्राणेशे।

४. राजमान-राज-मानव्यञ्जनराजतवरत्राहाराः काहाराः अहम्पूर्विकयाभिपतद्बालवृद्धवधूजनवर्गे मार्गे राजदोलिकामायान्तीं लोकं-लोकं सादरं दूरादेव दराद्दीयमानावकाशाः, श्रमशूत्कारपूरिताशाः, द्रुतमेव रामशास्त्रिणः प्रतिदिनविहितसवनहवनं भवनं प्रपेदिरे। तत्र च शनकैर्दोलामवतार्यावनितले निदधिरे। तेषु चैकेन कर्कशकर्मकरेण करेण ताडितमेकवारं भव्याकारं तदागारद्वारम्। विधिवशाद् वेश्मव्यापारान्तरव्यापृतत्वात् प्रतिहाराणां परिचारकाणां चानुपस्थितेः स्वयं रामशास्त्रिणाऽपावृतं कृतं चाऽरं चारु-दारु-विचित्रचित्रकचित्र-नव्यभव्याकारं मन्दिरद्वारम्। अररोद्घाटनसमकालमेव यदा मुदा सम्फुल्लहृदा तद्दारया दोलिकातिरस्करिणी पराकृता, विस्मितेन सस्मितेन च तेन तस्याः प्रावरणाभरणप्रसाधन-साधनलावण्य-प्रकाशपरिस्पन्दः क्षणमीक्षणातिथितां नीतस्तदा नितरां नतेन तेन जानताऽप्यजानतेव व्याहारि—'प्रेयांसो भ्रातरः! एवमाभाति मोहाद् वा भ्रान्त्या वा भवद्भिरेषा सुवेषा प्रमदा मदालयं प्रत्यानीता। मञ्जुमञ्जीरशिञ्जितैः कङ्कणकिङ्किणीक्वणितैश्चात्मवैभवं ख्यापयन्ती, हैमाभरणचरणा, एवंविधानि महामूल्यानि सौवर्णसूत्रानुस्यूतलतापुष्पपर्णानि, विस्पन्दमानवर्णानि, परितः प्रसरत्सुवासानि वसनानि वसाना मृदुहासिनी विलासिनी मम सधर्मिणी न सम्भवति। नियतं कस्यापि कोटिपतेः प्रियतमयानया भाव्यम्' इति सात्मीभूतार्जवेन तेनेदं निगद्य

द्रुतं मुद्रितं घनाघातानुनादितागारं द्वारम्। अहो ! अनिर्वचनीयः खलु गरिमा महिममण्डितानाम्।

५. अथ नितान्तं साध्वसाक्रान्ता महामात्रकान्ता, तदा निरस्त-मायामाधुर्यमदा, अमन्दमन्दाक्षवशंवदा कपाटपिधानसमकालमेवाज्ञासीत् न रोचते मदीयमिदं कर्म प्राणेश्वरायेति। क्षणं विचार्य चार्यचरिता भूयोऽनुतापभरिता सा भूयोऽपि दुःखासिकारूढान् किङ्कर्तव्यविमूढान् दृष्टात्मनिकारान् काहारानादिशत् शीघ्रं शिविकां राजप्रासादं प्रति नेतुम्। याप्ययानवाहका अप्यस्वतन्त्रमन्त्रा महामन्त्रिभयात् किमपि कर्तुमनुत्सह-मानास्तथा व्यथाव्यतिकरापहृतान्तःसुखाः पराङ्मुखाः पल्यङ्कीं भूपभवनं पुनः प्रापयन्। रामशास्त्रिसधर्मिणी चाप्यन्तःपुरं प्रविश्य महार्घाणि वासांसि विभूषणानि चावतार्य सामान्यानि चान्यानि परिधानानि परिधाय पद्भ्यामेव स्वगेहं प्रत्यावर्तत। केवलं प्रियानुकूल्यम् सतीनां जीवनस्य मूल्यम्।

६. रामशास्त्री तु कवाटमुद्घाट्य किमिदानीं वक्ष्यति प्राणेश इत्युदितदरायै दारायै स्नेहसङ्गतं स्वागतं व्याहृत्य साट्टहासं सोल्लासं चाचचक्षे चक्षुष्मान्—'प्राणप्रेयसि ! अपि नाम जानासि तवानुपस्थितौ कस्यचित् समृद्धसाधनस्य महाधनस्य, महार्घवसनालङ्कारझङ्काराकाराविष्कृत-माया जायात्र समाजगाम तव धाम। प्रसभं प्रवेष्टुं चातितमामबाधत माम्। साग्रहनिरवग्रहा सा प्रोक्ता मया प्रागेवाहं कृतदारपरिग्रहोऽस्मि, जीवति च प्राणसमा ममाद्यापि। अपास्तमञ्जिममानायां विद्यमानायां तस्यां कथमहमपरां वरवर्णिनीमुपयन्तुमल'मिति। परिहासपटिमाऽपि परमार्थपथप्रदर्शकः प्रतिभा-परिष्कृत-प्रकृतीनां पुरुषप्रवराणाम्।

७. साऽपि प्राणप्रिय-वाग्वक्रिमवैचित्र्यविमोहिता, ब्राह्मण्येनेवा-ऽपोहिता, कूटक्रियाकृतात्मकदना, व्रीडाविनतवदना, किमपि वक्तुमक्षमा क्षमायाचनोन्मुखी कान्दिशीकेव निष्पन्दमतिष्ठत्। ततः क्षणं यावत् तद्दशावशाविव जम्पती विष्कम्भितवदनावजायेताम्। तदनु संस्तभ्यात्मानं चेलाञ्चलेनापारां नयननीरधारां जोषं प्रोञ्छन्ती प्राञ्जलिः प्राह प्राणप्रियं पश्चात्तापिनी महामात्रमहिला—'सदय ! हृदयनाथ ! मिथ्याडम्बरं प्रति सम्प्रति न कदापि जागरिष्यति मे रुचिः। न च पुनरावृत्तं वृत्तं सम्पत्स्यत इदंरूपम्' इति। प्रक्षालयति हि पापपङ्कं परमार्थः पश्चात्तापः।

८. तां तथा व्यथाविह्वलामबलां बालां विलोक्य स्वैरं सान्त्वयन् धुरीयो धीरया वाचाऽव्याजो व्याजहार राजसचिवः—'यदि विविधैः बहुवस्नैः वसनैः वा मणिगणाभरणैर्हिरण्याभरणैर्वा कापि सुहासिनी विलासिनी

महामहिलात्वगरिमाणमधिगच्छेत् तदा त्वनन्तपारेऽस्मिन् संसारे एतावत्योऽग्र-गण्याः पण्याङ्गना एवाभविष्यन् यासां नितरां परिगणनमपि नतरां समपत्स्यत । उक्तं च—

९. येऽन्तःसारविहीनास्ते स्युर्मिथ्याडम्बरप्रियाः ।
अमायित्वं च सारल्यं विभूषा गुणिनां मता ॥ ३ ॥

आडम्बरोऽन्यचेतस्सु भूयोऽसूयां प्रसूयते ।
आदरं चाऽदरं दूरमार्जवं तनुतेऽतनुम् ॥ ४ ॥

कौतुकेनाभिजायन्ते कौ तु के नाभिमानिनः ? ।
उन्मदिष्णुं भविष्णुं च कुरुते कनकं न कम् ? ॥ ५ ॥

मृदापि महिमा हेम्नो मलिनस्य न हीयते ।
स्वर्णलिप्तस्य शुल्वस्य गरिमा किन्तु चीयते ? ॥ ६ ॥

तपस्त्यागस्तितिक्षा च ब्राह्मणस्य विभूषणम् ।
वसु विद्यानवद्या वै वैभवं न च काञ्चनम् ॥ ७ ॥

परिष्करोति को नाम सुधांशुं मञ्जुलानने ! ।
केन कज्जलिते नेत्रे कुरङ्गीणां सुलोचने ! ॥ ८ ॥

त्वपाव्यक्तमनस्तापे ! कलालापे ! वद प्रिये ! ।
केन कोकिलकण्ठेषु मिश्रितं मधु वाऽमृतम् ॥ ९ ॥

न वामा वाह्यमञ्जिजन्मा न वा माधुर्यसाधनैः ।
वञ्चनाव्यवहारैर्वा व्याहृता स्याद् वपुष्मती ॥ १० ॥

सुमुखी सत्त्वसम्पन्ना सच्छीला स्मितशालिनी ।
निसर्गसिद्धया भाति लज्जया न तु सज्जया ॥ ११ ॥

लावण्यमान्तरं सद्भिरात्मसम्पद् यदुच्यते ।
तेनैव राजते रामा गतार्थश्चर्मचारिमा ॥ १२ ॥

एवं भवन्ति महिलाः सहजातरूपैः,
लावण्यशीलमधुरा न तु जातरूपैः ।
भूयोविभूषणलसच्छवि - लासिनीनां,
पूजाऽन्यथा भवतु वारविलासिनीनाम् ॥ १३ ॥ इति ।

इत्थङ्कारमेकान्ततोऽपास्तसारेऽत्र संसारे न लेशतोऽपि महामहिमशालिनो मृषाडम्बरैकपक्षपातिनो जायन्त इति ।

सौहार्द-निर्वहणम् (१३)

१. मात्रा कलत्रेण च सत्रा पाण्डुपुत्राणां द्वादशवार्षिको विपिनवासः, सांवत्सरिकश्चाज्ञातवासोऽवसितः। परितोऽपि पुरात् पुरं परिभ्रमणपरायणास्ते 'उपप्लव्य'-नामधेये नगरे नग-रेखा-परिवृते निभृतं स्थिताः स्वपक्षीयान् प्रबलान् बलपूरान्, तेजसा तिरस्कृत-सूरान् शूरान्, सर्वथाऽनधीनान् सांयुगीनान्, शक्ति-शौर्योन्नतकन्धरान् धनुर्धरान्, अगदान् सगदान्, सासिकान् प्रासिकान्, अभीकान् याष्टीकान्, ऊर्जस्विनो जैत्रान् चर्मिणः, तरस्विनो मैत्रान् वर्मिणः, श्रूयमाण-शौर्यकथान् महारथान्, समर-स्थल-सिंहनादिनः सादिनः, लक्ष्येष्वच्युतसायकान् पुर-ग्रामनायकान्, कीर्त्या मेदुरित-दिगन्तान् विक्रान्तान् अनन्तान् सामन्तान्, प्रजाऽप्रतिरुद्धादेशान् मण्डलेशान्, गुणिगणगीयमानोत्साहगाथान् प्रदेशविशेषनाथान्, शताङ्गान्, तुरङ्गान्, मतङ्गान्, सधनानि नानाविधानि चान्यान्यायोधनसाधनानि सपदि सङ्गृह्णाना अभूवन्।

२. 'मा भूत् सोदर-सङ्गरः, संरुध्येत भीषणः प्राणिगणप्रणाशः' इति दूतो भूतो भगवान् श्रीकृष्णचन्द्रः समाश्रितनयानां पाण्डुतनयानाम् इष्टं सन्दिष्टमादाय हस्तिनापुरस्थं दुर्योधनमुपागमत्, क्षमापक्षपतितान्यरूक्षाक्षराणि प्रयुञ्जानः पौनःपुन्येन च प्रेरयन् तं परिबोधयितुं प्रायतिष्ठ। परं दुराग्रहः प्रिय-विग्रहः क्रोधनः सुयोधनः स्पष्टमाचष्ट—'रणं विनाऽणीयसीमपि क्षोणीं पाण्डवेभ्यो न दास्यामि' इति।

३. इत्थं वासुदेवस्य सन्धि-व्यवसायो बन्ध्यो बभूव। स प्रत्यागन्तुकामोऽजायत। तं प्रस्थापयितुं पुर-परिसर-पर्यन्तं ये भीष्म-विदुराद्याः सहागता आसन् तेन ते निखिला अपि प्रणय-प्रणति-पुरस्सरं प्रत्यावर्तिताः; परम् आहूय कर्णः स्वेन सार्धं स्यन्दने समीपे च समुपवेशितः। सूतसुतस्य रिक्तं रथं सूतः पृष्ठतः समानयन्नासीत्।

स्वीये स्यन्दनेऽभ्यर्ण-स्थितं कर्णं सादरस्नेहं प्राह स्म भगवान् श्रीकृष्णः—'वसुषेण! त्वं धर्म-धर-धुरीयः धीरोऽभीरुः प्रवीरश्चासि। पश्याद्य तेऽहं कामपि गुप्तां वार्तां विनिवेदयामि। त्वमधिरथ-सूतस्य सुतो नासि, त्वां तु विश्ववन्द्याऽनिन्द्या सती कुन्ती प्रसूतवती। अपरं च त्वमपि युधिष्ठिरादिवत् पाण्डवमात्मानं जानीहि। यतो हि भगवतो भास्करस्य करुणया पाण्डुपत्न्याः कुन्त्याः कौमारेऽधिरजनि ते जनिरजनि' इति।

४. कर्णोऽप्यानम्य मूर्धानं दत्तावधानं प्रणयपेशलं जोषमशेषमश्रौषीत्। वासुदेवः शुभलक्षणशस्तं स्वहस्तं मांसले तस्यांसे निदधे—'त्वं युधिष्ठिराग्रजोऽसि। सुयोधनोऽनीति-रीतिमनुसरति। केवलं ते बलं समुपजीव्याऽस्मानं मानम् आविष्करोति। त्वमधुनाऽरं तस्य सहचारं विहाय मया सहायाहि। श्वः एव तव राज्याभिषेकः स्यात्। युधिष्ठिरस्ते युवराजः सम्पत्स्यते। प्रणय-परम्परा-प्रदर्शन-पुरस्सरं पुरस्कृत्य त्वां पाण्डवा अनुवर्तिष्यन्ते परिचरिष्यन्ति च। अहमप्यभिवादयिष्ये। त्वया सत्रा पाण्डुपुत्राः षड् भ्रातरो यदैकीभूय कुहचिदपि स्थास्यन्ति तदा भुवनत्रयेऽपि तेषां सम्मुखीनः को दीनः स्थातुं साहसं करिष्यति' इति। पिंषन्ति पर्वतानपि पुञ्जीभूताः पराक्रमिणः।

५. स्मितविकसितवदनवर्णः कर्णः सोपचारं व्याजहार—'वासुदेव! अस्त्येतत्। वेद्म्यहं यद् देवी कुन्ती मे माता सूर्यसूनुश्चाहमिति धर्मतः पाण्डवोऽस्मि। परं सुयोधनः सखा सदैव दैववशाद् मयि विश्वसिति। यदाहं समन्ततः समस्तैः निरस्तो गलहस्तितो विमानितश्चाभूवं तदा सुयोधन एव मां सादरं स्वीचकार। सुयोधनोपकारभारेण भूरिणा नितान्तमाक्रान्तोऽहम्। ममैव बलावलम्बनेन सुयोधनेन आयोधनायोजनं व्यधायि। अहमीदृशे सांशयिके तथा साध्वसमये समये कथमपि न त्यक्ष्यामि तत्सङ्गम् न च विधातास्मि विश्रम्भभङ्गम्। अथ च—

६. **कामं स्यात् प्रलयो लोके, शक्यः स्वप्नेऽपि नोज्झितुम्।**
स्वयं सख्या समं स्थेयान्, समयः स मया कृतः॥ १॥ इति।

अतः तत्पक्षमादाय मां समरं समाराधयितुमादिशन्तु श्रीमन्तः। भविता तु तदेव देव! यद् भवतोऽभिमतम्। परं क्षत्रियास्तन्द्रालवः शयालवश्च शय्याधिष्ठिता एव न मरणं शरणं प्राप्नुयुः रणे च वीरगतिमधिगच्छेयुरित्येव मेऽभिलाषः' इति। त्रिविष्टप-कपाटोद्घाटन-कुञ्चिका खलु जन्यं राजन्यानाम्। 'कर्ण! रूक्षैरक्षरैः क्षते क्षारं क्षिपन् समाकर्णयन्नपि सोल्लासं च समन्दहासं च ममोपन्यासं न मन्यसे चेद्, यथा रोचते भवते। अनन्यगत्या दारुणं रणं त्वपरिहरणीयम्।'

७. इति समुदीर्य शीतायत-श्वसितेन श्रीकृष्णेन स्यन्दन-स्तम्भनाय सारथिः समादिष्टः।

तद्रथावरोहणात् प्राक् कर्णोऽभाणीत्—'वासुदेव! एका मदीयाऽभ्यर्थनाऽवश्यं वश्यात्मना श्रीचरणेन स्वीकरणीया। 'कर्णः कुन्तीसुतोऽस्ति'

इति रहस्यं कस्यचिदपि पुरतो नाविष्करणीयम्। युधिष्ठिरो हि धर्मात्मा। यदासाविदं ज्ञास्यति यदहं तस्याग्रजोऽस्मि तदा स राज्यं सपदि मे प्रदास्यति, अहं च तत् सुयोधनाय प्रदास्यामि। कृतज्ञोऽहं सुयोधनस्येति तत्पाक्षिको भवन्नेव योत्स्ये' किन्तु विजयतां न्यायो धर्मश्चेति तीव्रा मे तृष्णा। धर्म-परित्राणाः पुण्य-प्राणाः पाण्डवाः प्राप्नुयुः राज्यम्। विजयश्रीस्तु तमेव वरिष्यते यत्पक्षपाती भवान् भविता। तथाप्येष मेऽनुरोधः निर्विरोधमुरी-करणीयः' इति।

८. भगवता वासुदेवेन महात्मनः कर्णस्यानुरोधः स्वीकृतः। स सूत-सूनुः श्रीकृष्णस्य रथादवरुह्य स्वं स्यन्दनं चाधिष्ठाय हस्तिनापुरं प्रत्यावर्तत। एवम्प्रकारेणाबन्ध्य-सन्धि-व्यापारे व्यावृत्ते वासुदेवे विग्रहो-ऽवार्योऽवर्तत। सङ्गर-वासरोऽपि व्यवसितो वृत्तः। इतः कुन्ती नितान्तं चिन्ताचान्ताऽजायत यत् तस्या एव तनुजः कर्णः स्व-सहोदरैः सार्धं युयुत्सत इति। तस्यैवातुलं बलमाधारीकृत्य सुयोधन आयोधनाय वल्गति। इत्थं विविध-विचार-व्याकुला कुन्ती पर्यन्ते कर्ण-विबोधनाय कृतनिश्चया स्वैरमेकला निशाऽन्ते निशान्तान्निश्चक्राम। पूर्णप्रत्ययवत्यो हि जायन्ते जनन्यस्तनूजेषु।

९. स्नातः सूतसुतः कर्णः सुर-सरस्वत्यां सूर्यसम्मुखीनः स्थितः सन्ध्यामुपासिष्ट। किञ्चित्-कालावधि प्रतिपालनपरा पाण्डव-प्रसूः पृष्ठतः पार्श्वप्रदेशे प्रस्तरपट्टे समुपविवेश। सम्पन्ने सन्ध्याराधन-विधाने राधेयः पश्चाद् वदन-परिवर्त्तनमकार्षीत्। कुन्तीं प्रेक्षमाण एव स श्रद्धावद्धा-ञ्जलिपुटः प्रीत्या प्रावोचत्— 'देवि! अधिरथसूनुः कर्णोऽभिवादयते भवतीम्' इति। तत्क्षणे वाष्पाविलेक्षणा क्षणं किञ्चित् सङ्कुचन्ती कुन्ती व्याजहार—'पुत्र! ममाभिमुख एवात्मानं सूतप्रसूतं मा ब्रूहि। अहमिद-मेवाख्यातुमिहागतास्मि यत् त्वं भुवन-भासकरस्य भगवतो भास्करस्य तनुजनुरसि, अस्याश्चाधन्याया गर्भात् ते जनिरजनि। अहं मातास्मि ते। त्वं सहजैः सह जन्य-हठं विमुञ्च, इदमेव त्वां याचितुमद्यागतं मम प्रियपुत्र!' इति। न हि सोदर-समरः स्वस्तये सम्प्रपद्यते।

१०. कर्णः पुनः पुटीकृत-पाणिपङ्कजः प्राह—'सर्वथा सत्यमुदीरितं भवत्या मातः! जानेऽहं यत्ते तनुजनुरस्मि, परं सौहार्द-धनस्य सुयोधन-स्योपकारभारैः भृशमानतोऽहम्। सुयोधनस्तदा मे मित्रतामितः यदा कोऽपि मे वार्तां न पृच्छति स्म। विपत्काले सुहृत्सङ्गं सन्त्यक्तुमक्षमः ...

यावेऽहम् । आयोधनं तु सुयोधन-पक्षक एव भूत्वा विधातास्मि । इदं मे कृत्यतमम् । तथा च—

मान्यैर्मनीषिभिः 'मित्रं' मिथस्त्राणादितीर्यते ।
स्यादन्यथाचरन् प्रीतेः, पातकः स्निग्धघातकः ॥ २ ॥
महिमानं हि मानं च प्रापितोऽस्मीह येन तम् ।
कौरवं गौरवं त्यक्त्वा, रौरवं वृणुयां नु किम् ? ॥ ३ ॥
समं येन मयाऽभोजि, समं सौभाग्य-साधनम् ।
साकं तेनैव यातास्मि, नाकं वा नरकं ततः ॥ ४ ॥
पुष्कलं प्रीणितो येन, सादरं सोदरो यथा ।
तस्य सन्त्यज्य साहाय्यं, किं क्रियेत कृतघ्नता ? ॥ ५ ॥
वयोवृद्धाभिधानं यत्, 'साधुः स्यादुपकारिषु' ।
जघन्यो ध्वस्तसौजन्योऽधन्यो यस्तद् विलङ्घते' ॥ ६ ॥ इति ।

११. कुन्ती गद्गदया गिरा पुनः प्रोवाच—'जननी भूत्वाप्यद्य त्रपामपाकृत्याहं त्वामुपेता, त्वं च मां निराशा-विवशां विधाय व्यावर्तयसे' इति ।

कर्णोऽचकथत्—'मातः ! श्रोत्रस्वस्त्ययनं कृतं रोचनं ते वचनम्, परं मृष्यतां मे मन्तुः । कर्त्तव्याधीनो दीनोऽहम् । इदं तु प्रतिजानेऽहम् वचनं च ददामि ते यदर्जुनं विना कस्मिंश्चिदपि पाण्डवे प्राणापहारं प्रहारं न कर्त्तास्मि । इतरे च सोदर्य्याः सङ्गरे सम्मुखेऽपि मे समुपस्थिताः स्युश्चेत्, त्यक्ष्याम्यहं तान् । भवत्याः पञ्च पुत्राः स्थास्यन्ति । अर्जुनश्चेत् पञ्चत्वं गतः, अहं ते पञ्चमः पुत्रः । अहं यदि हतस्तदा सव्यसाची स जीवत्येव । एवमपि पञ्चत्वं शेक्ष्यत्येव' इति ।

'न विस्मरणीयं त्वयेदं वचनम्' इत्यभिधाय विषाद-विक्लव-वदनापि आशीराशीनुद्गिरन्ती कुन्ती प्रत्यावर्तिष्ट । मङ्गलं मार्गति महेश्वरं माता सर्वदा समेषां सूनूनाम् ।

१२. तेष्वहस्सु महामहः पितामहः श्रीभीष्मः सदा सदाचारं कर्णं यदा तदा पदे पदे तिरश्चकार । समर-समारम्भे महारथानां अतिरथानां च शूराणां सङ्ख्यान-समये समस्त-सैन्य-समक्षे स सन्तापनाय सूतसूनुं 'अर्धरथोऽयम्' इत्युदघोषयत् । किञ्चित् कोपारुण-वर्णेन कर्णेन प्रतिज्ञातं यद् यदवधि भीष्मः सम्पराये कौरव-पृतनापति-पदमधिष्ठास्यति तावन्नाहं प्रहरणमुद्यंस्यामि । एवं दश दिनानि यावत् परस्परं प्रमथ्यमानप्रत्यर्थिगणे समराङ्गणे सूतसूनुः स्यन्दनासीनः प्रेक्षकवदुदासीनः समतिष्ठत । दशमे दिवसे

धनञ्जय-धनुर्विक्षिप्तैः विशिखैः विपुलं विद्धवपुः, स्रवदस्रासारः शिथिलित-शरीरसारः, महामहिमा सेनावाहः पितामहः स्यन्दनान्निपपात। एवम्प्रकारेण सपत्राकृतस्य तस्य शरा एव शय्यात्वमुपगताः।

१३. पतिते पृतनापतौ पूज्ये पितामहे सपदि युद्धं रुद्धम्। सर्वं सैन्य-सम्पातास्तत्समीपं समुपेताः। स्वैरं-स्वैरं समाप्ते स्वजन-सङ्कुले, एकलः पितामहः शर-शय्याशयः शिष्टः। विष्वग् विविक्तं वीक्ष्य कर्णोऽभ्यर्णमुपागात्। स आह—'पितामह! भवता सह नित्यदा धृष्ट-चेष्टितान्याचरन् सूतसुतः कर्णो मानमहतामत्रभवतां भवतां कल्याण-करणे चरणे प्रणमति' इति।

१४. स कर्णं पार्श्वं आहूय भूयः सस्नेहं तद्देहं स्पृशन् कासमानश्च गद्गदिका-गृहीत-गलया गिराऽवोचत्—'प्रिय पुत्र! जानामि स्म यत् त्वं वीरवर्यः अनुपमेयः अजेयः विक्रान्तगोष्ठीषु गीयमान-शौर्यसङ्कथो महारथोऽसि अमानी ज्ञानी दानी चासि। परं सदाऽहं सदाहं निरुत्साहं च ते हृदयं विधातुं तवावमाननामकार्षम्। इदमेवाभिलक्ष्याहं सङ्गर-समारम्भे साहसिकसैनिक-संख्यानावसरे त्वामर्धरथत्वेनोदघोषयम्, यतो हि तव विक्रममेवोपजीव्य सुयोधनः प्रधनायोद्यतोऽजायत। यदि त्वं व्यग्रता-व्यञ्जनं समर-समर्थनं च नाकरिष्यस्तदा सुयोधनोऽपि संयुग-सङ्कल्पमत्यक्ष्यत्। सोऽयं संख्येऽसंख्य-सैन्य-संहारः यथा कथञ्चिन्निवार्येत इत्येवाहमचीकमम्। परं तदेव संवृत्तं यद् भविष्णु समभूत्। अहो! अपरिहार्याणि बलीयसो विधेर्विलसितानि। त्वां प्रति कदापि मे मनसि परिभव-भावना नाङ्कुरिता। तत्परावरज्ञा भवता पूर्ववृत्तो व्यवहारः सर्वथा नान्यथा मन्तव्यः' इति।

१५. कर्णो मूर्धानमानम्यावहितं हितं वचः समाकर्णयत्। पितामहस्तमाह पुनः—'पुत्र! सततं सम्पद्यमान-सैन्य-संहार-संहारेऽस्मिन् सम्प्रहारे उपहारतां नीतो मयात्मा। त्वमिच्छेश्चेदद्यापि वीरव्रातघस्मरः समरः परिहर्तुं शक्यते। अहमषडक्षीणं किमपि रहस्यं ते प्रकाशयामि। त्वमधिरथसूनुर्नासि अपि तु कुन्ती-गर्भसम्भवः सूर्यसुतः। पाण्डवेषु त्वं सर्वज्येष्ठोऽसीति दुरात्मनो दुर्योधनस्य साह्यमुज्झित्वा धर्मात्मनः सोदरान् पुरोगः परिपालय। तदुक्तं नयोपयुक्तमभियुक्तैः—

पुत्रवत् प्रथयेत् प्रीतिं, रोषयन् न च शोषयन्।
ज्येष्ठः कुर्यात् कनिष्ठानां रक्षणं च प्रतिक्षणम्॥ ७॥

मरणं यावदार्याणां, भरणं भ्रातृणां मतम्।
भूते भवति भव्ये वा, कर्त्तव्यं किमतः परम्॥ ८॥ इति।

१६. तदनु कर्णेन कथितम्—'पूज्यपादाः! अहं प्रागेवेदं वेद भवदभिहितं गुप्तं वृत्तम्। परं सुयोधनो मे स्थिर-सौहृदः सखा। तस्य सततं मयि सत्कारव्यवहारः। उपकर्त्रा मित्रेण द्रोहः तत्प्रत्ययभङ्गो वा मया कथं नाम कर्त्तुमिष्यते। सर्वथाऽसाववलम्बभूते मय्येव प्रत्येति। एवङ्गते विश्वतो वितत-विपज्जाले करालेऽस्मिन् काले कथमहं तमेकलं रहयितुमलम्। भवन्तस्तु मां युद्धं समाराद्धुं आदिशन्तु, आशीर्भिश्चाभिनन्दयन्तु। कौरव-पक्षमाश्रित्य विगृह्णानोऽहं वीरवद् विग्रहे विसृजेयं विग्रहम्, इयमेव मे मनस्कामना। तथा च—

१७. सुहृज्जनस्याऽकृतवेदिनो ये, भवन्ति तत्सङ्ग्रह- खेदिनो वा।
यावत्पराधं नृभिरत्र सार्धं, स्वात्मापि किं तान् न तिरस्करोति? ॥९॥
सम्पत्तयः सन्तु विपत्तयो वा, स्यात् सम्प्रसादो यदि वाऽवसादः।
या स्वीकृता सत्पुरुषैः सुहृत्ता, तां तेऽन्तकालावधि निर्वहन्ति ॥१०॥
सत्येन सम्यक् परिपालितानि, स्थास्नूनि सत्पुरुष-सौहृदानि।
उद्गातृ-वृन्दानि सदैव तानि, गायन्ति लोके, दिवि दैवतानि ॥११॥
युद्धे ममाप्यपर-योध-कृपाण-बाणैः, देहं विनाशि तिलशः शकलीकृतं स्यात्।
पिषन्तु मेऽथ शवमन्यरथाश्वपादाः, सौहार्द-पालन-पथं न परं त्यजेयम् ॥१२॥
इति।

१८. अथ सृक्वणी परिलेलिहन् हिक्कमानश्च पितामहः आशिष-मदात्—'वत्सल! वत्स! पूर्णः स्यात्ते मनोरथः। सोत्साहं कौरव-बलावलम्बो भवन् युध्यस्व। परिपाहि स्वधर्मम्। क्षेमङ्करी तेऽस्तु पावनी पुण्य-पदवी'ति।

एवम्प्रकारेण सत्य-सौहार्दं स्वासुभ्योऽपि गरीयो मन्यमाना मान्या महात्मानः प्रतीपाभिधायिनां शिक्षा-दायिनां गुरूणामपि वचनान्य-वधीरयन्तीति धीरैः सम्प्राप्तेऽपि प्राणसङ्कटे सौहृद्यं निर्वहणीयमिति।

अप्रतिमा प्रियतमा (१४)

१. अरिकुलकलहकोलाहलानाकुलत्वात् सर्वदास्वादितसम्मदेषु, पौरस्त्यजनपदेषु पुरा पदे पदे पल्लीषु पत्तनेषु प्रथीयस्सु पुरेषु च सदा सदाचारोपेतपूतचेतसाम्, प्रतिदिनं प्राज्याज्यतर्पितहिरण्यरेतसाम्, श्रुतिशत-

शीलनास्तसमस्तसन्तापानाम्, अगण्यपुण्यपरम्परापराकृतपापानाम्, स्वर्गापवर्गमार्ग-मार्गणोन्मुख-नित्यकृत्यानाम्, तपस्तेजस्तिरस्कृतादित्यानाम्, अरिषड्वर्गोत्सर्गेन्द्रियजयतिलकितविशालभालानाम्, मनोवाक्कायकर्मकृपाणकर्त्तितजगज्जालानाम्, परश्शतशिष्याभ्यस्यमानसामगानानाम्, तपस्त्यागतितिक्षावाप्तपर्याप्तमानानाम्, यमनियमानुष्ठानविधानकर्शितकायानाम्, प्रायः प्राघुणपरिचरणपरेश्वर-पूजापुण्यपुञ्जोपार्जनैकायानाम्, दयादानदाक्षिण्यदीक्षितानाम्, कल्याणकामैः प्रभातीयपान्थैः प्रणामपुरस्सरमुद्वीक्षितानाम्, प्रायेणानुष्ठीयमान-सान्तपनानाम्, प्रतिप्राणप्रसार-प्रणवपठितिपावितलपनानाम्, विश्ववैभववैराग्यरुचीनाम्, शश्वदेव शिवदेवश्रीशशास्त्रश्रवणशुचीनाम्, मानवमात्रमहितानाम्, मायामदमोहविरहितानाम्, विध्वस्तविषयवासनानाम्, साधुसमाधिसिद्धासनानाम्, निष्किञ्चनत्वेऽपि प्रीतानाम्, म्रदिम-मधुरिम-विनयनयक्रीतानाम्, परापवादापराधोत्कीर्त्तन-मूकानाम्, यायजूकानाम्, सौभाग्यस्मयमानानाम् अनूचानानाम् विप्रवर्य्यावतंसानां बहवो वंशाः प्रत्यवसन् ।

२. तत्रैकदा मुष्टिग्राह्यान्धतमसा तमस्विनी स्थितासीत् । वारिबुद्बुदाकारास्ताराः सरस्सङ्काशे विमलेऽप्याकाशे मन्दं परिस्पन्दमविन्दन्त । व्यहरन् वन-वाट-वाटी-वीथीषु विष्वगाबद्धव्यूहा अमूकाः जम्बूकाः । भयानकमानकमिवावादयन् तरुव्रततिततिषु श्रवणशितवाशितशूकाः घूकाः । सन्त्रासितजीवजाताः, शार्दूलादिश्वापदसङ्घाताः मुखरितदिक्चक्रवाला विग्रहिण इव करालाः कालाः स्वैरमगाहन्त नगरनेदीयांसि मूकिमवहनानि गिरिगहनानि। यत्र तत्रान्तरान्तराऽश्रूयन्त बुक्कत्कुक्कुरकुलानुगतवाणीनां, दीपिकादण्डपाणीनां प्रहरिणां नितान्तदीर्घीकृतान्त्यवर्णविस्फारितानि, प्रोच्चैरुच्चारितानि गाढस्वापोन्मोचनानि वचनानि। विश्वतो वटुबालवधूवृद्धवृन्दविधीयमानविश्रामस्य कस्यचित्तनुतरायामस्य ग्रामस्य, शरेषीकापर्णपटलाधारे मृन्मयागारे, अतनुतरतिमिरप्रतीपः एरण्डतैलप्रदीपः प्रादीपिष्ट। गोर्वरोपलिप्तकुट्टिमकुड्या कुटी नैसर्गिकेण नैर्मल्येन स्फीतेन शीतिम्ना चामानं मञ्जिमानं व्यतानीत् । गैरिकलिप्तप्रान्तशोणे कोष्ठैककोणे, विशाले कलशकपाले मृदुला मृदा निहिताऽदृश्यत । अपरत्र पवित्रपानीयपूर्णं, नीचैर्निहितसिक्तसिकताचूर्णं, स्वैरं स्रवत्सलिलमात्रं, क्षीरोक्षितवसनवलयितगात्रं, मृत्पात्रं रक्षितमस्थात् । परतो न बहुविस्तरः पेषणप्रस्तरः, कतिपयानि मृन्मयानि कर्करी-कमण्डलुकुण्डानि भाण्डानि तथात्यल्पः तृणतल्पः प्रणिहित आसीत् । दीपसमीपे नातिमृदुवासने कुशासने समासीनः

कश्चिद् विदांवरो विप्रो वारं वारं किञ्चिद् विचिन्त्याराद् मस्याधाराद-नन्ताक्षरखनीं लेखनीमादायैकतानचेतनया दारुफलकोपरि रोपिते पटपट्टिकाप्रतीकाशे तालपलाशेऽलेखीत् । अन्तरान्तराऽन्तिके न्यस्तानां पुस्तानां दुर्वाच्यवर्णानि पर्णानि परिवर्तयन् पुनः पुनरपाठीत् । पश्चात् पाणिप्राप्तानि पत्राणि पुस्तपीठी पार्श्वप्रदेशे प्रक्षिप्य निरस्तशयने नयने न्यमीलीत् । कतिपयकालकलान्तं यावन्नितान्तं गम्भीरं धीरं विचार्य चार्यचरितः शतपत्रमित्रे नेत्रे उन्मुद्र्य लेखकर्म प्राक्रमीत् । तदुक्तम्—

३. एकीकृतान्तःकरणैर्विधीयते, यतेन्द्रियैर्यद् व्यवसायशीलैः ।
फलेग्रहि स्यान्नु तदायुगान्तं कान्तं नितान्तं सुधियां प्रियं स्यात् ॥१॥ इति ।

अत्रान्तरे सहसा दीपप्राणस्य तैलप्रमाणस्य क्षोदिमा तदास्तोकं तदालोकं पर्यायेण मन्दिमानमानिनाय । दहनदग्धदेशीया दीनदशा दीपदशा धूमभूमानमवमीत् ।

तावदेव देवतेव देहिनी एका महस्वती सती महिला मौनिनी जङ्घाजवेनोत्क्रम्य चत्वरं सत्वरमुपागमत् । सा च साचीकृतशरीरा धीरा प्रदीपे तैलं प्रदाय ज्वलनजग्धदशाया दग्धं समग्रमग्रं शलाकया कयापि व्यपनेतुं व्याप्रियत । निश्शब्दचलदङ्के क्रियाप्रसङ्गेऽस्मिन् प्रदीपो निर्वापितः सद्यः समपद्यत । भरितः परितः तमःस्तोमः । विचारमग्नस्य, लेखनलग्नस्य, विमतमतखण्डनस्य, पण्डितप्रकाण्डमण्डलमण्डनस्य, व्यस्तो हस्तो विसृमरे तिमिरे समरुध्यत । जागरणजीर्णार्धदोषा जोषं सा जोषा जवेन वर्तितां वर्तिकां प्रज्वाल्य यदा ततः परत्र परावर्त्तमानाऽभूत्, तदा धीरधुरीणो वाङ्मय-पारावारपारीणो महामहिममण्डितः पण्डितः स विघ्नितविविध-विद्याविषयालोचनः स्फारविस्मयविस्फारितविलोचनः, शिष्टतां तन्वन् तामैक्षिष्ट कौतुकेन चाप्राक्षीत्—'का भवति भवती पूजनीया जनी ?' इति । विनिवर्तमाना वनितापि विपुलं विनयमुपनयन्ती, मृदुमधुमधुरया वाचा व्याहरत्—'शास्त्रशरणैः श्रीचरणैः यथापूर्वमनुष्ठीयतां स्वप्रिया क्रिया । प्रदीपनिर्वापणेन बताऽत्र भवतामपारे संसारोपकारसारे व्यापारे-ऽनाकांक्षितापातः व्याघातः सञ्जातः । एतत्कृते तदा किमपि कर्तुमक्षमा क्षमां याचे पौनःपुन्येन पचेलिमपुण्यहीना दीनाहम्' इति । पण्डितमिश्रोऽपि भूयो विस्रंसयन् पुस्तबन्धं भूयो निर्बन्धं च प्रथयन् पर्यप्राक्षीत्—'स्थीयताम्, स्थीयतां तावत् । विमुच्य तां सातङ्कां शङ्कामुच्यताम्, कासि त्वं भद्रे ! शम-दम-यम-धारिणी परोपकारिणी करुणाशीला महीला ? निरस्त-

समस्तसंसाराहारविहार-व्यवहारव्यापारे, साध्वसागारे, सान्द्रान्धकारेऽत्रागामिनि ! कामिनि ! सुकृतिनः कृतिनः कस्यासि नमस्यार्हा सत्कर्मिणी सधर्म्मिणी ?'।

४. मनाग् लज्जमाना मानवती मानवी न वीक्षितवदनैवावदत्—'महाराज ! समाजकौशल्यमात्रकामवतां भवतां विहिताध्यवसाये व्यवसाये नियतिनिघ्नो विघ्नो जातः, साऽतः सापराधाऽसाधारणीं बाधामनुभवामि' इति ।

तद्वाचमाचम्य तदा वदान्येन मनीषिमान्येन, ब्राह्मण्यमण्डितेन पण्डितेन पुस्तपत्राणि पार्श्वपतिते पीठे लेखनीसहितानि निहितानि ।

बोधित इव स्वापात्, शोधित इव पापात्, उदितात्मतत्त्वः प्रमुदितसत्त्वः पुष्कलोत्कलिकाकुलितां वाणीमभाणीदसौ सौम्यः—'नो, नो, नामधामादिकं यदपि नाम तत् त्रपामपाकृत्यामूलचूलमालपत्वत्रभवती भवती । नाहं तदवधि पुस्तपाठं लेखनीलीढां मसिं वा समास्थास्यामि' इति।

५. मृदुमन्दाक्षमुकुलितमूर्तिः, न्यञ्चितनयननलिना, किञ्चित्कुण्ठितमवगुण्ठितमतरुणमप्यरुणं सौम्यत्वसदनं वदनं बिभ्राणा साध्वी मधुमधुरिमम्रदिममिलितं, व्यक्तनिर्वेदनं निवेदनं व्यधात्—'प्राणेश ! शासितकरणानां शास्त्रैकशरणानां सदाचरणानां श्रीचरणानां हृताशा हुताशसाक्षिकं परिणीता पाणिगृहीता खल्वहम् । किमिति 'भवती'-त्यादिभिरादरोदरैरुदीरितैः ह्रेपयन्ति लेपयन्ति च शापैरिव पापैः देवदेविनीं सेविनीमिमां माम्' इति । निरस्तास्मितो विस्मितोऽसौ सौशील्यशाली शालीनं वचोऽवोचत्— 'सत्यम् ? ननु मम ? परिणीता पत्नी ? कर्हि पाणिपीडनं प्रपन्नम्' ?' इति । मानवी न्यवेदयत्—ईषदूनं नूनं शरदामर्धशतं व्यतिगतम् । आतत्कालादासीद् दासीयमस्ति च भद्रङ्करणयोः श्रीभृतां चरणयोः' इति । प्राणेश-पादपरिचर्यैव पतिव्रतानां परमपदप्राप्तिपद्धतिः।

६. पुनः पण्डितप्रवरः प्राह—'एतावत्यो द्राघिमवत्यो विपत्समाः समाः समाप्ताः, अद्यावधि केन तेन निमित्तेनेदं दुःखदायि मया नाज्ञायि ?' इति ।

तपःक्षामा निष्कामा वामा व्याहार्षीत्—'स्वामिन् ! सम्यक् स्मरामि विवाहविधिवेदिकायां प्रभवता भवता वामेतरेण करेण प्रतिक्षणं रोमाञ्चमञ्चन् मे मंदयन्तिकाभव्यः सव्यः पाणिः पर्यग्राहि । तदापि ध्यानैकतानचेतनावतां भवतां न्यक्कृतकुशेशये वामशये पुस्तपत्राण्यविद्यन्त । प्रतिपन्नं

क्रीडनं पाणिपीडनम्, परं श्रीजुषो वर्णांतूलिकामसीसमेतेष्वेतेषु नित्यदाभ्यर्णेषु प्रबन्धपर्णेषु मग्ना लेखलग्ना धन्या अनन्याः समभूवन्। तदारभ्याद्यावधि कुशासनेन साकं युष्माकं पुस्ती-पत्र-मात्राणि मित्राणि' इति।

७. पण्डितप्रशस्तः प्राह—'कथङ्कारं पञ्चाशतां वर्षाणां व्यतीतः स्फीतः कालः कल्याणिन्याः ? इतः प्राक् त्वया कुतो नावोचि पतिरस्मि तवेति ?'

वामा व्याहार्षीत्— 'प्राणाधिनाथ! श्रीमन्तः स्वीये विस्मृतसंसारे व्यापारे व्यापृता अतिष्ठन्, दीनेयमहं चात्मनीने दत्तशर्मणि कर्मणि प्रवृत्ताजायेय। अवार्यं भवत्कार्यं निरन्तरायं प्रातः सायं जायत इति दर्शं दर्शं हर्षोत्कर्षं समन्वभूवम्। अद्य सद्यो दीपदशोपशमेन व्याघातः सञ्जातः, तेन श्रीभृतां कदाचन रोचनवचनरचनाचमनावसरः प्रापि मे परत्र प्रवणाभ्यां श्रवणाभ्याम्, उपनतश्चायं चङ्गः प्रसङ्गः' इति।

उच्चावचविचारपारावारनिमज्जदुन्मज्जन्मना मनाक् संस्तभ्यात्मानं सकष्टं स्पष्टमाचष्ट पण्डितमिश्रः— 'अनुदिनं दैन्यदूना किं व्यवस्यन्ती त्वमासीः ?' इति।

८. नरी न्यगादीत्— 'प्राणेश! किमपरमकरिष्यम्, यावच्छक्यं यौष्माकीनं धर्मकर्मवितानं निर्व्यवधानं विधातुं संविधां व्यधाम्। प्रत्यहमहमायाते विभाते भवत्प्रबोधात् प्रागेवोत्थाय मध्यमरवेण मन्थरजवेन पेषणीमचालयम्। जातजागरणेषु श्रीचरणेषु भवतां शौचस्नानाद्यर्थं निकटनदाद् ह्रदाद् वोपानीतं पानीयं प्रादाम्। तदनु सन्ध्योपासनादि-समग्रसामग्रीव्यवस्थामास्थाय यथोपलब्धपदार्थायोजनं भोजनमसाधयम्। प्राप्तायां तिमिरजालजम्बालदिग्धदिशायां निशायां, अध्ययनं कुर्वाणेष्वेव निद्राणेषु मत्प्राणेषु भवत्सु, यौष्माकान्यस्तव्यस्तानि पुस्तानि पार्श्वपीठैकदेशे न्यवेशयम्, युष्मन्मूर्धानं च दत्तोपधानं व्यधाम्। एवं नित्यकृत्या भृत्या सेयं कल्याणकरणौ भवच्चरणौ संवाहयन्ती तत्रैव स्वापमापत्' इति।

९. मनीषिमिश्रः प्राह- 'मया तु कदापि त्वं नालोकितासि'। स्त्री सम्प्राह—'स्वामिन्! विलोकनमेकलेन चर्मचक्षुषा नाऽऽयतेनापि जायते। तत्कृते चेतश्चेतःसाचिव्यं समपेक्ष्यते। चक्षुषश्चेतसा चेत् साहचर्य्यं न स्यात् कथङ्कारं कञ्चिदपरं मांसमयं दृष्टिद्वयमपि द्रष्टुमीष्टे। न निरूप्यते पुरोऽपि रोपितः पदार्थः। तथा हि—

आसक्तमन्यविषये हृदयं यदीयं,
दृश्वापि सोऽन्ध इव जन्तुरशेषतः स्यात्।
जानाति नातिनिकटस्थमपि स्वदेहं,
के हन्त! सन्ति विषया नु विदूरसंस्थाः॥ २॥

आस्वादनस्पर्शनदर्शनानि, निशामनानीह च शिङ्घनानि।
भवन्ति नूनं मनसैव तानि, निमित्तमात्राणि तथेन्द्रियाणि ॥ ३ ॥

न यौगपद्येन मनो विधातुं, क्रियाद्वयीं कस्यचिदप्यलं स्यात्।
सादी पटीयानपि चाधिरूढः हयद्वये कः समकाल एव ॥ ४ ॥ इति।

१०. नित्यदा निरन्तरमन्तरं तु भवतां पुस्तपरिशीलने, लेखरहस्यो-न्मीलने कागदकीलने च मज्जं सज्जं च सञ्जायते। इत्थम्भूते कौतुकानुस्यूते गभीरतरे व्यतिकरे कतिकृत्वः कुतश्च दीर्घदृश्वानोऽपि भवन्तो मां प्रेक्षितुं प्राभविष्यन्' इति। पण्डितमिश्रः प्रोवाच— 'अस्तु, विसृज्यतामिदं वस्तु; कथं नामास्माकमशनवसन-व्यवस्था समपद्यत ?' इति।

स्त्री स्माह—'स्वाधाने ज्वलदिने मध्यन्दिने, निकाम-विश्रामवेलायां निकटनिवासिनां कुमारिकाः दारिकाः सूचीशिल्पमुपदिशामि। ताश्च सत्य-सचेतना आत्मनिकेतनेभ्यो वेतनरूपेण गोरस-गोधूम-मुद्ग-माष-मकुष्ठ-तिल-तूल-तण्डुल-प्राज्याज्यादिकमुपाहरन्ति। तेनैव निरपायो वृत्त्युपायो वरीवर्तते' इति। इदम्प्रकारं ससारं पुरस्कृतशोचनं वचनं निशम्य चेतनो विचलितचेताः स वन्दनीय-विद्वद्वृन्दवृन्दारकः सहसासनादुदस्थात्। न्यगदच्च गद्गदगलां गिरम्— 'देवि! कानि पुण्यभाञ्जि' भद्राण्यक्षराणि भजन्ते भवत्या अभिख्याम् ?

११. दीनवदना विनीता वनितावादीत्—'भामती' इति। 'भामति! भव्ये भामिनि! भामति! भाविनि भामति! हन्त! क्षन्तव्योऽहम्, पञ्चाशत्-परिवत्सर-पर्यन्तं प्रच्छन्न-परिचर्य्यां प्रतिगृह्णन्, परिचारिकां च प्रणयपुरस्कृतेन प्रेक्षणपातेनाप्यप्रीणयन् पापप्रायोऽशिष्टो धृष्टोऽहं मर्षणीय' इत्यभीक्ष्णं क्षमां भिक्षमाणः स पण्डितपथप्रदर्शकः परिहृतप्रसाधनसाधन-प्रसादयोः पत्नीपादयोः पतितुं प्राक्रमत। कं नाम न नामयन्ति विचित्राणि चरित्राणि सतीनाम्।

१२. पादौ पश्चादपसारयन्ती मृदुतामूर्त्तिः मतिमती भामती कुञ्चितकायाऽमाया सकपोतहस्तं विनीतं वचो व्याहरत्—देव, एवमभिधा[illegible] विधाय च श्रीमन्तः निमित्तेन केन एनस्विनीं विदधति तपस्विनीमिमां माम्। यदि भवद्भिर्दृष्टिर्मम देहाभिमुखीकृताभविष्यत्तदा पुरुषत्वं परिहृत्य पशु[illegible] प्राप्स्यम्। श्रीमद्भिरहं पशुत्वप्राप्तेः परिपालिता, पुरुषत्वं चापरि[illegible] परिरक्षितम्। सोऽयमुत्सादितावसादः प्रसादः विधिविधानोदया दया [illegible]

श्रीमताम्। अकामिन्, स्वामिन्! शास्त्रशीलनेन रहस्योन्मीलनेन च संयमाधीनं यौष्माकीनं समस्तं जीवितं वीतम्। मया च भवतां निरवग्रहेणानुग्रहेण यस्तनुतरः चरणपरिचरणावसरः सम्प्रापि तन्ममोत्कृष्टं दिष्टम्। अन्येन चेदचैतन्येन विलासोल्लासवासनासनाथेन केनचिद् वराकेण परिणीताऽभविष्यम् नियतमिह कराले जगज्जालजम्बाले निमग्ना भग्नाशा ऽमुत्रापि क्लेशकारके नारके न्यपतिष्यम्। न जाने तदा शूकरशुनकादिवदनियतीकृता कियती सन्ततिततिः समपत्स्यत। भवतां प्रबलप्रतिष्ठानेन तपोऽनुष्ठानेन त्वहमपि निष्पापतां प्रापिता। स एष ब्रह्मविद्यावतां भवतां महात्यागः सरस्वती-सेवायागः। सौजन्य-जन्य-गुरुगुणागारं, धर्मप्राण-कल्याण-संस्कारसारं वरयितारं भवन्तमासाद्य साऽद्य धन्यम्मन्याहं जघन्या। साम्प्रतमनुकम्पामानुकूल्यं चाविष्कुर्वाणाः प्राणाः मम प्रवर्तन्तां पूर्वप्रक्रान्तेऽप्राप्तावसाये पठनव्यवसाये। सर्वकालं यावत् स्मृत्यपेता विधेया विधेयास्मि श्रीचरणानाम्' इति। स्वार्थत्यागो हि साध्वीनामन्यतमो गुणः।

१३. इत्युदीर्य देहिनीव देवी सा ततः प्रस्थातुमचीकमत्। पण्डितमिश्रोऽवादीत्—'भामति, भामति, मा याहि, मा याहि, क्षणं स्तम्भय गतिम्, नोपेक्षस्व पतिम्। निशम्यतां मे वचः।' भामती समभाणीत्—'प्राणप्रिय! श्रीमन्तश्चिरन्तनाराधनां साहित्यसाधनां नित्यसङ्गिनीं विस्मृत्य किमिति महामोहकुहरे पातयन्त्यात्मानं प्राप्तमानम्; पाशयन्ति च मां जातातङ्के पातकपङ्के' इति। पुण्यं पतिपथं नतमां प्रतिरुन्धन्ति पतिदेवताः दूरदर्शिन्यो दयिताः।

पण्डितमिश्रः प्रोवाद—'भामति! नास्मि त्वा पापद्रापे पातयितुकामः। अहं त्वात्मनो विषये विमृशामि—किमहं किल्विषकश्मले विशाले पूति-प्रणाले, पतितोऽस्म्युत प्राप्तपुण्यपुञ्जप्रांशुपर्वतपृष्ठे प्रतिष्ठितः' इति।

१४. भामती बभाण—'गीयमानगुणगौरवगाथ! जीवितनाथ! परात्परेश-प्रसादप्रसूताः देवतावतारभूता अत्रभवन्तो भवन्तस्तु। यदपि विलुप्तमागमगुप्तं धर्म-कर्म-मर्म प्रस्तुतपुस्ते प्रकाशयिष्यन्ति श्रीमन्तस्तेनापारः संसारोपकारः; प्रभूतानां चोद्धारः सम्पत्स्यते।' एवमनुश्रूयते—

अध्यायिनं या रचना च नाथ! समुद्धरेत् प्रेरणया भवाब्धेः।
तस्याः प्रणेतुर्जनिमाऽत्र धन्यो जनस्य सम्पूजन-भाजनस्य॥ ५॥

किं च—

महात्मनो यस्य वचोविलासैः लोकाः सदालोकपथं श्रयन्ते।
कृतेन लोके सुकृतेन तेन, सोऽनन्तकालाय दिवं प्रयाति॥ ६॥ इति।

१५. पण्डितमिश्रः प्राह— 'कथ्यं तथ्यं मन्यताम्। सरस्वती-संवासेन भगवता व्यासेन विशालं कालं यावत् तीव्रं तपस्तप्त्वा ततस्तत्त्वनिदर्शनं वेदान्तदर्शनं व्यरचि। मया च तन्मयया चेतनया तस्य रहस्यज्ञीप्सया, लोकलाभाभीप्सया च वीप्सया दूरं देहदुःखदायि पारायण-परिशीलनं व्यधायि। परञ्च विश्वसिहि यन्मम सकलं कन्दर्पकीलन-शास्त्रशीलनं, आद्योपान्तमाचान्तः स वेदान्तः, तथा च सातिरेकः विवेकः तव पूजा-परिचरणपावनस्य प्राकृत-जीवनस्य तुलनायां तु तुच्छतरं बिन्दुं विन्दति। पूज्यपादेन पाराशरेण प्रबन्धः प्राणायि, निर्मायं मया चापाठि, परं भवती तु देहवती वेदान्ताधिदेवी'।

१६. इत्याम्रेडयन् पण्डितप्रकाण्डः पुनः प्रेयस्याः पदयोः पतितुं प्रारभत। भामती भूयः प्राणनाथमुत्थाप्य वैतस्या वृत्त्या वर्तमाना सौम्य-सौमुख्यमुपदर्शयन्ती प्रावादीत्—'महाराज! किमिदं चरणपातानाचरणम्। मया तु स्वजीवने जगदुपकर्त्तुः सत्क्रियस्य प्रियस्य भर्त्तुः वर्यां परिचर्यां परित्यज्य न किमपि सुखसहितं हितमहितं वा समीहितम्। भवद्भिरन-हितायै गर्हितायै तनुतरतूलतुल्यमूल्यायै चास्यै दास्यै वरिवस्यावसरः प्रादायीत्यपारः मय्युपकारः श्रीचरणानाम्। अद्यावधि दयावतां भवतां निरापदयोः पदयोरन्वहमहं दीनदुरापं सुखस्वापमवापम्। एवम्प्रकारेण विहतविषादयोः श्रीमत्पादयोः शयिता दयिता महानिद्रामप्यवाप्नुयां चेत् पुष्कलं कुशलम्' इति। तितिक्षाया अपरं नाम सतीत्युक्तम्।

१७. पण्डितमिश्रः स्वैरं समुदैरयत्—'देवि! भामति! शृणु। मया सकलाः श्वासप्रश्वासकालकलाः अस्य कृतागममन्थस्य ग्रन्थस्य विरचने-ऽतिवाहिताः, त्वया त्वभोगभाजिन्यात्मयाजिन्या मामनुचरन्त्या यथातीतं विनीतं जीवितं नीतम्, तत्प्रतियोगितायामात्मीयं जीवनं तुच्छतरं चाकिञ्चित्करं प्रतिभाति मे। प्राणप्रिये! प्रकृतप्रबन्धस्य प्रत्येकं पत्रेषु, पंक्तिषु, पदेषु, पुरतः, पृष्ठतः, परितः प्रतिफलितं प्रतिदृश्यते तेऽप्रतिमं पावनं जीवनम्। अनेन हेतुना ग्रन्थोऽयमेकेन पापपङ्कधावकेन पावकेन तावकेन नाम्ना विश्वतो विश्वस्मिन् विष्टपे विश्रुतिमेष्यति। मदर्थं भवत्या योऽपूर्वः परित्यागयागोऽन्वस्थायि तस्यानुस्मृतिं स्थेमानमानेतुं निर्विरोधं मेऽनुरोधः स्वीकार्यः' इति।

१८. भामती प्रार्थयत— 'तथा संविधा विधानीया यथाऽचिन्त्य-चरितस्य ब्रह्मविद्या-गरिमभरितस्य महनीयस्य महात्मनः प्रतिद्वन्द्वितायां परमाणुपरिमाणं मत्सदृक्षं क्षोदिष्ठं प्राणिनं संसृतिः विस्मृति-सृतिं नयेत्।

नाथ ! व्याप्रियतां दैवसिके व्यवसाये'। इदमभिधायाह्लाय सा सती भामती प्रस्थातुं प्रचक्रमे।

१९. 'अस्तु, तर्हि यथासमीहितं यत्र कुत्रापि गम्यताम्। परन्तु साम्प्रतं प्रतरां प्राणान्तं मूर्त्तिमन्तं वेदान्तं विहाय, नाहं वेदान्तस्य प्रेतीभूतं कङ्कालमात्रं गात्रं स्प्रष्टुं कामये' इत्युदीर्यौदार्यकार्यचर्याचार्यः स आर्यवर्यः पत्राञ्जनपात्रप्रभृति-पदार्थपुञ्जं पराकृत्य, पुस्ती-पत्र-पूगं प्रचित्य पार्श्वपतिते पुराणपटे पर्यवेष्टयत्। ब्रह्मविद्यावैदुषीमण्डितेन तेन पण्डितेन प्रणीतं ब्रह्मसूत्रापर-व्यपदेशभाजो वेदान्तदर्शनस्य भाष्यमद्यापि विश्वव्यापिनीं विख्यातिं बिभ्रद् वेदान्तस्यानुपमग्रन्थत्वेन स्वीक्रियते। अस्य च ग्रन्थस्य नाम 'भामती' इत्येव प्रथितं पृथिव्याम्। आकर्ण्यते च कर्णाकर्णिकयास्य कर्त्ता वेदान्तविद्यावारिधिः विदुरवृन्दवन्द्यः श्रीवाचस्पतिमिश्रः।

अनेन प्रकारेण प्राणान्तपर्यन्तं पतिचरणपरिचरणपरायणा सती सती सधर्मिणी स्वेन समं स्वामिनमपि सुमनसामिव स्थेयसीममरत्वपदवीं समधिरोपयतीत्यादर्शभूता भामिनीनां श्रीमती भामतीह निदर्शनम्। तथा च—

२०. संयान्ति सौम्यस्मितसाधुशीलाः, या नानुकूल्यं प्रमदाः पतीनाम्।
किमन्तरं कापथ-संगतीनां, तासां सतीनामथवाऽसतीनाम्॥ ७॥

किं च—

या स्वामिनं सत्त्वसमस्वभावं, दुनोति दूरं कलुषक्रियाभिः।
स्निग्धा न सा स्त्री गरलेन दिग्धा, शस्त्री शनैः मर्मणि संविशन्ती॥ ८॥

अपि च—

प्रसादयन्ती परिपोषयन्ती, पादैः पयोजैः पृथिवीं पुनाना।
साध्वी सदा स्मेरमुखी स्वकृत्यैः, सिञ्चत्यसौ सद्मनि शीतिमानम्॥ ९॥

इति।

अपि च परमार्थतः काचनापि काञ्चनकामिनी-कीर्त्यादिकामना मनागपि मनसि निष्ठिता चेत्, न कश्चन कृती कामप्यपूर्वां कृतिं कर्त्तुमलमिति सर्वथा स्वार्थविमुखा एव महामहिमशालित्व-साम्राज्यमधिशासतीति युक्तमुक्तम्—

स्वादावसादौ च सदा सदात्मभिर्यैर्विस्मृतौ लक्ष्यविलीनमानसैः।
तैरेव धीरैर्धरणीधुरन्धरैः, दुरासदं प्रापि पदं निरापदम्॥ १०॥ इति।

सत्यं सख्यम् (१५)

१. अस्ति देश-दैन्य-दुःख-द्रावण-दृढ-बद्धकक्षे, दुर्दान्त-दर्पित-द्वेषण-दल-दमनदक्षे, मन्दिरे मन्दिरे मृगेन्द्र-मदमर्दन-बलोन्मत्त-वरविक्रान्ते, राष्ट्र-रक्षणधर्मकर्मापरिश्रान्ते, पञ्चाम्बु-प्रान्ते, प्रायः पयः-प्रदानेन पूरित-प्रचुर-प्रदेशाशायाः, वर्षर्तु-विभीषण-वारि-विप्लव-परिच्छन्न-पूर्वपश्चिमाशायाः, कूलातत-कण्ट-कर्कश-करीर-किङ्किराल-काण्ड-कुशकाशायाः, द्वीप-संविभाग-सीमारेखा-सङ्काशायाः विपाशायाः, दक्षिण-दिक्तटनिकटे, दृष्टानेक-साम्राज्याभ्युदय पतनं पुरातनं पत्तनं कर्पूरस्थलाभिधानम् ।

२. पुरा तत्रापनेता लोकशोकबाधानाम्, विनेता दुर्वृत्त-वृत्तापराधानाम्, विविध-विश्वविद्या-विशेष-विश्लेष-विचक्षणः, शरणापन्न-दीनदून-गोद्विज-रक्षण-सक्षणः, समुपचित-गौरवगुणो, निरतिशय-न्याय-नयनिपुणो, विपुल-विग्रह-विहितावलिप्त-वैरिबलविशसनः, पुण्यपरम्परो-पार्जनैकव्यसनः, प्रांशु-काय-परिमाणः, शूर-शिरश्शेखरायमाणः, प्राणिमात्रे कृतकरुणस्तरुणः, सकलगुणयुतः सन्नप्यसुतः, शिवशक्तिरिति शुभाभिख्यः शासितासीत् ।

३. विधिविलासात् सच्चरितस्य तस्य भूभर्त्तुः यौवन-सुलभ-विलास-विप्लुतमतिः, प्रेम-प्रसङ्ग-परिच्छेद-प्रवृत्तिः, पर-प्रवादमृषावाद-मात्रमण्डितः, कापथ-प्रवर्तन-प्रतारणपण्डितः, निरपत्यः समुत्सृष्टसत्यः, प्रचुरोत्कोचोपचितगात्रो महामात्रो मुग्धमतिर्नाम समजनि । तेनैकदा कदाचारेण स्वार्थवशात् देवव्रताभिधेयः सतां विधेयः सरलसाधुस्वभावः, पौरप्रजा-प्रथित-पृथु-प्रभावः, सङ्कटेष्वपि सर्वथा सत्यसन्धः, समुत्सृष्टाशिष्टानिष्ट-दुष्टसम्बन्धः, प्रकृत्यैव सकरुणः, कश्चित्तपस्वी तरुणः पारदारिक-प्रकृति-प्रतारण-प्रभृतिकं विहित-विधान-विधि-व्यतिक्रमम्, अलीकमपराधं स्वय-मुपकल्प्य विविध-बाधा-व्यतिकरविकरालायां वन्दिशालायां न्यरुध्यत । तदुक्तम्—

४. **निष्कारणं दारुणतां गतानां, प्राणिष्वसञ्जातदयोदयानाम् ।**
यच्चिन्तितं यद् गदितं कृतं च यत् तद् दुष्कृतायैव भवेद् दुरात्मनाम् ॥१॥

अपि च—

प्रायः पुराणं पुरुषं परेशं, पश्चात् पराहत्य पदप्रहारैः ।
प्रवर्तमानाः परपीडनेषु, प्रयान्ति पापाः परमं प्रसादम् ॥ २ ॥ इति ।

५. तत्राकारणं कारणाशताकुलितेन तेन देवव्रतेनात्मनो निर्दोषतां प्रतिपादयितुं पृथ्वीपालपार्श्वे प्रार्थनापत्रं प्राहीयत। आहूतोऽभूत् स दूतद्वारा राजद्वारे नरनाथेन। तत्रासौ निरागसमात्मानं प्रमाणयन्नपि भयनियन्त्रितैर्महामात्रमन्त्रितैर्मिथ्यावादिभिर्विटादिभिः, प्रत्यक्षिभिः साक्षिभिः, प्रभूतैः प्रलम्भप्रमाणैश्च सापराधत्वेन सत्याकृतः समपद्यत। विमुखेनापि विकट-वृत्ति-विवशेन वसुधाधिपेन तस्मै वधदण्डादेशो व्यधायि। वहुधा वाधते बलीयसी स्थितिरनिच्छन्तमपि हि पुमांसं दुरितमाचरितुम्।

६. अथायत्यां बाल-वधू-वंशविपद्बाधाविचिन्तनविधूतेन, दुर्नय-जनिताऽस्तोकशोकाभिभूतेन च तेन देवव्रतेन न्यवेदि—'महाराज! लेशतोऽपि मयि करुणार्द्रचेतसा चेद् भवता मह्यमेकस्य वर्षस्यावधिर्दीयेत, भृशमुपकृतः स्याम्। अहं हरिवर्षमुपेत्य तत्र परिजन-योगक्षेमस्य सम्पदश्च व्यवस्थामास्थायाऽसंशयं व्यवस्थापितायां वेलायां प्रत्यागमिष्यामि' इति। सत्यसन्धाः सन्तो हि संजायन्ते।

भूमिभृताऽभाणि— 'अस्त्येका युक्तिः यथा सम्भवति बन्धनाद् भवतो विमुक्तिः। यदि कोऽप्यपरो नरोऽत्र त्वत्प्रतिभूः भूत्वाऽस्मान् प्रत्याययेद् यद् यदि त्वं ततो न प्रत्यावर्तिष्यसे तदाऽसौ त्वत्स्थाने प्राणदण्ड-प्राप्तये शूलमारोक्ष्यति' इति।

७. अमूदृशं भृशमुद्वेजनीयं नरनाथस्य निष्प्रणयं निर्णयं निशम्य देवव्रतस्य दृढसौहृदः साद्गुण्यशस्यः प्रियवयस्यः प्रियव्रतः पृथिवीपतेः पुरस्तादुपातिष्ठत्। तेन च देवव्रतस्थाने बन्धकत्वमात्मनः प्रतिपन्नम्। तथा सति देवव्रतो बन्धनाद् व्यमुच्यत। प्रियव्रतश्च वन्दि-वृन्द-विधीयमान-विविध-विषम-व्यापारायां कारायां न्यरुध्यत। तथा चोक्तं युक्तमभियुक्तैः—

८. स्वार्थस्य संसिद्धिमपेक्ष्य जाताः, व्राताः सखीनां सुलभाः समाजे।
प्राप्ते कराले तु विपत्तिकाले, चित्रं क्षणात्ते रहयन्ति मित्रम्॥ ३॥
ये जीवनं जातु तृणाय मत्वा, साह्याय सज्जाः सुहृदां सदैव।
स-दैवतं स्वं खलु वेत्ति धारिणी, तादृङ्-महामानवरत्नधारिणी॥ ४॥

किञ्च—

प्रायः प्रिया-पुत्र-पितृ-प्रसूनां, प्रीति-प्रदाने पटवः पुमांसः।
पीडापहाराय परं परेषां, प्रवर्त्तमानाः पुरुषाः प्रवीराः॥५॥ इति।

९. स्वैरं स्वैरं सरीसृप इव सर्पन् समयः समयात्। परिणत-प्रायतां प्रापद् वर्षावधिः। देवव्रतो न विनिवृत्तः। तत्प्रत्यावृत्ति-प्रवृत्तिर्वापि नावापि। कृतपणस्य कृपणस्य प्रियव्रतस्य समयानुसारं साक्षादिव करालः कालः

शूलाधिरोपणकालः समनुप्राप्तः । ससन्तापालापाः पौरा उच्चावचं व्यचीचरन् । कश्चित् कथयति—'एकान्ततो वैधेयः सोऽयं दुर्विधि-विधेयः प्रियव्रतो येन देवव्रतप्रतिभूत्वं प्रतिपन्नम् । कस्तावत् पुमान् प्राणदण्ड-प्राप्तये समुपस्थातुमीहते' । अपरः प्राह—'अनागतां गतिं गतो वराकः प्राप्त-पापपरिपाकः प्रियव्रतः' । अन्यो मन्यते—'अदूरदर्शिन एवैवं दुर्दैवं निमन्त्रयन्ति ।' इतर उदीरयति—'बालिशानां मूर्धसु विषाणा न जायन्ते' इति । प्रोक्तमपि पण्डितप्रकाण्डैः—

१०. जननीं जनकं जायां जामिं जात्यं च जातकम् ।
जोषं जहाति जीवाय जातु जन्तुर्जिजीविषुः ॥ ६ ॥

अपि च— निन्दतोऽनन्दतो नाम निरस्येन्निखिलान्नरान् ।
निरुक्तं नीतिनिष्णातैर्निजार्थं नैव नाशयेत् ॥ ७ ॥

अन्यच्च— परित्रासप्रदे प्राप्ते पुरः पञ्चत्व-पन्नगे ।
प्राणान् पूर्वं पुमान् पाति परस्तात् प्रेक्षते परम् ॥ ८ ॥ इति ।

११. परत्र प्रियव्रतः पुष्कलं प्रासदत् । नूनं मे वयस्यो नियते-ऽनेहसि निर्वर्तिष्यत इत्यासीत्तस्य द्रढीयान् विस्रम्भः । परमनल्प-सङ्कल्प-विकल्प-विवशतया विविधं विमृशतोऽपि तस्येयमभूदात्यन्तिकी लालसा यद् यादसां-पतिः, झञ्झावाताघात-प्रजात-विकटोत्सङ्गो विष्वग् विजृम्भमाणा-भ्रंलिहोत्तुङ्गतरङ्गो जायेत, स्थास्नुस्नेहस्य, दिव्यदेहस्य, कुल्यस्य देवतुल्यस्य देवव्रतस्य पानीयपोतः परिभ्रष्टपथः परं प्रदेशं प्रयायात्, विस्मृत-विहित-वासरो वासौ पार्थिव-प्रतिष्ठापिते पाशाधिरोपणकाले व्यावर्त्तितुं नालन्तमः स्यात्, मम मित्रस्य प्राणपरित्राणं प्रपद्येत, तत्स्थाने च भूभर्त्ता मां शूलमधि-रोपयेच्चेदेकपद एव सौभाग्यभाजनस्य मे प्रत्न-पुण्यपरम्परा पुष्कलफला, सत्य-संस्कृतं सौहार्दं च सर्वथा सुखावसानं सञ्जायेत' इति । सर्वथा स्वार्थ-निःस्पृहाः सत्याः सुहृदः सर्वस्वं समुत्सृजन्ति सख्यसंरक्षणायेति स्वगतम-चिन्तयदसौ—

१२. कामं ममाङ्गान्यपि तोदितानि, शनैः शनैः स्युः शकलीकृतानि ।
अयन् श्रियं शर्म शिवं च शश्वज्-जीव्यात् सखा मे शरदां शतानि ॥९॥

किञ्च— अद्य प्राप्तानुगुण्यानि, गुण्यानि स्युश्च सर्वथा ।
पुण्यानि म्रियमाणस्य, मम मित्रस्य मुक्तये ॥ १० ॥' इति ।

हन्त ! वस्तुत एव देवव्रतो व्यवस्थापित-वारवेलायां न विनिवृत्तः । तत्पर्यालोच्य च परवश इव पृथ्वीपालः प्रियव्रतस्य शूलाधिरोपणाय दण्डपाशिकानादिदेश । ततो मरण-माला-मण्डित-मुण्डः, पुरः प्रचलत्पार्थिव-

पुरुष-प्रताड्यमान-प्रचण्ड-डिण्डिमः, प्रमुदित-मुग्ध-मुखमण्डलः, पश्चात्-पाशित-पाणिपयोजः, पशुर्निविशेषं प्रियव्रतः प्रापितः प्रमापण-प्रदेशम् । हन्त ! नितरां निष्ठुरो न्यायः न कृपते कृपायामपि ।

१३. एतस्मिन्नेवान्तरे मार्गं-मृदित-मृदा-मलीमस-मञ्जु-मूर्त्तिः, विह्वलता-बाहुल्य-विकृत-विवर्ण-वदनः, पानप्रसक्त-पुरुष इव पदे पदे पुरतः पश्चात् पार्श्वयोश्च प्रस्खलन्, विष्वग्-विकीर्ण-व्याकुलित-वालवलयः, तृषातुर इव रूक्षरसनः, लीढदन्तच्छद-द्वितयः, स्फार-स्फुरन्मज्जदुन्मज्जद्-हृदयः, प्रांशु-पर्व्वतीय-पथ-प्रधावन-परिश्रम-प्रादुर्भूतेन प्रस्वेद-पयःपूरेण प्रक्लिन्नप्राय-परिच्छदः, वृथा - वाधित - वयस्य-व्यापद् - विशङ्का - वैकल्य-विस्फारितविलोचनः, क्लान्त्या नितान्तं तान्तः, गद्गदिका-गृहीतगलां गिरमुद्गिरन्, यष्टि-प्रमाणानायतानुच्छ्वासांश्चोद्वमन् देवव्रतो द्रुतं वधस्थलीमासाद्योच्चैरुदचारीत्—'अये वधशालाधिकृताः ! एषोऽहं देवव्रतः, न शूलामधिरोपणीयो निरपराधो मे प्राणप्रियो वयस्यः । सम्प्राप्तोऽहम्' इति ।

१४. प्रोच्चैः परिदेवन-परान् पुनः पुनः प्रमोह-परवशान्, पृथिव्यां पततः पांसुषु प्रलुठतः, परिजनान् प्रतिवेशिनः प्रेमिणश्च परित्यज्य देवव्रतः समुचित-समय एव हरिवर्षात् प्रातिष्ठत, परं प्रतिक्षणं प्रबन्धेन प्रचण्ड-पवन-प्रताडनैः प्रकुपितस्य पारावारस्य पयःपूरेण प्रणोदितस्तस्य पोतः परवशतया पर-प्रदेश-प्रतीरं प्रापितः । तूर्णतरं तीर्त्वा तटं देवव्रतो यथोप-लब्धेन वाहनेन प्राद्रवत् । तस्यान्तिमस्तुरगस्त्वरित-तरसा प्रधावन् पदवी-प्रस्तर-प्रहृति-पाद-प्रस्खलन-पतितः पञ्चत्वं प्राप्तः । बहवो वासराः व्यतिगताः । मा भूद् वेला-व्यतिक्रम इति विशङ्कितेन तेन नाभोजि नापायि किञ्चिदपि । प्रभूतं प्रधावनात् पुञ्जितास्रौ, प्रोत्फुल्ल-पुटप्रतीकाशौ तस्य पादौ पिटिका-पूरितौ प्रपन्नौ । परं तस्येदमेवासीत् सबलं समीहितं यत् स संस्थापिते समये समुपेत्य साक्षात् स्नेहस्वरूपस्य स्वसुहृदोऽसून् सन्त्रायेत । असहनीयं खलु महनीयस्य मित्रस्य मरणम् ।

१५. तदानीमेव प्रकम्पितजीवजातः, समुन्मूलित-पादपसङ्घातः प्रावर्तत झञ्झावातः । प्रागेव प्रणिधिप्रयत्नैरभियोगस्यासत्यत्व-ज्ञानेना-नुशयानः, प्रत्यक्षदर्शी पृथ्वीपतिस्तु तयोस्तादृशीमदृष्टाश्रुतपूर्वां प्रगाढां पारस्परिकीं प्रीतिं पर्यालोच्य विपुलं विस्मितो व्यजायत । सतां सत्कार-संरतेन महामात्र-सहितेन तत्र स्थितेन तेन च तदानीमेव सत्यसौहार्दो देवव्रतः प्राणदण्डाद् विमुक्तः । पुनः पुनः प्रार्थ्यासौ सौभाग्य-सूचक-विशाल-

भाल: पृथ्वीपाल: स्वयमपि तयोरन्तरङ्गं स्नेहासङ्गं सम्प्रापत्। स्पृहणीयं सर्वत्र सत्यसाराणां सतां सौहृदम् ।

एतस्मिन्नेवान्तरेऽन्त:पुरात् काचित् परिचारिका दारिका त्वरयोपेत्य वैतस्या वृत्त्याभिवाद्य च भूभुजं सहासोल्लासं व्यजिज्ञपत्—'देव ! दिष्टचा वर्धंते भवान् पुत्रोत्पत्त्या। श्रीजुष: श्व:श्रेयसमाशंसमाना सर्वथा स्वस्था सुप्रसन्ना च कल्याणिनी देवी क्रियासमभिहारेण प्रणय-प्रणाम-पुष्पाञ्जलिं प्राभृतीकृत्य सभाजयति देवस्य पावन-पाद-पयोजौ' इति। पुत्रप्रसवं हि परमोत्सवं प्रवदन्ति प्राञ्च: ।

१६. प्राप्त-प्रचुर-प्राभृत-प्रीता प्रेष्या प्रतिन्यवर्तिष्ट। परं प्रासीदन् प्रेक्षका: पौरा:। परं तां पृथिवीपाल-प्रजा-प्रमोदप्रदां प्रवृत्तिं प्राप्य प्रकृत्यैव मत्सरी महामात्र: प्रलम्भ-पूरितत्वाद् वाङ्मात्रेण प्रमोद-प्रचिकटयिषया पार्थिवपार्श्वं प्रयियासिषुरभूत्, परं सहसा घोर-घनाघन-घोष-विभीषितस्य, पवन-जवनस्य राजवाजिनो लघु-लङ्घन-दर-विद्रावित-जनसङ्घया जङ्घया बलवद् वदने व्याहतो विनष्ट-दृष्टि: प्रस्खलितपाद: प्रत्यासन्न-कूपे पपात। तदालोक्य लोकानुकूलताऽभावान्महामात्रस्य, प्राण-भयाच्चात्मन: केवलं कोलाहलं कुर्वाणेषु लोकेषु कोऽपि महामात्राभि-रक्षणाय कूपे कूर्दितुं नाचीकमत्। समुदैरयंश्च सर्वेऽपि— 'म्रियतां मृषा-मानी, मत्सर-मलीमसमति: मुग्धो महामन्त्री' इति। प्रलयोऽपि हि पापानां प्रायेण पुंसां प्रमोदाय प्रजायते।

१७. एतस्मिन्नेवान्तरे 'कश्चिन्नरो निकट-निपाने निपतित' इति निशम्य निसर्गतो विश्वजनीनवृत्तिर्देवव्रत: सपदि समुपेत्य सपरिधानमात्मानं निम्ननीरे निपाने न्यपातयत्। तत्र च तरणावेदित्वात् तोये निमज्जनो-न्मज्जनाकुलित-चेतनं, प्रतिप्रश्वासं प्रसभ-प्रविष्ट-पय:पूर-प्रफुल्ल-पिचण्डम्, प्राण-परित्राणाय प्रचुर-प्रयास-प्रवृत्तै: पतग-पक्ष-प्रचल-पाणिपादम्, निश्चुतितातिमात्र-रक्त-परिस्पन्दमान-गात्रं महामात्रं बलीयसा बाहुद्वितये-नोद्धृत्य जनान्तरानीत-रज्ज्वादि-साहाय्येन निपानान्निष्कासयामास। यतो हि—

१८. जीवद्भिरासाद्यत एव सर्वै:, स्वयं सुखस्यावसरोऽनुवारम्।
परं परार्त्ति-प्रशमाय कालो, धन्यैरवाप्येत कदाचिदेव ॥ ११ ॥

किञ्च— पिचण्ड-पूर्त्तये प्राय: प्राणन्ति पशुपक्षिण:।
परं परोपकाराय पुमांस: पङ्क्ति-पावना: ॥ १२ । इति।

तदा तदीयमतिमानुषं पौरुष-प्राचुर्यं प्रेक्ष्य परं प्रीतेन पार्थिवेनासौ मुख्यमन्त्रिपदे प्रियव्रतश्च प्रतिनिधि-महामात्राधिकारे प्रस्थापितः । तदुक्तम्—

अद्याधुना श्वो दिवसान्तरेऽपि वा, सत्यस्य सत्यं विजयो विजायते ।
अश्मेत्यविज्ञाः कथयन्तु कामं, व्याहन्यते नैव मणेर्मणित्वम् ॥ १३ ॥ इति ।

१६. एवम्प्रकारेण सत्यसख्याः, सञ्चरिष्णु-सुरप्रख्याः, सर्वदा मर्त्यमात्रे मैत्रीमाविष्कुर्वाणाः, निस्तुल-सत्त्वपरिमाणाः, समुपेक्षित-स्वीय-सुखाः, सर्वथा स्वार्थ-पराङ्मुखाः, प्राण-परित्यागेनापि पर-पीडा-प्रतीकार-प्रवृत्तयः, प्रतिपक्षिष्वपि प्रेमपरम्परां प्रथयन्तः पुरुष-पुङ्गवाः प्रसभं परि-गृह्णन्ति प्राणभृतां हृदयानीति प्रियव्रत-देवव्रतयोः प्रीतिपद्धतिः पुण्य-प्रताप-प्रेप्सुभिः पूरुषैः पुरस्करणीया । यतो हि—

औदार्य-निष्ठान्यभवन्मदानि, व्याजैर्विमुक्तानि च सौहृदानि ।
अपाकृत-स्वार्थ-विमर्शनानि, स्थास्नूनि जातानि निदर्शनानि ॥१४॥ इति ।

त्यागस्तपस्या च धनं द्विजानाम् (१६)

१. वर्तते सर्वतः पञ्चनदप्रदेशे प्रख्यातानाम्, विद्यावितरण-व्यसनानाम्, सुधासारस्यन्दिरसनानाम् तीव्रतपस्त्यागानाम्, सततायोज्य-मानजपयागानाम्, प्रभाकरकुलजातानाम् असङ्ख्यातानाम् विद्वत्सङ्घाता-नाम् पादपयोजात-परिमर्शैः पावितपरिसरम्, परितः परिदृश्यमान-विपिन-पलाशिपुञ्जप्रसरम्, बहु-वर्षर्तु-वाहिनी-बाहुवलयितम्, शिवालकशैलशिखा-श्रयितम्, धर्मप्राणं पुराणं भग्नगोपुरम् पुरं 'जयजय'— नामधेयम् ?

२. तत्र पुरा प्रातःस्मरणीयः पूज्यपादः पङ्क्तिपावनः विद्यार्थि-वृन्दपरिवृतः प्राघुणपूजादृतः शाब्दिकशिरोमणिः धीरधुरन्धरः शिवशक्ति-प्रभाकरो नाम विप्रवरो वसति स्म । निष्कामः स्वात्मारामः स वेतनं विनैव निजनिकेतने त्रैवर्णिकानां दारकान् गैर्वाणीं वाणीमध्यापयामास । अयाचितं यत् किञ्चित् केनचिददीयत तेनैवासौ सन्तुष्टो जीवनयात्रां निरवहत् । परमेश्वरकरुणया तस्य पाणिगृहीताऽपि परम-विदुषी तपः-परायणा, नमसित-नारायणा, अनारतं रामायण-पुराणादि-पारायण-प्रवणा, सुतरां सन्तृप्त-स्वभावा समभूत् ।

३. एवं पूजा-पुस्तपठन-पाठन-व्यापृतयोः तयोः दम्पत्योः सकलः कालः ससुखं समत्यैषीत्। अकिञ्चनौ जायापती कदाचनापि कञ्चन किञ्चन नायाचेताम्। अतः कर्हिचिद् भक्ष्यपदार्थभावादेव तौ शरीर-शोषणमुपोषणमकुरुताम्। जीवनाय याचनं वस्तुतो मरणम्।

एकदा पण्डितः शिवशक्तिरेकल एव निवेशने निशीथिन्यां शयानोऽभूत्। यावदवसितार्धा वासतेयी, तावदेव वसिते स्तेयकृत् कोऽपि प्रविष्टः। पण्डितप्रकाण्डस्य प्रकोष्ठात् पार्श्वतश्च पुञ्जितानां पीतल-पात्र-प्रभृति-पदार्थानां प्रथीयसीं पोटलिकां परिमोषी नैजं निलयं निनीषति स्म। परं स मनागुर्वीं गुर्वीं च तामुत्थापयितुं न प्राभवत्। अत्रान्तरे प्रस्रावोत्सर्गाय प्रबुद्धः पण्डितः शिवशक्तिः, दस्योः दुस्सहां दशां द्रष्टा, मृदुहृदयत्वात् सञ्जातदयोदयः, पुष्कलं प्रेमाणं प्रकटयन्, प्रोवाच—'तात! तिष्ठ तावत्, अहं ते साहाय्यं सम्पादयामि' इति। सहजाताऽनुकम्पा साधूनाम्। यतो ह्युक्तम्—

४. सम्पत्तयो यान्तु यथासभीहितं, हितं हतं स्यान्न परं परेषाम्।
इत्येव कृत्वा हृदयेऽसुखानि, हन्तेह सन्तः सदयाः सहन्ते ॥ १॥

बुभुक्षितत्वेऽप्यपरस्य पोषणं, दैन्येऽप्यहो! तुच्छतरस्य तोषणम्।
कुर्वन्ति लोकोत्तरसत्त्वसिन्धवः, तृणं विजानन्ति धनं च साधवः॥ २॥

दूनेषु दीनेषु दयां दधानाः, भवन्ति भद्रा भुवमात्मवन्तः।
ये पापवत्स्वप्यनुकम्पिनस्ते, माहात्म्यलक्ष्म्या पुरुषाः प्रथन्ते ॥३॥ इति।

५. तदा पण्डितं प्रेक्ष्यैव चौरश्चपलं पलायितुकामोऽभूत्। परं प्रकृत्यैव हृदयालुः दयालुः अदिममण्डितः पण्डितस्तं सान्त्वयन् सुतरां सुकुमारस्नेहां सरस्वतीं समुदैरयत्— 'प्रियभ्रातः! किमिति पलायसे? मा भैषीः। तवापेक्षा ममापेक्षयाधिकतराऽभूदेषां समस्तानां वस्तूनाम्। अतो वैवश्यात् सान्द्रतमिस्रायां तमस्विन्यां सन्तापं सहमान इमानीतो नेतुं त्वमुपेतोऽसि' इति। तदाकर्ण्य तस्करोऽतितरां त्रपितः समपद्यत। साग्रहं पण्डितेन प्रोक्तः पाटच्चरः पोटलिकां मूर्ध्नि निधाय निजनिवेशनं निनाय। 'हा! देवतैव वतैनस्विना मया मुषिते'ति परम-पश्चात्ताप-परिपूरितोऽसौ परस्वापहारी निर्निद्रो निशामनैषीत्। इत्थं तस्यातितमां तमोमयी मनोवृत्तिः एकपदे समस्ता विपर्यस्ता। स प्रत्यूष एव पोटलिकामादाय तदेव सदनमाससाद। पुनः प्रमुषितस्यापि प्रकृत्या प्रसादपूरितस्य पण्डित-प्रवरस्य पादयोः पतित्वा प्रोच्चैः परिदेवनं प्रारेभे। सोऽपि तितिक्षा-शीलस्त्वरितं तं तस्करं समुत्थाप्य वक्षसा परिषस्वजे। मलिम्लुचस्य मनः

सत्त्वसम्पन्नं निर्जर-निर्झरिणी-नीर-निर्मलं सदातनाय समयाय साधुस्वरूपं समजायत। यदुक्तम्—

६. संसर्गमासाद्य सतः शठोऽपि, क्षणान्तरे स्यात् परिवर्तितात्मा।
स्वल्पोऽपि सिद्धस्य रसस्य कल्कः, शुल्वं द्रुतं स्वर्णमहो! करोति ॥४॥
लोकोत्तरं सच्चरितं महीयसां, मुष्णाति दोषानसतां मलीयसाम्।
तमांसि तिष्ठन्ति निशावसाने, किमुज्जिहानेऽपि गभस्तिहस्ते ॥५॥ इति।

एवमतिक्रामति कियति काले कुतश्चिदकस्मात् कोऽपि दण्डी परिव्राजकः तन्नगरमुपेत्य पिण्डप्राप्तये कस्यचित् कर्मकाण्डिनो विप्रस्य वेश्माप्राक्षीत्। प्रणतिपुरस्सरं पादपांसुं परामृशन्तः प्रकाशित-प्रणयाः पौराः पूतात्मनः पण्डित-शिवशक्तेः निशान्तं निरदिशन्। परिव्राट् पण्डितस्य पार्श्वे प्रापत्। परिव्राजकं पश्यन्नेव पण्डितः परां प्रीतिं प्राप्तस्तत्पादौ पुनः पुनः प्रणम्य प्रेमपूर्वकमुपावेशयत्, भिक्षार्थमुपेतं तं 'क्षणं विश्रम्यताम्' इति च विनिवेदयामास। ततः स्वयं सदनं प्रविश्य सहधर्मिणीं संन्यासिने भोजनायोजनायाचकथत्।

७. पण्डितपत्नी प्रावोचत्—'नाथ! न किञ्चिदपि वस्तु वेश्मनि विद्यते, येन भैक्ष्य-भक्ष्यं सिद्धं सम्पाद्येत' इति। तन्निशम्य नितान्तं चिन्ताचान्तः तान्तस्वान्तः शिवशक्तिः क्षणं स्तब्धस्तस्थौ। पर्यन्ते चेदं निरणायि, यदद्यायाचनव्रतभङ्गं विधाय प्रतिवेशि-निवेशनात् तण्डुलाद्यमाद्यमानीयेतेति। ब्राह्मण्या समानीय तत्, सद्यः खाद्यं च सम्पाद्य न्यवेदि 'सज्जं भोजनमि'ति। दम्पती बहुतिथाया वेलाया बुभुक्षितावास्ताम्, परं तयोर्नासीदात्मचिन्ता। चिन्ता त्वियमेवाभूद् यत् कर्हिचिद् बुभुक्षुः संन्यासी निराशो न निवर्तेतेति। शिवशक्तिना यथाशक्ति प्रयत्तं यन्नैजं नैर्धन्यरहस्यं परिव्राजको बोद्धुं न प्रभवेदिति। भूयोभक्तिबद्धया श्रद्धया कृतायोजनं तद् भोजनं भगवन्नारायणाय निवेद्य पुनः पुष्कलं प्रेमाणं प्रकाशयता पण्डितेन परिव्राजकाय प्रादायि। पूर्णतया पर्यतृप्यत् परिव्राट्। परं न जाने कथं तेन शिवशक्तेर्निष्किञ्चनत्वमज्ञायि। सोऽचिन्तयत्— 'अहो! पारीणः सकलागमानाम्, धुरीणः त्यागात्मनाम्, मुकुटमणिर्मनीषिणाम्, सन्तोषिणां मूर्धन्यो धन्यो नैर्धन्योत्पीडितो दण्डितो दैवेन पण्डितोऽयं दिने दिने दारिद्र्य-दुःखेन दन्दह्यमानो जीवति। तथाप्यात्मव्यथा-कथां कस्याप्यग्रे न कथयति' इति। उक्तं च—

८. देहं दहेद् दैन्यदशा दुरन्ता, पाथोधि-पूरे पृथिवी प्रलीयताम्।
वसन्ति सन्तो न तु दुःखहेतोः, हाकारधाराः पुरतः परेषाम् ॥६॥ इति।

इत्थं सहज-सुकुमार-स्वान्तः संन्यासी शिवशक्तेरायसाधनहीनतां नितरां दीनतां च दृष्ट्वा तत्साहाय्य-सम्पादनाय कृतनिश्चयोऽभूत्। हिरण्य-निर्माणविधिं व्यज्ञासीत् स संन्यासी रसरहस्यवित्। स शिवशक्तिं पार्श्वे समुपवेश्यावादीत्—'गुणगरिष्ठ! विद्वद्वरिष्ठ। अहं सुरसरिदवतारं हरिद्वारं प्रयामि। भवता कुम्भोत्सवस्यामुकदिवसे तत्रावश्यमुपस्थानीयम्। तत्र त्रिपथगायाः प्रतीरे सोपानपथस्थितस्त्वामहं प्रतीक्षिष्ये' इति।

९. अतिथिभक्तिना शिवशक्तिना तद्रहस्यं नाज्ञायि परमग्निवेशश्रमणेशादेशानुपालनार्थम्, किञ्च सम्भवति परिव्राडयं परमपदप्राप्तये कामपि सुखसाध्यामदवीयसीं पदवीं प्रदर्शयेद्, दद्याद् वा दिव्यदृष्टिं दयालुराशिषैवेति तेन हरिद्वारगमनमुररीकृतम्। तदुक्तं नयनिष्णातैः—

स्वप्नेऽपि सौम्याः सरलस्वभावाः, विलङ्घयन्तो न सतां निदेशम्।
सदा शुभोदर्कमसंशयेन, मत्वा प्रमाणं परिपालयन्ति ॥७॥ इति।

१०. अथ कालान्तरे कलत्रे कालधर्ममुपेते, विमुक्त-वेश्मवासबन्धः वैराग्यवृत्तिः सौहार्द-सौभाग्य-संयुतः सौम्योऽसौ सङ्केतिते समये सुरसरिति सिष्णासुः सह स्वेन सुहृत्-सङ्घेन साधुसहस्रसञ्चारं हरिद्वारं प्रति प्रतस्थे। स च व्रजन् वर्त्मनि विधिवशात् प्रभ्रष्टां हेममुद्रामलभत। सेयं मुद्रा कस्मैचित् क्षुद्राय दरिद्राय देयेति विचारयत्येव त्यागतोषिणि तस्मिन्, नियतिनियोगात् कोऽपि लोलुभो भूवल्लभो वाजि-वारणादि-बलमवलम्ब्य, लघिष्ठं किञ्चिद् राज्यमभिषेणयितुं तेनैव पथा समागमत्। सोऽयं नितरां नृशंसो नरेशः तपस्विनः कस्यापि नृपतेः तनिष्ठं राज्यमाक्रम्य हिरण्यहरणाय यातीति रहस्यं विज्ञाय, पर्याप्त-पात्र-प्राप्ति-परितुष्टः स विप्र-वरिष्ठः, त्वरितं तं भूभृतमुपेयिवान्। 'महाशय! गृह्यतामिदम्' इत्यभिधाय च प्रसारिते महाराजस्य पाणौ महारजतमुद्रां निदधे। प्रचुराश्चर्य-चमत्कार-चुम्बितचेताः, चकासित-चण्डिम-चक्षण-चटुल-चक्षुः द्विज-दीनदशादृश्वा च नृपः 'किमिदम् कुतश्चे'ति तमन्वयुङ्क्त। स प्रत्यवोचत्—'सेयं हैमी मुद्रा मयका कस्मैचित् तृणप्रायाय, भूयिष्ठं विभवविहीनाय, दीनाय दानीयेति, प्रतिग्रह-पात्र-पुरुष-विशेषविषये विचिन्तयत्येव मयि प्राप्तो भवानि'ति। तन्निशम्य किञ्चित् सकोपः प्रकटाटोपः स नरनाथो निजगाद—'अरे! न जानासि महीमहेन्द्रोऽहम्? ईदृश्यः क्षुद्रा मुद्रास्तु कोटिशो मे कोषे निर्भरं भरिता भवन्ति। तद् देहीमां कस्मैचिदन्यस्मै' इति। न हि मानी मनुते स्वमनुष्ठीयमानं पाप्मानम्।

११. स शिवशक्तिस्तु सुतरां साहसिको हसिकां कुर्वन्नचकथत्—'नैतद् भवति सम्भवति। अलीकमाचक्षसे। त्वत्तोऽन्यः कोऽधन्यः स्याद् विपणः कृपणः संसारे यो लोभाभिपाती लघुतरं लघुतरराज्यलङ्घनेन निरागसां पुंसां वधकवद् वधं विधाय पापोद्भवानि वैभवानि भवानिच्छति' इति। अहो! न हि लोभस्य पर्यन्तः।

अकथ्यमपि तथ्यं तथा रोचनमप्युन्मीलितान्तर्लोचनं तस्य वचनं निशम्य नितान्तं व्रीडित इव पश्चात्ताप-पापपीडित इव च पृथ्वीपतिः पर-प्रदेशाक्रमणवासनां विसृज्य सद्यः स्वदेशं प्रति निववृते। यतो हि—

क्रूरक्रियाणामपि मानवानां, मनांसि वज्रोपलकर्कशानि।
स्फुरद्भुतैर्मोहनमन्त्रकल्पैः, सतां वचोभिः परिवर्तितानि ॥ ८ ॥ इति।

१२. अथासौ शिवशक्तिः सरण्यामेव सन्त्यक्त-सुहृत्सार्थो नियतेऽहसि पापापहारं हरिद्वारमुपाजगाम। तत्र च स सुरसरित्-सोपान-सरणावासितं रसायन-सेवनोद्भासितं निसर्गत एव स्वैरं हासिनं संन्यासि-नमालुलोके। कृतप्रणामं निकामं निष्कामं तं द्विजन्मानमाशिषाभिनन्दयन् स परमं प्रमोदं प्रापत्। परेद्युः ब्राह्मणः श्रमणश्च गङ्गावगाहनाय गतौ। तत्र पण्डितप्रवरेण स्नान-ध्यानाराधन-पूजापदार्थार्पण-तर्पणादिकं वेदविहि-तेन विधिना साधु व्यधायि। पर्यवसिते पूजन-भजन-यजन-मार्जनादि-व्यापारे, परिव्राजकः प्रसाद-प्रदर्शनपूर्वकं विप्रवरेण्यं आसन्नासनाध्यास-नायाजुहाव। तथा कृते प्रीतेन परिव्राजा झौलिकाधाराद् निभृतं निष्काल्य महीयसी हेममयी मूर्त्तिः भूरिभारि शिलशरीरं शातकुम्भशकलं च पण्डित-प्रेष्ठस्य पाणौ प्रणिधायाभ्यधायि— 'द्विजदेव! दृश्यतां तावत्। एषा मनोहारिणी महाधातुमयी महेश्वरमूर्त्तिः, एतच्च विपुलं कलधौत-शकलं वर्तते। गृह्यतामुभयं निर्भयम्। त्वं दीनो द्विजन्मेत्यत एवात्राहूतोऽसि। याहि, या हि ते दरिद्रता, सा सपदि समस्ता प्रास्ता सम्प्रति सम्प्रतिष्ठा-स्यते' इति। सकलक्लेशहरणं हिरण्यमाहुः।

१३. तदाकर्ण्य सन्त्यक्तगृहेण नितान्त-निःस्पृहेण महिममण्डितेन तेन पण्डितेन संन्यासिनः सकाशात् समग्रा सुवर्ण-सामग्री समादायि। ततोऽसौ समुत्थाय सुरसरितः गभीरे नीरे प्रविवेश। संन्यासी तु ब्रह्मणा क्रियमाणस्य कर्मणो रहस्यं सर्वथा बोद्धुं नाशकत्। भूसुरेण मन्त्रोच्चार-पुरस्सरं सौवर्णं तद् वस्तु-द्वितयं तृणतुल्यं त्वरया तोयेऽत्याजि। स्वयं च सुतरां स्मयमानः सुर-सरस्वती-स्रोतसो बहिरायासीत्। भूसुरोऽसौ एतावत्परिमाणं कौतुकजनकं कनकं प्रतिगृह्णानो न परं प्रसादं प्राप न च

व्युदस्यन् व्यथितो बभूव। कथितं केनापि कृतिना—

प्राप्त्या वसूनामथवा समाप्त्या, स्थिरात्मनो विक्रियते न चेतः।
न वै हिमद्धर्चा न नदीप्रवाहैः, नगाधिपे कोऽपि भवेद् विभेदः॥ ९ ॥ इति।

१४. इदमालोक्य कर्मन्दी त्वमन्दं विस्मेरो बलवद् बाधितश्च व्यजायत। ततः कोपाटोप-कुटिलीभूत-भ्रुकुटिः भूयस्तरां भूसुरं भर्त्सयन् बभाण—'अरे दुर्गते! मन्दमते! किमिदमहितं विहितं कुटुम्बरागरहितेनात्माहितेनाऽनवहितेन च त्वयका? मया मन्दाकिन्याः पानीये पातनाय तु एतावत्तपनीयं तुभ्यं न प्रादीयत' इति।

अनिर्वचनीय-माहात्म्य-मण्डितेन तेन प्रकाण्ड-पण्डितेन पाणिपुटं पुरस्कृत्य स्निग्धं अदिमदिग्धं वचोऽवाचि—'महात्मन्! क्षाम्यति चेद् भवान् कथयानि किञ्चित्?

परिव्राट् प्राह—'कथ्यताम्' इति। पण्डितः प्रोवाच— 'महाराज! युक्तमुपयुक्तं च विहितं मया'। परिव्राट् पप्रच्छ—कथं हितावहं हि तत् कथयसि?

पण्डितः प्रत्युवाच—'उभयोरावयोः भद्रङ्करणं किलेदमाचरणम्'।

परिव्राट्— मत्तोऽपि गतं तत्, त्वत्तोऽपि। तत्केन प्रकारेण कतरस्यापि कल्याणकरम्?

पण्डितः—अवश्यं शिवङ्करमिदमकारि।

परिव्राट्—केन प्रकारेण?

पण्डितः—स्वामिन्! मम मङ्गलं त्वेवं जातं यद् द्विजातीनां द्रविणेन न जातुचित् प्रयोजनं जायते। अस्माकं तु तीव्रं तपो वा निरवद्या विद्या वा भविकोद्भावकं वास्तवं वैभवं भवति। करिष्यमाणानेकमायं बहुव्यथाश्रायं प्रभूताऽपायं रायं प्राप्य तु निरयातङ्के पापपङ्के निर्भरं निमग्ना वयं परमेश्वरमपि प्रस्मरामः। अथ च स्वर्ण-स्वापतेय-संस्पर्शोऽपि संन्यासिने शास्त्रेण प्रतिषिद्धो महामन्तुश्च मन्यत इति भवतोऽपि पारत्रिकोत्पातपरित्राणं कल्याणं सम्पन्नम्। इत्थमभव्यद्रव्योत्सर्गादुभयोरपकर्षित-दुष्कृत-शितशल्यं कौशल्यमावयोः' इति।

१५. इदं कौतुककारणम् असाधारणं विभवविरागं तीव्रत्यागं पश्यन् परिव्राजकः परे च परितः प्रेक्षमाणाः पुरुषाः विस्मयविस्फारितेक्षणाः प्राहुः—'अहो! ईदृशे विकराले कलिकालेऽप्येवंभूता भूसुरा भवन्ति' इति। ततः परिव्राडात्मगतमिदमचिन्तयत्—'मिथ्या ममेदं मस्करित्वम्। तात्त्विकः त्यागी त्वयमेव। एतेन पण्डितप्रवरेणात्मनीनं मामकीनं चाकारि

क्षेमं हेम नीरे समीरयता। सर्वथा ऋतम्भरं रोचनं च वचनं रजोरुजा वर्जितस्य वक्त्रजस्य। तत्त्वतस्त्याग एव ब्राह्मणस्य श्रमणस्य च भद्रङ्करण-माभरणम्'। उक्तं च—

१६. **वित्ताप्तिवृत्तिः वणिजां विभूषा, वीरव्रतं बाहुबलं विराजाम्।**
त्यागस्तथा तन्मयतात्मतत्त्वे, तोषस्तितिक्षा च तपो द्विजानाम् ॥१०॥

किञ्च— **'सोऽहं' मुक्त्वाश्रयन् लोहं, मोहं सन्दोहमापदाम्।**
दासीभूतः स मायायाः, संन्यासी भूत उच्यते ॥११॥ इति।

तदनन्तरं विश्व-विभव-विशेष-विलास-वेश्मवास-व्युपरतवृत्तिः वेद-विदां वरो ब्रह्मासौ 'ब्राह्मण्यं फलेग्रहि स्यादि'ति निरन्तरं ब्रह्माक्षरं जपन् यायावरः शिलोञ्छी विवर्जयन् वसतीः वनविजनेषु बभ्राम। अहर्निश-मीशध्यानं; नैकत्रावस्थानं; नगरादौ नायानं; पृथ्वीपतितान्नप्रत्यवसानं हि यायावराणां परमधर्माधानम्।

१७. एवं शीतातपवातवृष्टिभिः श्यामलितमलिनित-शुष्क-रूक्ष-शरीरः जर्जरचीवरः सुधीवरः परात्परब्रह्मोपासनासक्तिः शिवशक्तिः विश्वतो विहरन् कदाचिन्नगरनेदीयसि नारायणनिकेतने पर्वविशेषहेतोः मुदायातं जन-समुदायमद्राक्षीत्। दैवगत्या तत्रागतेन तेन सह हरिन्मणि-हीरक-हृदयहारि-हिरण्यहारस्य, काशिष्णु-कनक-कुण्डल-कटक-किरणकदम्ब-कमनीय-कर्ण-कलाची-कीर्त्यमान-कमला-कृपस्य, प्रख्यात-पाण्डित्य-प्रभावस्य, प्रदेशपुरुषैः प्राज्यपूजितस्य, प्रणीत-प्रचुर-प्रामाणिक-प्रबन्धस्य, पृथ्वीपति-प्रधान-पण्डितस्य ब्रह्मविद्याविषयको वादानुवादः प्रावर्तिष्ट।

१८. पर्वप्रयोजनात् परितः पुञ्जितानां पुंसां प्रमुखे पदवाक्यप्रमाण-परमार्थवित् वेदान्तविद्याविशारदः शिवशक्तिः कटकहाटक-घटपटादि-युक्तिगर्भैः, पुरस्कृत-पुरातन-प्रबन्ध-पुराण-प्रमुख-प्रमाणसन्दर्भैः, मन्दोच्चारैः मैत्रीमधुरिमोद्गारैः सुकुमारैः ससारैश्च वाक्प्रसारैः, पार्थिवपण्डितं पदे पदे प्राधर्षयत्। एवमसौ पार्श्वोपस्थितानां, करतलध्वनिं कुर्वतां, साधु साध्विति चोच्चैरुच्चारयतां, श्रावकाणां स्निग्ध इव स्निग्धः संवृत्तः। स्वर्णसूत्रस्यूतं पट्टपट्टं परिदधानः पृथिवीपालपण्डितस्तु तर्कसम्पर्केण प्रमाण-प्राबल्येन च शिवशक्तिं पराजेतुमनलङ्कर्मीणोऽभूत्। स हि प्रधानपण्डितपदस्य, पुष्कलायाः सम्पदः, समाजसम्मानस्य चामानं मानं मनसि दधानः, हस्ताहस्ति युयुत्सुरिवासनात् किञ्चित् किञ्चिदुदतिष्ठत्। मञ्जुल-मङ्गल्य-मुद्रिका-मण्डितं प्रसारितं पाणिं पुनः पुनरुद्यम्य च उत्ताननेत्रा-रुणिमासङ्गं, भयोद्भावन-भूरिभर्त्सन-भ्रूभङ्गं स्वोत्तमाङ्गं धुन्वानः स

प्रस्तुतप्रसङ्गमुत्क्रम्यापि भूयो भाषमाणः कुशकाशावलम्बनमिवाकार्षीत्। एवं वाग्वादान्तरे स्वपक्षे सर्वथा खण्डिते सति पार्थिवपण्डितः सङ्गत-समाज-सम्मुखे सुतरां स्वाऽवमानं मन्यमानः, सञ्जातविमर्श-विलोपः समुज्जृम्भमाणकोपः समपद्यत। स स्वेदी वास्तववृत्तावेदी सहसा समुन्नतासनादुत्थाय शिलोञ्छिनः शान्तस्य शिवशक्तेः वर्ण-वपुर्वेश-व्यञ्जितं बाह्यं व्यक्तित्वमवधीरयन्नुदीरयामास— 'अरे अकिञ्चन! पांसुस्नातक! पटच्चरपरिहित! क्षीण! ग्रामीण! कुतो नु जानन्ति त्वादृशा नग्ना बुभुक्षिताश्च ब्रह्मविद्यावैभवम्, सामर्थ्यं स्थितिं चोपेक्ष्यानल्पमुन्मत्तकल्पं प्रजल्पन् नतरां त्रपसे?' इति। वाग्वादे पराजयलक्षणं परुषवचनम्। उक्तं च—

१९. **सौभाग्य-सम्मानपदाधिरूढाः, ममत्व-मात्सर्यमदैरुदूढाः।**
मनुष्यवेषे दनुजा निगूढाः, तुच्छान् विजानन्ति परान् विमूढाः ॥१२॥
इति।

तदाकर्ण्य लेशतोऽपि रोषं स दोषमाक्रोशं चानाविष्कुर्वन् शिवशक्तिः सागर-गम्भीरां धीरां स्नेहसिक्तां प्रतिकाररिक्तां च वाचमवोचत्— 'सौम्य, महात्मन्! अपि नाम जानासि यायावरोऽस्मि। सत्यमाह भवानकिञ्चनोऽहम्' इति। तद्वचनमाकर्ण्य सद्यः समुच्छ्रितासनमुत्सृज्य राजपण्डितः 'हा! किमिदमुदितमविमृश्यकारिणा मुग्धेन मया विग्रहिणो ब्रह्मणो विषये' इति प्रचुरं पश्चात्तापी त्रपितश्च पृथिव्यामेवोपविवेश। सकपोतहस्तं मुहुर्मुहुः क्षमां भिक्षमाणश्च नितरां नतमौलिरतिष्ठत्। त्यागे हि तेजः परिग्रहे परिभवः।

२०. अथ समकालं कृताभ्युत्थानाः, यायावरं प्रत्यङ्कुरितबहुमानाः तत्परिभवपीडाभिभूताः सम्भूताः पुरुषाः रुषानुबिद्धैः धिग्वादैः राजपण्डितं निन्दन्तः, भूरिभक्तिभावेन नमोभिः शिवशक्तिमभिनन्दन्तः, पाणिभ्यां पुनः-पुनः परामृष्टैः तत्पादपांसुभिः ललाटपट्टं प्रलिम्पन्तः, सौभाग्यं श्लाघमानाश्च परस्परं प्रावोचन्— 'अद्य फलेग्रहि नो मानुषं जनुः, कृतकृत्ये नो नेत्रे, पारमार्थ्येन प्रसन्नः परमेश्वरः, प्राप्तं पुण्यवतां पर्वदिनम्, पवित्र-परिसरा च पुरी परिहसति पौरन्दरं पदम् यदीदृशस्त्यागी विरागी क्षमा-शमी चेमां कृतक्षेमां भूमिमुपेतः' इति। यतो हि—

२१. **पाद-पद्म-परामर्शैः, पदवी-पांसु-पावनः।**
पूतात्मा प्राप्यते पुंसां, पुण्य-पुञ्जैः पुरातनैः ॥ १३ ॥ इति।

अनयर्त्त्या त्यागैकधनाः, तत्त्वविदः, तपस्तेजसा तिरस्कृत-तृष्णा-तमस्ततयः, मुषित-मिथ्या-मूर्त्ति-महिला-मन्दिर-ममता-मानमोह-मदमूलाः, भगवद्भक्ति-भस्मीभूत-भवभीति-भूरिभूति-भोगभावनाः, प्रकृतिपावनाः, 'अर्थकामावानुषङ्गिकावि'त्यवधीर्य 'मुख्यत्वाद् धर्ममोक्षावेवैषणीयावि'ति सम्यक् सम्बोधयन्तः साधवः, सांसारिक-स्वस्ति-सौश्रिय-सम्पादनायैव महीमण्डलं मण्डयन्तीति तीव्र-तृष्णा-तीक्ष्ण-तरवारिणा त्रुटितस्य स्वान्तस्य सुखेन स्वैरं सीवनं, परमपावनं शिवशक्ति-जीवनं सबलं साक्ष्यम्।

अये मिथ्या-मद-मदन-मन्यु-मनोरथ-मोह-माया-मरीचिका-मज्जनाः, जगज्जनाः! इत इत। येनापि विश्वामित्रमित्रेण ब्राह्मण्यमपेक्ष्यते, प्रत्यगात्मनि स्थेयसी प्रमोद-परम्परा चेष्यते, स शिवशक्ति-जीवनेन संसक्तिं विदध्यात्। उक्तमपि तदवदानरहस्यम्—

गुरूणि सर्वाण्यपि वैभवानि, विसर्जयन् बान्धव-बन्धनानि।
निष्किञ्चनः पुण्यबलेन पारं, संसारसिन्धोः ससुखं समैति॥ १४॥ इति।

मातृभक्तो विष्णुगुप्तः (१७)

१. अस्ति नैकानीक-विहितवरवीरवैरिव्रातसङ्घातेषु, परस्परप्रीति-प्रतीकशोणसुरसरस्वतीसम्पातेषु, निध्यातनृशंस-नीतिनिष्णातनन्दवंश-विध्वंसेषु, निःशेषदेशशुभारतभारतेला-महेला-मञ्जुमूर्धावतंसेषु, दर्दुरोद-रोदकदारिकार्त्तसदारसैरिक-दारकदारिकारोप्यमाणशुभशालिषु, गोधूमभूम-विविधान्यधान्य-शस्यश्रेणिशोभाशालिषु, विश्वतो ब्राह्मणादिवर्णवृन्द-विख्यातबहुविधविद्यावैभवविलासेषु, दिशान्त-विश्रान्तकान्तकीर्तिकलाकोविदनिष्पाद्यमाननित्यनवोत्सवोल्लासेषु, विष्वग्वीक्ष्यमाणविविधवस्तु-बृहद्-वीवधेषु, मगधेषु अमुत्रात्र कुत्रापि पाटलिपुत्राभिख्याभिख्याता सांसारिक-सर्वसुखसौभाग्यसम्पन्नजनगरीयसी नगरी।

२. तत्र विश्वविश्रुतशौर्याणां मौर्याणां अनेकप्रदेशविभाज्य-प्राज्य-साम्राज्यप्रयोजकस्य, चेतनाचातुर्योन्नमितभारतकन्धरस्य, नयनिष्णातधीर-धुरन्धरस्य कौटलीयार्थशास्त्रप्रणेतुः नेतुः जगज्जातानां चारुचरितचतुरचय-चर्चितानाम्, महामन्त्रिमचर्चिकानां, वाचा वर्णयितुमशक्यस्य विष्णुगुप्त-चाणक्यस्य मङ्गलधाम नाम को न जानीते जनः। तस्यैवागण्यगुणततेः,

महामतेः, नानाद्भुतज्ञानावदानाधारेण कौमारेण कृतसम्पर्कं शुभोदर्कं दिग्देशकमुपदेशकञ्चोपाख्यानं कर्णाकर्णि समनुश्रूयते। यत्र तस्य पुण्य-परम्परापालिकां पूज्याम्बालिकां प्रत्याबद्धश्रद्धातिरेको विस्मापित-विवेको व्यज्यते।

३. यदा चाणक्यः क्रीडामात्रकारको दारकोऽभूत् तदा तदम्बामभिलक्ष्यान्यतमो ज्यौतिषिक आह स्मेदं 'देवि! त्वदीयस्तनुजो महामनुजो भविष्यति सम्राड् भविष्यति' इति। अलिकलोलालकस्य बालकस्य चाणक्यस्य राजमानं राजदन्तद्वयं रदनान्तरापेक्षया बृहत्तरमसमं च समजायत। तदवेक्ष्यैव भविष्यवक्ता शकुनशास्त्री चाणक्याय शुभङ्करं बुद्धि-वीर्य-वैभव-वैपुल्य-चक्षणं लक्षणममन्यत।

एकदा यर्हि चाणक्यो जनुषैवाधिगत-नयेन तनयेन धन्यम्मन्यया जनन्या समं सामान्यधान्यायोजनं भोजनं कुर्वाणः शातशतमनुभवन्नभूत् तदा तन्मातुः वात्सल्यवृष्टिर्दृष्टिरश्रुपूराप्लुता समपद्यत। अक्षण-मृदुमानसां मातरं मन्यन्ते हि मतिमन्तः।

४. तामस्थानेऽयथातथं व्यथा-विकलां विलोक्य चाणक्यस्तामस्रासारनिस्सारणं कारणमप्राक्षीत्। आत्मजाताख्याता माता द्राघीयोनिःश्वासचञ्चलेन चेलाञ्चलेनाश्रूणि प्रमार्जयन्ती नासिकन्धमा गद्गदया गिराऽगादीत्— 'नास्ति वत्स! किञ्चित्'। परमेतेन कारुण्योपेतेन व्यक्तशोचनेन प्रतिवचनेन न समतुष्यत् तस्य नितान्तं शङ्कातङ्काक्रान्तमशान्तं स्वान्तम्। ततो न जाने किमपि मनसैवामन्त्र्य जग्धाल्पमात्रं भोजनपात्रमेकतोऽह्नाय निधाय जोषं सरोषमसन्तोषमाविष्कुर्वता तेन तावदवधि ग्रासादाने नकारः कृतो यावज्जननी व्यक्तवाचा न हृद्विदारणं कारणा-कारणं कीर्त्तयेत्। विलक्षणं बाल्यमपि विदग्धबुद्धीनाम्। आजन्मनः शिताग्राणि शूलानि।

५. पुत्रप्रेमपरवशतया व्यथितया तया कथितम्—'वत्स! उक्तास्मि केनापि ज्योतिर्विदा यत् त्वं भाविनि काले चक्रवर्ती सम्राट् सम्पत्स्यसे। तवेदं मुक्ता-सितिम-सदनयोः रदनयोः युगलमेतदेव तथ्यं पिशुनयति। बृहदन्तौ हि दन्तौ शकुनशास्त्रे शुभलक्षणत्वेन स्वीकृतौ कृतिभिः। त्वं च सम्राजः सिंहासनमधिष्ठाय साम्प्रतं साह्यसुखसौभाग्यहीनां दीनां स्वजननीमवश्यमवशां विस्मर्त्तासीति दोदूयते भासमान-भूयोभयं मदीयं हृदयम्। एषोऽत्र भिन्नधैर्यसेतुरस्रासारप्रसारस्य हेतुः'। शङ्काशीला भवन्ति सुतरां सुतवत्सला मातरः।

६. एतदाकर्णनसमकालमेव भूरिभाग्यभासमानभव्यविशालभालो बालोऽसौ मुहूर्त्तं मौनित्वमाकलयन् सवाष्पोद्गारं स्वाहारं विहायाऽह्नाया-न्यधाम जगाम। तदन्तरे किमिति वत्सलो मे वत्सः आशास्यमपास्याभ्यवहारं सनिकारं परत्रानाख्यायैव गतो नाद्यापि पर्येतीति जातातङ्कशङ्कापाता माता नितरामाश्चर्यचकितेव चाजायत। एवं एकद्वानि द्वित्राणि त्रिचतुराणि, चतुष्पञ्चानि, पञ्चषाणि चपलं चलानि पलानि शरदां शतानीव स्फीतानि वीतानि, नीतानि च प्रतिपालयन्त्या नितान्तमशान्तया स्निग्धसुतया तया। यतो हि—

७. कालः कुञ्चित-कायोऽयं स्थेमानं याति भूयसा।
प्रवासे च प्रतीक्षायां स्नेहिनामिह देहिनाम्॥ १॥

तदैव दैवयुतः सुतः स नयधनाढ्यम्भविष्णुर्विष्णुगुप्तश्चाणक्यः सपदि पदानि निदधानः प्रत्याजगाम धाम। मृदुमधुरगदनं तस्य वदनं रक्ताक्तं समलक्ष्यत। तद्दशायामपि च समन्दहास्यस्य तदास्यस्य दुरवस्थामस्वस्थां निरूप्य बहुलं व्याकुलत्वमापद्य च दुःखदारुणं हृद्दारणं तत्कारणम-प्राक्षीदम्बाऽस्रसहस्राक्षी। चाणक्योऽपीतः स्वीयमानीय दन्तद्वितयमनन्याया जनन्याः पुरतः प्रणतिपुरस्सरं प्रणिदधे। प्राह पुनरपि प्रणयप्राचुर्यप्रदर्शन-पूर्वकम्—'अयि! अमृतमधुमयि, मम मातः! दुर्लग्नं भग्नमिदन्तद् दन्त-द्वन्द्वं यदासीज्जनितभयमिति दुःखमयम्। साम्प्रतं प्ररूढमानमदं सम्राजः पदं नाधिष्ठातास्मि। तथा सति च प्राणेभ्योऽपि गरीयसीं महतो महीयसीं मातरं त्वां कदापि नास्मि विस्मर्त्तास्मि'। इत्युदीर्य वीर्यवतामुदाहारः स कुमारः हार्दार्द्राभ्यां निर्निमेष-निश्चलाभ्यां मौग्ध्यक्षेत्राभ्यां नेत्राभ्यां निरन्तरं मातरं निध्यायन् नतरामतृपत्। तदुक्तम्--

८. आ शैशवाच्चिद्भक्तो भवन्ति भविष्णवो भाविनि भाग्यभाजः।
उदाह्रियन्ते च सदस्सु तेषां सदावदानानि जनोत्तराणि॥ २॥

एतस्मिन्नन्तरे जननी त्वदृष्टाश्रुतपूर्वं तादृशं भृशं विस्मापनं स्वतः स्वान्तसन्तापनं च वृत्तं वीक्ष्य वाग्यताऽवर्तिष्ट। अथ साजस्रास्रासारस्रावसे-केन वात्सल्यातिरेकेण प्रस्नुतस्तनी जननी दीर्घदृष्टि विचित्र-बुद्धिबल-सृष्टि सहजात-नयं तनयं वक्षसा वाढं गाढं परिरभ्य वाष्पवर्षविकलविलोचनापि हर्षोत्कर्षनिर्भरा, विपुलपुलकपाली समधुरालापं कुमारकुन्तल-कलापं कोमल-करकुद्मल-कङ्कतिकया विजटीकुर्वाणा पुत्रप्राणा क्रियासमभिहारेण चुम्बन्ती अतिवेलं प्रमोदपरम्परां प्रापत्।

६. आमनन्ति हि मुहुर्मननीयं मातृमहिमानमानन्त्यं मान्या मनीषिमतल्लिका:—

आबाल्याद्रञ्जनी दु:ख-भञ्जनी केवला जनि: ।
स्मरत्यतो जन: खिन्नो देवतां वा सदैव ताम् ॥ ३ ॥
कीर्त्येत महिमा मातु: कथं चानृण्यमाप्यताम् ।
निधत्ते तनयं नाके रौरवे रमते स्वयम् ॥ ४ ॥
जले जडे निशि स्वार्थं तपोनिष्ठस्तपत्यहो ! ।
परार्थं जननी पुत्र-स्नेहे गेहे तपस्विनी ॥ ५ ॥
पय:पाने पुनश्चेष्टा-कारके सति दारके ।
निशायां नाश्नुते माता शायिकां सुखदायिकाम् ॥ ६ ॥
रोचनैर्वचनैर्नैकै: विनयानुनयै: प्रसू: ।
नन्दनं नन्दयत्येव रुषितं रेणुरूषितम् ॥ ७ ॥
विष्टरे वेष्टितेऽङ्गारै: पुत्रप्राणा विचेष्टते ।
तया यातनया माता भवेद् या तनयाश्रया ॥ ८ ॥
माता मूर्त्तिस्तपस्याया आत्मोत्सर्गतितिक्षयो: ।
सुतार्थं जीवनं तस्या वलिदानान्न भिद्यते ॥ ९ ॥
शीतशातेन वातेनाप्याकिरत्कज्जलं जलम् ।
सूनो: संवीक्ष्य साम्बा स्यात् स्वयं सास्रा स्खलत्स्वरा ॥ १० ॥
कल्पान्तेऽपि तथानृण्यं नैति नूनं तनूजनु: ।
मात्राधमर्णतां नीतो लालितो लोहितै: हि तै: ॥ ११ ॥
स्नेहस्य न्यस्यते मात्रा मात्रा पुत्रेषु यावती ।
अप्रदायैव तां लोका लोकादस्मात् समे गता: ॥ १२ ॥
माधुरी या धुरीयाऽस्या: सुधाधारावधीरणी ।
साऽमाया सूनवे मा या जल्पना-कल्पनातिगा ॥ १३ ॥
तनुजो वस्तुतो मातुस्तनुज: परिकीर्त्तित: ।
वापोऽवाप्त-निवापोऽन्ते सुधैत्यत्र यशस्विताम् ॥ १४ ॥
जनन्या पुत्र वत्सेत्यामन्त्रितश्चेज्जरन्नपि ।
आत्मानं मनुते भूय: स प्रत्यागत-यौवनम् ॥ १५ ॥
पुनरावर्त्तयेद् वीतं यद्येकं चापि हायनम् ।
आयुष्यं विद्यते नात्र तादृक् किन्तु रसायनम् ॥ १६ ॥
सूनोश्चूषति दु:खानि चुम्बनैरेव चाम्बिका ।
दयामय: स तद्वर्ग्य: कोऽपास्तहृदयामय: ॥ १७ ॥

माता मायैव यत् सूनुस्ताडितोऽप्येति तां द्रुतम् ।
तावच्च तप्यते नासौ व्रीडया न च पीडया ॥ १८ ॥

सत्यं सन्तानसन्तापे रुग्णा स्याद् द्विगुणाम्बिका ।
पात्यपत्यं प्रियं प्राणैरपि त्राणैकधर्मिणी ॥ १९ ॥

नमस्या-वरिवस्याभिध्यानैः स्नानैश्च यत्फलम् ।
प्राप्यते परिमर्शैस्तत् प्रसू-पादपयोजयोः ॥ २० ॥

मन्त्रः को मातृफूत्कारे यत्तेन ह्रियते शिशोः ।
छेदनी भेदनी मूर्त्तेः क्लेदनी कापि वेदना ॥ २१ ॥

विलीनोऽङ्के विशङ्के च चञ्चलो मातुरञ्चले ।
यत्सुखं लभते बालो भुवि वा दिवि तत्कुतः ॥ २२ ॥

शरणे स्याद् यदा मातुः शङ्करे च सुखङ्करे ।
शिशुस्तदा स जानीते पापं तापं न किञ्चन ॥ २३ ॥

मानी ज्ञानी यदा जातो जातो मुक्ताम्बिकाश्रयः ।
तान्तोऽशान्तस्तदाक्रान्तो दीनो दुःखमयैर्भयैः ॥ २४ ॥

एकस्य वस्तुनोऽभिख्ये मेति च त्वदिमेति च ।
कुमारेऽपि कदाचारे नातः सा क्वापि कोपिनी ॥ २५ ॥

सोपयाचितकं माता कुर्वाणा देववन्दनम् ।
अमन्दाशीर्भिराधत्ते नन्दनं साभिनन्दनम् ॥ २६ ॥

आपातावधि पुष्णाति रसैः पुष्पं प्रतानिनी ।
प्रसूतं स्नेहसारैश्च प्रसूस्तं साऽव्यथा तथा ॥ २७ ॥

सुतायोत्सर्गिणी स्नेह-धनिका जनिकात्मनः ।
वत्साय युध्यते धेनुः करिणा हरिणाऽपि वा ॥ २८ ॥

तारुण्यं तिलशो याति कारुण्यं पुत्रपोषणैः ।
यस्या मातुर्नयेत्तस्या भजनं त्रिदिवं जनम् ॥ २९ ॥

अ-नयापेतयाऽनया रीत्या, भविष्याभ्युदयाभीप्सया, संसृतिसत्त्वतत्त्व-ज्ञीप्सया च मुक्त-मिथ्या-मान-मदाः, सदा वात्सल्यवशंवदाः, भग्न-भङ्गुराङ्गभागानुरागाः महाभागाः, परमेश्वरीत्येवोपासते प्रसाधितावनीं परम-पावनीं प्रसविनीमिति ।

आचार्यदेवो भव (१८)

१. नवीनानां नृपतिनीतीनां राज्यरक्षारीतीनां च रहस्यस्य ग्रहणाय गुरुगृहे गतस्य राजकुमारस्य समरसिंहस्य शिक्षा परिपूर्णतां प्रापत्। तस्य पिता पृथिवीपतिः महाराजो मृगेन्द्रसिंहो महामात्रमुख्यैः मन्त्रिभिः समं स्वयं सुतं समरसिंहं समानेतुं सम्प्राप्तः। सम्पन्ने स्वस्ति-सुखसञ्चारे समावर्तनसंस्कारे साष्टाङ्गपातं प्रणनामाचार्यस्य चरणौ शिक्षिताचारः स राजकुमारः। तं स्नेहसंसिक्तेन सौम्यत्व-सौहित्य-सम्पृक्तेन च चक्षुषा लक्षयन्नाचार्य आचचक्षे—'समरसिंह! स्थीयतां तावत्, उपानीयतां मे दण्ड' इति। समरसिंहः सत्वरं चत्वरमुत्क्रम्याखण्डं वेतस-दण्डमानिनाय। आचार्यस्तं सुकुमारं राजकुमारं तेन प्रचण्डेन दण्डेन द्विः बलवत्ताडयामास। त्रासिततातेन तेन वेत्राघातेन तस्य पृष्ठमनूनमुच्छूनं क्षरत्-क्षतजं चाजायत। तत आशिषाभिनन्दयन्नाचार्य आचष्ट—'प्रिय-वत्स! शश्वत् शरदां शतानि यावत् श्वःश्रेयसं श्रयन् शास्ता भव। सम्प्रति सम्प्रतिष्ठस्व साकं स्वजनकेन' इति।

२. तीव्रं ताडितोऽप्यकृतमुखविकारः सौम्याकारः स राजकुमारः तूष्णीं तस्थौ। परं पृथिवीपालः पिपृच्छिषां प्रतिरोद्धुं न प्राभवत्। स आह— 'महामते! मृष्यतां मम मन्तुः। केन निमित्तेनानेन दण्डेन दमनमनेनसोऽस्येति मनो मेऽनुप्रष्टुं कामयते' इति।

आचार्यो धीरमुदीरयामास— 'विहितेऽपि निरवशेषेऽस्योपदेशे लेशेन न्यूनतासीत्। नेदानीमन्यद् निदानं दण्डदानस्य किञ्चिदपि। सहज-सौम्यत्व-सौशील्य-संस्कृतः सोऽयं समरसिंहः स्वविधानेषु सुतरां सावधान इत्यस्य शासनस्यावसर एव नासादितो मयाद्यावधि। परमेष देशशासिता भविता, सति समये चानेन दण्डनीयाः स्वकीयाः परकीयाश्च। अतो वेत्रप्रहारेण कियती वेदना जायत इत्यनुभविना भवनीयमनेन' इत्यभिधाय पेशलेन पाणिना प्रियस्य शिष्यस्य पृष्ठं परामृशन् दर्शं दर्शं च करालाकारं प्रहारं वाष्पबिन्दुविप्लुतविलोचनो व्यजायत। तदुक्तम्—

३. **परमार्थगुरोः क्रोधे प्रतिरोधे च जायते।**
सद्यः सन्तापसम्पर्का शुभोदर्का परा कृपा॥ १॥

किं च—

गुरुर्दयावानुदितो नियन्ता, शिष्यस्य नासौ नियतं निहन्ता।
वाणी तदीया प्रखरापि जोषं, छिनत्ति वैद्यच्छुरिकेव दोषम् ॥ २ ॥ इति।

ततस्तस्याद्भुतेन तेन परिणामशर्मणा कर्मणा मोमुद्यमानो मेदिनी-नाथः समुदैरयत्— 'धन्योऽस्याचार्यवर्य्यः! यस्येदृशी शिष्य-श्वःश्रेयसाशंसिनी भाविनि प्रजाप्रमोद-भावनी पावनी प्रज्ञा। भवत्सदृक्षैरेव सुर-स्वरूपैः गुरुभिरद्यावधि गुरुत्वगरिमा जागर्ति जगति' इति।

आचार्य आचचक्षे— 'परमप्रताप प्रजाप! त्रैकाल्येऽपि छात्रमात्रस्य कल्याणकरणम् तद्दूषणापहरणं चाचार्यस्य परमो धर्मः। प्रतिमूर्त्तिर्हि शिष्य आचार्यस्य। शिष्याय शुभमाशंसुरनुक्रोशशीलो गुरुर्न तमेव दण्डयति, प्रत्युत बहुधा तदुद्धाराय स्वयमपि दुःखा दृढदण्डाहतीः सहते' इति।

४. पृथ्वीपालः प्रोवाच— 'पूज्यप्रवर! कथमेतत् सम्भवति?' इति। स आह— 'श्रूयतां तावत्'—

अजराम-नामके ग्रामके रामदत्ताभिधेयोऽविधेयो गुरूणां निष्करुण-स्तरुणो न्यवसत्। स ग्रामे निवसतामसतां संसर्गाद् दुर्व्यवहारः स्वैराचारः, अक्षदेवी मदिरासेवी च संवृत्तः। विभवाभावविवशोऽसौ विभावरीषु बहुधा दारुणदण्डपाणिः रौद्ररूपो गुरुगर्जितैस्तर्जितैरेव त्रासयित्वा रोरुदावतो दीनानध्वनीनानलुण्टत्। प्रतिरोधिनश्च पान्थान् मुष्टियष्टिप्रघातैः परिक्षतान् क्षितौ क्षिप्त्वा प्रसह्य पण-पटाभरणहरणं व्यधात्। एवं परस्वापहारव्यापारे व्यापृतस्य तस्य मत्तस्य रामदत्तस्य बहुतिथा वेला व्यतिगता, वचनीयतां चानीयतोत्क्रान्तधर्मणा नीचकर्मणाऽसौ निरवशेषे प्रदेशे। तन्नामाप्याकर्ण्य भयाकुला लोकाः कम्पिनः कर्णकुहरौ करकुड्मलैः स्थगयन्ति स्म। तन्नामोच्चारणे ष्ठीवित्वा कुत्सयन्तः कथयन्ति स्म कदर्थिता जनाः— 'कलङ्किता कमनीया कीर्तिरमुना कुलाङ्गारेण गुरु-कुलस्य। कदाचिन्मूलदेवप्रणीतं चौर्यशास्त्रमेवाधीतं तत्रापि तेन धर्म-हापितेन' इति।

५. इत्थङ्कारं कर्णाकर्णि सञ्चरन्ती तस्य चौर्यक्रौर्यक्रियाकुत्सा कदाचिदार्यस्य गुरुकुलाचार्यस्यापि श्रवणशुषिरं शिश्राय। तदाऽसौ परां पीडां व्रीडां चानुभवन् लुप्तहासोल्लासो ग्रासमपि न जघास, न चाध्यापयामास विद्याभ्यासिनमन्तेवासिजनम्। अचिन्तयच्च— 'न खलु रामदत्तश्चौरिकामाचरति, न चासौ दुश्चरितः। अहं चुराम्मचरामि, अहमस्मि कुचरितः। प्रतिबिम्बभूतौ हि शिष्यो गुरोः। शिष्यो यद् विदधाति, यद्

वदति, यद् व्यवहरति, यद् विचारयति, तद् गुरोरेव गण्यते। पितरौ पिशितपिण्ड-प्रतिमस्य जन्तोः जननस्यैव निमित्तभूतौ, गुरुस्तु परमार्थतस्तस्मिन् पौरुषं सञ्चारयति। तेन शिष्यनिष्ठं दूषणं गुरोरेव पातकम्। उत्पथ-प्रतिपन्नस्य शिष्यस्य सत्पथे प्रवर्तनं परमो धर्म आचार्यस्य। तस्मात् प्राणप्रहाणमप्यपरिगणयन्नहं तं नियतं निरयनिपातान्निवारयिष्यामि। अस्यातुलस्य गुरुकुलस्य पवित्रे चरित्रे लग्नं कलङ्कपङ्कं स्वजीवन-प्रयोगेणापि प्रक्षालयिष्यामि' इति। यदाहु—

६. **गुरुः मोमुद्यते शील श्लाघां शिष्यस्य शुश्रुवान्।**
पश्यन् दुःखायते तस्य तर्जनं मानवर्जनम्॥ ३॥

यतो हि— **सत्यो गुरुः स्वशिष्यस्य भ्रमं वृत्तव्यतिक्रमम्।**
'शिक्षणं हन्त! मे न्यूनं नून'मित्येव मन्यते॥ ४॥ इति।

अस्तमितो गभस्तिहस्तः। क्रमेण विसृमरैस्तिमिरैः सञ्जाते काले विकराले च दिक्चक्रवाले, गुरुरेकां पटपोटलिकां पृष्ठप्रणिहितां पाणिना प्रगृह्य पादुकाभ्यां प्रकामं प्रणादं प्रादुष्कुर्वन्, पारदेश्य-पथिक इव तं कुत्सित-कथं पथं समुपेतोः; यत्र रामदत्तः सारणिकानां द्रविणहरणमकार्षीत्। मृगयुरिव गुल्मगहन-गोपितगात्रः छात्रः स रामदत्तः सहसा निर्गत्य गुरु गर्जन् गुरुं लगुडेन ताडयामास, जगाद च— 'स्थीयतां स्वयमेव रे! निष्कास्यतां निगूहितं निष्कम्, द्रुतं दीयतां दीनारादिद्रव्यम्। नो चेद् दण्डदलितदेहो दिष्टान्तदेवं द्रक्ष्यसि' इति। उक्तं च—

७. **द्विषां प्रकृतिघोराणां, चोराणामथ कामिनाम्।**
गामिनां लोभमार्गे च, लुप्यते हृदयाद् दया॥ ५॥ इति।

गुरुस्तु प्रागेव प्रताडन-पीडा-प्रसहाय प्रस्तुतः, पोटलिकां पारिपन्थिकस्य पुरतः प्रणिधाय, तं प्रति प्रगाढां प्रीतिं प्रथयन् प्रोवाच— 'पुत्र! पौनःपुन्येन प्रबलं प्रहर, सर्वथा सज्जोऽहमजस्रं प्रहारसहस्रं सोढुम्, यदि कापथगामिनी मनीषा ते साधु साधिता स्यात्' इति।

इत्थं पूर्वपरिचितेन तेन वात्सल्यविकस्वरेण स्वरेण समुच्चारितं सौकुमार्यसुधारोचनं विवृतविलोचनं वचनं श्रुत्वा 'हा! परमेश्वरप्रतिमः शिष्यप्राणः पूज्यपादो गुरुरेष मया पापपुष्टेन दुष्टेन दग्धदण्डद्वाराहतः' इति चाऽह्नाय परिज्ञाय सहसाऽपस्मृतापहारव्यापारः, ग्लानित्रपानुतापागारः कदाचारः प्रास्तवेत्रः, वाष्पविप्लुतनेत्रः गुरोः पादयोः पतित्वा भूयोभूयः क्षमां भिक्षमाणश्चिरं चक्रन्द। पश्चात्तापपरिदेवनपरः पूज्यपुरुषे प्रहरणाद् पुष्कलं पातकिनौ पाणी पृथिवीपतितेषु प्रस्तरेषु पुनः पुनः प्रताडनेन

पीडयन् प्रोवाच – 'गुरो! पण्डितमण्डलीमण्डन! अमुनैव प्रचण्डेन दण्डेन खण्डनीय उद्दण्डस्य मे पिण्डः। शतधा शातय शीघ्रं शालीनताशून्यस्य, शरारोः शयौ। दयस्व क्षन्तुं मे मन्तुम्। विस्मृतधर्मा पापकर्माहम्। अवाच्यानि बीभत्सभरितानि दुरितानि मयाचरितानि। गर्हणीयतां गमिता गोष्ठीषु गेयगुणग्रामाणां गुरूणां गरिमाणः, कन्दर्पकादम्बरीकैतव-कृतेन किल्विषकज्जलेन कलङ्किताः किल कुलकीर्तयः, जनातिगं जैह्म्यं जुषाणेन जर्जरीकृतं जनजातिजीवनम्, पावनीं पुण्य-पद्धतिं परिहृत्य प्रमादात् पातितः पुरुषः पूतिपातालपङ्के' इति।

८. ततः पादयोः शयानं भूयोऽनुशयानं तमुत्थाप्य गुरुरगादीत्—'आयुष्मन्! बाह्यव्यापारव्यासक्ततया यद्यपि मध्य एव स्वाध्यायमपहाय प्रपलायितस्त्वम्, न च सुचिरायास्थायि सुपात्रैः छात्रैः सङ्कुले गुरुकुले त्वया, तथापि तथ्यं कथय कोऽसौ मे दोषः यस्त्वयि सङ्क्रान्तः, प्रैरयच्च त्वां पापपथे प्रवर्तितुम्? सञ्चरन्ति हि गुरूणामगुणा अपि माणवकेषु' इति।

ततो रामदत्तः प्रश्रय-पुरस्सरं प्रत्युवाच— 'पूज्यप्रवर! सम्भवति तपताम्पतेस्तेजसि तिमिरम्, कुसुमासवे कुत्सनीयं किमपि काटवम्, सुधारसे संसारसूदन-स्वाभाव्यम्, जाह्नवीजले च वृजिन-जनकत्वम्, परन्तु नाणीयानपि दुर्गुण आचार्यचरणेषु निपुणं निरूपणेनाप्युपलक्ष्यते। पूतात्मन्! सहजापराधानां व्याधानाम्, मद्यसेविनामक्षदेविनाम्, वेशासङ्गानां भुजङ्गानाम्, दीनदुर्बलशोषकाणां मोषकाणां च वर्गस्य संसर्गस्य हेतोः, प्रसह्य पीडितानां पुंसां व्यञ्जिततापैः सविलापैः शापैरथ पुरातनैः पापैः उत्तरोत्तरं क्रमेण त्वरितं मे चरितं नीचान्नीचतरतामुपेतम्। अधन्येन जघन्येन मया समुत्सृष्टा भवन्निर्दिष्टा शिष्टा संसारसिन्धुतरणिः सात्त्विकी सरणिः। प्रसीद, सीदत्-स्वान्तं नितान्तं किल्विषाक्रान्तं क्षमस्व माम्। शपेऽहं भवतः कृपावतः पावनाभ्यां पादपयोजाभ्याम्, भविष्यति न भविष्यति मत्तोऽन्यायः समायोऽपायः, चरितघातकं पातकं च। अद्यप्रभृति मुक्तो मया मदिरादोषः, मार्गस्थमोषः, शुभशीलशोषः, पापान्तरपरिपोषश्चेति कथयित्वा, कर्णौकुद्मलौ च कराभ्यां कलयित्वा नसाग्रेण पांसुले पथि लेखाशतं लिलेख। तत्पश्चात् पश्चात्तापप्रादुष्कृतेन बाष्पवारिणा पापपङ्कं प्रक्षालयन् विरक्तवृत्तिः, गुरुणा दत्ताशीः काशीमयासीत्। यदाहुः प्रगुणा नयनिपुणाः—

९. **दुर्वारान् दूषिताचारान्, कुष्टान् दुष्टांश्च सर्वदा।**
सञ्चारयन्ति सन्मार्गे, स्वार्थं सन्त्यज्य साधवः॥ ९॥ इति।

पुनः पृथिवीपालं प्रबोधयन् प्रोवाद प्राचार्यः— 'महीमहेन्द्र! विजृम्भमाण-वृजिनजाले करालेऽस्मिन् कलिकाले तु यत्र तत्र मिथ्या-माहात्म्यमण्डितेषु मायामयमुनिमन्दिरेषु, महिलामण्डलीमोहिषु मुण्डित-मूर्धमस्करिमठेषु, श्रद्धालुशिष्यशतश्रेणी-शुश्रूष्यमाण-श्रमणाश्रमेषु, विश्रुतैः विविधविषयविदुरैः विद्वद्वरैर्विभूषितेषु विद्यावेश्मसु, विश्वतो विहरद्-बोधकवृन्देषु बौद्धविहारेषु, तुषाराद्रौ त्रिदशतटिन्याः तोयधेः तडागानां च तीरेषु, तथा तापसतततिततेषु तीर्थेषु, उद्घाटितमन्त्राद्यापणाः कृपणाः दृश्यन्त ईदृशाः प्राप्तप्रतीक्ष्यपदा गुरवो यैः कूटाधारेण कदाचारेण गर्हणीयतां गमितं गुरुपदगौरवम् । एतादृशस्यैव गुरोः दुःखदायिका सत्याऽप्यसत्याख्यायिकानुपूर्व्येणाकर्ण्यते । तथा हि—

१०. अस्ति पञ्चाम्बुप्रान्ते प्रख्यातं, वापिवृन्दैर्वलयितत्वाद् विश्वतो विश्रुत-वारिबाहुल्य-वैभवम् 'पटुपुरं' नाम पवित्रं पत्तनम् । तत्र राकाभि-धाना लक्ष्मीव लोकोत्तरेण लवणिम्ना लिप्ता बालविधवा वसति व्यधात् । एकदा प्रातः, प्रदेशे प्रख्यातः, कोऽपि तस्या गुरुरायातः । श्रद्धाबद्धाञ्जलि-पुटासौ तं पाद्यप्रसूनप्रभृतिभिः पदार्थैः प्रेमपरम्पराप्रदर्शनपुरस्सरं पर्यपूपुजत् । पुनश्च प्रकटप्रसादैः मधुराद्यास्वादैः, दत्ताधारैः नानाप्रकारैः रसनारञ्जनैः व्यञ्जनैः आकण्ठपूर्त्तेस्तमतर्पयत् । तत्पश्चात् सा पुण्योपदेशप्राप्तये तत्प्रमुखे समुपविवेश । गुरुस्तु तस्या देव्या मञ्जिममण्डितां मोहनीं मूर्त्तिमालोक्य मदनोन्माद-मथितमानसः तां प्रतारणपाशे पातयितुकामः प्रचुरैः पुराण-परिकथा प्रमाणैरात्मसमर्पणस्य महिमानं व्याचख्यौ । स्पष्टं चाचष्ट— 'शिष्याऽसि मे त्वमित्यात्मनिवेदनं विदधानया शरीरेणापि शुश्रूषितव्यो गुरुरहं त्वया' इति । अहो ! अकथनीयं किल कपटकौशलं कामकदर्थि-तानाम् ।

११. गुरुः वेदादि-विविध विषयविचक्षणो बभूव, अतस्तेन प्रबल-प्रमाणपुरस्कृताभिः युक्तिभिः सदुक्तिभिश्चेदं पर्यपोषि यदेवं नानुष्ठितं चेद् गुरोः कृपा न सम्पत्स्यते, तदभावे च नियतो निरये निपातः' इति । युक्तमुक्तमभियुक्तैः—

कूटान् कापटिकाः कांस्कान् कौशलेन न कुर्वते ।
खलीकृतास्त्रपात्रास-घस्मरेण स्मरेण ते ॥ ७ ॥ इति ।

राका वराकी विधवा विदग्धबुद्धिः सतीत्वसंरक्षणे सुतरां सावधाना समजायत । तया तूर्णं गर्ह्यस्य गुरोः व्याजसमेतं व्यभिचारसङ्केतं अभिप्रेतमभिज्ञातम् । सा अदिममिश्रं वचोऽवोचत्— 'गुरुवरेण्याः ! श्रीमतां

कृपया मया 'गुरुचरणपरिचरणं शिष्यायाः परमो धर्मः' इति शास्त्रशस्यं रहस्यं त्वज्ञायि, परं विधातृवैपरीत्याद् वरिवस्याविधिविशेषो नावेदि ।

१२. अतोऽहं यथामति गुरोः पादपद्मयोः प्रतिमां हृदये निधाय नेत्रश्रोत्राद्यैः करणैस्तत्परिचरणमाचरामि । नयनाभ्यां तस्य स्वरूपं निरूपयामि, कर्णाभ्यां चोपदेशपीयूषं पिबामि । केवलं मलमूत्रवाहि जघन्यमिन्द्रियद्वयं मया गुरोः शुश्रूषायां न न्ययोजि, यतो हि पावनमेव पदार्थजातं पूज्यपादानां परिचर्य्यायां प्रयोक्तव्यमिति प्राग्भिः प्रदिष्टा-पद्धतिः । मलमूत्राविले विले गुरोर्विनिपातो मा भूत् तत्परिचरणे च प्रत्यवायो न जायेतेति मलमूत्रपात्रे गात्रे मया परिधानैः प्रावृते । तथा कृतेऽपि गुरुर्न प्रीयते चेत् को निरपाय उपायः । परं परमार्थो गुरुः पाप-प्रधानं प्रतीपं पन्थानं न प्रतिपद्यते । यो गुरुः मुषितमतिः महामाङ्गल्यं मोक्षमार्गं मुक्त्वा मोघं मोहमलीमसं मृतिमार्गं मार्गयति, यो गुरुः परमपद-प्राप्तिपथे प्रवृत्तः परमात्मप्रेमपीयूषं पीत्वापि मलमूत्रमार्गं मदनोन्माद-मुकुलिताभ्यां लालसाभ्यां लोचनाभ्यां लोकते, यो गुरुः शिष्याया दैन्यसदनं वदनं अनुक्रोशस्पृशा दृशाऽनालोक्य दूषितं मलीयांसं मलमूत्रमार्गमीक्षते, ईदृशाय गुरवेऽप्यन्यदेव कार्यं निर्धार्यम् । आत्मसमर्पणस्थाने स्थाने स्यात्तस्य मुखं मषिप्रलेपैःमलीमसं विधातुम् । मिथ्यामहात्मनः विषयवासना-व्यसनिन-स्तस्य शासनीयं शरीरं मस्करमार्जन्या' इति । आसिधारं व्रतमाहुः गरुधर्म निर्वहणम् ।

१३. तदाकर्ण्य विप्रलम्भवैदग्ध्यवान् गुरुः विमानेन व्रीडया च बद्धवदन इव वाग्यतो वेगेन बहिर्वव्राज' इति । यदुक्तम्—

अहो! मारस्य माहात्म्यं, मूर्धन्यं मन्त्रमोहनम् ।
येनायं विकृताकारः संसारः सम्प्रजायते ॥ ८ ॥
यः प्रसूनोपहारैश्च, तालिकाभिश्च सत्कृतः ।
स्यात् स पादप्रहारैश्च, गालिकाष्ठैश्च कात्कृतः ॥ ९ ॥ इति ।

पृथिवीपते! कृतयुगे त्वन्यैवासीद् ग्राह्यगुणा गतिर्गुरूणाम्, अन्यैव च श्लाघनीया श्रद्धा शिष्याणाम् । तथा ह्यालोक्यते किमपि लोकोत्तरमौ-पनिषदं पवित्रं चरित्रम्—

१४. आसीत् काशीनिकटे विकटे मुनिकुलहूयमानदहने गहने, साक्षात्कृतधर्मा विदित-ब्रह्मविद्यामर्मा शिष्यजनाकर्षी, महर्षिरायोदधौम्यो नाम । तस्यान्तेवासिष्वन्यतम 'उपमन्यु'-नामा धन्यजन्युरमन्यत । सहज-सौम्यत्वसंस्कृतात्मा, सुतरां सुकुमारस्वभावः, वशीकृतविषयिवृन्दो विनय-

विशेषविभूषितोऽसावाचार्यचरणयोराबद्धागाधश्रद्धो बभूव। गुरुणाऽनुयुक्तोऽसौ प्रत्यहं प्रत्यूषात् प्रभृति प्रदोषपर्यन्तं गवां चारणम्, वन्यविपद्बाधावारणम्, गोवरोत्सारणम्, दोहनसंविधानम्, तर्णकेभ्यस्तृणतोयादिदानं च व्यधात्। आत्मविस्मरणं हि परमार्थं परिचरणम्।

१५. पेशलप्रकृतिः महर्षेः पत्नी सरलस्वान्तं नितान्तं शान्तं तमुपमन्युं पुत्रनिर्विशेषं मन्यते स्म। साऽनुदिनं महर्षिं प्रेरयामास—'स्वामिन्! मुग्धे तस्मिन्नुपमन्यावपि वितरणीया कापि विद्या। बहवो वत्सरा व्यतीता इहागतस्य सेवारतस्य च तस्य तपस्विनः। करणीया करुणा पूज्यचरणैः। हरणीयस्तस्याज्ञानपाशः, भरणीयश्चान्तःकरणे दिव्यः प्रकाशः' इति।

महर्षिस्त्वनवधान इवाभ्यधात्—प्राणप्रिये! सति मङ्गलमये समये स मयेष्यते शिक्षितुम्। न तु समायातः समयोऽसौ। तद् धीरा भव' इति।

१६. पूर्वाश्रमनियमानुसारेण ब्रह्मचारी, गुरोः सेवाकारी, तदाज्ञानुसारी वशी चावश्यं तस्यैव वेश्मनि निवसेत्, स निकटस्थेभ्यो नगरावसथेभ्यो भैक्ष्यमादाय गुरोः सम्मुखे स्थापयेत्, तस्माद् भैक्षाद् यमपि यावन्तमपि च भागं प्रतीक्ष्यो गुरुः प्रयच्छेत् तमेव प्राश्य प्रीतः प्राणयात्रां निर्वाहयेत् इत्यासीत् प्राक्तनी परिपाटी। उपमन्युरप्येतं परम्परयोपेतं नियममन्वपालयत्, परमसौ यदपि भिक्षितं भक्षयितव्यमानिनाय, तत्समग्रं ऋषिगणाग्रणीरायोदधौम्यः स्वपार्श्वं एव परिररक्ष, स्तोकमप्युपमन्योः दीनस्यादनाय न ददौ। तथा कृतेऽपि पेलवप्रकृतिरुपमन्युरनुदितमन्युरतिष्ठत्। नासौ व्याजहार सव्याजं वा व्यथाव्यञ्जनं वा विपरीतं वचनम्। स यथापूर्वमप्रमत्तः समस्तं व्यापारजातमन्वतिष्ठत्। स्वप्नेऽपि नोत्क्रामन्ति गुरुवचनं वर्धिष्णवोऽन्तेवासिनः।

एकस्मिन् दिवसे महर्षिस्तं पप्रच्छ—'उपमन्यो! निरवशेषं ते भैक्ष्यं त्वहं प्रत्यहं रक्षामि, एतादृश्यां विवशायां दशायां किमश्यते त्वया? कुतो न कणीयांसमपि कृशिमानं कलयति ते कायः? तथैव तेजस्वितां तनुते ते मेदस्विनी मूर्त्तिः' इति।

१७. सत्यात्मा उपमन्युः पुटितपाणिः प्रोवाच—'गृहमेधिभ्यो भूयो भिक्षान्नमानीयते मयका, भुज्यते च स्वैरम्' इति। सरलस्वभावः सज्जा सताम्।

तदुपश्रुत्य महर्षिः वेदितापि प्रोवाद सखेदम्—'नेदं चिरञ्जीव! साधीयो विधीयते। एतेन ते ननु दुष्कृतेन कर्मणाऽस्वस्था गृहस्था लोलुभर्ल

लाघवं चारोपयन्ति पूर्वाश्रमिषु। भूयोभैक्षादानेन परेषां भिक्षोपजीविनां जीविकापहारजन्यं जघन्यं सुकृतविघातकं पातकं चापि जायते' इति।

तत्परिश्रुत्योपमन्युः— 'नैतद् वृत्तं पुनरावृत्तं सम्पत्स्यते' इति प्राञ्जलिः प्रतिशुश्राव। वीतेषु कतिपयेषु वासरेषु मुहुर्महर्षिः पर्यप्राक्षीत्— 'उपमन्यो! किमद्यतेऽद्यतनेषु दिनेषु ?' इति।

१८. सत्यसन्धः उपमन्युः प्रत्यवोचत्— 'महाराज! एतासां सौरभेयीणां स्वादीयः स्तन्यं पीयते' इति।

तं निर्भरं निर्भर्त्सयता महर्षिणाभाणि— 'अरे! मामकीनमिदं धेनुकम्। मन्निदेशमन्तराऽस्य पयसः पानं प्रथीयः पातकं तस्करतां नात्येति' इति।

एवममर्षवर्षिणा महर्षिणा तीव्रं तर्जितेनोपमन्युना धेनूनामूधन्यपानमपि परिहृतम्। अतियाते वासरव्राते पुनः गुरुरन्वयुङ्क्त—'आयुष्मन्! किमद्यमद्यते' ? इति।

उपमन्युना प्रत्यवाचि— 'भगवन्! प्रत्यूषे प्रदोषे च पयःपानपरायणानां वत्सानां वदनेभ्यो विगलितं फेनं पिबामि' इति।

परं परीक्षितुमना महर्षिरहर्षित इव प्रावादीत्— 'नेदृशः किल वातुलबालिशसदृशः भृशः प्रमादः पौनःपुनिकः प्रजायेत। पृथिव्यां पतितः फेनस्तावत् कीटपतङ्गभाग इति परेषां प्राणिनां प्राशनीयं पदार्थं प्रसह्य परिगृह्य पिबन् पातकपात्रतां प्रापयस्यात्मानम्। अपि च न वेत्सि गोवत्सानां वत्सलताम्। ते ह्यसोढपराभीलाः परमकृपाशीला जायन्ते। नियतं ते यतन्ते यदधिकतरस्य गोरसस्य फेनं निर्माय त्वत्कृते निपात्येत' इति। एवं ते त्वन्निमित्तेऽनिशमशनायिता नयन्ति सन्तापमयं समयम्। पुत्र! नातः परं पापतरं प्राहुः प्राञ्चो यत् परपीडनेनात्मपिचण्डपूरणम्' इति।

१९. एवम्प्रकारेण सर्वथाहारेण विनाकृतस्य दीनस्योपमन्योः द्वित्राणि दिनानि वीतानि। सोऽनुदिनं गोवृन्दं चारयन् वारयंश्च विविधा वन्या बाधाः, बुभुक्षाविक्षोभितोऽभितो वनं बभ्राम। एकस्मिन् प्रचण्डमार्तण्डकिरणजाले मध्याह्नकाले दुस्सहया क्षुधा पीडितेन तेन पदार्थान्तरमनुपलभ्य सहज-विषयुक्तानि भुक्तानि त्रिचतुराण्यर्कपत्राणि। गरलगर्भाणां पित्तप्रधानानां पलाशानां प्राशनात् तदानीमेवासौ दीनो दृष्टिविहीनो व्यजायत। एवं विलुप्तदर्शनशक्तिः वराकोऽसौ विपिनविमार्गेषु विहरन् विधिविपर्ययाद् वारिविरहिते कस्मिंश्चित् कूपके निपपात।

२०. पतिते पश्चिमपयोधौ प्रचण्डप्रभापुञ्जे प्रद्योतने, प्रत्यावृत्तः पशुपालं परित्यज्य सकलः सुरभी-सङ्घातः। उपमन्युमपरागतं निरूप्य महर्षेः सहधर्मिणी समुदाजहार— 'स्वामिन्! प्रियो मे वत्स उपमन्युर्नाद्याप्यायातः; तद् गवेष्यतां किं कारणम्' इति।

करामलकवत् सकलसंसारव्यापारदर्शी महर्षिः स्वगतं स्मयमानः समुवाच— 'स एष्यति स्वयमेव, मा स्म चिन्तातुरा भूः' इति।

सा तु स्वामिनोऽनवधाननिबन्धनीं वाचमाचम्य किञ्चित् प्रकटितकोपाटोपाऽचकथत्— 'नेष्यते चेत् नान्विष्यताम्, परं यावत्कालं वालं तमुपमन्युं नेहोपेतं निरूपयिष्यामि तावन्न किञ्चिदपि पास्यामि न च पर्यशिष्यामि' इति। यदुक्तं सहृदयैः—

परागसारादपि कोमलानि, मृणालतन्तोरपि दुर्बलानि।
निसर्गतो बालकवत्सलानि, भवन्ति चेतांस्यबलाजनानाम् ॥ १० ॥

किञ्च—

नवस्य वासा-कुसुमासवस्य, हैयङ्गवीनस्य तथा हिमस्य।
सारं समादाय शनैर् विदग्धः, करोति मातुर् हृदयं विधाता ॥११॥ इति।

२१. तन्निशम्य किञ्चित् सचिन्त इव महर्षिः न्यगादीत् — 'सर्वथा प्रतिरुद्धं भोजनं मया, मन्ये तेनोदितमन्युरुपमन्युः क्वापि पलायितः स्यात्' इति।

ततस्तदानीमेवासौ कतिपयैः कृपापात्रैश्छात्रैः सत्रा सन्त्रासिताध्वन्यां वन्यां गोचारणस्थलीमाससाद। तत्राप्यविचलितचेता इतश्चेतो विचरन् 'क्वासि वत्स! उपमन्यो!' इत्युच्चैस्तमां तमाजुहाव।

अनुनादितोदपानम् साभिधानम् गुरोराह्वानं निशम्योपमन्युरगादीत्—'भगवन्! अहमिह निपाने निपतितोऽस्मि' इति।

पश्चात् कूपोपान्त उपेतेन महर्षिणा पृष्टोऽसौ निपाननिपतननिदानं निखिलेन निवेदयामास। तपस्विनस्तस्य विनयविमिश्रं विगतवञ्चनं वचनं विनिशम्य परां प्रीतिमुपेतो महर्षिः अमरागदङ्कारयोरश्विनीकुमारयोः वन्दनां विधातुं व्यादिदेश। गुरुणा प्रचोदितेनोपमन्युना प्रारम्भि प्रशंसापुरःसरं प्रार्थनम्। वीनाहस्थेन गुरुणा पठितो मन्त्रः, सकृदेवोच्चारित उपमन्युना, सद्यः प्रकटितपार्थिवकलेवरौ विबुधवैद्यवरौ समुद्धृतवरदकरौ प्रोचतुः— 'चिरञ्जीव! सुधास्वरूपोऽपूपोऽयं कूपादुद्धरणात् प्रागेव प्राशनीयः' इति।

२२. साष्टाङ्गपातं प्रणिपत्यात्मानं मुक्तमायामानं अदिमानमानमनुपमन्युरुदैरयत्— 'महाराजौ! मर्षणीयं मुग्धममोहमग्नस्य मुषितमतेः मम मानुषसुलभं वैयात्यम्। गुरवेऽर्पणं विना नाहं पूपमिमं प्राशितुं प्रभवामि। वरमान्ध्यम् न चाचार्यनिदेशातिक्रमः' इति।

तावाहतुः— 'प्राक् तव गुरुणाप्यस्मत्स्तुतिरकरि, परं तेन त्वस्मत्प्रत्तं पूपं स्वगुरवेऽसमर्प्यैवाऽभोजि। तस्मात् त्वमपि तथैवाचर' इति।

उपमन्युः मन्त्रयामास— 'कृपाकरौ सुराग्रेसरौ! नेदृशं पापपथप्रवर्तकं पुण्यप्रलोपकं च वचनं वन्द्ययोः विबुधवर्ययोः वदनाद् विनिर्गतं शोभते। प्रभविष्णूनां हि गुरुजनानां प्रमादो नानुचरैर्निरूपणीयः। न खलु गुरवेऽसमर्प्यापूपो मयाशितुं शक्य इति क्षन्तव्यो मेऽपराधः'। इति यदाह—

पतन्तु वज्राणि वहन्तु वात्या आप्लावितास्तूदधिना धरित्री।
ध्रुवात्मनां किन्तु न लेशतोऽपि भवन्ति चेतांसि चलाचलानि ॥१२॥ इति।

२३. अश्विनावोचताम्— 'पुत्र! प्रीतावावां ते सुकृतासक्त्या गुरुभक्त्या च। अयोमयी दन्तावली तव गुरोः, परं सौवर्णी सम्पत्स्यते ते। तव दर्शनशक्तिरपि यथापूर्वमप्रतिहता स्थेयसी च स्याद्' इति। कं न प्रीणाति सत्यं विनीतं च वचनम्।

दृष्टिलाभोल्लासितो निपानान्निष्कासितो विगतमन्युरुपमन्युः भद्रङ्करणौ गुरुचरणौ प्राणंसीत्। सौम्यो महर्षिरायोदधौम्योऽपि— 'सकला-समवायाः सकला आम्नायाः शास्त्रसमुदायाः निरवद्या हृद्यगद्यपद्याद्यविद्याश्च सद्यस्ते हृदि सरहस्याः स्वत एव प्रकाशिताः स्युः' इत्याशीराशीन् भूयो भूयोऽवादीत्। गुरोः प्रसादो हि शिष्यसौभाग्यस्य प्रस्तावना।

सोऽपि सहसा विविधविद्यामहसा समुद्भासितान्तःकरणः, पुनःपुनश्चुम्बिताचार्यचरणः, कृताभ्यनुज्ञो गुरुणा गृहस्थाश्रमप्रवेशाय स्वनिवेशप्रदेशाय प्रतस्थे, इति।

२४. तदुपश्रुत्याचार्येण प्रेरितः क्षमापः समं समरसिंहेन समैश्च सचिवाद्यैः, वाद्यैरुन्नीयमानः सप्रसादं स्वप्रासादमाससाद।

एवं परमार्थो गुरुः स्थूलदृशाऽप्रियमपि प्रतीयमानं यत्किञ्चिदाचरति, तत्सर्वं शिष्यहितायैव। वास्तवेन दीक्षमाणो वा परीक्षमाणो वा स्वपन् वा जपन् वा लपन् वा, हसन् वा वसन् वा घसन् वा, दिशन् वा विशन् वा, गच्छन् वा संयच्छन् वा, वाधितो वा राधितो वा, सर्वास्वपि स्थितिषु गुरुः सर्वात्मना स्वान्तेवासि-समुन्नतये स्पृहयति। शिक्षकस्य श्वासा अपि

शिष्याय श्री-शर्म-शुभ-शतानि शंसन्ति। सत्यानुस्यूतमनुभूतं चेदं रहस्यं यज्जगति पितरौ गुरुश्चेति त्रय एव मनोवाक्कायकर्मभिः मनुजस्य व्याज-विरहितं हितं समीहन्ते। परे तु भूयसीमसूयामनुभूय स्थाने स्थाने तस्य समृद्धि-सरण्यां कुटिलान् कण्टककीलकानेव किरन्ति। कृपालुशीलो गुरुः कर्कशैरपि कोमलपरामर्शैः वाग्व्यापारव्यवहारकूर्च्चकैः शिष्यस्य कल्मष-मूलमलमज्ञानकश्मलं क्षालयति, शिष्यस्याभ्युदय-शैलशिखरारोहणकर्मणि च सोपानायते। स एव विरोधिविघ्नबाधापनोदनैः तर्कतोदप्रचोदनैश्च जागरयति शिष्यस्यान्तः शयानं सुखनिदानं ज्ञानम्। उक्तं चापि धर्ममर्मविदुरैः—

> **ऋणस्य प्रतिदानेन, निष्कृतिः सम्प्रजायते।**
> **गुरोः विद्याधनं प्राप्य, कथमानृण्यमेस्यसि ? ॥ १३ ॥**

किञ्च—
> **अनुक्रोशोऽथवा रोषो, यस्य क्षेमफलो भवेत्।**
> **अहो ! गिरा कया तस्य, गीयतां गरिमा गुरोः ॥ १४ ॥** इति।

तस्मादायुष्मन्! सर्वात्मना 'आचार्य-देवो भव' इति।

दानस्य महिमा न माने (१६)

१. धर्मक्षेत्रे कुरुक्षेत्रे कियत्कालावधि शस्त्राशस्त्रि, केशाकेशि, बाहूबाहवि, हस्ताहस्ति, तलातलि, मुष्टामुष्टि, कोपाकोपि च प्रवर्तमानमना-रतं महाभारतं नाम दारुणं प्रविदारणं पर्यवसितम्। प्रबलनयेन बलचयेन च रणरौरवान् कौरवान् महामाये सम्पराये पराजित्य प्रह्लादितजनसमाजो-ऽव्याजो महाराजो युधिष्ठिरः सकलभूवलयस्यैकातपत्रः सर्वजित्-क्षत्रः सम्राट् समजायत। तेनेह तेने सततं, देयामेयादनीयपेयम् अप्रतिमेयम् अश्वमेधाभिधेयं क्रतुत्रितयं गौरवमयम्।

२. स दानी तदानीं सादरं सोदरसमेतः एतावद् धान्य-धेनुक-विभव-वस्त्राद्य-खाद्य-वस्तुवृन्दं दीनहीन-क्षीणेभ्योऽदाद्, येन तस्य विनतस्य यशः प्रायशः ककुभां कूलङ्कषतामुपागमत्। एतेन महिमोपेतेन प्रसूत-प्रभूतशर्मणा धर्मकर्मणाऽमन्दनन्दनानां कुन्तीनन्दनानाम् 'इदं नो द्रव्यदानं स्वर्गसोपानम् अपरिमेयम् अनुपमेयं च' इत्यखर्व-गर्वोदयं हृदयं बोभूयते स्म। स्मर्यते चैवं नयनिष्णातैः—

> **३. सम्पाद्य दानानि विकत्थमाना मानार्थिनः क्षुद्रतमा भवन्ति।**
> **ये मानवा मानस-जात-माना मा नाम ते दानफलं भजन्ते ॥ १ ॥**

भवन्ति न प्रत्युपकार-लिप्सवो, विधाय पुण्यानि च विस्मरन्ति ये।
वीत-स्पृहाः सात्त्विक-दान-शौण्डास्ते ब्रह्म-सायुज्यमभिप्रयान्ति ॥ २ ॥
सत्त्वं समापयति याति मृषा प्रसादं,
मिथ्यैव कल्पयति चात्मनि तुङ्गिमानम्।
द्वेषं घृणां च हृदयेऽङ्कुरयन् परेषां,
पुण्यं विलोपयति हन्त! स दानदर्पः ॥ ३ ॥
शौटीर्यं शोभते शौर्य-शौण्डानां शत्रु-शातने।
हन्ताऽन्यथात्मनो हन्ता स्यादहन्ता-वशंवदः ॥ ४ ॥ इति।

४. तस्मिन्नुल्लासमये समये यदा तार्तीयीको वाजिमेधः विहित-विपुल-व्यवसितः पर्यवसित आसीत्, कृतावभृथाभिषेका अनेके लोकाश्च चारु-चरु-सुरभिधूमभूमोत्थानात् सव-स्थानाद् अपगता अपि नाभूवन् तदा तत्र सत्र-सङ्गतैः काकतालीयवत् कुतोऽप्युपेतः कोऽप्यलौकिकः त्वराकुलो नकुलो व्यलोकि। नकुलस्य नयने नितरां नीलिमायने अजायेताम्, कलेवरस्यैकतरः पार्श्व-प्रदेशश्च कनकमयः समभूत्। वातुल इव व्याकुलो नकुलो विशालां यज्ञशालां समुपेत्य यत्रतत्रशयः धरित्र्यां गात्र-पार्श्व-परिवर्तनं प्रारेभे। कतिपयकाल-कलावधि काय-कक्ष-प्रलोठनात् परं प्रधनानकध्वान-भयानकेन गुरुणा गर्जितेन पशु-पक्षि-पुरुष-प्राणिपुञ्जं भीषयन्निवासौ मनुष्यवाचाऽवोचत्— 'रे रे शूरसंस्तुताः मिथ्या-मान-युताः कुन्तिसुताः! वेद-विहित-विविध-विधि-विधानेन कृतः क्रतुरयं सम्पन्नः, परमस्य भावित-भूरि-भागस्य चापि भवद्यागस्य सकलं पुण्यफलम् एकेन केनचिदुञ्छशीलेन चाप्यप्रकटाभीलेन वैभव-विहीनेन दीनेन जितात्मारातिना द्विजातिना कृतस्य सेटकमात्रमानस्य चापि सक्तुदानस्य सुकृतफलेन तुल्यतां नातनोति'।

५. इत्थङ्कारं तारं नकुल-व्याहारं निशम्य विस्मितैः विप्रैः विजित-विपक्ष-वाजस्य महाराजस्य पाण्डवाग्रजस्य प्रजाहृदय-हरणं धर्माचरणं, पुण्यं न्यायनैपुण्यम्, अपारम् उदारं च दरिद्रोपकारं वारं वारं प्रचुरं प्रशस्य पृष्टम्—'नकुल! कोऽसि भ्रातः? कुतस्त्वमायातः? किङ्कृते च कुत्स्यते क्रतुरयम्?' इति।

६. नकुलेन निर्भरं निर्भयं निभृतं न्यगादि— 'नास्मि निन्दामि भवन्निष्पादितं पवित्रं सत्रम्, न चानृतगर्भां वाचं व्याहरामि। तस्यावनी-सुरस्य पावनीमवितथां तथा चेतश्चमत्कारिणीं कथां विद्यानिधानाः दत्ताव-धानाः शृण्वन्तु श्रीमन्तः। कतिपयेभ्यः वर्षेभ्यः प्राक् पवित्रे तत्र कुरुक्षेत्रे

कोऽपि धर्मवर्मा कल्याणकर्मा विप्रवर्यो वसति स्म। तस्य पत्नी, पुत्रः, पुत्रवधूश्चेति त्रयः परिजना अजायन्त। प्रायः कौपीनावशेषवेष एष धर्मधरधुरन्धरो धीरो विप्रवरोऽहरहः कृषीवल-सस्यकर्त्तनादर्वाक् केदार-पतितान् धान्यकणानेकैकशः समचेचीयत, तैरेव च पुत्रपत्न्यादि-परिवारस्य पोषणं व्यधात्।

७. एकदा द्वित्र-वर्षाऽवर्षण-हेतुकः करालोऽकालो विश्वतो वसुमतीं व्याप्नोत्। रजोराजि-विनिपाताः सन्तप्ता वाताः सर्वतो ववुः। वनावनिवारि-व्योम-विहारिणः क्षुत्पिपासा-विकृत-दशा विवशा विह्वलाश्च विष्वग् व्यलोक्यन्त कङ्कालशेषा जीवाः। यत्र कुत्रापि साश्रुधाराः तारा हाहाकाराः प्राविशन् परेषां पीडाप्रवणयोः श्रवणयोः। परेत-पुरुष-पशु-पक्षि-पुञ्जपञ्जरैः पर्यपूर्यत परितोऽपि पृथिवी। न कोऽप्यप्राक्षीत् कस्यापि वार्तां न वाऽऽताम् अश्रौषीद् वाचाम्। दुर्भिक्षं बुभुक्षा च धर्मं क्षपयतः।

८. एवं दुस्तर-दुर्भिक्ष-दलितस्य तस्य दीनद्विजस्यापि पार्श्वे किञ्चित् सञ्चितमन्नं तु नाभूत्, केदारेषु कृशैः कृषिकैरुप्तानि चापि बीजानि धूलिगुप्तानि विलुप्तानि वारिविरहात्, कुतो यवादि-धान्योत्पत्तिः सस्यसम्पत्तिर्वा। वराको विप्रोऽसौ तपोधनः सपरिजनः उपोषित एवालं दिवानिशमकालकालमनैषीत्। अनेकदिवसोपवासावसाने क्रमेण प्रचुरपरिश्रमेण तेन पण्यशालाविकीर्णान् यवकणान् सञ्चित्य सेटकपरिमाणाः सक्तवः सज्जीकृताः।

९. निष्पादिते नित्यकर्मणि, पर्यवसिते च देवर्षि-पितृ-पूजार्पणतर्पणे, द्विजातिना समे सक्तवः समे भागचतुष्टये विभक्ताः, पृथक् पृथक् कदलीदलेषु निधाय च प्रत्येकं कौटुम्बिकाय प्रदत्ताः। सर्वे जना भोजनार्थमुपविविशुः।

१०. अकस्मात्तस्मिन्नेवावसरे बुभुक्षा-व्याकुलः, तनुतनुः, आमूलचूलं धूलिधूसरः कोऽपि भूसुरस्तत्राजगाम। उपागतमभ्यागतं निरूप्य तपोनिधिः पुण्यफलोन्मुखविधिः स विप्रवरस्तं परमप्रह्लाद-पुरस्सरं प्राणंसीत्। पुनश्च नामितमस्तकः पुटित-हस्तकः, सौशील्यशीतां विनीतां वाचमवोचत्—

सौभाग्यमेतन्मम हे महात्मन्! पुण्य-प्रसूतं भवता दयालो!।
अकिञ्चनस्याद्य निवेशनं यत्, पवित्रितं पाद-पयोज-पातैः ॥५॥ इति।

११. तदनु च स्वकुल-गोत्र-शाखाद्यं सद्यो निगद्य धवल-यज्ञोपवीतमात्र-संवीत-शरीरं धीरं तं ब्राह्मणं कुटीरं प्रत्यनैषीत्। तत्र चानुवारं

ससत्कारोपहारं दैन्यादनास्तीर्ण-पटे कटे समुपवेश्य विपुल-विपादिका-भरणे भद्रङ्करणे तच्चरणे प्रमोदाश्रु-मिलितेन विमलेन सलिलेन प्रक्षालयामास। पाद्यार्घ्याद्यैरागन्तुकं जनं प्राज्यं सम्पूज्य सत्कृति-क्षिप्रेण गृहमेधि-विप्रेण स्वकीयः सक्तु-भागस्तस्मै सविनयं, भोजनायोपायनीकृतः। यतो हि—

१२. कामं निकामं विपदः समीयुः, प्राणास्तथा संशयिता भवेयुः।
परोपकार-व्रतिनः कदाचिन्नातिथ्यधर्माद् विचलन्ति सन्तः ॥ ६ ॥

युग्मकम्

घनाभिघातैरिव घोर-गर्जितैः, ब्रह्माण्ड-भूतानि विभीषयन्ती।
कल्पान्तकालस्य घना घनाली, सम्प्लावयेद् विश्वमिदं यथास्वम् ॥७॥
माहात्म्य-शीलाः परदुःखकातराः, संरक्षणे दीनजनस्य दीक्षिताः।
सन्त्यज्य सङ्गं सुत-सम्पदादेः, पुण्याप्तये प्राण-पणैः पणन्ते ॥ ८ ॥ इति।

अत्रान्तरे स्रागेव स सक्तुभागो भगवताऽभ्यागतेन बुभुजे, परं तेनासौ नातृपत्।

१३. अतिथये किमिदानीमदनाय दानीयमिति दीनो द्विजो नितान्तं चिन्ताक्रान्तोऽजनिष्ट। तदैव दैवत-दैववशंवदतया द्विजदयितया विस्मृतात्मत्राणया पतिप्राणया स्वकीयः सक्तुभागोऽभ्यागतनिमित्तं प्रीति-प्रदर्शन-पुरस्सरं प्राणेशाय प्रादायि। सधर्मिण्याः स्वांशविश्राणनं ब्राह्मणाय नारोचत। समरौत्सीत् सतां नेता स तां नैकशः, परं परमोदारा द्विजदारा भर्त्तुरातिथ्यधर्मं प्राणपरित्राणापेक्षयापि गरीयांसममन्यत। आग्रह-ग्राहितेन तेनाग्रजन्मना तस्या अपि सौभाग्यवत्याः सक्तु-भाग आगन्तुकाय प्रह्लाद-प्रकटन-पूर्वकं प्रादायि। किन्तु हन्त! जग्ध्वापि तान् सक्तूनपूर्णोदरः प्राघुणः प्रसादं नाससाद।

१४. यथापूर्वं विप्रस्याविष्कृतविनयेन तनयेन तनीयोऽप्यनुदित-रुषया स्नुषया च स्वभागभूताः सक्तवः सनिर्बन्धमभ्यागताय प्रदातुं प्रेम्णा ब्रह्मणः पाणिपुटके प्रणिहिताः। बुभुक्षाक्रान्तेन चाप्येकान्तस्थास्नु-स्वान्तेन तेन ब्राह्मणेन—'महाराज! दीनेन स-मानं दीयमानं स्वीक्रियतामिदम्' इति। नैकधाऽभिधाय तदपि भागद्वयं स-प्रणयम् अभ्यागतजनभोजनाय स्वयमेव स्वैरं समर्पितम्। कृपणस्य हि पणः सधनस्य मणः।

१५. तस्य धर्मात्मनो द्विजन्मनोऽमूदृशं भृशं समुत्कृष्टं सृष्टावदृष्टं प्राण-प्रयाणोपस्थितावपि पूर्ण-परिवार-प्रदत्त-सक्तुभागं महात्यागं समनुभूयं भूयः प्रामोदत प्राघुणिकः। स द्विजातेः तद्दारदारकस्नुषाणां च विपुलां उदारतां, दानस्य ससारतां, धर्मस्यापारतां, पुण्य-स्फारतां तथातिथ्यं

श्लाघमानोऽवादीत्— 'धन्योऽसि ब्रह्मन्! परमपुण्यवान् प्रशस्यः सदारः सदाचारस्ते परिवारः। धर्मोऽहम् भवन्तं परीक्षितुमत्रागमम्। भवतस्त्वेकाल्येऽप्यतर्कितया दानशीलतयाऽहं इतरे त्रिदशाश्चातितरां प्रीताः। पुण्यविभववान् भवान् समैः कौटुम्बिकैः समं समलङ्करोतु विशोकं स्वर्लोकम्' इति। दानं दिव्य-लोकाप्ति-निदानम्।

१६. प्रसादी नकुलो न्यगादीत्— धर्मस्यैवमुदीरणसमकालमेव स्वर्लोकायाने विमाने समुपविश्य द्विजदेवः पत्नी-पुत्र-वधू-परिवारेण साकं पुण्यविपाकं नाकं समुपेयिवान्। त्रिविष्टपं प्रविष्टे द्विजाति-परिजने, मयापि निकट-निखाताद् विवरान्निर्गत्य तत्र पार्श्व-प्रलोठनं प्रारम्भि, यत्र भुक्तसक्तुनाऽऽगन्तुना द्विजराजेन पावन-पाणि-पयोज-प्रक्षालनं व्यधायि। विप्रातिथये वितीर्णानां सक्तूनां द्वित्राः कणाः वातोर्मिभिरुद्धूलितास्तत्र विकीर्णा अभूवन्। सम्प्राप्य तेषां संस्पर्शमात्रं गात्रं मेऽर्धं कनकमयं सञ्जातम्।

१७. ततः प्रभृति सततमहमवशिष्टं कायार्धमिष्टं कनकमयं कर्त्तुं विशालासु क्रतुशालासु, मुनिजन-विहित-सवनेषु तपोवनेषु, पवित्र-सलिलेषु तीर्थस्थलेषु च वातुल इवाकुलः परिभ्रमामि, परं क्वापि नावापि मया स्वर्णमयाङ्गार्धसिद्धिः। तामेवाश्रान्तमन्तःप्रकाशां प्रत्याशां समादाय दायिनां भवतामप्यत्र सत्रस्थलीमुपागमम्, परम् अपूर्णकामः परिणामः। कीदृक्षं सादृश्यं तावद् हीरकशैलयोः।

१८. धर्मपुत्रस्याजातशत्रोरत्र पवित्रे सत्रे वसु-वसन-वासनादि-विविध-वस्तु-वितरण-प्रीणितैरप्रमाणैः ब्राह्मणैरभोजि। विपिनस्थेन तेन विप्रेण त्वेक एव भूदेवस्तर्पितः। तत्रासीत् तीव्रस्त्यागः, सुचिराद् बुभुक्षया निकाम-क्षामैः, स्वार्थनिरपेक्षैश्चतुर्भिरपि परिवारस्य पुरुषैः स्व-प्राण-परित्राणमपहाय लेशतोऽप्यमलीमसमानसैः तस्मै द्विजाय भोजनं प्रादायि। लोकास्त्वात्मरक्षानिमित्तं वित्तं तु दूरे पितृ-पति-पुत्र-पत्नी-प्रभृति-प्रेमापि परित्यजन्ति। याथार्थ्येन दानस्य महिमा परित्यागे निष्ठायां च तिष्ठति, न तु तस्य गणनायां परिमाणे वेति। एवमभिधायाह्नाय तस्मात् स्थानात् प्रवासी नकुलः प्रायासीत्। यदाहु—

यदीश्वरा हाटक-कोटि-दानैः, परात्परं पुण्यमवाप्नुवन्ति।
तदेव दीनाः कणिकां कृषाणाः, तथाऽधनाः काकणिकां ददानाः॥१॥

युग्मकम्

प्रतारणाभिः परपीडनैर्वा, परैश्च पापैरपि पुञ्जितानि।
जितानि चाक्षादिक-देवनेन, वेश्या-नियोगैरथवार्ऽजितानि ॥ १० ॥
दत्तानि भूयोऽपि वसूनि पुण्योदर्काणि न स्युर्न सुखावहानि।
अरिष्ट-बीजाकरणेन वन्ध्यो, मनोज्ञ-माकन्द-फलाभिलाषः ॥ ११ ॥
दीनाय शुद्धश्रमजीविना स्वयं, धर्मार्जितश्चेत् पणकोऽपि दीयते।
स्युर्दन्त-दष्टाङ्गुलयोऽपि निर्जराः, दोलायते निर्भरमैन्द्रमासनम् ॥ १२ ॥

इति।

अनया रीत्या समुत्सृष्टसृष्टि-स्नेह-सम्पत्सुखाः पुण्य-पूग-पिण्डीकरणोन्मुखाः, 'दुःखमेव वरणीयम्' इति दृढ-निष्ठाः, भौतिक-शरीरेष्वनास्थाः उभयलोकजैत्राः, इहत्रामुत्र चामरत्वमश्नुवते परमत्यागैकयागा इति।

साह्यं प्राणपणेनापि (२०)

१. समतिगता साक्षिणी विपुलविप्लवानां, समालक्षित-सुकृत-साम्राज्यत्वात् स-माना समानां पञ्चसाहस्री। तरणितनयातरलतरङ्गाप-हसितपातकपङ्केषु, सरस्वती-पुण्यसलिल-सम्पाद्यमान श्रौत-विधान-धौताज्ञाननिरयातङ्केषु, सकमल-ब्रह्मसरोवरादि-पूतसलिलविधूतमनोमूर्त्त्यादि-सकलमलेषु, चणककणिकेक्षुक्षेत्रपालिशुभशालिशस्यश्यामलेषु, स्थाण्वीश्वरकरुणापात्रेषु, ब्रह्मभूय-वाञ्छकवृन्दविहितबहुयात्रेषु, दिव्यदोग्ध्री-बलदर्प-बलदवृन्दपालक-सार्वकालिक-हालिक-लोकम्पृणेषु, परस्परप्रेम-परम्परा-पराकृतपरुषपुरुष-प्रथितनैकानीकनिघृणेषु, विनयविधेयासन्धेय-यौधेयशौर्यशौण्डीर्यविश्वविख्यातेषु, दृष्टाशिष्टप्रजासमर्धनवर्धनवंशविभूतिविभातेषु, जमदग्निघातकपातकसङ्घातनिध्यातात्मोत्पातेषु, आर्यमर्यादाधर्मकर्ममर्मोपदेशदानमानगुरुषु, आपञ्चनदादामरुमण्डलमुरुषु, पुण्यपुरुषु, कुरुषु धृतधर्मधुरे हस्तिनापुरे, रञ्जितसेवकलोकः पुण्यश्लोकः सत्यावतारः कुन्तीकुमारः सन्तुष्टपुष्टसमस्तसमाजः श्रीयुधिष्ठिरो महाराजः संविधाय विपक्षवलोज्जासनं राजासनमध्यतिष्ठत्।

२. तेन सिंहासनाधिरोहणसमकालमेव बन्धुवृन्दवरूथिनीमनोरञ्जनाय, वैरिबलावलेपभञ्जनाय, एकत्र क्षत्रैकच्छत्रशासनाभिव्यञ्जनाय चाश्वमेधनामधेयोऽध्वरवरः प्रारम्भि।

तदानीमेव दानी रत्नपुराधीशो महाराजो मयूरध्वजोऽपि तादृशमेव प्राप्तप्रजानुरागं यागमुपाक्रमत। इत: पाण्डवाश्वमेधीयहयरक्षणे श्रीकृष्णार्जुनावश्वारोहसन्दोहसेनापतित्वमध्यतिष्ठताम्। ततश्च रत्नपुरतुरगत्राणे मयूरध्वजतनुजस्ताम्रध्वज: प्रभूतप्रत्यर्थिपराजयोन्मादिनां सादिनां स्वैरं केसरीवाग्रेसर: सम्बभूव।

३. विधिविलसितवशाद् मणिपुरे दविष्ठदैन्यं निर्भयमुभयसैन्यं मुखामुखि समवर्तिष्ट। अहमहमिकया परिपन्थिपृतनामभिपतताम्, शौर्योन्मादं सिंहनादं वितन्वताम् सक्रोधानां योधानाम् शस्त्राशस्त्रि, धन्यमुखवन्याऽध्वन्यप्रशस्यमानसैन्यं दारुणं प्रविदारणं सम्प्रवृत्तम्।

भगवदभीप्सया धनञ्जयध्वजिनी ताम्रध्वजेन पराजिताऽजायत। ताम्रध्वजो जित्वरस्त्वरया वाजिद्वितयमश्वमेधीयमादाय दयामयमितरं धर्मावतारं पितरमुपेयिवान्। परमेतेन सहसोपेतेन स्वपक्षाभ्युदयान्तेन वृत्तान्तेन महाराजो मयूरध्वज आह्लादस्थाने विषादमेवान्वभूत्। स हि वृष्णिवंशविभूषणस्य, भग्नभक्तभवतृष्णस्य भगवत: श्रीकृष्णस्यानन्यमनसा परमोपासकोऽजनिष्ट। अमुत्र च सव्यसाची नष्टचेष्टो द्वित्रघटिकानन्तरं प्रत्यागतचेतनोऽक्षिणी करतलाभ्यां प्रमृज्य प्रजवं समुत्तस्थौ। शितशस्त्रच्छिन्नशूरशिरश्शतसंकुले कलहस्थले चाश्वमेधिकं वाजिनमनवलोक्य व्यथाव्याकुलो जितो लज्जितोऽपि च भूयोऽबोभूयत। दु:खासङ्गः खल्वाशाभङ्गः।

४. अनुरक्तभक्तपरवश: परात्पर: प्रभु: श्रीकृष्णो विप्रवेषमास्थायार्जुनं च स्वशिष्यरूपेण सहायमादाय प्रारब्धयागं महाभागं मयूरध्वजमुपातिष्ठत्। स तु तेजिष्ठौ तौ विविधव्यञ्जनैर्विप्राविति सम्प्रधार्य निरूप्य च तयोराखण्डलं दीप्तिमण्डलं विस्मयविस्फारितविलोचन: स्तब्धवाग् यदा श्रद्धाबद्धशयकुशेशय: प्रणन्तुमचीकमत् तावदेव ताभ्यामभ्यागताभ्यां सोत्क्षिप्तहस्तं 'स्वस्ति' इत्युदीर्याशीराशंसनं व्यधायि। राजा तु तयोस्तादृशं भृशं शिष्टाचारविपरीतं विगीतं व्यवहारं सनिकारं मनसैवामन्दं व्यनिन्दीत्। पुनश्च प्रकाशममितस्मितेन विकचकल्हारहारिणा मुखेन सुखयन्नागन्तू कृतमन्तू उत्थित एवोल्लासगद्गदं जगाद—

५. भूदेवौ! भवतो: पादपद्मपांसुपवित्रित:।
शिवोपेतो निकेतो मे दिष्टमिष्टं फलेग्रहि॥ १॥
भद्रोदयां दयादृष्टिमाशीर्वृष्टिं च कीदृशीम्।
कर्त्तुं दिष्ट्यागतौ दिव्यविग्रहौ युवकौ युवाम्?॥ २॥

अभिख्यां भवतो: वर्णाः पूतकर्णा भजन्ति के ? ।
कृतार्थीक्रियतां कायः कया वा सेवया मया ? ॥ ३ ॥ इति ।

अथ साग्रहां तद्गिरं गृहीत्वा मायामनुष्यो विश्वबाधाविमोचनः कञ्जलोचनः श्रीकृष्ण आह—

६. हे श्रील ! शुभशील ! राजन् ! श्वापदशरण्ये तवारण्ये विचरन् मे सूनुः केसरधारिणा मृगारिणा परिगृहीतः । असकृदभ्यर्थितोऽसौ मया सानुनयविनयं तनयमेकलं मे कलङ्कषो मोक्तुम् । परमाकृत्या घोरः प्रकृत्या च कठोरः स नाभ्यमन्यत वन्यत्वाद् मृगाग्रेसरः केसरी । अन्ततो गत्वा बहुशो विनतिततिप्रदर्शनपुरस्सरमुपायान्तरमपश्यन् सुतस्थाने सजायं स्वकायं प्रतिपादयितुमुद्यतोऽहमजायेय । तथापि नाश्रौषीदसावार्तां मे वार्ताम् । ततो विनीतिरोचनवचनरचनाम्रेडनैरनुनीतेन तेनेदं प्रतिपन्नम् यद् विराजितः सतां स्वान्तेषु, नीराजितो जिताऽहितमहीपालमुकुटमणिमयूखमालाभिः विपक्षवाहिनीवृन्दविदितवाजो महाराजो मयूरध्वजः सर्वात्मना समुत्सृज्यावसादं सप्रसादं, विधाय मनोनिश्छलनिर्मलमलं, देहदक्षिणादलं, एकत्र कलत्रेणापरत्र च पुत्रेण लगित्वा करपत्रेण द्विखण्डीकृतं दद्याच्चेत् तूर्णं त्यक्ष्यते ते तनूज इति । अहो विचित्रा हि परीक्षाऽपि पुण्यभाजाम् ।

दृष्ट्वा दूरं दीनं शोकाधीनं विप्रं क्षिप्रं कृपालुशीलेन तेन निस्सन्देहं स्वदेहं दातुमनुज्ञातं तदाख्यातम् । उक्तं हि युक्तियुक्तमुपयुक्तं च धर्मकर्ममर्माभिज्ञैः विज्ञैः—

७. **सद्वृत्ताः पुण्यपुञ्जस्यैवाशया हि महाशयाः ।**
पीडामत्राभिमन्यन्ते क्रीडामात्रं तितिक्षवः ॥ ४ ॥
जायते नायतेक्षाणां त्यागयागैककर्मणाम् ।
स्वाङ्गेषु क्षणभङ्गेषु कणीकापि क्वचिद्रतिः ॥ ५ ॥ इति ।

अत्रान्तरे सत्यालापस्य निष्पापस्य च प्रजापस्य श्रुतिपुटोद्वेजनं हृदयविदारणं दारुणं दत्तार्धकायं च व्यवसायं निशम्य सर्वतोऽपि निरन्तरं निस्सरन्नेत्रनीराः सशोका लोकाः सोच्छ्वासं हा हेत्यमन्दमाक्रन्दन्तः करतलैः कपोलोरःस्थलताडनं प्रारेभिरे । न कस्य कष्टाय सतां व्यसनम् ।

एवंविधे दुःखाकरे व्यतिकरे सत्यप्यविकृतमुखमण्डलः स इलाखण्डलः प्रभातभास्वद्भासी मृदुहासी मधुमधुरया सुधाधाराकिरा गिरा प्राह स्मेदमात्मानममन्दमानन्दयन्—

८. **जनुर्जातं च सञ्जातं धन्यं मे फलिनी तनुः ।**
त्यागः परोपकारायात्मनो यागः परो मतः ॥ ६ ॥

जीवने सुलभा खेला महेला हेलया तथा।
सुप्रापा च सुहृन्मेला वेला नोपकृतेः परम्॥ ७॥
आराभिः शितधाराभिः पीवरं मे कलेवरम्।
परोपकारकाराय तोदितं मोदितं भवेत्॥ ८॥
यर्हि द्वेधाकृतं कृत्तकचेन क्रकचेन मे।
शीर्षकं शोणितैः शोणं स क्षणः स्यात्तु स-क्षणः॥ ९॥ इति।

तदैव दैवविदधिगतशास्त्रसारः, सभास्तारः, उदाराचारः कश्चनाचचक्षे—

परार्थं ये जनाः पीडाश्राजिनश्चात्मयाजिनः।
महीयं तैर्महीयोभिर्दानिनी शूरमानिनी॥ १०॥
दयामयेन येनायं जीवलोको हि तायते।
प्रादायि दायिना तेन तनूः लोकहिताय ते॥ ११॥
सन्त्यात्मम्भरयो जीवाः क्षीवाश्चातीव पीवराः।
विधूतावीचयः प्रायो नाविभूमि दधीचयः॥ १२॥
करालं नर-कङ्कालं स्वार्थनिष्ठो वहन्नहो!।
गामुको नरकङ्कालं निन्दां मन्दोऽत्र विन्दति॥ १३॥
प्रीयते नोपकार्योऽसावुपकारेण केवलः।
परं प्रैत्युपकर्ताऽपि परं प्रह्लादसन्तरे॥ १४॥
परार्थमेव नो हन्ति हन्तात्महितमोहितः।
परं स्वमपि हातिष्ठन् गर्हितं चाप्यनर्हितम्॥ १५॥ इति।

९. तदनु प्रत्यासन्न-प्राणेशप्रलय-शोकाकुला कुलान्विता परमोदारा दारा मयूरध्वजस्य निभृतं न्यवेदयत्— 'महाराज! इयमहमस्मि तावदर्धांशिनी प्रभवतो भवतो भव्येषु कर्त्तव्येषु, तत्तुष्यत्वशनायितो मृगारिः कमल-कुद्मलकोमलेन मे कायेन, परिहरतु च विप्रकुमारमारमारात्, जायतां द्विजातिजातो दीनः स्वाधीनः। मा स्म भवत् वाष्पाली-प्लावित-कपोलपाली तस्याम्बालीति। ततः सा पुटीकृतपाणिपयोजा प्रतिवचन-शुश्रूषुः जानुभ्यामस्थात्। पतिपीडापरिहारः कुलाङ्गनानामाचारः।

परं सविग्रह इवाग्रहः सोऽग्रजो वामाङ्गत्वाद् वामायाः सव्येतरस्यैवाङ्गस्यापेक्षणीयतामुपयोगितां चाचख्यौ।

१०. परस्तात् पुत्रोऽप्यात्मानं पितृप्रतिमानं प्रवदन् विगतासङ्गं स्वमङ्गमदित्सत। परं मूर्धानं धुन्वानो व्याजविप्रवेषः यथापूर्वं साभिनिवेशः

स तदुक्तमयुक्तमिति न्यषेधीत्। आह च —

नात्र गात्रं कलत्रस्य न पुत्रस्य तवेष्यते।
स्वीकार्यमार्यवर्येदं दक्षिणं राजलक्षणम् ॥ १६ ॥
किमपायदराद् राजन्! देहदानाद् विरज्यसे।
दारकेण तथा दारा-द्वारा तन्वन् प्रतारणाम् ॥ १७ ॥
सत्यसन्धाः सनिर्बन्धा लोकद्वयभयातुराः।
प्रतिज्ञातं न लङ्घन्ते दायका वीरनायकाः ॥ १८ ॥ इति।

११. महनीयो महात्मा मयूरध्वजस्तु तस्याचारचोदनं श्रुतितोदनं तथाविधं मर्मवेधनं तर्करचनं वचनमाचम्य क्षान्तिं शान्तिं च परितोऽपि प्रसारयन् प्रश्रयपुरस्सरं प्रोवाच - 'धर्मावतार! गुणागार! सत्यमाचष्टे ब्रह्मविद्यावैभववान् भवान्। सोऽयमाचारव्यवहारसारः सकलः संसारः, तद्बन्धननिबन्धनास्तथा सम्बन्धिबान्धवाः। एतन्मर्यादावशंवदाभ्यामेव मे वनितातनयाभ्यां तथा शरीरविश्राणनाय युक्तमुद्युक्तम्। अनुपालितस्ताभ्यां स्वधर्मः, प्रकटिता च मयि स्नेहनिष्ठा-पराकाष्ठा। यत्तु मया समयातिक्रमो विधीयत इति परीवादानुवादः स्तुतात्मना प्रस्तुतः स वस्तुतो व्यलीकतां नातिवर्तते। एतदीयं नाल्पं जल्पितं कल्पित-सदाचरणानुकरणसरणिभिः सदाभरणैः—

१२. कुमतिर्यः प्रतिज्ञातमतिक्रामति कामतः।
विगीतोऽलकभीतोऽसौ प्रमीतोऽपि विगर्ह्यते ॥ १९ ॥

इदम्प्रकारमपारं धर्माचारं ससारं व्याख्याय अपाङ्गेङ्गितकृतारम्भयोः स्तम्भयोरन्तराले समुदितसुखः स्मेरमुखः स देवभूयं भविष्णुर्भूयः—

आनन्दकन्द! गोविन्द! वन्दारुवृन्दनन्दन!।
बाधाभिर्विधुरं विश्वं विदध्या विप्रबालवत् ॥ २० ॥

इत्यनुवारमुच्चैरुच्चार्य धीरकन्धरो धीरधुरन्धरो नासाग्रनिहित-निष्पन्दनयनेन्दीवरो दयामयोदारदातृसमाहारवरोऽनुष्ठाय प्राणापानौ समौ, संयतसमस्तकरणः, स्वस्तिकीकृतजङ्घाचरणः समुपविवेश।

१३. ततस्तत्र कम्प्रयोः करयोः करपत्रं समादाय विधाय चादयं हृदयं महिषी-महीपात्मजौ विकटे सङ्कटेऽपि नितान्त-प्रशान्त-मुद्रं महीमहेन्द्रं मयूरध्वजं पाटयितुं प्रारेभाते।

काञ्चनक्रकचेन विदार्यमाणमुण्डस्य, सन्ततस्रवदस्रसन्तान-सिक्त-समस्तसंहननस्य मयूरध्वजस्य तत्क्षणाद् वामेक्षणाद् अमन्दं सस्यन्दिरे वाष्पबिन्दुवृन्दानि। दत्तदृष्टिरपि दुःखदारुणे तादृशे दृश्ये दृषद्दृढहृदयो

दम्भ-द्विजातिर्दूयमानमानस इवेदमगादीत्— 'नाहं परिताप-प्रकाशनपुरस्सरं प्रतिपाद्यमानं पदार्थं प्रतिग्रहीष्यामि, प्रीति-प्रकटन-पूर्वकं प्रदीयमानस्यैव हि पदार्थस्य पुरातनैः पथप्रदर्शकैः प्रशस्य-परिग्रहत्वेन प्रोक्तत्वात्' इति।

१४. तदा तदाकर्ण्य मुदितमना मनागप्यमलिनित-मुखमुद्रः समुद्र इव गम्भीरो धीरवीरोऽसौ मयूरध्वजो माधुर्यधुर्यां वाणीमभाणीत्— 'अतिथे! अवितथं कथ्यते, तथा वधत्रेणेव करपत्रेण मे विग्रहस्य विदारणाद् विपुला वेदना वर्तत इति नियतं नेदं नेत्रनीरनिस्यन्दनिदानम्। परञ्च, युगपदावयोर्जनिरजनि युगपदेव लालनं पालनं च। वामस्य विधेर्विलासादपसव्येन वपुषा सहाहमपि नोपकारको भवामीति दृढं दोदूयते दक्षिणेतरो देहः। इदमेव वामविलोचनतो वारि-बिन्दुविसरणकारणम्'।

१५. इत्याकर्णनसमकालमेव प्रसाद-प्रसूत-पुलकपालिप्रावृत-सकल-कलेवरेण विप्रवरेणास्थायि मायि रूपान्तरमास्थायि। माभूत् ब्रह्माण्ड-खण्डनमितिभयादेव मूकं शम्बूकं, दलितदनुजचक्रं चक्रं, कलिकालकल्मष-क्लेशापनोदाऽगदां गदां, श्रीसद्म पद्मं च करुणाकरेषु पुष्करेष्विव करेषु धारयन्, लोकातीतं स्फीतं शीतिमानं सर्वपथीनं प्रसारयन्, पीतपटपरिहितो मेघमालामेचकमूर्तिः, निराकृतभक्तजनतृष्णो भगवान् श्रीकृष्णो यावदमृत-सीकर-किरा कराम्बुजेन क्षितिपतेः क्षतजोक्षितं स्रवत्सव्यनेत्रं क्षेत्रमस्प्राक्षीत् तावत्तत् पूर्वापेक्षयापि भूयिष्ठेन चारिम्णा, तरुणिम्ना, भरिम्णा च भासमानं चासमानं समपद्यत। ततः समेते समेताः कुलकुटुम्बजनैः भद्रङ्करयोः श्रीभगवच्चरणयोः पुष्कलं प्रीणिताः साष्टाङ्गपातं प्राणंसिषुः अस्तौषुश्च— कुशलशालिनश्चिररात्राय चराचररचयितारं पातारं भक्तिभाजाम्। 'वीरवर्याः! वरं वृणुते'ति विश्वात्मा विभुरब्रवीत्तान् प्रीतिप्रणतान्।

१६. स्वार्थनिरपेक्षः क्षितिपतिस्तु प्रभुपादयोः स्थेयसीं भक्तिं 'एवङ्कारं कृपालो! भूयो नतरां कोऽपि वराको विषमविधिना, विधिना परिक्षीणः परीक्षणीयः' इति च प्रह्वोत्तमाङ्गः पुटितपाणिपयोजः स्वार्थं प्रार्थयामास। ततः आतिथित्रयात् तेषां तथातिथ्यं प्रतिगृह्याश्वमेधीयं हयमादाय श्रीकृष्णार्जुनौ ततः प्रातिष्ठताम्।

एवं न हि परदुःखकातरा महामहिमशालिनः पुरातनपुण्यपरम्परा-प्रपन्न-प्रतीक्षितपृथिवीपतिपदा अपि पुत्रपत्न्यादिपरिवारप्रणयं गणयन्ति न च तन्वते तनिष्ठामप्यद्यश्वीनात्ययां तनूं प्रत्यभिरुचिमशाश्वतिकत्वाच्चाविश्वास्यविश्वप्रपञ्चस्येति।

सर्वस्व-समर्पणम् (२१)

१. आसीत् प्रायेण पर्यन्तः पौषस्य। तुषार-तिरस्करिण्या तिरोहिता आशाकाशकक्षाः। प्रकाशस्य पिहितप्रायतया प्रभाकरः प्रालेयांशुतां प्राप्तः। चैतन्य-शून्यीकृत-शरीरः शिशिरः समीरः प्रवातिस्म। स्वस्तिकीकृतबाहवो बहवः क्षेत्रकर्षका इक्षुभ्राष्ट्राभिमुखमधावन्। पदे पदे प्रालेय-प्रतिकाराय पुम्भिः प्रादीप्यन्त पावकाः। पर्यधीयन्त पौरैः प्रस्फुटितेषु पाणिपादप्रमुखेष्वपि प्रभूतानि प्रच्छादनानि। प्रतिवेश्म प्रायुज्यन्तोपताप-परिबृंहणानि पेयानि प्राशनीयानि च। कच्छपीकृतकायैः विभावसु-विभाकर-वयस्यैः वराकैः वित्तविहीनैरवाद्यन्त दन्तवीणाः। शीतभीतानीव सङ्कुचितानि म्लायदिनानि दिनानि।

२. परं जनस्थानस्य जना जन्यश्च परम-प्रमोद-परिप्लुताः पुनः पुनः परस्परं परिरम्भण-परायणाः प्राप्तोत्सवा इव पर्यधावन्। पुरस्य प्रतिष्ठिततमः सौजन्यधन्यो वेदादि-विविध-विद्या-विदुरो विप्रवरेण्यः पुण्य-मतिः लक्षपतिः श्रीपद्मापतिः प्रयागतीर्थं प्रयातुं प्रस्तुतोऽभूत्। सङ्गतानां सुरसरित्-सूर्यसुता-सरस्वतीनां कृतानेक-पापपुरुषोद्धारया बहुविस्तारया, मनोहराकारया च धारया सुतरां समाकृष्यत तदीयं हृदयम्। मन्दं मन्दं माघो मास उपावर्तमानोऽजायत। हैमेन महसा महीमण्डलं मण्डयतो मानवमात्रमोदनस्य मरीचिमालिनो मकरे सङ्क्रमोऽपि समीपे सम्प्राप्तः।

३. पण्डितप्रवरेण पद्मापतिना प्रयागं प्रति प्रस्थानाय वैदिकेन विधिना विहितः सङ्कल्पः। वेश्मनि विपुलानि वसूनि विद्यमानानि बभूवु-रिति पद्मापतिना प्रयागं प्रति प्रचलनात् प्राक् पुरे प्रथीयान् प्रयागः, दरिद्राणां द्रव्यैरादरः, प्रवयसां प्रतीक्ष्याणां च पादपूजनमक्रियत। तस्य तीर्थयात्रार्थं मतङ्गानां तुरङ्गाणां शताङ्गानां सेवकानां सेविकानां च समूहाः सज्जीक्रियमाणा आसन्। पावन्याः प्रयागयात्रायाः पुण्यपरम्परां परिजना अपि प्राप्नुयुरिति परिचिन्त्य पद्मापतिना पत्नी पुत्रः पुत्रवधूश्चापि स्वस्य सहयायिनः सम्पादिताः। प्रयागं प्रति प्रस्थानात् पूर्वमेव ब्राह्मण्य-विभूषणेन पद्मापतिना कृतोऽपरिग्रह-सङ्कल्पः। अतः 'प्रयागं प्रतिष्ठासुः पद्मापतिः परैः प्रदीयमानं कमपि पदार्थं नतमां प्रतिग्रहीष्यति' इति पुरस्य प्रतोलीषु पथिषु च पुनः पुनः पटुपटहैः प्रख्यापितम्। पूज्यपादस्य पण्डित-प्रकाण्डस्य

पद्मापतेः प्रयागयात्रायाः प्रथीयसायोजनेन जनस्थानस्य जनाः श्रद्धया परया प्रीत्या चाप्लाव्यमाना व्यधीयन्त ।

४. पद्मापतेः प्रांशु-प्राकारस्य प्रासादस्य प्रतमां पार्श्वे परिमित-परिमाणा एका पर्णशालाप्यवर्तिष्ट । तस्यां दैन्योत्तापितो नापितो 'जय'-नामधेयो न्यवसत् । स दिवसावसानावधि- नगरनिवासिनां मूर्ध-मुखमुण्डने कर्त्तरी-व्यापृतकरः सन्नपि विविध-विचित्रवार्त्ताव्याख्यानैः विपुलां वाचालतां व्यतानीत् । कर्त्तर्यपेक्षया तस्य सुखसञ्चारेण सचमत्कारेण वाग्व्यापारेण सञ्जातमनोरञ्जना जनाः प्रभूतं प्रभाविता बभूवुः । पेशलप्रकृतिर्हि नापितजातिराजन्मनः ।

प्रतीक्ष्ये पद्मापतौ प्रयाग-प्रयाणाय, प्रत्यूह-प्रणाशनं परशुपाणि नागास्यमुपास्य, विधाय वृद्धवन्दनम्, स्यन्दनमारोढुकामे सति, सपदि समुपेत्य जयस्तस्य कृपणशरणे चरणे जग्राह ।

५. पण्डितः पद्मापतिस्तस्य पृष्ठप्रदेशं पाणिना परामृशन् प्रणय-पुरस्सरं प्रोवाच— 'अरे जय! प्रायः सुप्तसमस्तजीवजाते प्रभातेऽस्मिन् किङ्कृते कृतेहागतिः ?' इति । उपनीत-विनयो निबद्ध-शयद्वयो जयो जगाद— 'महनीय-महाराज! प्रभवन्तं भवन्तं न्यायं याचितुमुपेतोऽस्मि' इति ।

'न्यायम्' इति निशम्य पद्मापतिश्चकितचेताः समजायत—अपास्तभयः स जयः पुनः म्रदिम-मधुरिम-शीतं विनीतं वचो व्याजहार—'पूज्यपाद! प्रतिवेशिनं परित्यज्य प्रयागं प्रयात्येकलो भवान् । स्वयं मुक्तिमुपेत्य पादयोः पतितं विपण्णं कृपणं किमिति संसार-सागर एवासहायं निरुपायं रहयितुं कामयते ? किमिदमननुरूपमुदारहृदयस्य पतित-पावनस्य द्विजतल्लजस्य भवतः ? कतमद् दुरितं मयाचरितम् ?' इति उक्तञ्चापि—

६. **संसर्गमासाद्य महत्तराणां, भवन्ति तुच्छा अपि पुण्यभाजः ।**
टङ्कोऽपि माहात्म्यमुपैति लग्नो, हिरण्यहीरादि-विभूषणेषु ॥१॥ इति ।

अथ सस्नेहसेकं करुणातिरेकं प्रथयन् परिहसंश्च पद्मापतिः प्रणि-जगाद—'रे चञ्चल! चल त्वमपि । सुहृत्समस्य सततस्तव सहचारेण मोदिष्यते मे मानसम् । मया तु वैदिकेन विधिविधानेन विहिता व्यवस्था-ऽस्यास्तीर्थयात्रायाः, अकारि चापरिग्रह-सङ्कल्पः । परन्तु त्वन्तु सहसा सह-सार्थिको भवितुं प्रस्तुतोऽसि' इति ।

ततः पद्मापतेः पादौ पाणिभ्यां प्रगृह्य प्रेम्णा प्रगाढं पीडयन्, तथा विनम्रां वाचं व्यापारयन् व्याजहार विदग्ध-बुद्धिः जयः— 'स्वामिन्! श्रीमता विहितं विशालं वैदिकं विधिविधानं पुण्यनिधानं पर्याप्तं निखिलस्य

नगरस्य तीर्थयात्रार्थम् । यत्तु सङ्कल्प विषयेऽगादि श्रीपादैः, तद्विषये विनिवेदनेयं मदीया यन्मयापि सम्प्रत्येव व्यवसाय-विमोकस्य व्रतं विधीयते । तीर्थयात्रायां व्यवसायविषये विचारमपि न विधास्यामि' इति ।

७. दिवाकीर्त्तेस्तां प्रवलां प्रतिज्ञां परिश्रुत्य प्रहसन् परमार्थपथे प्रेरयंश्च प्राह पद्मापतिः— 'साधु, साधु । सुन्दरम्, अतितमां सुन्दरम् शुचिव्रत ! अप्रतिरूपमभूतपूर्वं चेदं ते तीव्रतमं व्रतम्' इति । एवं पद्मापतिना जयस्यापि संवर्धित-सुखमात्रा सहयात्रा स्वीकृता । तदुक्तम्—

स्याद् येन हानिर्न जनस्य काचित्, परं प्रसादं च परः प्रयाति ।
कार्यं तदार्यं कुशलेन कार्यं, मुक्त्वा विकल्पं च विमर्शनं च ॥ २ ॥

अपि च— **पुण्य-प्रवृत्तये प्रायः, प्रेरयन्तः परानपि ।**
पुण्यशीलाः प्रपद्यन्ते, परेताः परमं पदम् ॥ ३ ॥ इति ।

प्रायेणास्तं गतवति भगवति गभस्तिहस्ते, पद्मापतिः स्वजन-सन्ततिसहितः त्रिवेणीतीरमुपेतः । तदानीमपि तरणिकिरणारुणिमा त्रिपथगायाः तरणितनयायाश्च तोये विलीनो व्यलोक्यत । पद्मापति-रतर्कितेन विलम्बेन तत्रायातः । भगवतो वेणीमाधवस्य पावनीं स्थलीमुपेत्य स्नान-ध्यान-दान-विधानं विना तेन कथं पानीयमपि पानीयमासीत् ।

८. रुद्धा रयिवन्तो रथाः । प्रेषिताः प्रजवनाः परिचारकाः । प्राप्तः प्रधानः प्रयाग-पुरोहितः । एकीकृताः कामिताः कर्मकाण्डक्रिया-कुशलाः । परं नापितो नाऽपि तैः पर्येषणपरायणैरपि परिजनैः । यतो हि निम्लोचति लोकलोचने विरोचने निखिला नापिता निर्वर्तित-नियोगा निशाया निकटत्वाद् निदिद्रासवो निजनिकेतनेभ्यो निवृत्ताः । पद्मापतेः पुरतः प्राप्ताऽसमाधेया समस्या । तीर्थराजमुपेत्य वपनं विना विधीयमानः कृत्स्नः कर्मकाण्डक्रियाकलापः किमर्थः स्यादिति विवशः पद्मापतिः जयाभिमुखं विवर्तितवदनो व्याजहार—'सखे ! सङ्कटेऽस्मिन् सम्पादयिष्यसि साहाय्यं मे ?' इति ।

९. पद्मापतिना समीहिता सहायता नितरां नतरां तिरोहिता-सीदिति व्यञ्जितविनयो जयो नापितः पुटितपाणिः प्रोवाद— 'महाराज ! नियतापायः कायः सोऽयं समर्पितः सेवायै भूदेवाभरणानां श्रीचरणानाम् । यदुचितं रुचितं धर्मविहितं हितम्, यच्चाऽविगानं विधानम्, तत्सर्वं सम्पादयितुं सदा प्रस्तुतोऽयं वशंवदो दासः' इति ।

किञ्चित् कुञ्चितकण्ठः श्रीपद्मापतिश्चकथत्— 'विधेयमेव वक्ष्यामि वत्स ! वपनं हि ते व्यवसाय इति क्षौरक्रियां कारयितुं कामये त्वया' इति ।

१०. पण्डित-प्रेष्ठस्य पद्मापतेः पदे पाणिभ्यां परामृशन् प्रार्थयामास जयः—'यत् सत्यं नापित्यं मे व्यवसायः' परमस्यां तीर्थयात्रायां धर्मविरुद्धं सम्पत्स्यते तत्' इति ।

पद्मापतिः प्रलोभयन् प्राह—'पश्यायुष्मन्! मा मे व्यवसाय-बुद्ध्या वपनं विधेहि त्वम्, धर्मधियेदमाचर' इति । अनुपममाभरणं धर्माचरणम् ।

तदाकर्ण्य मस्तक-न्यस्त-हस्तः जयः सविस्मयः सम्पप्रच्छ—'तत् किमहं क्षौरक्रियया भवन्तमुपकुर्याम्? किं भवान् मे क्षौरकर्मणः पारिश्रमिकस्य प्रदानाय दुराग्रहं तु न करिष्यति?' इति । प्रहसन् पद्मापतिः प्रावादीत्— 'कथमेतत् सम्भवति? तीर्थे भरणं विना क्षौरं कारयन् पुण्यप्रलोपको वृजिनभाजनं भवेयम् । अहकं ते काञ्चनीं कटोरीं कर्त्तनीं च, तथा पुत्रहेतोः सौवर्णं क्षुरं नखनिकृन्तनं च प्रदास्यामि' इति ।

११. किमपि कार्कश्यं कलयन् जयो जगाद— 'यथा पारिश्रमिक-प्रदानमन्तरा भवतः पुण्यं प्रणङ्क्ष्यति पापं च परिवर्धिष्यते, तथैव परिगृहीते पारिश्रामिके मेऽपि पुञ्जितं पुण्यं प्रलोपं प्राप्स्यति, पातकं च प्रथिमानम् । देव! ध्रुवमधमोऽहम्, अधनोऽहम्, परन्तु सत्यसन्धः स्थास्नुसङ्कल्पश्चास्मि' इति । पद्मापतिः प्रबोधयन् प्रावोचत्— 'प्रिय! पुनः परिमृश्यतां तावद्' इति ।

जय आह— 'मर्षणीयो मे मन्तुः महाराज! दीनस्य प्रतिज्ञा, तस्य श्रद्धा भक्तिरेव च तदीयं वास्तवं वैभवम् । भवतः क्षौरं विधाय प्रतिज्ञाभङ्गभीरुः वेणीमाधवस्य पुरतः किं प्रतिवक्ष्यामि' इति । पद्मापतिः गाम्भीर्यगर्भां गिरमगादीत्— 'अवधाय श्रूयतां जय!, मया वितीर्णस्य सुवर्णस्य दानेन त्वं प्रयागयात्रायाः प्रभूततरं पुण्यं प्राप्तुं प्रभविष्यसि' इति। सकलं सुखसाध्यं सुवर्णेन संसारे ।

१२. सोऽपि स्वान्तं संस्तभ्य सौम्यस्वरेण समुदाजहार— 'सत्य-सङ्कल्प! सुरस्वरूप! समुत्सृष्ट-सङ्कल्पेन समुपार्जितस्य सुवर्णस्य सम्प्रदानेन सर्वथा न मे सुकृतं समेधिष्यते, सम्प्रयास्यति च मोघतां माघमासिकः पुण्यमयः समयो मयोपलब्धः' इति । यदुच्यते—

वाक्चातुरीणां विविधैर्विधानैः, दानैश्च सांसारिक-वैभवानाम् ।
वित्रासनैः कर्कशशासनैश्च, धीराः पटूनां न वशं प्रयान्ति ॥ ४ ॥

किञ्च—

चेतांसि नूनं दृढनिश्चयानां, स्थास्नूनि गौरीगिरि सन्निभानि ।
भीतिप्रवातैश्च विलोभघातैः, मनागपि स्युर्न चलाचलानि ॥ ५ ॥ इति।

१३. तदुपश्रुत्य प्रतिवचनप्रदानेऽनलङ्कर्मीणः स धर्मधुरीणः पद्मापतिः वाचंयमतामालम्बे। तेन प्रेष्यं प्रेष्यानायितो नगरान्नापितः। मुण्डन-मज्जन-पूजनानन्तरं दानस्यावसरः सम्प्राप्तः। धनधान्यनिधानस्य जनस्थानस्य सुमहता सम्पत्स्वामिना गृहमेधिना पद्मापतिना विप्रेभ्यो विविधस्य वसु-वसन-वासनादि-वस्तुविसरस्य विसर्जनं व्यधायि। सुरसरित्-सूर्यसुता-सरस्वती-सङ्गमस्थली पुञ्जितपुण्यस्य पद्मापतेः पदार्थ-प्रदान-प्रादुष्कृतया कीर्त्याऽभितः सुरभिता समजनि। तस्य पाणिगृहीत्या पुत्रेण पुत्रपत्न्यापि च विवशेभ्यो वित्तविधुरेभ्यो वराकेभ्यो विधवाभ्यश्च बहुविधानि वैभवानि वितीर्य स्वान्त-सन्तोषेण समं सुकृत-समवायः समवापि। नश्वरेण हि धनेन शाश्वतं धनमुपार्जयति दाता।

तत्पश्चात् परीप्सित-पुण्यचयस्य जयस्य वारः समायातः। तेनापि नापितेन कारितं कर्मण्यैः प्रार्थना-पाठपूर्वकं पावनं परमेश्वर-पूजनम्। तीर्थपुरोहितस्तस्मात् पुष्कलायाः सम्पत्तेः परीप्सया प्रत्यैक्षत।

१४. जयः सपदि समुत्थाय स्यन्दनं समुपजगाम, तस्माच्च पोटलिकामेकामादाय तीर्थपुरोहितमुपेयिवान्, 'ब्रह्मन्! निष्किञ्चनस्य मम सविधे केवलमिदं विद्यते। इदमेव मे सर्वस्वम्। स्वीकरणीयमिदं करुणाभरणैः श्रद्धाशरणैः श्रीचरणैः' इत्यभिधाय प्रणतिपूर्वकं पोट्टली पुरोहितस्य पुरतः प्रणिहिता।

लोलुभाभ्यां लोचनाभ्यां पुरस्तात् पतितां पोटलिकां प्रेक्षमाणः पुरोहितः पप्रच्छ— 'किमत्र वस्तु न्यस्तमस्ति ?' इति। स प्रत्यवोचत्— 'भगवन्! सर्वस्वं मम' इति। प्रमुक्ता प्रीतेन पुरोहितेन पोट्टली। तदन्तरे मुण्डनपेटी, तस्यां च क्षुराः, कर्त्तर्यः, मुकुरः, कङ्कती, कट्टोरः, नखनिकृन्तनं, क्षुरतेजनचर्मादीन्युपकरणानि च निहितान्यासन्। तदुपलक्ष्य पुरोधसा सपदि पोटलिकां परस्तात् सैकते प्रास्य प्रावादि— 'पादज! पातकिन्! किं नापितोऽहम् यत् क्षौर-करणोपकरणानां दानमुरीकुर्याम्' ? इति।

१५. तन्निर्वर्ण्यासहायो निरुपायो नितरां प्राप्त-पुण्योपप्लवभयः स जयः क्षणं यावत् कर्त्तव्यं निर्णेतुं न प्राभवत्। तदानीं दूनः स दीनो दानी क्षुरादीनि वालुका-विकीर्णानि परितः पुञ्जयित्वा पटप्रान्तेन प्रोञ्छ्य, पुनश्च पोटलिकायां प्रणिधाय पुरोहिताय प्राभृतीकुर्वाणः सास्रुपातं प्रोवाच—'भूदेव! अनर्थोऽसमर्थोऽहं नापरं किमपि प्रदातुं प्रभवामि। तस्मादुरीक्रियतां तुच्छमिदमुपायनम्' इति। परं प्रसादं परित्यज्य प्रताड-

नाय प्रोद्यतप्रतलेन, कोपाटोपविततविलोचनेन, भुग्न-भ्रकुटी-भीमभालेन, विपुलवेपमानाधरपुटेन पुरोहितेन प्रोक्तम्— 'पार्श्वे एव परिरक्ष पोटलिकामिमाम्। वपनवस्तूनि विप्राय वितितीर्षुणा त्वयका ब्राह्मण्यमवमानितम्। दास्योपजीविने ते दास्यत्यस्य हास्यस्य फलं माधवराजः' इति। अर्थमात्रप्रियास्तीर्थपुरोहिताः।

१६. पुटीकृतशयो जयो जगाद—'पावनीयं भावना भूदेव! निर्धनाधीना तु भावनैव भवति, नैवान्यत् किञ्चिदपि। श्रद्धा श्रद्धा निबद्धाऽस्यां पोटलिकायां भगवन्!' इति।

'नाहं ते हन्तेमां भावनां प्रतीच्छामि। हुम्! पणं विनैव कृपणः पारं परीप्सति संसार-पारापारस्य' इत्याद्यमनल्पं जल्पं कृत्वा प्रसह्य पृथ्वीं पादेन प्रताड्य पुरोहितः परायासीत्। तत्पश्चात् तपस्वी जयः त्रिवेणीतीरे समवेतान् समस्तान् पुरोहितान् पर्यायेण प्रश्रय-पुरस्सरमुपससार, पोटलिकाप्रतिग्रहणाय च पौनःपुनिकया प्रार्थनां व्यधात्, परं केनापि तस्य नापितस्य विनतिः नोररीकृता। मांसमात्रापेक्षिणो हि गृध्राः।

सन्ततं सन्तापितोऽसौ प्रत्यावृत्य पद्मापतिपार्श्वे प्रापत्। ततश्च विषादविवर्णवदनः शोचनाभ्यामश्रुमोचनाभ्यां लोचनाभ्यां मन्दाकिन्याः कलिन्दनन्दिन्याश्च शुक्लां श्यामलां चापारां जलधारां कृतत्राटक इव निरन्तरं निरैक्षिष्ट। तं व्यथाविह्वलं विलोक्योपालभमानः पद्मापतिः परिबभाषे—'जय! दृष्टा सृष्टिः? मया तु प्रागेवानुवारमवाचि। यदि त्वया मद्वचनमनुपालयता वपनं व्यधास्यत, तव क्षुर-कर्त्तन्यादिकमुपकरणं हैममभविष्यत्, तदा विकल्पित-विरहितैः पुरोहितैः तत्सर्वं स्वीकृतं समपत्स्यत' इति। हन्त! धनधूमेनान्धिता धियो धीरधुन्धराणामपि।

जयोऽकथयत्—'किन्तु कुत एतदेवं देव? दानस्य गरिमा कालायसेन कलधौतेन चास्ति यद्वा सत्त्वसम्बद्धया श्रद्धया? किं केवलं सञ्चितधन-सम्भाराः साधिकाराः पुण्यपूगीकरणे संसारसिन्धुसन्तरणे च?' इति। उक्तं च—

श्रद्धां पुरस्कृत्य समर्पितानि, फलन्ति दानानि न चान्यथात्वे।
श्रद्धैव दानस्य यथार्थ आत्मा, निगद्यते धर्मविवेकशीलैः॥ ६॥

अपि च— **हीर-हार-हिरण्यादेस्तुलाकोट्यपि निस्तुला।**
श्रद्धां विना वितीर्णान्न, कृत्स्ना मृत्स्ना प्रजायते॥ ७॥ इति।

१८. पद्मापतिः स्पष्टमाचष्ट— 'एतत्तु तान् तीर्थपुरोहितान् पृच्छ प्रियंवद!' इति।

तदुपश्रुत्य पोटलिकां तरङ्गिण्यास्तीरे त्यजता सगद्गदं क्रन्दता च—'किं तान् पृच्छेयम् ? के ते कुक्षिम्भरयो गृध्रा मम प्रश्नस्य प्रतिवचन-प्रदाने, प्रक्ष्याम्यहं तीर्थराजम्, प्रक्ष्यामि माधवराजम्। दानमिति दत्तं द्रव्यमशक्यं प्रत्यावर्त्तयितुम्। यदि नितरां निष्कल्मषा निश्चला च मे निष्ठा, सत्यः सत्त्वसम्पन्नश्च सङ्कल्पः, शाठ्य-शून्या शुद्धा च श्रद्धा, तदेदं सात्त्विकं सम्प्रदानं सृष्टि-स्थिति-संहार-सम्पादकः संसारस्य स्वामी साक्षात् स्वयं स्वीकरिष्यति।' इत्युन्मादिनेव, बहुविषादिनेव, उपालम्भदादिनेव जयेन न जाने किं किमवादि। अत एवाहुः—

१९. **आशाहीनो यदा दीनो, विश्वतः सम्प्रजायते।**
चेतसा शरणं याति, तदासौ परमं प्रभुम्॥ ८॥

किञ्च— **यस्य नापदि संसारेऽवलम्बः कोऽपि जायते।**
सततस्तस्येश्वरो बन्धुरविलम्बं सुखङ्करः॥ ९॥ इति।

पद्मापतिः प्रत्यवोचत्—'परमेश्वरोऽपि न परिग्रहीष्यति चेत्?' इति।

'प्राण-परिजिहासया तदाहं दाहं देहस्य विधातास्मि, इति द्वितीया मे प्रतिज्ञा' इत्युक्त्वा जयो विक्षिप्तबुद्धिरिव त्रिपथगातटमभ्यधावत्। आदिनत्रयादसौ विस्मृतात्मा विकीर्णवालः, प्रोच्चैः परिदेवमानः, वाष्प-बिन्दून् विमुञ्चन्, पाणिपाद-प्रभृतिषु पङ्कं प्रलिम्पन्, पौनःपुन्येन प्रलपन्, कदाचित् स्नानं, कदाचिद् ध्यानं, कदाचिदुपस्थानं, कदाचिद् गानं, कदाचित् पानीयपानं, कदाचिदवस्थानं, कदाचित् प्रस्थानं प्रकुर्वन् सरित्-सङ्गम-स्थलेषु पर्यवस्थात्। अहो! मिथ्यामायाजालः किलैष कलिकालः। सम्प्रति विलून-पाणिपादो दीनश्चतुर्वर्गः, सर्वथा स्वार्थसम्भृतः स्रष्टुः समस्तः सर्गः। विभवस्यैवाबालवृद्धं विश्वतो वार्ताः, न पृच्छयन्ते श्रद्धाभक्तिभृतोऽपि दैन्यार्त्ताः। कामं करोति केलिं कुले कुले कुण्डलितकार्मुकः कामः। अस्तुङ्काराश्चाटुकाराः पैशुन्य-पेशलाश्चैदंयुगीनाः कलाकुशलाः धुरीणा धार्मिका वास्तव-व्यवहारमार्मिकाः विशिष्टाः शिष्टाश्च। त एवोच्चासना-सीनाः कुलीनाश्च गण्यन्ते गौरवभाजो विष्वग् विततव्याजे समाजे। किमिद-मेव जीवनस्य ऐदम्पर्यम्? किमेषैव वैपश्चिती पावनी परमार्थ-पद्धतिः?

२०. चतुर्थेऽहनि कोऽपि विशीर्णवासाः वयोवृद्धो विप्रस्तमुप-सृत्याह—'जय माधवराज, व्याकुल इव विभासि दातः!' इति।

पीयूषपूरप्लावितामिव मधुमयीमिव तस्य वाचमाचम्य करुणं क्रन्दन् जयो जगाद—'भगवन्! मया सर्वस्वं प्रादायि, परं परिभूतं पुरोहितैस्तत्। वन्ध्यतामुपेता मे तीर्थयात्रा' इति।

तच्छ्रुत्वा स्मयमानेनाननेन सुमानि विश्वतो विकिरन्निव विप्रो व्याजहार—'क्व तावकीनं सर्वस्वम् ? देहि मे तद्दानम्। अहं क्षोदिष्ठानां वा गरिष्ठानां वाऽसाराणां वा ससाराणां वा सर्वप्रकाराणां पदार्थानां प्रदानं प्रतिगृह्णामि' इति।

जयोऽवादीत्—'किं सत्यमेव देव!' इति।

'अथ किम्, त्वं स्वयं पदार्थं प्रदाय परीक्षस्व प्रेक्षस्व च' इति वदतो विप्रस्य बलिवलयितं वदनं सूर्यसमानं भासमानं संवृत्तम्।

२१. जयो वातूल इव वेगवान् तां दिशमभिदुद्राव यस्यां तेन पोटलिका प्राक्षिप्यत। परं पोट्टलकं तत्र नाभूत्। अङ्कुरिताशातिशयेन, पुनः प्रादुर्भूतभयेन जयेन कूलङ्कषा-कच्छकोणकुक्षयः सर्वतः समीक्षिताः, परं पोट्टलं न प्राप्यत। स प्रत्यागत्य साष्टाङ्गपातं विप्रस्य पादयोः पतित्वा नैराश्यावेशविवशो व्यलपत्— 'देव! दुर्दैवं मामनुधावति। यदा दान-प्रतिग्रहीता प्राप्तस्तदा पोटलिकैव प्रलुप्ता'। द्विजातिस्तमुत्थाप्याचख्यौ मा स्म भूश्चिन्ताचान्तः। एहि पश्यावः। कुत्रापात्यत पोट्टली ?' इति। उभाभ्यां पृथक् पृथक् प्रक्रान्तं पोट्टलिका-पर्येषणम्। तावदेव भूदेवो जयमुपाजगाम। स एकां पोटलिकां प्रदर्शयन् प्रोवाच—'प्रेक्षस्व प्रिय! कच्चिदेषा तु नास्ति ?' इति।

२२. 'आम्, आम्, इयमेव देव! सा। कुतोऽधिगता भवता?' इति वदन् जयः विप्रात् पोटलिकां प्रगृह्य पुनः पुनः परिचुम्बन् प्रगाढं दोरन्तरेणापिपीडत्।

'अरे! इयं तु दिवसत्रयाद् मत्सविधे विद्यते' इति वदन् ब्रह्मा सरहस्यं मन्दहास्यं व्यतानीत्। 'दिनत्रिकात् ?' इति सकौतुकमप्राक्षीज्जयः। विप्रो बभाण—'पुण्यप्राण! इयं तु मे यजमानेन जय-नामकेन केनचिन्नापितेन प्रादायि' इति। तदाकर्ण्य विस्मय-विस्फारित-विलोचनद्वयो जयोऽप्राक्षीत्—'महाराज! को भवान् ?' इति। विप्रः प्रावोचत्—'स एवास्मि यं त्वमनुवारमाकारयसि' इति।

एतस्मिन्नेवान्तरे सिन्धु-सम्भेदस्थल-सिकतासमूहे किमप्यद्भुतं प्रादुर्भूतम्। वृद्धो विप्रो विहायसि विलीनः। तत्स्थाने च देदीप्यमान-दिव्यदेहः, सुन्दर-सौम्यस्वरूपः, वरद-शयकुशेशयो भगवान् वेणीमाधवः साक्षात् समभूत्। अत एवोक्तम्—

२३. **स्यादुपेतो यदा नाशो, हताशोऽथ भवेज्जनः।**
आर्तां तस्य तदा नूनं, वार्तां संशृणुते प्रभुः॥ १०॥

सर्वथा साह्यहीनस्य, दीनस्य वाष्पबिन्दुभिः ।
शिलामूर्त्तेरपीशस्य, हृदयं सदयं भवेत् ॥ ११ ॥
दिव्यलीलः कृपाशीलः, स्मृतः सत्येन चेतसा ।
ईश्वरस्त्वरयोपैति, पादयोरिव पाशितः ॥ १२ ॥
प्रायः प्रार्थयते नैव, पुरुषः परमेश्वरम् ।
प्रार्थितस्त्विह शैलोऽपि, प्रतिवाचं प्रयच्छति ॥ १३ ॥

अथ विस्मय-विमुग्धबुद्धिर्जयः 'भगवन्! भवान्! इति भणन् परया प्रीत्या प्लावितः परमेश्वर-पादयोः पपात ।

मनुष्यवाचा भगवताऽभाणि—'आं वत्स! मया ते पोटलिका-प्राभृतं तु प्रागेव प्रतिपन्नम्, परं विषाद-वैक्लव्यविवशस्त्वमासीरिति साक्षात् त्वत्तस्तत् प्रतिग्रहीतुं प्राप्तोऽस्मि' इति ।

२४. 'तीर्थराज! धन्यं मे जनुः, धन्या मे तनुः, धन्यः प्रयाग-प्रवासः, धन्यो यात्राप्रयासः, धन्य एष सरित्सम्भेदः, धन्यः पोटलिका-परित्याग-खेदः, धन्यो वपनवृत्तिविच्छेदः' इत्याम्रेडयन् तथैव तस्थौ ।

भगवानुवाच—'वत्स! न त्वं धन्यः, धन्यम्मन्योऽहं संवृत्तः । त्वयार्पितमिदं महादानं प्रधानमद्यावधि मह्यमुपायनीकृतेषु दानेषु । अत एव साक्षात् साकारो भूत्वा त्वद्धस्तादिदं सम्प्रदानं स्वीकर्तुं समुपेतोऽस्मि । प्रियतरमिदं मे पण्डितेन पद्मापतिना प्रदत्तेभ्यः प्रकृष्टेभ्योऽष्टापदस्यापि प्रसाधनेभ्यः' इति ।

तत्र वन्दारु-वत्सलेन, विभव-विहीनबन्धुना, दयासिन्धुना माधवेन निराकारेणापि साकारेण सता स्वयं सिद्धार्थतां नीतो विनीतो जयः । तस्य दानं ससम्मानं स्वीकुर्वता तेन तस्य निष्ठाया निदर्शनं संसारे सनातनाय समयाय स्थास्नुतां नीतम् ।

२५. अनयत्त्वर्था परमार्थपथात् परिभ्रष्टाः प्राकृताः पुमांसः 'परार्घ्यैरेव पदार्थैः परमेश्वरः प्रसीदती'ति प्रतिपद्यन्ते । परमार्थतः प्रीति-परवशः परमात्मा । प्रह्वेण पुंसा प्रणय-पुरस्सरं प्रदत्तैः पलाश-पुष्प-पानीय-प्रभृतिभिरपि पदार्थैः प्रीयते परमः प्रभुरसौ । अशिष्टा सृष्टिरिष्टा तस्य । तद्दृष्ट्या न किमपि वैशिष्ट्यमशेषेषु वस्तुविशेषेषु । पदार्थेषु क्षोदीयस्त्वं महीयस्त्वं च कल्पितं जल्पितं च कृपणैरदीर्घदर्शिभिः । उपयोग-वशात्, अपेक्षाभेदात्, भावनाभेदाच्च कस्यचनापि पदार्थस्य मूल्यं हीयते चीयते च । धर्मकर्मणि तु विशेषतो निष्ठैव पदार्थेषु लघिमानं गरिमाणं चोपजनयति । निर्भरं निष्ठया दीयमानः कणोऽपि मणो जायते, अन्यथा तु

रजतमपि रजस्त्वे परिणमति। यदि महेश्वरो महामूल्यैः मणिमुक्ताहारैः महारजत-मुद्रामुखोपहारैरेव च मोदेत, तदा पद्मपतयो वा पद्मापतयोऽपि वा रशनाभिः कीलेयुः परमात्मानं मन्दिरालिन्देषु। तत्र चासौ क्रीतदास इव नित्यं नृत्यं कुर्यादिति निष्ठापक्षपातिना भाव्यं परमेश्वर-पूजकेनामुष्मिकं कौशलं कामयानेनेति।

औदार्यं महतां धनम् (२२)

१. विष्वग् वीथी-वर्त्मसु विहित-बहुविधाऽवरोधविधानैः, सुतरां सावधानैः, प्रचण्ड-राजदण्डातङ्कभ्रान्तैः, शङ्काक्रान्तैः, जङ्घालजवैः सैन्य-पुङ्गवैः गवेष्यमाण-सकलागारा, पृच्छ्यमान-चकितनागरा, गरीयस्यागरा-नगरी कोलाहल-कुतूहलाकुलासीत्।

प्रबल-प्रहरि-परिपाल्यमान-दृढद्वारां, दुर्लङ्घ्योच्चप्राकारां दुर्गकारां परितो द्रवन्तः, प्रतिपक्षि-षड्यन्त्राऽवेदिनः, प्रचुर-प्रधावन-प्रयास-प्रस्वेदिनः, प्रमादि-प्रहरि-परिचारकादि-कर्त्तव्योपेक्षाऽवसादिनः राजसादिनः, कुश-काश-काण्ड-कान्तारान्, कर्पासादि-केदारान्, विदूराऽद्रिदरीविदारान्, एकान्तापसारान्, लताकुञ्जान् पादपपुञ्जान्, घनपत्रजटान् वटान् बहु-विकटान् तटिनीतटान्, शीर्णकूपान् जीर्णस्तूपान्, घट्टान् घरट्टांश्च निपुणं निरीक्षमाणा लुप्तं गुप्तं च कञ्चिद्वस्तुविशेषमन्वेषयन्ति स्म।

२. पुरा जग्धानेकहिन्दुजनजीवः, स्वधर्मोन्मादक्षीवः, शकलिता-नन्तार्यदेवः, सम्राड् औरङ्गजेबः भूयसो भारतभूभागान् शास्ति स्म। तदानीं वैदिकधर्ममर्यादा-रक्षण-दक्षिणे दक्षिणे गुरुर्गजितैः तर्जितौरङ्गजेबा-लमगीरः प्रधनधीरः श्रीशिववीरः पुत्रप्रेमनिर्विशेषं प्रजा अपालयत्।

एकदा हिन्दूनां तत् प्राज्यं समृद्धिमत् साम्राज्यमसहमानेन बहुल-बलमानेन, कृतसम्मिलनव्याजेन मुगलमहाराजेन देहल्यामाहूय श्रीशिववीरः प्रबल-प्रहरणपाणि-परिचरप्रसारे कारागरे न्यरोधि। अखर्व-चातुर्यगर्वेण शिववरेण चापि 'शठे शाठ्यं समाचरेत्' इत्यविनयनयानुयायिना मायिना च सता तस्यागरानगरीकारागारात् प्रच्छन्नं पलाय्य प्रकृष्टं प्रतिवचनं प्रादायि। यदुक्तमभियुक्तैः—

३. दुष्टे दुराचरणमित्युदिता सुनीतिः,
कौटिल्य-कौशलजुषां प्रथिता च रीतिः।
याऽऽविष्कृतार्यपुरुषेण खले विनीतिः,
सा मंस्यते कुचरितेन तदास्य भीतिः ॥१॥

शक्त्या च शौर्येण च मण्डितानि, दीने दया-व्यञ्जन-पण्डितानि ।
द्विष्टे च दुश्चेष्टित-लोभवन्ति, चेतांसि चित्राणि सतां भवन्ति ॥ २ ॥

कार्कश्यमेव तनुतान्नयवित् कदर्य्ये,
सौम्यत्वमात्मकुशलाय तथायंवर्य्ये ।
स्युः कोमला यदि हि भूमिभृतो विशालाः,
अत्स्यन्ति तान् दिवस एव शठाः शृगालाः ॥ ३ ॥ इति ।

४. वैरि-विलोचनयोः प्रतारण-पांसुपूरं प्रक्षिप्य वन्धनालयाद् व्यपसर्पता शिववीरेण साकं तस्य तनुजः सम्भाजी, येसाजी-तानाजीत्यभिधेयौ बुद्धि-बलाविजेयौ सदा स्वदेशसेवासक्तौ स्वामिभक्तौ निर्मायौ सखायौ चाप्यास्ताम् । प्रायेण पथिक-प्रसार-प्रसिद्धां प्रधानपदवीं परित्यज्य, पलाशि-प्रतानिनी-प्रभृतिभिः पिहितेन पल्लीपथेन प्रचलत्सु तेषु कानने केनापि पञ्चाननेन महासहसा सहसाक्रमणमकारि । हेलयैव हतो हरिः । परं खर-नखरेण म्रियमाणेन मृगेन्द्रेण विसृमरे तिमिरे दृष्टिदोषात् शिववीरस्य मुद्गरस्थूलं बाहुमूलं बाहुल्येन व्रणितं व्यधायि । तत् सम्प्रेक्ष्य क्षेपिष्ठ-करैः सहचरैः रुधिररोधाय व्रणविरोपणाय च पदवी-पार्श्व-प्रदेश-प्राप्तैः, पादप-पत्र-पुष्प-पानीय-प्रभृतिभिः प्रलेप-पट्टिकां पिनद्धामापाद्य पुनः पुरस्तान् निरापदं पदं प्रति प्रास्थायि ।

५. प्राप्ते मुर्शिदाबादनामधेये नगरे वीरः शिववरः सद्यः सज्वरः सञ्जातः । अनावृते शीतवातभृते विपद्बाधाऽऽधाने दुश्शकोपचारविधाने स्थाने शिववीरस्यावस्थानं नोचितमिति विचार्य प्रागेव कृतभिल्लभङ्गिभिः सङ्गिभिः कतिपय-दिवसावधि प्रस्तुत-पत्तन एव शरणाप्तये प्रयत्नः प्रारम्भि । परमेतेभ्यो विशेष-वेषधरेभ्यः परनरेभ्यः कोऽपि कृपालुः विगत-विपद्-विभीषिका-प्रायं श्रायं प्रदातुं न सज्जितो जातः । अन्ततो विनायक-देव-नामकेनैकेन सत्त्वजुषा महाविदुषा निर्मायेण दयामयेन द्विजदेवेन तेभ्यः स्वसंवासे समाश्रयः प्रादायि । यतो हि प्रवदन्ति पूर्वपुरुषाः—

६. आतिथ्य-धर्मणि कदाचिदपि प्रमादं,
तन्वन्ति दैन्यदलिता अपि नो महान्तः ।
ते त्वैहिकं सुखमनित्यमुपेक्षमाणाः
पारत्रिकाभ्युदयमाप्तुमहो ! यतन्ते ॥ ४ ॥

अपि च— अभ्यागतस्य सेवाभिर्जायन्ते ये न खेदिनः ।
सन्तो ध्रौव्येण तेऽमुत्र सूर्यमण्डलभेदिनः ॥ ५ ॥ इति ।

द्विजोऽसौ केनचिद् दुर्वारणेन कारणेन विरतचेतास्तत्र मात्रा सत्रा निवसन् भिक्षितान्नेन जीवनं निरवहत्। विनायकदेव-वेश्मनि वसन् वीरः शिवाजी स्वैरं स्वैरं प्रतिवासरं स्वास्थ्यमासादयन्नासीत्। परं पूर्णरूपेण नीरोगताधिगतये द्राघीयसः कालस्यापेक्षाभूत्। एकदा सन्नपि स्वस्थः क्षामावस्थः श्रीशिववीरः सहचरावाचचक्षे— 'युवां युवानं युवराजमादाय द्रुतं दक्षिणदेशं द्रवताम्। अहं तदवधि समधिगत-स्वास्थ्यः सपदि समुपेतास्मि। मम परोक्षे दास्याद् विहित-विमोक्षे महाराष्ट्रे मत्प्रतिष्ठापितस्य वैरि-व्याज-विग्रहाविभाज्यस्य राज्यस्य प्रतिक्षणं रक्षणं विधेयम्।

७. निरुपायैः सहायैः सनिर्बन्धं शिववीरोदाहृतं स्वीकृतम्। ततस्तत्कर्त्तुमकामा अपि कृतप्रणामाः सम्भाजी-सहितास्ते त्रयो नगरान्निरगमन्। किञ्चिद्दूरमुपेत्य दूरदर्शी शूरशिरोमणिः तानाजी-महाभागो येसाजी-महोदयं धीरमुदीरयामास— 'अवहितं विहितहितो दिवा पिहितो भवान् वर्त्मनि वर्जयन् वैरिव्याजं युवराजं दक्षिणं नयतु। अहमन्तिकेऽन्तर्हितोऽत्राऽमिनः स्वामिनः पर्यवेक्षणं रक्षणं चानुक्षणं विधास्यामि। स्वस्थेऽथ प्राप्त-पूर्वावस्थे नाथे तेन सममहमपि समुपस्थातास्मि' इति। यदाहुर्धर्मज्ञाः—

८. त्रैकाल्येऽनुचरा पुण्याः, सर्वभावेन कर्मिणः।
सेवन्ते ये प्रभुं गुण्याः, तत्वतस्तेऽत्र धर्मिणः॥ ६॥
कर्त्तव्यपालनपरैः दृढभक्तिनिष्ठैः,
भृत्यैः भवन्ति पुरुपुण्यकृतां वरिष्ठैः।
सर्वाणि दैवतकुलानि सभाजितानि,
स्थानानि चोर्ध्वभुवनानि सुखं जितानि॥ ७॥
प्रीतिः का परिवारस्य, भीतिः मृत्योश्च कीदृशी।
स्वाम्यर्थे बद्धकक्षाणां, दक्षाणामनुपसेवने॥ ८॥
ये केवलं स्वार्थमपेक्ष्य सेवकाः, स्वं स्वामिनं कूटकरा उपासते।
यथार्थरूपेण भवन्ति ते वकाः, न धर्मलेशोऽपि हि तेषु भासते॥९॥ इति।

९. इतः सत्त्व-सौम्यत्वमितः स भूदेवो विनायकदेवोऽपि प्रतिदिवसं भिक्षाचरणं व्यधाद् यत् तेषां त्रयाणां प्राणधारणकारणमभूत्। नीरोगतां गते शिववीरे एकस्मिन् दिवसे विप्रो विनायकदेवः क्षोदीयो भैक्ष्य-भक्ष्यमलभत। तदा स दास इव सदा शिवङ्करः उभयोस्तत् प्रदाय स्वयमशनायित एव क्षुन्निशमनैषीत्। आलक्षिता क्षिताधिपेनानुक्रोश-शरीरेण शिववीरेणेयं वार्ता। तेन चेतसीदमालोचितम्—

न जाने कदा प्रभृति दयामूर्त्तिः धृतिभृदयं भूदेव एवं बुभुक्षा-क्षामः क्षपाः क्षपयन् स्यात्' इति। व्यपोहित-गोविप्राऽशिवाय शिवाय कश्चिद् विपश्चिद् द्विजः क्षुधोद्वेजितस्तिष्ठेदिति दूरं दुस्सहमासीत्तत्कृते। कोऽसौ प्रकारो येनास्योपकारो विधीयेत दैन्यदूनस्य द्विजन्मन इत्येवासौ वारं वारं विचारं व्यधात्। विविधवाधाविकटत्वाद् विदूरवर्त्मनः दुश्शकं द्विजस्यास्य दक्षिणं प्रति नयनम्। अथ च ततोऽस्मै हितं प्रहितमपि ससाधनं धनं निःसंशयमेष लप्स्यत एवेति कः प्रत्ययः? विपरीतविधिवशाद् रहस्यमिदं प्रकाशितं स्याच्चेत् काऽस्य दशा सम्पत्स्यते?' इति। पर्यवसानेऽकारि तेनैको निर्णयः।

१०. ब्राह्मणेन कलमं कालिकां चानाय्य, पत्रमेकं विलिख्य तत् प्रदेशपति-पार्श्वे प्रदानाय तं प्राहिणोत्। काकतालीयवदनपेक्षितेन पुरुषेणोपानीतं पत्रं प्राप्य प्रदेशपतेराश्चर्यमौत्कण्ठ्यं च ववृधे। तत्पत्रं चाह्नाय समादाय सोऽपाठीत्—'शिववीरो विप्रस्याऽस्य वसिते वसति। अनेन सहागत्य स्वैरं तं प्रतिबध्नन्तु भवन्तः। परमवधानीयमिदं यत् शिववीरस्य बन्दिग्रहायाऽवघुष्टं नूनमनूनं पारितोषिकं ब्राह्मणाय प्रदानीयम्। कृतं चेत् प्रतारणम्, पश्चात्तापकारणं सम्पत्स्यत' इति।

११. पत्रं पठन्नेव प्रान्तपतिः प्रभूतां प्रीतिं प्राप्य प्रोत्पपात पीठात्। शिवराजं राजधानी-देहल्यास्थानीमुपनीय राजाधिराजादपारस्य सत्कारस्य स्फारस्य च पुरस्कारस्य प्राप्तेराकाशकुसुम-सङ्काशा मोघाऽऽशा स्फीतं प्रीतेन तेन मनसि कल्पिताऽभूत्। स सकलमिदं कौशलकर्म स्वैरं सद्यः सम्पाद्य सम्राजः स्वान्तं नितान्तं सविस्मयं सुखमयं च संविधित्सते स्म। अतः स्वकोषादेवासौ रूप्यकसहस्रद्वयीमादाय सोल्लासं विप्रावासं समुपेयिवान्। तत्र पटपुटकं राजतरूप्यकैः पूरितप्रायं विप्राय सम्प्रदाय गोस्वामिचीरं शिववीरं स्वेन सहानैषीत्। समालोक्य संवृत्तं तद् वृत्तं समग्रमग्रजन्मा विस्मितः सुतरां कातरामवस्थामभजत। स लेशतोऽपि रहस्यमिदं बोद्धुं न प्राभवत्। तथापि कुटुम्बिभवन-पवनं व्याधि-विपद्-वशाच्छरणागतम् अभ्यागतं यवनेन नीयमानं निरूप्यासौ प्रथीयसीं पीडा-परम्परां प्रपेदे। स सुतरां मानसे सुस्थतामनासादयन् किङ्कर्त्तव्यविमूढः, किटकिटायमानरदनः, रोषोद्वेगारुणितवदनः, स्फार-स्फुरन्नासः, शीघ्र-शब्दि-श्वासः, मुहुर्मुहुर्बद्धमुष्टिः, प्रसारितदृष्टिः, गेहाङ्गने गतागतमकार्षीत्। स्वगतं चाचिन्तयत्—

१२. पापीयसो मे हतदैवजातं, हा हा महावैशसमद्य जातम्।
यत् प्राघुणः प्राप्स्यति कष्टजातं, घातं च कारागृहसन्निपातम्॥१०॥

क्रियेत किं नाम च कैरुपायैः, ह्रियेत घोरं व्यसनं प्रपन्नम् ।
ध्रियेत दण्डोऽपि परं प्रचण्डो, म्रियेत चासौ भयदो भुजङ्गः ॥ ११ ॥ इति।

तस्मिन्नेवान्तरे तस्यैव गोस्वामिनो नितान्तमशान्तं समायान्तं सहचरमालोच्य देवो भूदेवोऽचिरादेव पर्यचिनोत् । बद्ध्वा नीयमानः स्वकीयः स्वामी सहचरेण तेन स्वयं समालोकि। तेनेदमपि प्रागेव परिपृष्टं यद् अमुकवेलायाम् अमुकवर्त्मना च स देहलीं निनीषित इति ।

१३. सहचरः समागत्य क्षिप्रं विप्रं वस्तु-वास्तवत्वमप्राक्षीत् । व्यथाविह्वलेन ब्राह्मणेन वृत्तो वास्तविको वृत्तान्तो वैशद्येन विन्यवेदि। सहचरेणापि सौकर्येण सम्यक् समबोधि यद् भूसुरस्य ससारं प्रत्युपकारं कामिना स्वामिना स्वात्मा विकटे सङ्कटे समावेशितः। तथापि तेनेदं निरणायि यन्मरणावधि तमेतस्माद् विघ्नबहुलाद् विपद्वन्धनाद् विमोचयितुं व्यवसिष्यामि, इति । सर्वं सम्पाद्यते स्वाम्यर्थे सत्यैः सेवकैः।

तदनु द्विजन्मानं सात्मसम्मानं सत्यस्वभावं विश्वास्यं च विज्ञाय शिववीर-सङ्गिना स्वैरं सकलं रहस्यमुन्मीलितम्— 'ब्रह्मन्! नायं धन्यः कश्चिदन्यः, सोऽयं स्वयं गोब्राह्मणप्रतिपालकश्छत्रपतिः शिववीरोऽभूत्। आकुञ्चितालकः स बालकः सौम्यत्वसंयुतः तत्सुतः 'सम्भाजी', सहचरश्चान्यो मान्यो 'येसाजी' समजायत । अहं च तस्य महाराष्ट्रकेसरिणो दासेरोऽस्मि' इति ।

१४. 'तानाजी'-महोदयस्य वाचमाचम्यैव मङ्क्षु महीसुरो मुमूर्छ। नितान्तं तान्तं पतन्तं तं 'तानाजी'-महाबलोऽविलम्बं समाललम्बे । समधिगतचेतनः करुणाक्रन्दनकलकलाकुलितकेतनः स पुनरेतेन समुपेतेन सहस्रद्वयेन रूप्यकचयेन यथा-कथञ्चिदपि शिववीर-विमोक्षाय शिष्टं वा दुष्टं वा भव्यं वाऽसभ्यं वा सम्भाव्यं प्रयत्नविशेषं विधातुं तानाजी-महोदयं वारं वारं सविनयपुरस्कारं समयाचिष्ट ।

१५. तदनु श्रीताना नानारचनैरभयनयवचनैर्द्विजदेवं सन्ततं सान्त्वयामास । स्वयं च प्रकृत-प्रदेश-पुरुषसमानं परिधानं परिगृह्य तैस्तै रूप्यकैः पञ्चाशदायुधजीविनां भृतकानां संविधां व्यधात् । तैश्च प्राप्ताक्रमणावबोधैः योधैः सह झाट-झटिषु तत्र तिरोहितः स्थितो येन पथा प्रत्यासन्नोपरतिः प्रदेशपतिः शिववीरं देहलीं निनीषुरासीत् । प्रसुप्तप्राणिमात्रे मध्यरात्रे समतीते प्रदेशपतेः वाहनं पञ्चविंशतिभिः सैनिकैः सत्रा तत्रागत यत्र तानाजी-प्रभृतयः गहन-गुल्मावरणाः प्रस्तुत-प्रहरणाः प्रतीक्षमाणा आसन् । तावदेव तानाजी-वीरेण सह सहसा युगपद् हेतिहस्तैः

शूरशस्तैः मुक्तकरुणैस्तरुणैः पञ्चाशद्भिः घाटी व्यधायि। प्रदेशपतिपार्श्वे प्रहरणपाणयः पुमांसः परिमाणे प्रायः पञ्चविंशतिरिति प्रतिपक्षापेक्षयाऽल्पीयांस आसन्। अपि च श्वपाकास्ते वराका हेतिसहिता अप्यवहिता नाचालिषुः। अतः सुखानुमानं तदवसानम्। प्रान्तपतिपूर्वाः पञ्चविंशतिः प्रहरणपाणयः पृतनापुरुषाः पञ्चत्वं प्रापिताः। ततो धीरं शिववीरमादाय कृतकृत्यः शिवाद्त्यभृत्यः श्रीतानाजीमहोदयः सम्प्रति विप्रवासम्प्रति सशातः पुनरायातः।

१६. ततः परमोदारं वारं वारं कृतनमस्कारं बन्धविमुक्तं तानाजीयुक्तं शिववीरं दर्शं दर्शं स्वस्ति-प्रशस्तिवाचकः सोऽग्रजातकः परप्रकर्षं हर्षं प्रापत्। एवमुदारहृदयानां महोदयानां स्वधर्माश्रयाणां त्रयाणां तेषां तत्र श्रेणी त्रिवेणीविभां विभर्तिस्म। तत्पश्चात् पुनः प्राह्वनीयं शिवं प्राह विप्राग्रणीः—'राजन्! अद्यैवालोकितः कोऽपि कौतुककरोऽलौकिकः स्वप्नो मया योगनिद्रां गतेन। यदार्यं महौदार्यं त्वया दयामयेन मयि जन्मन्यस्मिन् प्रकाशितम् ततोऽप्यधिकतरं जननान्तरेऽपि। तथा हि— आसीत् पुराकल्पे स्वल्पेऽपि श्रीश्रेयः-पुण्य-प्रमोद-प्राज्ये सुकेतराज्ये सौमित्रिसेनो नाम महितात्मा महामतिः महीपतिः जनरञ्जनरतिः सज्जनसङ्गतिः, दूरद्रावित-दीन-देश-दुर्नयतिः, विविध-विद्याविशारद-विबुधविभूषित-वसतिः। अहिंसाव्रतधरः करुणाकरः प्राणिपीडाहरः कृपणपरिपोषणपरः, स नरवरः प्रत्यक्षे परोक्षे च सर्वत्र समन्तात् प्रणय-पुरस्सरं प्रातःस्मरणीयः, प्रजानां प्रशंसापात्रमजायत।

१७. गच्छति च काले मङ्गलमूर्त्तेः महीमहेन्द्रस्यास्य दयादानौदार्यप्रसिद्धिः प्राप्तप्रथिमा प्रदेश-परिसरं परिलङ्घ्य प्रतिवासि-पृथिवीपतीनां प्रान्तेष्वपि प्रससार। तदसहमानः सहजाभिमानः परोत्कर्षद्वेषी प्रतिवेशी मृषायशस्कामी विलासपुरस्वामी शूरसिंहो विपुलं प्रबलं बलमादाय प्रमोदोत्सवप्रायं प्रशमश्रायं सुकेतराज्यमभ्यषेणयत्। अतर्कितोपनतेन परपृतनापातेन पराजितः सुकेतपतिः विवशो विपिनं विवेश। शूरसिंहेनाधिकृतो निश्शेषः सुकेतप्रदेशः। परं पुरजनैः कृत-माङ्गल्यतोरणरचनैः स्वागतवचनैः पुष्पप्रसारैः हारोपहारैः जय-जयकारैश्च सर्वथा नासौ सत्कृतः। वसुधाधिपवियोगमविषहमाणा विश्वतो लोकाः शोकाकुलाः करुणं क्रन्दन्तः लुण्टितसर्वस्वा इव, वाग्विकला इव, विहतबान्धवा इव चाजायन्त। तत्रैकोऽपि कार्त्स्न्येन शूरसिंहस्य कृतेष्टोपायः सहायः समस्ते सुकेते नाभूत्। प्रत्युत

परितः पदे-पदे तत्प्रतिविधानेषु प्रत्यवायाः प्रतिबन्धाश्च प्रभूतैः प्रवञ्चनप्रकारैः प्रतिव्यधीयन्त प्रकृतिभिः। प्रजासहकारमपेक्षते हि शासनम्।

१८. तदालोच्य विश्वतो विगीतेन, प्रकृतिप्रकोपभीतेन, प्रदेशे परितः प्रसारित-शूर-सेनेन शूरसिंहेनेदं स्वगतं व्यचारि यद् यदवधि जीवति जगति सौमित्रिसेनः तावत्तेन बद्धानुरागाः अध्यवसितात्मत्यागाः सुकेतप्रकृतयः पूर्णतया वशं नैष्यन्ति। अतस्तेनेदमुदघोषि निश्शेषे सुकेतप्रदेशे यद् यः कोऽपि सौमित्रिसेनं गवेष्यानेष्यति स सौवर्ण-मुद्रासहस्रद्वयं लप्स्यत इति। किं किं न कुर्वन्ति शत्रुशातनाय शासनलुब्धाः।

अमूदृश्याः शोणितशोषणायाः घोरघोषणायाः श्रवणमपि पापपुञ्जप्रलेपाय प्रकल्पत इति प्रजा-पुरुषाः पिहित-श्रोत्राः 'पाहि प्रभो! पाहि प्रभो! स्वस्त्यस्तु सौमित्रिसेनाय' इति पुनः पुनरुपांशूच्चारयामासुः। एवङ्गते क आसीत्तत्रैवम्प्रकारः कदाचारः कुलाङ्गारः पुरुषको यस्तादृशं प्रजापरित्राणं पुण्यप्राणं पृथिवीपतिं प्रगृह्य प्रसह्य राज्यापहारिणे रौद्ररूपधारिणे राज्ञे समर्पयेद्, आत्मानमदयालुं पापलोकपतयालुं, इह लोकेऽकीर्त्ति-कालिका-कलङ्कितं च कुर्यात्।

१९. अमुत्र पाटितपटपरिहितवपुः संश्लिष्टकेशः सुकेतनरेशः शकारिधराधरधारासु दुष्प्रचारासु, विविधव्यथेषु कान्तार-पथेषु च बुभुक्षाक्षामः पर्यभ्रमीत्। एकदा कोऽपि दीनोऽध्वनीनोऽभ्युपेत्य तमप्राक्षीत्—'वनेवासिन्! दिग्भ्रमेण दीर्घक्रमश्रमेण च दूरं दूनोऽहमस्मिन् विघ्नबहुले व्याघ्रादिसङ्कुले विजने विपिने सुचिराद् विचरामि। किमङ्ग! जानासि सरलां सरणिं या गुणगरिममान्येन वदान्येन क्षितिपतिना रक्षितं समस्तसमृद्धिसमुपेतं सुकेतं प्रति याति?' इति। विविध-व्यञ्जन-विशेषवैषः ब्राह्मणं विज्ञाय तं पृथ्वीपतिः प्रणिपत्य प्रश्रयप्रणयातिशयप्रकाशनेन पथिकपरिश्रान्तिं प्रशमयन् अदिम-मधुरिममिलितां अक्षण-मयीमिव वाणीमभाणीत्—'पूज्यपाद! कैमर्थ्यं ते तत्र गमनस्य?' इति। पथिकः प्राह—'प्रिय महानुभाव! पञ्चाम्बु-प्रदेश-प्रसिद्ध-पटुपुरवासी द्विजातिरहं जात्या। सौन्दर्य-स्वास्थ्य-सद्गुण-संस्कृतामपि प्राप्तयौवनां मे दुहितरं कोऽपि तरुणः पुष्कलं यौतुकं विना परिणेतुं न कामयते। मत्तः स मत्तः करं चापि जिघृक्षति न तु कन्यायाः करं केवलम्। हन्त! सम्प्रति हि धनं सुखसाधनं मानं प्रधानं च जानन्ति न गुणाधानं जनं नाभिजनं न पुण्यं न साद्गुण्यम्। यतो हि—

२०. लुप्तो धर्मोऽधुना हन्त!, गुप्तो वा गिरिगह्वरे।
छुप्तो लोभाहिना तोषः, सुप्तो नैव प्रबुध्यते॥ १२॥

अधन्या निधनं यान्ति, मार्गयन्तोऽनिशं धनम् ।
बन्धुत्व-बाधनं हैमं, बन्धनं वैर-वर्धनम् ॥ १३ ॥ इति ।

ततः पुनरायतं निःश्वस्य प्राह विप्रः— 'कां कां कथयानि दुरवस्थाम् । दैवदुर्विलासाद् दारुणेन दयारहितेन दहनेन भसितशेषतामुपेतः समस्त-सामग्री-समेतः स मे निकेतः । इदानीं द्रविणादानादानाय द्वाराद् द्वारं दूरं द्रवतोऽपि दीनस्य मे द्रुतं मनोरथसिद्धिः न सम्भाव्यते । शुश्रुवानस्मि मणिकर्ण-माण्डव्य-पराशरकुण्ड-मन्वालय-गामुकानां प्रभूतानां पथिकानां मुखेभ्यो यत् सौभाग्येन समेधमानस्य सुख-स्वस्ति-केतस्य सुकेतस्य स्वामी सौमित्रिसेनो नाम सुतरां दानशीलो दीनवत्सलश्च । न निराशो निवर्तते तन्निकेतनात् कोऽपि कृपण इति प्रकृष्ट-पुष्कल-परिग्रह-प्राप्तये तस्यैव परोपकरण-परायणस्य पुण्य-प्रणयिनः पृथिवीपालस्य पुरतः पाणिपुटं प्रसारयितुं प्रयियासामि' इति । दैन्यदलितस्य द्विजदेवस्य दशां दृष्ट्वा नितान्तमन्तःसन्तापितेन सुकेतपतिना क्षणं विचार्याभाणि— 'ब्रह्मन्! कृतमेतया हतया चिन्तया । विप्रकृष्टाद् विदेशाद् विषम-वर्त्म-व्याकुलितो भवानिति स्वयं सङ्कल्पितं स्थानं प्रापयामि' इति । यस्माद्—

२१. दुष्ट-दिष्टेन दष्टस्य, दृष्ट्वा दीनस्य दुर्गतिम् ।
द्रूयते द्रावितो दूरं, द्रुतं दाक्षिण्य-दीक्षितः ॥ १४ ॥ इति ।

अथ सौमित्रिसेनोऽमानमोदमानमानसः तमग्रजन्मानमादाय सुकेतासनाधिष्ठायिनः शूरसिंहस्यास्थानीमुपेयिवान् । समेऽपि सचिवाद्याः सभ्याः मलीमसवेषं जटिलकेशं सुकेतलोकेशं विलोकयन्तोऽप्यपरिचिन्वानाः, मन्यमानाश्च 'कश्चिद् वनवासी वा दनीयको वाऽय'मिति जोषमतिष्ठन् ।

शूरसिंहः प्रश्नयाञ्चकार— 'वनवासिन्! कथ्यतां तथ्यं तावत्, किन्निदानमत्रोपस्थानम् ?' इति ।

अथ विलुलितां वालवल्लरीं शय-कुशेशयशाखाभिः व्यपनीय सौभाग्यलक्षणधरं, राजमुद्रासुन्दरं, कान्तार-कण्टकादिक्षतकिणनिकरं करं चोद्यम्य मृदुहासी वनवासी सौजन्यं व्यञ्जयन् व्याजहार - 'सुकेतस्वामी सौमित्रिसेनोऽहम् । त्वया च 'सुकेतपतिं गृहीत्वा य आनेष्यति तस्मै सुवर्णमयं मुद्रासहस्रद्वयं प्रदास्यते' इत्युद्घोषणाकारि । सोऽयं सहचरो भूसुरवरो मां गहनाद् गृहीत्वा त्वत्सविधमानेतास्ति । तस्मादस्मै तत्पारितोषिकस्वापतेयं सम्प्रदेयम् । येन सुतायाः सदाचाराय वराय समर्पणाय सोऽयं सत्वरं सम्पादयतु स्वैरं सामग्री-संविधानम्' इति । तत् सन्निशम्य सचिवसेनापति-समेतः समस्तः सभ्यसमाजः सुतरां विस्मय-वितत-विलोचनो

व्यजायत। कतिपयानां मृदुमनसां प्रतिहारि-प्रभृतीनां परिचारकाणाम् ईक्षणे तत्क्षणे वाष्प-विप्लुते समपद्येताम्। अचिन्तयंश्च समेऽपि—

युग्मकम्

२२. अद्यापि यस्य कृपया स्ववशीकृतानि,
चित्तानि भूय उपकारभरैर् भृतानि।
रात्रिंदिवं गणित-दिव्यगुणव्रजानां,
सौभाग्य-संस्तुत-सुकेतभव-प्रजानाम् ॥ १५ ॥
सोऽयं स्वयं मृदुमनाः सुकृतावतारः,
माङ्गल्यमूर्त्तिरधिभूर्महतामुदारः।
आः ! साम्प्रतं मलिनितो दयनीयरूपः,
प्राप्तो दशां विधिवशां कतमां नु भूपः ॥ १६ ॥ इति।

शूरसिंहोऽपि तन्निखिलं निशम्य दया-दान-दम-दीप्ति-दर्शनीय-देहं सौमित्रिसेनमापादमस्तकं निरूपयन् मोहित इव कीलित इव च कृतत्राटक इव निर्निमेषनयनः, सहसा सिंहासनमुत्सृज्य सकपोतहस्तमाकुञ्चितकन्धरोऽवादीत्—'महनीय! महामनः! महाराज! पराजितोऽहमसूयकः रजोराहित्यराजितेन सदाचार-संस्तुतेन प्रजाविस्रम्भवता भवता। अधिष्ठीयतामिदं राजासनम्। क्रियतां पुनः सुकेतशासनम्। विस्मर्यतां व्यतीतं वैमत्यम्। भवादृशा एव भूभर्तृत्वभाजनभूता भद्रा भद्रासनाधिकारिणो भवन्ति' इति। ततः प्रगृहीतपाणिः सौमित्रिसेनं सिंहासने समुपवेश्य तस्य मृदु-मार्ग-महीमृत्तिकामलिनिम-मिलिते मौलौ मुकुटं निदधे।

२३. तदा तदालोक्य सकलाः सभ्या लोकाः सत्क्रियानालसाः, राजदर्शनलालसाः उल्लासलासिनः सुकेतवासिनश्च 'विजयतां सुकेतराजः, जीव्यात् समानां सहस्रं सौमित्रिसेनः' इत्युच्चैरुच्चारयन्तः साधुवादैः शूरसिंहं शश्लाघिरे। विस्मेरो विप्रोऽपि वसुधाधिपवितीर्णं विपुलं विभवं वाससि बद्ध्वा वारं वारं व्याहरन् स्वस्त्यक्षराणि यथागतमयासीत्।

महाराष्ट्र-महीमहेन्द्र शिववीर! स करुणा-वरुणालयः सुकेतस्वामी सौमित्रिसेनस्त्वमेवासीः। अहं च तत्सहचरो दारिकादान-दूनो दीनो द्विज इति।

उक्तप्रकारेण विविध-विकट-विघ्न-व्यसन-व्याधि-विपन्ना अपि, सांसारिक-साधनसमूह-सम्पदसम्पन्ना अपि दृढ-दृषद्दारुणा द्वेष्य-दुर्वृत्तेषु दौष्ट्यं दर्शयन्तोऽपि, कुसुम-सुकुमार-स्वभावाः, कृतवेदिनो दुर्बल-दरिद्र-दुःखोच्छेदिनो दलित-दौर्भाग्य-द्रावणदीक्षिताः, प्रायेण प्राप्त-प्राण-परित्राण-

परिशङ्का अपि परोपताप-द्रावितहृदः पुञ्जित-पुराण-पुण्यपारवश्यात् दयौदार्यसिन्धवः विश्वबन्धवः साधवः, स्वकीयं, वैभवबलविकल-विपद्-वारणव्रतं, न वै विमुञ्चन्तीति शिववीरस्यावदान-कथानकमानकध्वानेन विश्वं विबोधयतीति ।

दीने दया-दर्शनम् (२३)

पञ्चाम्बु-प्रान्तस्य पूर्वस्मिन् पार्श्वे विद्यते विश्वतो वृक्ष-वेल्लि-वीथी-वैभव-बाहुल्य-विश्रुते, महामहीध्र-मालामूर्ध-मन्थन-मन्थरित-मृदुमारुते, नाना-नद-निम्नगा-निर्मलनीर-निर्णिक्त-निवासि-नर-नैर्धन्य-निराशे, मङ्गलमूल-महित-मणिकर्णमुख-महेश्वर-मन्दिर-मण्डल-मण्डिते, ज्वलज्ज्योतिर्जिह्वा-जालाया ज्वालाया जृम्भणेन जागरित-जगज्जनजाते, सर्वतः सरलस्वभाव-स्त्रीसङ्घ-सङ्गीत-स्वर-समुन्नादित-सकल-सदने, सेवादि-स्वादु-सरस-सस्य-सम्प्रदान-सन्तोषित-समस्त-संसार-समाजे, पदे-पदे प्रसृत-प्रस्रवण-परम्परा-परिपुष्ट-पयस्विनी-प्रजविप्रवाहे, धवल-धराधर-धारा-धारित-तुषारतति-तर्जित-तीव्रतपन-तापे, सर्वशः सौन्दर्य-सौभाग्य-सुखसम्पत्-सौम्यत्व-समलङ्कृते, परितः पर्वाकार-केदार-समाहार-दर्शनीय-दन्तुरित-दिग्देशे हिमाचलप्रदेशे, भग्न-भित्ति-भव्य-भूतेश-भवन-भावित-भूरि-भावुकं, विपाश-वाहिनी-वीचि-वेग-विघात-वाचालित-वाह्य-वाट-वनविभागं, मध्यस्थ-मञ्जु-मन्दिर-मण्डप-मण्डल-मण्डितं माण्डव्य-नामधेयं नगरम् ।

२. वीता वहुतिथा वेला, तत्र प्रायेण परमेश्वर-पूजन-परायणः, पुराण-प्रमुख-पवित्र-पुस्त-पारायण-प्रवृत्तिः, पौरेषु प्रथितप्रभावः, पण्डित-प्रवरः, पद्मपतिः प्रत्यवसत ।

एकदासौ परम-प्रभुपूजां परिसमाप्य यावद् देवालय-सोपानोपरि प्रणिहिते प्राणिहिते परिदधान आसीत् तावदेव मलीमसनिवासो नगर-निर्मितनिवासो देवदासोऽपि तत्रोपगम्य प्रह्वोत्तमाङ्गः पुटितपाणिः, प्रीति-प्रदर्शनपुरस्सरं, पण्डित-प्रवरस्य पादौ प्रणम्य प्रावोचत्— 'महाराज! अहं प्रभवतां भवतामेव सकाशेऽस्मिन्नवकाशे समुपागतोऽस्मि' इति। तदुक्तं नीतिनिष्णातैः—

तालुं स्पृशन्तो मृदु जिह्वयाऽलं, सौजन्य-सारैर्बहुचाटुकारैः ।
महाधनांश्चापि गुणैर्विहीनान्, दीना विपन्ना विवशाः स्तुवन्ति ॥१॥ इति ।

अथ पद्मपतिः पण्डितो विस्मयविस्फारिताभ्यां विलोचनाभ्यां वीक्षमाणो द्वित्राणि पदानि परावृत्य सोपेक्षमाचचक्षे— 'अरे देवदास! का वार्ता? किं कामयसे? कामयसे दुःखासिकाम्?' इति।

३. देवदासोऽगादीत्—'गेहं प्रतिगन्तव्यं प्राक्, ततो निवेदयिष्यामि' इति। पुनः प्रावोचत्— 'पण्डित-प्रकाण्ड! विंशतिः रूप्यकाण्यपेक्षे। इदं चास्तु विनिमय-वस्तु' इति प्रवदन् पाणिपुटं प्रासारयत्। पण्डित-प्रशस्तः पद्मपतिश्चिन्ताचान्तचेतस्त्वाद् मलिनिम-मिलित-मुखस्य, निस्सुखस्य, निर्भर-निःश्वासस्य देवदासस्य वेपमाने पाणौ राजतं कटकद्विकं वीक्ष्य व्याहार्षीत्— 'अस्तु, अस्तु, गेहमेहि। परं वैधेय! एतेन कटकद्वितयेन विंशति-रूप्यकाण्यादित्ससे? कूटकल्पिते कटके किलैते! कांस्यं कुतोऽपि कलितम्। अपि नाम जानासि कियन्मूल्यं महत्त्वं च रूप्यकस्य? ब्रूहि तावत्, कियान् भार एतयोः कटकयोः। रिक्तोदराभ्यामेव भाव्यमाभ्याम्। नूनं रक्तालक्तः सक्तोऽन्तरे तिष्ठति। द्वित्रतोलकानधिकस्तोल एतयोः' इत्येकपदे तद्द्रव्यदोषैकदर्शी, परभाग्यभोग-भोक्ता भ्रष्ट-भूसुरो भूयोऽभाणीत्— 'देवदास! नाहमेवम्प्रकारमपहार-व्यापारं विदधामि। सङ्कलिताऽमितरायं धनपतरायं वाणिजमुपेहि। स एतन्निक्षेपेण नियतं ते वाञ्छितं वसु वितरिष्यति' इति। तदाहुर्नयनिपुणा विचक्षणाः--

४. कुसीदिनो नैव कुलाद्यवर्णं, जानन्ति धर्मं न तथा च वर्णम्।
कुर्वन्ति दीनोक्तिषु नैव कर्णं, प्रतारयन्तः परितोऽधमर्णम्॥ २॥
निःश्वासवातैरिह निर्धनानां, निरन्तरैः क्वापि च नेत्रनीरैः।
घोरं कठोरं च कुसीदिनो हृद्, न चालितं नापि समुक्षितं स्यात्॥३॥
स्वार्थैकसारा असुरावतारा:, द्रव्यं स्वमाहुः खलु रक्षितव्यम्।
ते चाश्म-चित्ता ऋणिनं स-वित्ताः, कथं विजानन्ति मुदाऽशितव्यम्॥४॥
भृशं कृशं खरं स्वकं, वदन्ति वाजि-शावकं,
परस्य सिंहिकासुतं, विडालमाहुरद्भुतम्।
विचारयन्ति नो हितं, पिबन्ति लोक-लोहितं,
कृतप्रपञ्च-सृष्टयः, स्व-लाभमात्र-दृष्टयः॥ ५॥ इति।

ततो व्याजविमिश्रां बहुविधां वाग्वागुरां विस्तारयन् विप्रः स्वसदनं प्रत्यावर्तत। मन्दिर-द्वारे क्षणमवस्थाय चाह—'त्वं तु ऋणदातारं धनिकं मुग्धं मन्यमानोऽतिसन्धातुं कामयसे। कूट-कटके करे कलयन् मदीयं भव्यं द्रव्यं कुत्सित-कर्कराऽवस्कर-कल्पं मन्यसे' इति। अहो! एकान्ततः पातकं हि स्वार्थबुद्धिः।

५. विपर्यस्त-विधिविलासो वराको देवदासो व्यपेक्षाविशेष-विवशः पण्डित-पद्मपति-पार्श्वे प्रापत्। दैन्यदूनस्य तस्य दूरं दयनीया दशाऽदृश्यत। पण्डित-पद्मपतेस्तादृशं भृशं खेदनं विगताऽनुवेदनं वदनं शुश्रुवान् सन् स न्यगादीत्— 'महाराज! व्याधितो मे तनयः। मम पार्श्वे किमपि वस्त्वन्तरं तु नैव वर्तते। सुचिराद् गृहे गोपायितं विवाह-वेला-प्रणय-प्राभृत-संस्मरण-स्वरूपं कटकद्वयमिदं ततो निष्कास्य वाष्प-वारि-विप्लुत-विलोचनया मद्गेहिन्या सायतनिःश्वासं प्रादायि। दशाविशेष-परवशा हि साऽभूत्। यथा चोक्तम्—

प्रेयांसि देहादपि भूषणानि, सीमन्तिनीनां नियतं भवन्ति।
ता दातुमीशाः ससुखं स्वकायं, रायं तु नैवाभरणाभिधायम्॥ ६॥ इति।

अपि च पुत्रस्य प्राणपणेनाऽप्युपचारः पित्रोः कर्त्तव्यत्वेनापतति। यदाहुः—

विद्धेऽपि कण्टेन मनाक् तनूजे, मातुर्मनो व्याकुलतामुपैति।
जातो जनन्याः शुचिशोणितेन, जातोऽतिवेलं पुषितो यतोऽसौ॥ ७॥
स्नेहावसेकैः परिपोषयन्त्याः, अम्बालिकाया नियतं तनूजः।
त्यागस्य तावत् तपसश्च साक्षात्, सञ्चारिणी स्यान्मुखरा च मूर्त्तिः॥ ८॥
इति।

६. अपि च नास्त्यस्मदीयः कोऽप्यपरः सजातीयः, पुत्र एवावलम्बः। अतः सहज-स्नेह-सुकुमारहृदयो दयोदयो, वैभववान् वै भवानिदं कटकयुगलमादाय रूप्यकाणि मे प्रयच्छतु इति।

तदुपश्रुत्य कुटिलमतिः पद्मपतिः कृतकैतवस्मितिः प्रावोचत्—'दश रूप्यकाणि दास्याम्येतयोः कटकयोः। जिघृक्षसि चेद् देहि। मासान्तं यावत् प्रतीक्षिष्ये, तदन्तरे प्रत्यावर्तनाय नायास्यसि यदि कस्मैचिदन्यस्मै दातास्मीदं कटकद्विकम्। निकेतने निधाय किमेतेन करणीयम्' इति। अहो अवर्णनीयं! कैतवकौशलं स्वार्थपरायणानाम्।

हन्त! प्रागेव चिन्तावासो देवदासो निशम्य तद् बहुलं व्याकुलो बभूव। स मनाङ् नैराश्य-निघ्न-नयनो नभो निरीक्षमाणो निःश्वस्य निजगाद— 'पण्डितप्रवर! एतयोः कटकयोर्मूल्यं पञ्चाशद्-रूप्यकेभ्यो नूनमूनं नास्ति। तनयश्चेद् रुजातुरो नाविष्यत् किमेतावदल्पिष्ठं वित्तं लिप्सुरहं महार्घं कटकद्वयमिदं निक्षेप्तुमागमिष्यम्? भाग्यवान् भवांस्तु भूयिष्ठं भगवद्भक्तो ज्ञानी ध्यानी च वर्तते। किञ्चित् कारुण्य-कृत्यं

क्रियताम्। वेदनीयं मे दीनस्य वेदना-व्यसनम्' इति प्रब्रुवाणोऽसौ पौनःपुन्येन पण्डित-पद्मपतेः पादौ प्रणनाम। किं किं नाचरति विवशो जनः।

७. पद्मपतिर्मनाङ् मनःक्षोभं प्रादुष्कुर्वन् प्रावोचत्— 'मा मा समुपदिश। वित्तविषयिका व्यवहारवार्तेयम्। तां तत्त्वतो वेदितुं चेष्टस्व। अहमेतयोः कटकयोः पञ्चदशरूप्यकेभ्योऽधितरमेककं पणकमपि दातुं नालङ्कर्मीण' इति। यदाहुः—

धनप्रधाना विधुतावमाना, नानाप्रकारच्छलनैकतानाः।
विज्ञाय वैवश्यमकिञ्चनानां, कठोरतां वार्द्धुषिका वहन्ति॥ ९॥ इति।

अथ दुःखदशा-विवशेन दैन्यावासेन देवदासेन गलद्गिराऽगादि— 'यथा रोचते प्रभवते भवते' इति। यदुक्तम्—

ऋणार्थिनो हा! वधकोत्तमर्णैः, सम्प्रेरिताः स्वैः समयैर्भवन्ति।
पञ्चाननाः पञ्जरपातिताः स्युः, प्रवञ्चकैर्वेत्रवितांडनीयाः॥१०॥ इति।

८. ततः पद्मपतिः प्राप्तिपत्रं विलिख्य देवदासाङ्गुष्ठमुद्रितं विधाय कटके चादाय पिटकात् पञ्चदशमुद्रा निष्कास्य देवदासस्य प्रसारिते पाणिपुटके प्राक्षिपत्। कथयन्ति हि कुशलाः कथकाः—

ऋणार्थिने स्वं दययेव दानं, स्वं दीयमानं मनुते कुसीदी।
उद्धारवार्धुष्यमथाददानः, परार्पितं प्राभृतमित्यवैति॥ ११॥ इति।

ततो गते दुर्गते तस्मिन् स्वगतमेवं व्यचीचरत् पद्मपतिः— 'दुर्लक्षणजातो यथाजातः प्रातः समायातः' इति। ततोऽसौ पञ्जिका-पत्र-परिवर्तनं प्रारभत। पुनश्च तत्कटक-युग्मकं करेणादाय व्यतर्कयत्— 'पञ्चदशतोलकेभ्योऽल्पतरस्तोलस्तु नास्त्यस्य। पण्यशालायां त्वीदृशं कटकयमकं रूप्यकशतेनापि लब्धुं दुश्शकम्। नियतं गरीयः पूर्णगर्भमपीदं वर्तत' इति। पुनरसावास्यं सङ्कोचयन्नात्मगतमगादीत्— 'तदिदं देवदासेनापि न मूल्येनोपक्रीतं स्यात्। केनापि मुदितमानसेनानुग्रहाग्रहेण वा यजमानेनोपायनीकृतं भाति। अथ च समतीतः स समयः साम्प्रतिक-समय-समानः सर्वथा नासीत्। तदानीं तु यः कश्चनाऽकुलीनो दीनोऽपि रौप्याभरण-भूरिभारभरणः पदे पदेऽक्षिलक्षीक्रियते स्म। इमे सम्मार्जकास्तु विशेषेण रजतरुचयोऽजायन्त' इति।

९. विधिवशात् तदानीमेव पद्मपतेः पत्नी प्राप्ता। कटके प्रदर्शयन् पत्नीं प्रति प्राह पण्डितः— 'किं दानादानमिदं फलदं, न वर्तते? केवलं पञ्चदशरूप्यकाणि प्रतिपादितानि देवदासाय' इति।

पत्नी प्राह— 'यर्हि भवान् देवालयं गतोऽभूत् तदानीमप्यसौ तपस्वी दुःखाघात इहायातः। तस्य तनुजस्तीव्रमातुर इति श्रूयते। 'मङ्गला' महत्तरिका समुदीरयन्ती समभूद् यद् बालोऽसौ मन्दं मन्दं मूर्छा-मृत्युमुखे मज्जति। ईश्वर एव तं रक्षितुं क्षमः' इति।

पण्डितपद्मपतिनाऽऽकर्ण्यापि तद् नावधानमदायि। तन्मनसि तदानीमपि कटक-व्यवहार-वार्तैव व्यचेष्टत। स एवमचिन्तयत्— 'अद्य शुभशाते प्रभाते प्रायश्चत्वारिंशत् परिमितानां रूप्यकाणां लाभो लब्धः। सौभाग्यभाजः सुलक्षणस्य कस्यचिदद्य श्रीमुखमालोकि' इति। पर-गेहेऽग्निं दत्त्वा तापयति स्वतनुं स्वार्थपरः।

१०. परं तावदेव देवताप्रकृतिस्तत्पत्नी पुनः प्राह—'देवदासो दूरं दुःखदूनो भविष्यति। तस्य तु हृदयमप्यमन्दं क्रन्दत् स्यात्। पातक-परिपाकेण वराकेण स्वकीयमन्तिमं वस्त्वपीह निक्षिप्तम्' इति। पुनः पण्डितपद्मपतिं प्रति प्रादुर्भूत पाप-परिवाद-प्रज्ञा प्रवदितुं प्रारेभे— 'त्वया त्विदमपि कर्तुं नाशक्यत यद् विपत्पारावार-पतिताय तस्मै दश वा पञ्च वा रूप्यकाणि प्रियपुत्रोपचाराय प्रदीयेरन्। कूटेन कटके समादाय किं प्रभूता विभूतिः सम्भूता? त्वयका तु परम-प्रभु-पूजा-पाठ-प्रार्थन-प्रमुख-प्रपञ्च-पदवी परेषां प्रवञ्चनायैव प्रपन्ना प्रतिभाति' इति। तथा चानुश्रूयते—

काला: कराला: कलुषान्तराला:, कण्ठाक्षमालास्तिलकाङ्कभाला:।
दम्भेन सत्यानि च निह्नुवाना:, धृतार्यवेषा: कुटिला भवन्ति ॥१२॥ इति।

११. तदनु प्रियाया अमूदृशं घोरं कठोरमरोचनं च वचनमाकर्ण्य पण्डित-पद्मपतिरनिरोधेन क्रोधेन नितान्तमाक्रान्तः सन् द्रुतमुदतीतरत्— 'देवि! ईदृशे सुधर्मणि करुणाकर्मणि व्यापृतश्चेद् वर्तिष्ये, अनुक्षणं क्षपिताक्षया बुभुक्षया क्षयाभिमुखः क्षिप्रं सम्पत्स्ये। त्वं च यैरेतैः हिरणाभरणैर्भारिणी हरिणीव हारिणी सविभ्रमं भ्रमसि तानि मयाऽपि देवदासवत् कस्यापि कुसीदिकस्य पार्श्वे निक्षेप्तव्यानि स्युः। मुग्धे! जगदिदम्। पूजन-भजन-यजनायोजनादेर्नायमर्थो यत् संसार-व्यवहार-परिहार एव विधीयेत। देवदासः स्वार्थविशेष-विवशोऽभूद्। अत एवासौ मामुपेयिवान्। इतरथा स तु मे प्रतिच्छायामपि प्रेक्ष्य चपलं पलायते। जानेऽहं यत् स मे स्नान-ध्यान-चन्दन-चर्चादिकमालोच्य निभृतमुपहसति। खलः खल्वयं खलपूः इति। स्मर्यते चैवम्—

१२. **व्यापारैर्विविधैर्वाक्यैः, व्याज-बीजक-वापकाः।**
तन्वन्ति तेजितांस्तर्कान्, स्थगाः स्वार्थस्य सिद्धये ॥ १३ ॥ इति।

परमियद् युक्तिविधानं समाधानं श्रुत्वापि पण्डितपत्नी सर्वथा न सन्तुतोष। सा स्वामिनस्तथाविधं मर्मविधं व्यवहारं नृशंसाचारं व्यज्ञासीत्। अवश्यममानुष्यं परलोक-घातकं महापातकमिदमभूत्। देवदासेन यद् विचारितमुच्चारितं च, तत् सत्यानुस्यूतं पुण्यतर्कपूतं च।

एतस्मिन्नेवान्तरे पद्मपतिना प्रोक्तम्— 'सम्प्रति कटकद्वयीमिमां नतरां तस्मै प्रदातास्मि। षष्टिरूप्यकाणीमानि निष्प्रयोजनमेव मया नो विनाशनीयानि। मयापि तावत् किञ्चिदुपार्जनीयम्' इति। उपेक्षन्ते हि परहितं दयारहिताः।

१३. पत्नी रूक्षतया प्रहसन्ती प्राह— 'तव तु क्रयविक्रयिकस्य कस्यचित् कुले जन्म युक्तमुपयुक्तं चाभविष्यत्, न तु ब्राह्मणस्य। इदमेवानाद्रत्यं कृत्यं नित्यं करणीयं चेद् इमानि प्रथिष्ठानि पुस्तानि पटेन परिवेष्ट्य पेटिकायां प्रक्षिप। धर्मस्यार्थस्तावदस्ति कृपणेषु कृपा, सा च सुकृतसमेता त्वत्तो दूरापेता' इति। सा भूयोऽभाणीत्— 'आयतिसमये देवदासो रूप्यकाण्यादायायाति चेत्, त्वं च कटके न प्रत्यावर्तयसि, किमिदं कौटिल्यं किल्विषं च न स्यात्? कुत्सिते कुसीदकर्मणि तु त्वया धनपतरायोऽपि पराकृतः। हा! प्रत्यहं प्रेक्षेऽहं वार्धुष्यावर्तपतितेन त्वया सकलाः कलोपजीविनो जगतीजना जिताः। नेदं विस्मरणीयं यत् पद्मा नैकसद्माश्रिता तिष्ठति। कपि-कल्पकृत्या सा पारिप्लवतां प्रथयन्ती कदाचिदुपैति कदाचिदपैति। उच्यतेऽपि—

१४. द्रविणोपार्जनायैव, जना जानन्ति जीवनम्।
द्रविणं जीवनायेति, याथार्थ्यं जानते न ते॥ १४॥

किं च—

पापप्रकारैः पुरुषाः प्रमत्ताः, द्रव्याणि निद्रास्वपि पुञ्जयन्तः।
प्रहाय तान्यत्र हि पापपूगानादाय लोकान्तरमाश्रयन्ति॥ १५॥

अपि च—

धेनुं च धान्यं च धनं च मत्ता आम्रेडयन्तः सततं पुमांसः।
समूहमाना इह साधनानि, हा! विध्यधीना निधनं लभन्ते॥१६॥ इति।

अनेन प्रकारेण साक्षात् स्वभार्याया भूरि-भर्त्सन-भरितां भणितिमाकर्ण्य पद्मपतेर्विवेको वैकृतो वै कृतोऽबोभूयत, त्रिशिख-भ्रुकुटि-लेखामालं भालं च करालं समजायत। ततोऽन्तराविर्भूतामर्ष-प्रकर्ष-सङ्घर्षः स गर्जद्-गलगह्वरां गिरमगादीत्—'अद्यावधि मया नावेदि यद् दयिता देवी देहिनी दया विद्यते। सम्प्रति सम्प्रतिष्ठा-भाजनं जनं धर्ममर्मोपदिदिक्षति।

प्रां महामोह-मलीमसमानसं मूर्खं मलिम्लुचं मनसि मन्यमानाऽऽमनति— 'कल्मषमिदम्, क्रौर्यमिदम्, कार्कश्यमिदम् ... ... हुम्' इति । तदुक्तं नयवेदिभिः—

प्रवर्तमानस्य कुकर्ममार्गे, वाञ्छाविरुद्धं विदुरोऽपि वक्ता ।
स्याच्चेदमर्षानल-दीपनाय, प्रायेण सञ्जायत एव तस्य ॥१७॥ इति ।

१५. पुण्य-प्रकृतिः पण्डितपत्नी पुनरपि पर-प्रमाणं प्रेमाणं प्रकटयन्ती प्रावोचत् — 'नाथ! नाहमुपदिशामि, नाऽथ व्यथयामि, केवलं कोमलतया कल्याणं किमपि कथयामि । यथास्त्वं यत् किमप्याचर, मा परिचर परमात्मानम्, परमात्मानं मा प्रवञ्चय, पापपुञ्ज-प्रतारणां मा प्रपञ्चय, पातक-पताकां नोदञ्चय, लोकलोचनान्धङ्करणामाडम्बर-धूलिं नोद्धूलय, धर्ममूलं नोन्मूलय, दिष्टमनिष्टं च नो स्थूलय' इति ।

एवं धिक्कार-निकार-प्रवण-वचन-श्रवणसमकालमेव सहसा पद्म-पतिः प्रभूतं कोपाटोप-लोहित-लोचनश्चेतश्चाञ्चल्यं प्रकटयन् प्रावोचत्— 'अलम्, अलम्, पापेनातिप्रलापेन । क्षुद्रं मुद्रय मुखम्, नियन्त्रय निस्सारान् दुराचारान् विचारान्, मा द्राघय दोषवीभत्सं साहसम् । स्नेह-संस्कृतं स्वादिमसमवेतं सम्पन्नमन्नं लभ्यते येन निसर्गत एव प्रज्ञापि ते ज्ञापितेव प्रथीयांसं पटिमानं प्रकटयति । नेदं विनैव खेदं सौभाग्यं सुलभं स्याच्चेद् ज्ञायेत कीदृशं भवति भृशं दीने दयादर्शनम्' इति । हन्त! पापं धनं च समं समुपार्जयन्ति स्वार्थिनः ।

१६. तद्वाचमाकर्ण्य किञ्चित् कुपिता पण्डितपत्नी प्रावादीत्— 'किं त्वमेव ममेमं योगक्षेमं वहसि ? हन्ताहन्तु भूरि-भव्य-भागधेय-भावितं भोगभरं भुञ्जे । किं विस्मृतं तत्, अहं यद्दिनेऽस्मिन् सदने समागता तदात्र पात्रचतुष्कमपि नासीत् । अश्रीमतां सतां श्रीमतां जठर-पेट-भरणाय भोजनव्यवस्थापि दुष्कराऽभूत् । अद्यश्वीनोपवासचिन्ताचान्तचेतसामेव दीनानां दिनानि नो व्यत्यैषुः । विवशैः श्वोवसीयाय शिवः प्रतिपलं प्रार्थ्यत' इति । पुनः प्राह – 'अहं तु सत्यधर्मावाश्रित्य प्रायेण प्रतिवासरमुपवास-रतापि नतरां तापिता जीवितव्यतिक्रमं विधातुमलम् । परमिदानीं त्वमनुक्रमं प्राप्य भ्रमं नितरां हृदयहीनतां पापपीनतां चाधिगच्छन्नसीति दिवसे दिवसे दोदूयते हृदयं मदीयम् । त्वं तु दूरं दुरित-दूषितं दुर्गति-द्वारं केवलं द्रव्यसारं संसारं दरीदृश्यसे' इति ।

१७. सहसाऽऽश्चर्यचकितः पण्डितः प्रावोचत्—'परमेश्वरि !!!' इति । परमेश्वर्याऽवादि— 'अहमृतममृतं हितं च तिरोहितं न विधास्यामि । अद्य

त्वया दुरितमाचरितम्। तस्य तपस्विनो दुःख-दैन्यावासस्य देवदासस्य केवलः कुमारः क्षणे क्षणे कराल-काल-कर-कृष्यमाण-कुन्तलकलापः, शनैः शनैः शोष्यमाण-शेष-श्वास-श्रेणिः, शोणित-शक्ति-शून्य-शिथिल-शिशिर-शरीरः, शय्यायां शाशय्यते। त्वयका च स एव दैवमारितः प्रतारितः। त्वमेतेन प्रच्छन्न-प्रवञ्चन-पाटवेन, परमेश-पूजा-पाठ-पाण्डित्य-प्रदर्शनेन, चूडा-चन्दन-चर्चित-चर्म-चारिम्णा, चित्र-चेल-चोल-चमत्कारेण, चपल-चारित्र-चातुर्यचर्या-चेष्टाचक्रेण च परपुरुषान् प्रतारयितुं प्रभवसि, न तु माम्। एवम्प्रकारः कदाचारः सोऽहन्ताहतो निहन्ता हन्त! मन्यते। पर्याप्तं परिहृत-प्रयोजनं तस्य पावनपुस्तपरिशीलनम्। अद्य दयनीय-दारक-दशा-दुःखितस्य दुर्विधस्याशिषोऽवाप्तेः शुभङ्करोऽवसरो विपरीत-विधि-विलासात् सहसा ते हस्तादपयातः। धन-धान्य-धेनु-धाम-धरा-धूमिका-ऽन्धितधिया, लक्ष्मी-लव-लाभ-लोभ-लिप्त-लोचनेन, लोलेन त्वया तीव्र-त्रासस्य देवदासस्य नैराश्यायनयोर्नयनयोर्न निर्भरं निर्यन् नीरं न्यरूपि, न च प्रचुर-पीडारूढं किङ्कर्त्तव्यविमूढं नितान्तमशान्तं स्वान्तम्। अहं सत्यं वच्मि—'अद्य देहधरः परमेश्वरः तवागार-द्वारमुपेत्यापि हा! आशाहीनो दीनो विनिवृत्तः। यस्य महामायस्य धनपतरायस्य सकाशे प्रभूता विभूतिः सम्भूता रूप्यकाणां च सहस्राणि विद्यन्ते, नगरेऽत्र कस्तमादरदृशा समुदीक्षते। को नाम तं मान्यं मानवं मन्यते। आबालवृद्धं जनास्तं जलौका-जन्तुं जल्पन्तो जीवज्जीवजक्षणं जातुधानं, जिह्मजिह्वं जालिकं जघन्यं च जानन्ति। गतानि कतिपयान्यहानि यदा तस्य मन्दिरं महा-साहसिकैर्मलिम्लुचैर्मुष्यमाणमभूत् तदा तस्य साहाय्य-सम्पादनाय संरक्षणाय च नैकोऽपि नगरनिवासी बाह्यो वासीदुपागतः। दीयताम्, आदीयतां चेति विनिमयव्यापारः सोऽयं संसारः। न दास्यसि चेत् कस्त्वामुपायास्यति। किं नाकर्णितवानसि, प्रायेण पुरवासिनः प्रवासिनश्च पुमांसः प्रवदन्ति यत् पण्डितः पद्मपतिः वणिग्व्यापारव्यापृतो वैश्यो बुभूषति। वराकः काकः कल-हंसाचार-कामनीयकं कामयते' इति व्याहृत्य कोपाटोपपरिपूरिता परमेश्वरी ततोऽपसृत्य भवनकोणेऽजस्रमस्रासार-स्राविणी समुपाविशत्। यतो हि—

१८. वैगुण्यमाप्ते सति जीवितेशे, देशे च तस्य प्रथितेऽपवादे।
स्यात् सद्वधूनां हृदयं विभिन्नं, खिन्नं कुकूलानल-पच्यमानम्॥१८॥

इति। पुण्यः पत्न्युपदेशः पत्युः प्रकृतिं परिवर्तयति।

कतिपयकालकलानन्तरं सहसा पण्डितपद्मपतिर्म्लानिं म्लानिं चाभजत। तस्य चिराच्चाण्डालचण्डं चेतश्चकम्पे। सोऽचिन्तयत्—व्यक्त-

वादिन्या विषादिन्या परमेश्वर्या युगपदेव यदवाचि तन्मन्ये मम दुष्कृतानामितिवृत्तमेवोन्मीलितमिति। प्राक् प्रियंवदापि सा एतावत् निष्प्रणया विगतविनयाऽदयहृदया च जाता यत् संसाराचारविचार-सीमां समुत्क्रम्य कथं किञ्च पति-विषये कथनीयमिति मुहूर्त्तमपि तया कुपितया न विचारितम्। इदं तु समस्त-समाज-सम्मतं सत्यं यत् परमेश्वर्याः समागमे सत्येव पण्डित-पद्मपतेः सदनं सुखसौभाग्य-सम्पन्नं सम्पन्नम्, सकलं कुशलं च वैभव-विख्याति-विलास-समेतं तन्निकेते समवेतम्। परमेश्वर्या तु तथ्यमिदं तदैवोदीरितम्, परं तेन नगरे प्रभूताः पूरुषाः प्रमदाश्च परस्परं प्रवादपराः प्रेक्षिताः परिश्रुताश्च—'पण्डित-पद्मपते! पत्नी ते विनीतेयं शरीरिणी श्रीरेव, या तव सदनं समायान्ती सुरभिसमय-सुभगतामपि स्वेन सममेव समानैषीत्' इति। उक्तं च—

१९. **पतिव्रताः पूतपदप्रहारैः, प्रसह्य पद्मां परिपीडयन्त्यः।**
साकं प्रमोदैर्विनिवेशयन्ति, प्रायेण प्राणेशनिवेशनेषु ॥ १९ ॥

अथ च—

यासां सतीनां प्रणयोपहारैः, पूजा पतीनां परमोऽभिलाषः।
तासां मनो यत्र भवेदशान्तं, तद्याति नाशं नियतं निशान्तम् ॥२०॥ इति।

अथैवं दिवसोऽवसितः। अजनि विसृमर-तिमिरा जनी-जनोद्वेजनी रजनी। परमेश्वरी सुचिरात् सुष्वाप। परं पद्मपतेः प्रनष्टशयने नयने निरन्तरं नभसि नक्षत्रनिकरं निरैक्षेताम्। स पेलव-पट-पिहिताङ्के पल्यङ्के प्रतिपलं पौनःपुन्येन पार्श्व-परिवर्तने प्रावर्तत। स कर्हिचित् चिलिमीलिकायमाने विपुलाकुलत्वक्षेत्रे नेत्रे न्यमिमीलत् कर्हिचिच्चोदमिमीलत्। केनापि प्रतोदैः प्रचोद्यमानमिव, वेधन्या विध्यमानमिव च तस्य मानसं भूयोऽदूयत। नितान्तं तान्तोऽसावभूतपूर्वां बहुलां विह्वलतामन्तरन्वभूत्। प्राग् व्यतीतेषु बहुषु वत्सरेषु यदा पद्मपतेः सोदरः स्वल्पवयस्क एवान्तकान्तिकमुपेतः तदा तस्यार्थिकी दशा सुतरां शोचनीयाऽभूत्। दैन्यदमितं सदनममितं दयनीयमजायत। सम्यगुपचारव्यवस्थाया विधातुमशक्यत्वादेव तस्य सोदर्यः पञ्चत्वं प्रापत्। प्रणति-पुरस्कृतं प्रणयप्रदर्शनं प्राज्यं प्रविधाय, सचाटुवादं प्रार्थितेनापि सजायेन धनपतरायेण तद्भ्रातुरुपचारार्थं पञ्चाशद् रूप्यकाणि न प्रादायिषत। सम्प्रति पद्मपतेः पुरतः परमेश्वर्या प्रोक्ता प्रवृत्तिरासीत्। सोऽचिन्तयद्—'देवदासं प्रति प्रातर्यन्मयाऽभिहितम्, तन्नोचितं विहितम्। मुद्रा-ममत्व-मुषित-मनसा मया घृणिता निर्घृणता प्रकाशीकृता। परमेश्वर-पूजन-प्रवणेनापि व्यवहारतोऽपुण्यं

नैपुण्यं प्रत्यक्षीकृतम्। पावनं मानवं जीवनं न चरितार्थतां नीतम्। विगीतं मे जन्म वीतम्। तदुक्तम्—

२०. प्राणिषु प्राप्यते पुंस्त्वं, पुण्यपुञ्जैः पुरातनैः।
विप्रत्वं तत्र निष्पापं, दुष्प्रापं सर्वथोच्यते॥ २१॥

अपि च—

प्राप्यापि ये ब्राह्मणतां न तादज् जना यतन्ते सुकृतार्जनाय।
ते पापपुञ्जैः प्रसभं प्रणुन्नाः, पतन्ति घोरे निरये रयेण॥२२॥ इति।

सायं सन्ध्या-समये स केनाप्युपेत्य विज्ञापितोऽभूद् यद् गताशो देवदासः स्वावासद्वारि समुपविष्टो वाष्पविप्लुत-विषण्ण-वदनो निश्शब्दमन्द-मक्रन्दत्। गरिष्ठेनागदङ्कारेणागत्याऽगादि— 'गाढं गम्भीरगतिर्गदः। अचिकित्स्यस्य प्राप्तकालस्यास्य बालस्य, विचिकित्सास्पदतां प्राप्ता अत्राणाः प्राणाः प्रायेण' इति। परमेशोऽपि हि दीनेष्वेव प्रकोपं प्रदर्शयति।

तस्मिन्नेव निरवशेष-संसार-संवेश-सुखसमये समये दिवसावसानावसित-वसित-व्यवसायः प्रायः प्राप्तविश्रामो महाग्रामोऽसौ प्राज्यं मूकिम-साम्राज्यं समन्वभूत्। प्रतोलीष्वन्तरान्तरा दन्तादन्ति योधिनः क्रोधिनः कुक्कुरा अबुक्कन्। क्वचित् क्वचिद् दिग्देशेषु व्यराविषुः दिवातन-चेतना-महानिद्रा-शम्बूका इव घूकाः। उन्निद्रयन्ति स्म तमिस्रसंवासं सन्त्रासं झाटझुण्टेषु झिल्लिका-झाङ्काराः। श्रवणशष्कुलीं श्रयन्ति स्म सर्वतः सदनेभ्यः समुदिताः सुखसुप्तानां सूत्काराः। समपद्यन्त कवलिताऽऽशा-ऽऽकाशाः कीनाश-निकाशा अपाराः सान्द्रान्धकाराः।

२१. तदा व्यक्तं विश्वतो व्यस्तता-विविक्तं विश्वं वीक्ष्य पण्डितः पद्मपतिः पेटिका-पट्टपुटमुद्घाट्य धीरं कटक-द्वितयं कियन्त्यपि रूप्यकाणि च निष्काल्य सावधानं चोलक-कोशे न्यधात्। तदन्तःकरणे हि सहजं ब्राह्मण्यं जागरितमजायत। ततोऽसौ पित्तल-कील कोरक-खचित-पर्वखण्डं दीर्घदण्डमादाय महत्तरविशिखां प्राविक्षत्। तत्र यावदसौ देवदासावास-सम्मुखे प्रापत् तावत् तिमिरान्तरितेन तेन देवदासः तत्कलत्रं च तत्र चेष्टाहीनस्य मोहाधीनस्य मञ्चे विलीनस्यातिक्षीणस्य दीनस्य तनयस्य निकटे समुपविष्टौ विकटव्यथा-वैक्लव्याविष्टौ सन्दृष्टौ। विषमविधि-विधीयमान-वंशविनाशौ निराशौ उदश्रुविलोचनौ, शिवेतर-शङ्का-शोचनौ दम्पती तूष्णीमतिष्ठताम्। परमन्तरान्तरा देवदासगेहिनी देहिनीवाधिः दूरं दूना दुर्वारान् दीर्घाकारान् हाकारानमुञ्चत्। असह्या खलु पुत्रवेदना।

२२. इदमालोच्य पद्मपतिः प्रावोचत्— 'देवदास!' इति। देवदासस्तदाकर्ण्योदस्थाद् बहिश्चायासीत्। तं प्रेक्षमाणेन पण्डितेन पृष्टम्—'कीदृशी दशा दारकस्य?' इति। भाग्यभिन्नेन खिन्नेन देवदासेन गाढं ग्रस्तया गिराऽगादि—'महाराज! दुरवस्था वर्तते' इति। चकितचेताः स चाचिन्तयत्—'वर्णाव्यवस्थान्धविश्वासी श्रोत्रे पवित्रं सावित्री-सूत्रमारोप्य मूत्रोत्सर्गी, तिलकमण्डितः सोऽयं पण्डितः समुपरुद्ध-जगद्यात्रेऽस्मिन्नर्धरात्रे कुपात्रे मयि किं विपद्वज्रं विनिपातयितुमत्रागतः? किं वा कटके प्रत्यावर्तयितुं रूप्यकाणि चादातुं तु नायातः?' इति। परं तावदेव पद्मपतिना प्रोक्तम्— 'देवदास! प्राणधरणं मरणं च परमेश्वरायत्तम्। परमनुमन्यसे चेत्, पश्येयं सामयं ते तनयम्?' इति।

२३. तदाकर्ण्य देवदासो मनागुदितोल्लासो द्रुतमुदीरयामास—'महाराज! म्लेच्छस्य मानुष-मशकस्य मम मलीमसे मन्दिरे मङ्गलमूलानां पातकमुषां श्रीजुषां पावन-पाद-पाथोज-पातोऽपि प्राक्तन-पुण्य-पुञ्ज-परिणामः। इदं तु परमं सौभाग्यं सूनुना साकं समेषामेषामस्माकम्' इति।

परं पद्मपतिर्दूरं दयोद्रेकोदय-द्रावितहृदयो द्रुतं प्रकोष्ठे प्राविशत्। तत्र च पटच्चर-प्रावृते त्रुटित-तन्तुततित्वान्मग्नमध्ये मलिने मञ्चके लेट्यन्तं, बालभावेऽपि बहुल-वलिवलयितवदनं, शोणित-शून्यत्वात् शीतिम्ना शून्यमिव शुष्कशरीरं, निरालोक-लीनलोचनं, श्वासशेषं, निकटकालं, कृपणकङ्कालं व्यलोकयत्। तमभितो भूतले विकीर्णानि विशीर्णानि द्वित्राणि पित्तल-पात्राणि, भग्नभूयोभागानि कतिपयानि मृन्मयानि कुम्भादीनि भाण्डानि, कुञ्चितकोणा कुशकाशमयी कटद्वयी, शिलोञ्छशितशूकैः पाटितप्रायपटः प्रसेवः, दैन्य-दौर्भाग्य-दर्शनाः परिमिताः परे पदार्थाश्च प्रैक्ष्यन्त। यदाहु:—

२४. **निरस्तभोगा अशिवा वियोगाः, योगेऽपि रोगा घटना अयोगाः।**
स्तोका न शोकाः स्युरथो विशेषाः, क्लेशा निवेशेषु सदाऽधनानाम्॥२३॥

किञ्च—

मुक्त्वा गृहं यत् कमलाऽपयाति, वर्णत्रयीमभ्युपगम्य तस्याः।
अनुक्रमं तत्र विशन्ति सत्वरं, कष्टं च तावन्मरणं च लाघवम्॥२४॥
इति।

तावदेव तेन पण्डितेन पटपुटात् कटके पञ्चाशद् रूप्यकाणि च निभृतं निष्कास्य न्यगादि — 'प्रियदेवदास! अद्य मे मनसि निषण्णः कोऽपि मां धीरं धिक्करोतीव, पुनः पुनः प्रेरयतीव, गम्भीरमुदीरयतीव च किञ्चित्।

गृहाणेदं कटकद्वयम् इमानि च पञ्चाशद् रूप्यकाणि सौभाग्य-विशालभालस्य बालस्यास्योपचारव्यवस्थां विधेहि । भयावहे भवितव्यता-भ्रमरके भ्रष्टस्य भवतो भगवान् भूतभावनो भावुकं भावयिष्यति । यतो हि—

२५. **विपद्-ग्रस्तान् विहस्तांश्च, विभुर्वहति वस्तुतः ।**
नाममात्रेण नीयन्ते, नरास्तेन निमित्तताम् ॥ २५ ॥

इत्यभिधान-समकालमेवोपानद्युगलमवतार्य व्याधि - विह्वलस्य बालस्य मूर्धनि प्रणय-पूर्वकं पाणिं प्रणिधाय प्रार्थयत— 'प्रभो! मयाद्यावधि यावदपि धर्मकर्म विहितम्, यदपि च पूजा-पाठ-प्रभृति पुण्यमाचरितम् तत्फलव्ययेनायं कुण्डलितालको बालको निरामयो मङ्गलमयो भूयाद्' इति। फलन्ति वै हृन्निर्गता आशीर्वादाः ।

तस्मिन्नेव शुभलक्षणे क्षणे धर्म-समाज-मर्यादामुत्क्रम्य प्रादुष्कृतोल्लासो देवदासो नामितकायः सजायः पर्यश्रुः पद्मपतेः पादयोरपतत् । परं पण्डितपद्मपतिः बहुल-वैह्वल्य-विवर्णवदनः, प्रभूत-भवभावुक-भावनाभिभूतोऽभाणीत्— 'देवदास! सर्वेषामस्माकं समानो जीवनोद्देशः, कल्पित एष देश-वर्णादि-विशेषः, सैव संसारसम्बन्धिनी सनातनी सरणिः, अभिन्ना जन्मदा धरणिः । तस्मान् मा स्म चिन्तातुरो भूः । सम्पूर्णां सम्पदं समर्पयिष्यामि सुतस्य ते संरक्षणाय' इति ।

२६. तदनु पद्मपतिः वाष्प-वारि-विप्लावित-विलोचनः सपदि स्वसदनं प्रत्यावर्तिष्ट । यावदेवासौ सुकुमाराङ्के पर्यङ्के स्वापाय समुपविष्टस्तावदेवाह्नाय समुत्थाय परमेश्वरी तमुपेत्य प्रोवाच— 'नाथ! अद्य परं प्रीत्युपेतं मे चेतो भवतः पादप्रक्षालन-पावितं पीयूष-प्रतिस्पर्धितां प्राप्तं पयः पिपासति, निर्नतिषति च मूर्ध्ना समुत्क्षिप्य भवन्तम् । वधूनां साद्गुण्योद्भवेषु धवेषु ध्रुवमखर्वो गर्वो जायते, स एवाद्याऽनिगाद्यो भूयोऽनुभूयते मयापि । इतो यदा भवानितो देवदासगेहं तदाहमपि भवदनुसरणमकार्षम् । आलोकितमाकर्णितं चामुखतो भरतवाक्यावधि समस्तं प्रशस्तं वृत्तं संवृत्तम् । एषाहमपि पलात् प्राक् प्रतिनिवृत्तास्मि ततः। स्वामिन्! सम्प्रति सुखं विश्रम्यताम् । निर्वाण-भूयिष्ठा विभावरी' इति।

२७. अथ पुरस्य प्रकोष्ठ-परम्परासु, प्रासाद-पालीषु, पल्लीषु, प्रतोलीषु, प्राङ्गणेषु, पदवीषु, पर्वतप्रदेशेषु, पाटीरेषु, प्रवितत-पत्रपुञ्ज-पाटेषु, पादपेषु, प्रतानिनीषु, पुष्करिणीषु, पयस्विनीषु, प्रस्रवणेषु, पुरस्तात् पश्चात् पार्श्वयोः च परस्तात् पृथिव्यां परितः-प्रपतत्प्रभाकर-पाटल-प्रकाश-पीयूषे प्रत्यूषे प्रपन्ने, प्रगेतनीं पवित्रतां प्राप्य परिहित-पाण्डुर-परिच्छदः

पण्डित-पद्मपतिः पूजार्थं परेश्वर-प्रासादं प्रायात्। तत्र परात्-परेश्वर-पाद-पद्म-परिचरण-परायणो यथापूर्वं प्रातस्तनं सान्ध्यं विधिं परिसमाप्य पूजापात्राणि पाणिभ्यां परिगृह्य पथि 'पाहि प्रभो! प्रसीद विभो!' इति पुनः पुनः पठन् नैजं निवेशनं निवृत्तः। तं प्रेक्ष्य परमेश्वरी प्राह—'प्राणेश! फलिता तवाशीराशिः। नीरोगतां गतो देवदासदारकः। तत्र कृतगमया मया स्वयं समं समालोकि' इति।

२८. परमां प्रसत्तिं प्रकटयता पण्डितेन प्रावाचि—'प्रिये परमेश्वरि! परं पुण्यं प्रणीतं श्रीमत्या भवत्या। अमानेन ज्ञानदानेन धावितं मे दुष्कृतम्, पावितं मे जीवितम्। अपरं चेदं चेतसि चेदन्यथा न मन्यसे किञ्चिदावेदयामि दयामित्रीकृतां सौम्यमतिं श्रीमतीम्। 'त्वं यदा तदा कथान्तर-प्रसङ्गेष्वात्मनोऽपुत्रत्वाधिं विवृणोषि। तस्माद् गतरात्रौ यदाहं देवदासस्यावासं गत आसं तदैव तव स्वीकृतिं सम्मतिं च विनैव तस्य तनयो मया दत्त्रिम-पुत्रत्वेन प्रतिपन्नः। तदुचितमनुचितं वेदमाचरितमिति विषये किं तवाभिमतं मतम्?' इति।

तद्वाचमाचम्य स्मेरास्य-सरसिजेन सुधासारमिव सर्वतः सिञ्चन्ती परमेश्वरी प्रत्यवादीत्—'नाथ! मन्ये मम हृदयेनैव सह मन्त्रितं प्राक्तन-पुण्यफल-लाभवता भवता। कल्याणाभिनिवेशिना विधीयमाने प्रियङ्करे कर्मणि कस्य वराकस्य वैमत्यं सम्भवति' इति।

२९. अथ पण्डित-पद्मपतिः परिपाकोन्मुखैः पुरातनैः पुण्यपुञ्जैः पुष्कलं प्रेरितः पुनः परमेश्वरीं प्रत्याह--महिलामण्डलमाननीये! मानिनि! मुषितो मे मनोमालिन्यमूलो मानः, भ्रष्टो भववैभवोद्भवो भीषणो भ्रमः, तिरस्कृतं तत्त्वतिरोधानं तीव्रं तिमिरम्, नष्टा नितरां नम्रतानयन-निमीलिनी निरन्तरा नैष्ठुर्य-निद्रा। दैवदययाऽदूरे द्युतितो दिग्देशदर्शनो दृग्दूषण-द्रावणो दिवाकरः। अतः श्व एव देवदास-दारकाय यद्वाऽऽत्मन एव दारकाय समस्तां सम्पत्तिं समर्प्य संसारोत्सर्गोल्लासिनौ वनवासिनौ तपश्चर्यया पुण्य-पण्यं ब्राह्मण्यं सफलयिष्याव' इति। यदुक्तम्—

३०. फलप्रदानाय यदोन्मुखानि, पुण्यानि गुण्यानि भवन्ति तावत्।
स्याद् वैभवाच्चाथ भवाद् विरक्तिः, भवे भवेदङ्कुरिता च भक्तिः ॥२६॥
इति।

अनया रीत्या प्राक्तन-पातकपुञ्जैः प्रसभमुत्पथ-प्रवर्तिता अपि प्रशस्ताः पुमांसः परप्रेरणया प्रबोधिताः परलोकपीडा-परित्रस्ताः पापाचरणे

पश्चात्तापं प्रकटयन्तः पुण्यां पदवीं प्रतिगृह्य पुनः प्रियङ्करा दुःखदूनेषु दीनेषु दयां दर्शयन्तीति पद्मपति-पण्डितस्य दयादानावदानं मानवमात्र-मङ्गलाकूतं प्रमाणभूतम्' इति ।

हृदयोदया दया (२४)

१. अस्ति पञ्चाम्बुप्रदेशात् पूर्वस्यां दिशि परितः परिहित-दूर्वा-दर्भ-हरितिम-महितैः, गुल्मद्रुमविद्रुम-सुम-सौभाग्य-सहितैः, जनितापद-श्वापदशत-शरण्यारण्य-लावण्य-पिहितैः, असंख्यात-प्रस्तरपात-खात-सङ्घात-विकटैः, शिलोदर-सम्भूत-पूत-प्रपात-व्रात-मुखरितनिकटैः, पदे-पदे प्रादुष्कृत-प्रस्खलत्-पथिकपुञ्ज-प्रचारप्रचुरसङ्कटैः, समुच्छ्रित-पुच्छाङ्गारचूड-काकली-वाचालित-लताकुञ्जैः, परिभ्रमत्-प्राजनपाणि-पशुपोषक-पुरुषप्रमदा-पाद-प्रहति-प्रलुठत्-पाषाणपुञ्जैः, धूमभूम-पांसुपूर-पूति-प्रसारापेत-प्रतनु-प्रवातैः, प्रवण-पृष्ठ-प्रणिहित-पेटक-वन्धुरवर्त्म-गायद्-ग्रामगौरी-व्रातैः, प्रफुल्ल-प्रसून-प्रकर-प्रसरत्-परिमल-पूजित-पर्यटक-पथिक-प्रीतिपरम्पराप्रदैः, मध्ये-मध्ये मङ्क्तृ-मन्तुमोषणमुकुरामल-मधुरोदकोदर-महाह्रदैः, वृक्ष-वल्ली-विशेष-वीथी-वर्णवैविध्यविभा-विभाज्यैः, दूराम्बरान्त-नितान्तशान्त-मूकिम-साम्राज्यैः प्राज्यैः कुल्याभरणैः शीतिमशरणैः हृत्तापहरणैः पर्वतैः सर्वतः दन्तुरितदिगन्तः प्रान्तः हिमाचलो नाम ।

२. यत्र विद्यते प्रभूत-सेवोद्यानानुस्यूतम्, विपाशाऽम्बुपूतम् प्रदेश-प्रसाधनभूतम् कुलूतं नाम पत्तनम् ।

तत्रैकस्मिन् विगत-विलासवस्तुविरह-विषादे, परितः पीत-पाण्डु-प्रलेप-प्रसाधित-पार्श्वपादे प्रासादे पटपरिहिते पाषाणपट्टे परिविष्टे पयः-प्रभृतिके प्रातराशपदार्थे, सग्धये सद्यः सङ्गते समस्त-स्त्री-सुत-सन्तान-स्वजनसार्थे, सदनस्वामी सहसा सामान्येन समप्राक्षीत्— 'क्वास्ते पाञ्चालिका बालिका ?' इति ।

३. निपुणं निध्यात-निखिल शिशुजाता माता तत एव कर्णकण्डूति-करेण तारस्वरेण समबोधयत्— 'कात्यायनि ! अरे कात्यायनि ! क्वासि ? त्वरितमेहि, प्रत्युत्तरं देहि' इति । कुतोऽपि प्रतिवचनमनवाप्य चञ्चल-चेतनां तनयां गवेषयितुं सा शुचिशोभिनीं शाटीं शिरसि व्यवस्थापयन्ती शनकैरासनादुदस्थात्, कक्षात् कक्षमीक्षमाणा स्वगतं चाचिन्तयत्— 'किं

सा कमनीय-कण्ठालङ्कारकाङ्क्षिणी कलिका-केसर-कुसुमान्याहर्त्तुं कूर्दन्ती क्वापि कुल्या-कूलकाननं गता ? किं वा सह सखीसमुदायेन सञ्चरन्ती स्वभावतः स्वादिमसेविनो सरस-सेव-सङ्ग्राय सुदूरं समीहितं स्थानं संश्रिता ? आहोस्वित् कोकिलकलकण्ठी क्वचित् कुलकन्यकाकुले केलि-कोलाहल-कृत-कृतक-कलहाकुला कामतः कल्यावर्तकालातिक्रमं कुर्वाणा स्यात् ? अथवा—

४. **किं बलाद् बलिदानाय, बाला केनापि मे हृता ?।**
ऋक्षेण विक्षता यद्वा, स्खलित्वा पर्वते मृता ?॥ १॥ इति।

यतो हि युक्तमुक्तमभियुक्तैः—

चेतांसि यावन्ति भवन्ति पुंसां, स्नेहेन सिक्तानि च कोमलानि।
तावन्ति सम्बन्धि-सुहृत्सु नूनं, स्युः पापशङ्कासहितानि तानि॥ २॥

अपि च— **सुतरां कातरात्मनो मातरस्तु विशेषतः।**
स्युः परोक्षं गतेऽपत्ये सत्येकान्तत आकुलाः॥ ३॥ इति।

तस्मिन्नेवान्तरे तयोस्तनूजस्त्वरितमुपगम्य व्यजिज्ञपत्— 'राजपथे चपलपदा प्रयान्ती प्रेक्षिता मया कात्यायनी। कर-किसलय-कलित-कुसुम-करण्डा, दूरतो महेशमन्दिरं समया सा मयाऽऽहूतापि पुनः प्रतिवचन-प्रदान-कृपणा केवलं प्रहस्तमुद्यम्य धुन्वानाऽपायासीद्' इति।

५. कच्चित् पुनः सा प्राप्यावकाशं रम्भासेनायाः सकाशं तु न प्रयाता हठपक्षपाता मे जाता ? इति नितान्तं चिन्ताचान्तायाः भूयोभयाभि-भूया भस्त्रीभूत-हृदयायाः सद्मस्वामिन्याः विशालं भालं सस्वेदसीकरजालं समवर्तिष्ट। सा विवर्तमाना विदूरादेवावादीत्— 'मयाख्यातम्, अद्य भूयो भवतातिलालिता कात्यायनी मायिनीमुपयाता। लब्धस्तस्या दुर्ललनस्य वामः परिणामः ? किं सम्प्रति प्रतिविधानम् ?' इति।

दन्भूदष्ट इव सदनस्वामी सहसा भयविस्मयातिशयविकलीकृतः पुनः प्रावोचत्—'किमु पुनरपि गता कात्यायनी ?' इति।

गद्गदिका-गृहीतगलः, स्रवदक्षिजलः, प्रादुर्भूतभूयोदरः कात्यायनी-सहोदरः सत्वरं समुदतीतरत्— 'सा तु सुचिरात् तत्स्थानं प्रपन्ना स्यात्' इति। साम्प्रतं प्रतरां शोकशङ्काभिभूतेन तेन वस्तुस्थितिः सम्यक् समवगता। आत्मानमप्यसौ विहितविपुलापराधमिवान्वभूत्। सोऽधिकं धिक्कुर्वन्नात्मानं पुनः पुनः विमर्शं व्यधात्—'विभात-समये मया बहिर्वन-विहाराद् विवर्तमानेन कनीयसी स्वीया स्वसा स्वैरं सरण्यां सम्प्रयान्ती समालोकि, तदानीं तदानिनीषा किमिति मे मनसि न जागरिता जाता ? तां

प्रत्यानेतुं को नाम प्रयत्नो मयानुष्ठितः ? हा हन्त ! नाहं तदज्ञासिषं यत्रास्या यियासासीद्' इति ।

६. 'हे भगवन् ! सम्प्रति किं सम्प्रतिपत्स्यते ? इत्यायतमुच्छ्वसन् गेही देहीव शोकः कम्पसूचितभयेन शयद्वयेन शिरोऽवलम्ब्याधिमात्रशरणः, स्तब्धसकलकरणः, सतूलदुकूलवासने वेत्रासने निश्चलनिम्ननयनः समतिष्ठत । 'आः ! किं साम्प्रतं समापतिष्यतीत्युदात्तस्वरेण निःश्वासधाराधरेण विवृत-बहुल-विलापा, सुव्यक्तस्वान्त-सन्तापा, सकज्जलाक्षिजललेखालाञ्छित-कपोल-चोला, लोलाधरनासाग्रा, किङ्कर्तव्यविमूढचेतना, निकेतनाधीश्वरी ; कन्या-कल्याण-कामिनः स्वामिनः स्कन्धयोः मेदस्विवन्धयोः मन्दं पाणिद्वन्द्वं निधाय कथञ्चनात्मानं धारयितुमशकत् आत्मगतं च व्यचारयत्— 'पूर्वेद्युः यदा कात्यायनी तस्याः कुकृत्यकारिकाया अभिचारिकाया अपावनं भवनं गताऽभूत् तदा मारारि-मन्दिरोपासकः प्रधानो धर्मशासकः प्रकाशीकृत-पुष्कलदोषं रोषं प्रकटयामास । परं कल्ये यद् वृत्तं तदद्य न सम्भवति । अपराधक्षमापणो नाम पावनो वैशाख-सङ्क्रान्त्युत्सववारो वारं-वारं नायाति वत्सरे । अद्य यदा कर्णाकर्णिकयाऽसुखान्तः सोऽयं वृत्तान्तः सर्वत्र सङ्क्रान्तः सम्पत्स्यते, तदावश्यमवश्यानां विचित्र-विचारव्रजानां प्रजानां तु दुर्मोषो रौरवो रोषोऽस्तोकेन शोकेन दूरं दुःखाकुले कुलेऽस्मिन् निपतिष्यत्येव, परं परमेश्वरस्यापरिहार्यः प्रकोपो न विद्मः कं क्लेशविशेषमाविष्करिष्यति' इति । सत्यं चेदम्—

७. **कष्टं वसन्तः सुखमुल्लसन्तः, स्थितिष्वशेषासु सदैव सन्तः ।**
मा भूम तावत् कुहचिद् विगीताः, भवन्त्यतो धर्मविरोधभीताः ॥४॥

किं च—

नारातिभीतिं न च जातिभीतिं, न राजभीतिं न समाजभीतिम् ।
कदापि जानन्ति जना विलज्जाः, स्वलाभसंसाधनमात्रसज्जाः ॥ ५ ॥ इति ।

सा दशवर्षदेशीया, सहजसुकुमारस्वभावा, चारु-चञ्चल-चलना, प्रदिम-मञ्जिम-मण्डितमूर्त्तिः, सजीवेव पाञ्चालिका बालिका कात्यायनी कं जानीते विनीततरं प्रवञ्चन-प्रपञ्चाधारं विश्वव्यवहारम् ? इत्थमेव गतदिनेऽपि निवेदनं विनैव सा सारल्यमूर्तिः ऐन्द्रजालिक्या गर्हितं गृहं गताभूत् । तदुक्तम्—

स्वप्नेऽप्यविस्तारितदम्भजाला भवन्ति बाला मृदुतावताराः ।
तेषां पवित्रं हृदयं च देहं न्यगादि गेहं परमेश्वरस्य ॥ ६ ।
कापट्य-कौटिल्य-निरस्तसङ्गं सौहार्दसम्प्लावितमन्तरङ्गम् ।
प्रायः शिशूनां वचनं विशङ्कं सञ्जायते कर्म च निष्कलङ्कम् ॥ ७ ॥ इति ।

८. कल्ये कात्यायनी कुतोऽपि त्वरमाणा उपासना-सदनमुपाश्रिता। प्रमुख-पर्व-प्रार्थना-प्रतिपादनार्थं समवेत-समाज-सम्मर्द-सङ्कुले समुपासन-सद्मनि प्रधान-पूजाकारिणः पार्श्वे प्राप्य तस्य च पावनं प्रावरण-पटप्रदेशं प्रश्रय-प्रणय-प्रदर्शन-पुरस्सरं पाणिपङ्कजेन परामृश्य प्रावादीत्— 'दीना-बन्धुविहीना वराकी वृद्धा बहुतरां व्याधिता वर्तते। सा तु सुतरां क्षीणा समुत्थातुमप्यनलङ्कर्मीणा। पानीयादि-प्रदानायापि पार्श्वे तस्याः कश्चिन्न विद्यते। तस्या मङ्गलमयमनामयं कामयमानया मया पौनःपुन्येन प्रार्थितः पिनाकपाणिः परमेश्वरः। तस्य भविकाय भवानपि भूयो भगवन्तं भवं भिक्षताम्' इति।

तन्निशम्य शैशव-शक्ति-शमित इव, स्नेहसूत्र-संयमित इव, निर्भर-निष्ठा-नमित इव, गाढं गौरवं गमित इव, दयादानदमित इव, प्राप्त-प्रजामानः प्रधानः पूजाकारी पुष्पपराग-परिमिलितेन, परिमृदित-पाटीर-प्रलेप-परिमलितेन च पाणिना तस्याः कुसुमकोमलां कपोलपालिं पुनः-पुनः परामृशन् प्रदर्शयंश्च परां प्रेमपरम्परां पीयूषपूरकिरा गिरागादीत्— 'पुत्रिके! कामार्तां जरतीमधिकृत्य वार्तां वदसि?' इति।

९. अथ कृपणा करुणाकरणा कात्यायनी तु बालसुलभां सरलतां व्यञ्जयन्ती व्याजहार— 'सा या नगराद् बहिर्वर्तिनि करीरकण्टक-प्रावारे केदारे प्रतिवसति। सानेक-जीवजात-व्रातशरणभूता, अनुक्रोशानुस्यूता, व्य-सनसदना, निर्दशन-वदना, विगत-विषयरतिः, जरती रम्भासेना केनापि दीर्घ-दुःखमयेनामयेनाक्रान्ताऽशान्तान्तःकरणा सन्ततमार्ततरं स्वरं करोति' इति।

तदा तदाकर्ण्य प्रमुखः पूजाकारी सहसाक्रान्त इव, भ्रान्त इव भूयस्तरां, दूरमपसृत्य कमनीयां सुकुमारीं कुमारीं निर्भरं निर्भर्त्सयन् न्यगादीत्— 'किं त्वं तत्सकाशमगमः? हन्त! हन्त! नितरां मलिनतां नीतोऽहमपि दुर्विनीतायास्तेऽपवित्रतापात्रस्य गात्रस्य संस्पर्शेन' इति।

सारल्य-सुभगा कात्यायनी अचकथत्— 'सा तु साधुस्वभावा विधि-विधुरा वयोवृद्धा व्याधि-बाधिता विद्यतेऽद्यत्वे' इति।

१०. अत्रान्तरेऽन्तरेव दर-दरितेन, कात्यायनीं प्रियां पुत्रीं पश्चात् प्रवर्तयता पश्चात्ताप-परिपूरितेन पित्रा प्रावोचि— 'पूज्यपाद! महनीय-महात्मन्! अवितथं कथितमस्याः कमल-केसर-कोमल-काञ्चनालक-मालिकाया बालिकायाः। अनया नयापेतया योऽहितो विहितः तत्कृते क्लेयं मया क्रियासमभिहारेण क्षमायाचनाऽस्तु मनोमालिन्यापनोदाय प्रमोदाय च प्रभवतां भवताम्' इति।

'तथास्तु' इत्यभिदधानस्य प्रधानस्य पूजाकारिणो विहित-परहितस्य वैर-विरहितस्य पुरोहितस्य विशाले भाले रोषरेखा अद्यापि विद्यमाना अभूवन्। परं पूर्वेद्युः पावनं क्षमादान-दिनमासीत्। यदि पुरुषः परपुरुषस्य मन्तुं क्षन्तुं न क्षमते तदासौ पर-पुरुषादात्मापराधानां क्षमा-प्राप्त्याशां कथं नाम कर्तुमलन्तराम्। अस्मिन् पुण्ये पर्वणि घोरघातको महापातकोऽपि चेत् क्षमां याचेत सर्वथासौ क्षन्तव्यो जायते। तस्य जन्तोः मन्तोश्चर्चा चिन्तनं च न कश्चनाप्याचरति। ईदृशे कलङ्क-पङ्कधावने भविक-भावने पावने दिने मुग्धकन्यायाः कात्यायिन्या अपराधस्य क्षमा तत्पित्रा याचिता, अतः पुरोगः पुरोहितः प्रसभं क्षमा-प्रदाने विवशोऽभूद्' इति।

११. तदनु प्रकारान्तरेण प्रकोपं प्रकाशयता प्रधानपूजाकारिणा पुरोधसा प्रावादि— 'परमपावनी मायाविनी सा सर्वथा न क्षन्तव्या। तत्कृते परोऽपि चेत् कश्चिन्मां क्षमां याचिष्यते, न क्षंस्यते' इति।

अस्तु, तदर्थं किमर्थं कश्चन क्षमायाचनं करिष्यति। को नु जनो न जानीते यदसौ भवभावनस्य भगवतः पापवती भवति। अभिचार-सारोन्मादिनी साऽनीश्वरवादिनी जरण्डा रण्डा अकुतोभयमात्मानं मनुते। कल्लोलित-लावण्यावलेप-कराले कैशोर-काले माण्डव्य-नगरस्य गण्या पण्याङ्गना सैषा साम्प्रतं तपश्चर्यारम्भं दम्भं तनुते। व्यभिचारिणी अभि-चारिणी सम्प्रति सम्प्रतिपन्ना। लोकभीतिभूतया तया व्याघ्रा वृका वानरा वञ्चका व्याला विडाला वक्रवालधयश्च न जाने के के जनित-जनतापदाः श्वापदाः परिपालिताः सन्ति। एवमनुश्रूयतेऽनुभूयते च यद् भूतभक्षक-यक्षक-कालवेतालसमेताः प्रेता अपि प्रभूतास्तस्या वशीभूताः। घोराश्चोरा, महापातका घातकाः, संसृति-सन्तापाः पापाः, काका लुण्टाकाः परेऽपि चाशेषा देशद्वेषाः रुष्टाः क्रुष्टा दुष्टाश्च तस्याः शरणं शरणं यान्ति। ऐन्द्रजालिकी कालिकेयं न जाने कां ज्यानिं जनयेदिति साहसिकैरपि नद्ध-नाल-जालया पर्णशालया सह सा सहसा नाद्यापि भस्मसात् कृता। को वेत्ति यत् तया कदाचित् स्वपरिपन्थिन एव परिवर्त्य सारमेया वालेया भल्लूका घूकाश्च पालिताः सम्भवेयुरिति। अभिचारं हि भयागारं प्राहुः।

१२. किन्तु कथ्यं तथ्यं त्विदं यदित्थं नगर-नेदिष्ठे वसिते वसन्त्या अपि तस्या वृद्धाया वृत्तविषये वास्तविकतां कोऽपि न वेद। उच्चावचानि वचनानि तद्विषये समुच्चारयन्तो धीरा अपि तस्याः कुटीरस्य करीर-प्राचीरमपि काक्षेणापीक्षितुं न क्षमन्ते। विग्रहिणी विभीषिका वयोवृद्धासौ लोकानां कृते। परिवर्धयन्ति प्रजासु परित्रासं प्रवादाः। अतिक्रम्य नगर-

सीमाम् ईदृशीं भीमां भूमिं न ज्ञायते कन्या कात्यायनी कथमुपेता। को जानाति कियतः कालादारभ्य सा तत्र यातीति। कल्य एवेदं विज्ञातं जातम्, परं ह्यस्तु पावनमपराधक्षमादानदिनमासीत्। साम्प्रतं किं सम्पत्स्यते? सा त्वद्यापि तत्र गता' इति।

प्रादोषिक-पूजा-प्रक्रियायाः पश्चात् प्रार्थनापराणां पौराणां प्रतिमुखं प्रायः परमपीडितेन प्रधान-पूजकेन पुरोहितेन वेपमान-वपुः वापः कात्यायन्याः प्रबोधितः— 'निष्कासनीया निकेतनात् कात्यायनी कौलीन-कलङ्ककारिणी' इति।

निर्दय-न्याय-निर्णय-विषये वैवश्यात् स्वयमपि बहुलं व्याकुलः किञ्चित् कुण्ठित-कण्ठः पूजक-पुरोगः पुरोधाः भूयोऽभाणीत्— 'सर्वतोभावेन कात्यायनी कौसृतिकाया माया-प्रभावेणाभिभूता सम्भूता। देशस्य परमेशस्य च द्वेषी नतमां क्षमामर्हति। दया-दाक्षिण्य-दिग्धायाः स्निग्धायाः कात्यायन्याः स्वगेहे रिरक्षिषा चेद्, भवद्भिरपि क्षिप्रं पुरं परित्याज्यं स्यात्। अथ चैतेन सममेव समस्तेभ्यो भवद्भ्यः समाजे सम्मेलनस्य नगरे निवासस्य चानुमतिः न सम्प्रदातुं शक्यते।

१३. अत्रान्तरे कश्चिद् भावुको युवकोऽननुभूतविश्वबाधां निरपराधां मृदु-मुग्ध-मुखमण्डलां कात्यायनीमालोक्य हृदये जातदयोदयः प्राक्तनीं परम्परां पराभूय समुदतिष्ठत्। यद्यपि पुरः पुरोगस्य पुरोधसो दण्डादेश-प्रत्याख्यानमपि प्रबलापराधप्रतिमं प्राजायत; तथापि त्रुटित-तितिक्षा-तटिनी-तीरं; प्रध्वस्त-पुण्य-पाप-परिचय-प्राचीरं; करुणाशरणं तदन्तःकरणं, मुक्त्वा मानमर्यादा-मोहं विद्रोहं व्यधात्। स आह—'क्षमन्तां महनीया महान्तः! ईदृशं भृशं दारुणं दण्डादेशं विधाय परमेश्वर-परिपन्थिनः पिशाचस्य प्रभावं प्रोत्साहयन्ति श्रीमन्तो भवन्तः। वृद्धा मायाविनी साऽऽमयाविनी वर्तते। सम्मुखीनं अद्यश्वीनं तस्या मरणम्। किन्तु कात्यायनी नगरान्निष्कासिता चेत्; सा तां वृद्धामाश्रयिष्यति, वृद्धा चात्मीयामभिचारविद्यामस्यै प्रदाय पश्चात् पञ्चत्वं प्रयास्यति। कुलूतनगरस्य नियति-नभसि निर्भरं नदन्तः प्रलयङ्करा विपद्वारिधराः क्षिप्रं प्रस्थायिनोऽपि स्थायिनो भविष्यन्तीति। भयं हि भयान्तरमुद्भावयति।

१४. ततः परं परः पुरातन-परम्परा-परिपन्थी कोऽपि करुणागारः कुमारः प्रतिवादपूर्वकं प्राह—'यदि जनितोत्तापः कात्यायन्या वापः स्वीयेन व्याकुलेन कुलेन समं समुद्भूत-प्रभूत-भूत-सन्त्रासं तस्याः संवासं संयातः; तदा तदापदा मरणं शरणं समेषामेषां नः' इति। तरुणस्य तां वाचमाचम्यैव

परस्परं पश्यन्तः पौरा भविष्याऽभव्य-भीत्यभिभूता विधुताः सम्भूताः। तेऽचिन्तयन्—'वस्तुत एव वपुष्मती वराकी दारिका चेदियमभिचारिका जाता; हा! दीर्घजीवनीयं मायाविनी भाविनि स्थायिरूपेण नोऽनिष्टोद्भावनो भाविनी। तथा च नैयत्येन नागरेभ्यस्तीव्रयत्नेन यातनाप्रदानैर्वैरनिर्यातनं विधास्यति। हन्त! को नु रक्षको नो भविष्यति' इति।

१५. परस्तादपरेणातङ्कशङ्कोट्टङ्कनेन यूना दूनान्तरेणागादि 'इदं स्वल्पनिदानं दारुण-दण्डदानं प्रणाश-पात्रं यन्त्रणामन्त्रणामात्रम्। किं तेन निर्णयेन कर्मणा धर्मणा वा येन कदाचारस्याभिचारस्य समाश्वासनं सुखैकतत्त्वस्य सत्त्वस्य च विवासनं जायेत' इति।

तदानीं तदानीतां तीव्रां तर्कततिमुपश्रुत्य नीचैर्निमीलितनयनः पुटितपाणिः प्रमुखः पूजाकारी परमेश्वरं प्रार्थयामास—'परमप्रभो! पाहि, दाहि दुःखं दारय, दर्शय दण्डदानदिशम्, दिश द्राग्-दर-द्रावणं दाक्षिण्यम्, प्रकाशय प्रत्यक्षं परमार्थपथम्' इति।

१६. प्रधानस्य पूजाकारिणः पुरोहितस्य—'प्रभो! प्रभो! इत्यादि-प्रश्रय-पूर्णा प्रार्थना प्रायेण प्रारब्धैव यदासीत् तावदेव दूर-दुर्गम-देशाद् द्रुतं द्रवन्; दण्ड-दीर्घानुच्छ्वासानुद्वमन्; विपाटितपट्टिकापट-पटलः, मेचक-मृदा-मलीमस-मुखमण्डलः, स्वेद-विलग्न-सकल-कलेवरः; सविराम-स्खलद्-वागक्षरः, तृण-तूल-धूलि-पत्रासक्तचूलः, शित-शूक-शूल-शीर्ण-शून-पादमूलः कटिवेष्टितवालरज्जुजालः, कश्चिद् गड्डारिकापालः सङ्गते समाजे प्राविशत्। स्वेद-सिक्त-संसक्तचीरेण शभ्रशरीरेण; भेड-पूतिगन्धमुद्गिरन् उपासना-निवासे स तदास्थिरेण चेतसा नात्मकायं न च नरनिकायं निरूपयन्नासीत्। असौ सरलतया प्रधान-पूजाकारिणः पार्श्वे प्राप्य साष्टाङ्गपातं प्राणंसीत्। पुनरुत्थाय तस्य पावनं पाद-पांसुं शिरसि निभृतं निदधानो विनयमुपनयन्नवादीत्—'महाराज! उपदिग्ध-भसितः, तपस्तेजसोल्लसितः, ऊर्ध्वरेतस्त्वोद्भासी; पराशरकुण्डवासी, मौनी मुनिः अधित्यकातोऽवतरन् कुलूताभिमुख आयाति। मन्दं मन्दमागच्छन्नसौ मे सूनुना सन्दृष्टः। व्यतीतमद्य दिनद्वयं यदाहं तेन विज्ञापितः। तदाकर्ण्यैव तदाहमत्रभवन्तं संसूचयितुं त्वरितं ततः प्रस्थितः' इति। सर्वे समुत्सुकाः संजायन्ते सुख-समाचारं संश्रावयितुम्।

१७. पराशरकुण्डाधिवासी मुनिः नगराभिमुखमायातीति निशम्य सर्वेऽपि पुरोहित-समेताः समवेताः पौराः परस्पर-परिरम्भणैः प्रथयन्तः परं प्रसादं संवादं कर्तुमारेभिरे। वास्तवेनैवायमासीदपारकल्याणागारः; सकल-

सांसारिक-सुखाधारः, सुधासारः समाचारः। मानवमात्रमहनीयस्य महात्मनो मुनेरभिनन्दनं कथङ्कारं क्रियेतेति विषयेऽपि ते स्वं स्वं विविध विधानं वर्णयामासुः।

तावदेव प्रमुखः पुरोहितो लोककोलाहलं शमयन् शनैः हस्ततलं चोद्गमयन् समबोधयत्—'कात्यायन्या अपराधनिर्णयः कालान्तरं यावद् विलम्बितः स्यात्। सा सम्प्रति स्वस्मिन्नेव सद्मनि संवसेत्। असौ प्रतीक्ष्यो मुनिः कृतार्थयितुमस्मानत्रायाति। तमेव प्रार्थयिष्यामहे किमत्रानुष्ठानीयम्' इति।

आगतो मान्यो मुनिः। कुलूतपुरवासिभिः सुदूरमुपगम्य श्रद्धासारैः जयकारैः, उच्चैः स्तुतिवचनोच्चारैः हारोपहाराद्युपचारैश्च सत्कृतेनापि तेन मुनिना मनागपि नाननमुन्नमितम्। ततः पुरोगः पूजकः प्रार्थयत—

परागतं प्राक्तन-पङ्कजातैः, पूता पुरी ते पदपङ्कजातैः।
महात्मना मान-वता त्वयाऽद्य, कृतार्थतां मानवता प्रयाता॥ ८॥ इति।

तथापि न तेन नितान्तं नतेन नयने समुन्नमय्य कोऽपि नरो निरूपितः। बधिरेणेव वाग्विकलेनेव च तेन नाश्रावि न चावादि किञ्चिदपि। स जनसम्मर्दमपश्यन्निव पदात् पदं पुरस्तात् प्रावर्तत। परमयं तस्य विलक्षणोऽपि व्यवहारः कस्यापि विस्मयावहो नाजायत। लोकास्तु तदा सहसाश्चर्यचकितचेतसः सञ्जाता यदासौ तस्या एवाभिचारिण्या वृद्धायाः करीरप्राचीरं कुटीरं प्रति व्यावर्तत।

१८. कर्णाकर्णिकयानुश्रूयते यदेष यशस्वी तेजस्वी तपस्वी चिरकालादेवमेवात्मरतिः यतिः; मुद्रित-मुखः संत्यक्तसुखः, विश्व-वैभव-विलास-विमुखः; पराशरकुण्ड-कामनीयकमात्रसंसिक्ते विविक्ते विमुक्त-वसतिः वसति। न कञ्चिद् वीक्षते; न दीक्षते; न भिक्षते; न व्यथयति न च कथयति किञ्चित्। पर्वतप्रदेश-परिभ्रमिभिः पशुपालैः यः कोऽपि पयःप्रभृतिः पदार्थः पर्यशनाय प्रदीयते तत एव स्तोकोऽनेन भुज्यते। अवशिष्टं वञ्चका खादन्तु वनविडाला वा वायसा वा; नायमवधत्ते। एष महामना न मोदते न रोदिति न च वदति। यदेव जीर्णं शीर्णं चावरणम् तदेवास्यास्तरणं जायते। तेनैवाद्याप्यनेन भृशं तपःकृशं कङ्कालमात्रं गात्रं प्रावृतं वर्तते। शीते वाते स्फीते तुषारपाते; घोरे धारासारे; स्फारे तीक्ष्णार्कसञ्चारेऽपि चायं प्रातः सायं दिवारात्रं गात्रं संस्तभ्य पद्मासनासीनः समाधिलीनः शिलाश्रितो दृश्यते। न जाने केन प्रेरितचित्तेन निमित्तेन कियद्वर्षानन्तरं चायमवतीर्णः पर्वत-पृष्ठाद्' इति।

१९. अथ क्रमेण करीरप्राचीर-समीपे समुपेत्य समेऽपि ते पृष्ठ-पार्श्वप्रयायिनः प्रतिष्टब्धपदाः प्रपन्नाः । 'न जानीमहे किमत्राभ्यन्तरे वर्तते, अन्तःप्रवेशे कस्य का हानिः स्यात्, कोऽपि म्रियेत वा ध्रियेत वा' इत्यज्ञातेन भयजातेन सकलानां लोकानां वेपमानानि वपूंषि पुलकितानि प्रजातानि । स्वल्पैः शिष्यैः सह प्रधानः पूजाकारी, तापसमनु कतिपये पौराश्च शङ्कातङ्कागारे कण्टकि-प्राकारे प्रवेशसाहसमकार्षुः । त इदमालोक्य विस्मयापन्नाः सम्पन्नाः, यदाश्चर्यावहं वस्तु वस्तुतो यत् तत्रासीत् स एकः कोणे काणः कदाकारः कर्णकण्डूयनकरः कुक्कुरः, वार्धकविकलो विगलित-वालः विडालः, खलीनखेदितः खण्डित-खल्ल-खुरः खुरखुरायमाणः खञ्जः खरः, व्याधि-विशेष-विकृतवपुः विदीर्ण-विषम-विषाणः व्यतीतवयाः बुलदः, शक्तिशालिना शकुनि-शासनेन श्येनेन शीर्णशरीरः शुष्क-शोणितः शिथिलः शशशिशुश्चासीत् । अमूदृशा एव कृशा पञ्चषाः परेऽपि पशवोऽभूवन् । पर्णशालायाः पूर्वपार्श्वे यथा-कामं परिभ्रमतां पशूनां पादप्रहतिभिः पिष्टपत्रा द्वित्राः पालङ्की-केदारिकाः क्षुर-क्षोदैः क्षिति-क्षिप्ताः क्षुद्राः क्षुपाश्चापि कतिचिददृश्यन्त ।

२०. तापसमनुगच्छता प्रमुखपूजाकारिणा पुरोहितेन प्रतिहारं प्राप्यैव कुटीरान्तरे खण्डितां खट्वामधिशयाना वराकी वयोवृद्धा व्यलोकि । तदानीमप्युपागता कारुणिकी कात्यायनी बाला प्रवालाग्र-कोमलकरकलित-कपाला स्थविरामामयाविनीं मायाविनीं किमपि पाययन्ती समस्थित । प्रधान-पूजाकारिणा पुरोहितेन परितो निपुणं निरूपण-निरतेनापि अभि-चारिण्याः पार्श्वे सम्भाव्यमानः भौलिकः कुतोऽपि नादर्शि । अयमासीत् तस्य द्रढीयान् चेतसि चिरवासो विश्वासो यद् वयोवृद्धाया अपावने भवने कीलिताः काला विलालाः ; कराला मानव-मुण्डमालाः; सेधा-कण्टकजालाः, श्मशानेङ्गालाः, विपिन-वराह-वालाः, काकोल्लूकादि-कङ्कालाः, कालायस-कील-फालाः, सित-सर्षप सङ्कुलाः स्थालाः, पिशाचबलिदानहालाः, गुग्गुलु-प्रभृति-धूप-धमन-नालाः, प्रीणित-वेतालाः विशालाः कीलाल-कपालाः, प्रभूताः परेऽप्यभिचार-पदार्थाः पूरिता भवेयुः । परं पर्णशालायां तु द्वित्राणि पीतलपात्राणि ; सपुटः घटः ; चला चुल्ली चेत्येतावदेव वस्तुजातम् दृग्गोचरतां यातम् इति । अशान्तिमङ्कुरयति भ्रान्तिः ।

२१. 'अयि तपोमयि ! करुणा करणीया कृपणे मयि, दूरदेशादा-गतोऽहमि'ति कातरः तापसस्य स्वरः सादरमनुचारिणं पूजाकारिणं स्तिमितममितं विस्मितं च व्यधात् । तेजस्वी तपस्वी पुटितपाणिः पुनः

पलिक्नी-पादपाथोजयोः पतित्वा प्ररुदितः प्रावादीत्—'प्रायः पञ्चाशतः परिवत्सरेभ्यः परिहृत-सुखसाधने परमेश्वराराधनेऽविरतं निरतोऽहम्। साक्षिण इमे मे पलितत्वे परिणताः काला वालाः। अद्यावधि ममोपासना फलोन्मुखी न जाता। अस्वीकृता सा संसृतेः कर्त्री भर्त्री हर्त्री च' इति।

शङ्काशरणा कम्पितकरचरणा, निश्चलकरणा, कुञ्चितकाया निर्माया कृपणा कात्यायनी कुटीरकोणे तूष्णीका तस्थौ। प्रधान-पुरोहितो देहलीदत्तैक-पदः स्तब्धोऽभूत्। द्वारावरोधादनुगामिनो मनुजास्तु बहिरेव यत्र तत्रावा-तिष्ठन्त। उद्विग्नः श्रद्धा-निमग्नः तपस्वी वाष्प-बिन्दुभिश्चिरेण सिक्ते जरिणी-चरणे प्रत्यूष-रवि-रश्मि-च्छटाभिः जटाभिः प्रीतिपुरस्सरं प्रोञ्छन्नपि पुनः प्रक्षरद्भिरस्रासारैः प्रक्लेदयति स्म। बहुलेभ्यो वत्सरेभ्यो मुद्रित-मुखोऽप्य-शावद्यैव वक्तुं प्रारब्ध। पुनरसौ चेतसि चलितां पलितां प्राह—'महामहिम-मण्डिते! मधुमय-मृदु-मानसे! महनीय-मूर्तिमति! मातः! निशामिता-मयाऽकस्मादैश्वरी वाणी, आदिष्टश्चास्मि तया भवत्याः पावन-पाद-पयोज-परामर्शैरात्मानं चपलं चरितार्थयितुं प्राप्तुं च परमार्थ-पथ-प्रदर्शनम्। तत् क्रियतां मयि सौजन्य-जन्या कापि करुणा। मृज्यतां मे महामोह-सन्दोह' इति।

२२. ततो मुञ्ज-मञ्चमग्ना; वली-वलय-वलयित-वदना; बहु-विदीर्यमाण-वाग्-विसरा; मन्दं मन्दं मन्त्रयामास करुणाभरणा जरिणी—'महात्मन्! नाहं जाने कीदृशः परमेश्वरः कथं चासौ प्रीयते। अहं तु पाप-परायणा माण्डव्यनगर-वासिनी वारविलासिनी समभूवम्। सम्प्राप्ते स्थाविरे मे काय-व्यवसायायावसायः संवृत्तः। निर्नाथा विविक्त-वास-वाञ्छिनी चाहमिमां विष्वग्-विकीर्ण-कुटिल-कण्टकजालां पर्णशाला-माश्रिता। बाल्यात् प्रभृति परिजानामि यत् पीडितः प्राणी कारुण्यपात्रं जायते। नैसर्गिकी हृदयोदया दया नूनं दूनस्य दुःखं द्राग् द्रवयति, न तु वाङ्मात्रेण विधीयमानो दम्भाचार उपचार इति। तरुणिमोपार्जितं मे द्रविणं दुर्गतानां दुःखार्त्तानां देहिनां भरणे परिचरणे च पर्यवसितम्। इदानीमपि विधि-व्यापन्नां मरणासन्नामपि च मां कः कीदृशश्च शरणार्थी समुपैतीति नाहं विमृशामि। असहायो वा व्रणितकायो वा व्याधितो वा; विश्ववाधितो वा, पुरुषो वा पशुर्वा, यः कश्चनापि स्यात् तस्मै किं नामाऽनु-वेदनानुकम्पातिरिक्तं प्रदातुमहं प्रभवामि। वस्तुतो विदितमस्तु वो यदेषा कुटी-कोणस्था कनीयसी कन्यका कात्यायनी करुणैव देहवती भवति। अस्या अनुवेदनयाहमपि दत्तावलम्बास्मि। 'दीना दूनाश्च दयनीया' इत्येव

समस्तधर्माणां सत्यं सत्त्वम्, इत्येतावदेवास्मि जानामि। उक्तं च—

२३. कृता कृपा प्राणिषु पीडितेषु चेत्, न कल्पते कस्यचनापि हानये।
किं शक्यते वर्णयितुं तया यः, सम्प्राप्यते कोऽपि परः प्रसादः॥ ९॥

किञ्च—
स्वयं सहित्वाऽसुखमस्तमायः, क्लिष्टस्य साह्यं कुरुते हृदा यः।
कामं स दीनो व्ययितार्थभारः, परं भवेत् पुञ्जित-पुण्यसारः॥ १०॥

शुश्रूषया दुर्गत-दुःखितानां, नन्दन्ति न प्राणिन एव केचित्।
प्रीतः प्रभुस्तत्र परं प्रयाति, पुमान् पुराणोऽपि परं प्रसादम्॥ ११॥

सर्वेऽपि चेत् कारुणिका भवेयुः, परस्परं प्रेमपराः पुमांसः।
स्वरूपमह्नाय विहाय भीमं, स्वर्लोकतामेष्यति भूतधात्री॥ १२॥

कृपालुता विश्वजनीन-वृत्तेः, गुणो गरिष्ठः परमेश्वरस्य।
गुणं गृहाणाऽस्य मुने! मुमुक्षो!, त्वमैश्वरं वाञ्छसि चेत् स्वरूपम्॥१३॥

२४. इति वृद्धावचनं शुश्रुवान् प्रचुर-पश्चात्तापपीडितः प्रमुखः पूजाकारी पुरोहितः पलपर्यन्तं प्रस्तर-प्रतिमा-प्रतिकाशतां प्रापत्। तावदेव देवतात्मा तपस्वी प्रवयसः प्रसादप्राप्त्या प्रभूतं प्रीतः पराशरकुण्ड-मण्डितं पर्वतं पर्यावर्तत। तस्मिन्नेव दिवसे स्थविरापि नश्वरं कलेवरमपहाय देवभूयं गता। किन्तु कन्यका कात्यायनी देहिनी दया-देवीति पौराणां प्रीतिपात्रतां प्राप्ता साऽद्यापि पावन-पर्वसु पूज्यते। पारम्पर्येणेदं श्रूयते यत् तस्या एव करुणाशीलायाः कात्यायन्याः प्रकृतेः शीतिमा म्रदिमा मधुरिमा च तत्प्रदेशस्य प्रत्येकं पुरुषेषु प्रमदासु पशुपक्षिषु पयस्विनीषु पवनेषु पादपेषु प्रताननीषु पर्वतेषु च परिपूरितः सम्प्रत्यपि प्रीणाति प्राप्तान् पर्यटकान् प्राघुणिकान्।

अनेन प्रकारेणात्मानं तृणाय मन्यमाना महीमण्डलमण्डितारो महामहिमानो मान्या मानवाः स्वान्ववायस्य जनसमुदायस्य सम्प्रदायस्य च च भयमपहाय तनुत्यागेनापि पीडितानां प्राणिनां व्यापदपनोदाय मनोमोदाय च प्रतिपलं प्रयतन्ते संसारे सर्वदिशं सुखसाम्राज्यं स्यादिति।

क्रूरलीलाः कृपाशीलाः (२५)

१. इतः प्रायेण पञ्चसहस्रेभ्यो वत्सरेभ्यः प्राक् कौरवाणां पाण्डवानां च परस्परं साम्राज्यकारणं दारुणं प्रविदारणमजनिष्ट । पुराणेषु प्रबन्धान्तरेषु च पदे-पदे भयावहोऽयमाहवो निरदेशि । सञ्जातासङ्ख्यात-वीर-विनाशे प्रलय-प्रतीकाशेऽस्मिन् समरे स्नेहं समुत्सृज्य सम्बन्धिभिरेव स्वसम्बन्धिनां शोणितैररुणिता धरणी । व्यवच्छिन्न-वीरवैरिवारवाणैः वाणैः, तेजितधारैः कुठारैः, चुम्बितशाणैः कृपाणैः, जनितसन्त्रासैः प्रासैः, कुलिश-कर्कशाभिः लोहकशाभिः, परैश्च प्राणहरणैः प्रहरणैः परिक्षतानां चमूचराणां सङ्ख्या तु वितर्कमप्यतिचक्राम । पुरुषेषु प्रादुरभुत् प्रलयावि-रोहिणी द्रोहिणी काचित् पैशाची वृत्तिः । समन्तादाकर्ण्यन्त सन्ततं दिगन्तेष्वपि नामग्राहं लालप्यतां हतबन्धूनां सास्रासाराः दीर्घाकाराः तारा हाहाकाराः । प्रत्यहं हतानेकयोधगणं रणाङ्गणं निर्वर्ण्य 'कल्पान्तकालीनं परोक्षं खण्डपरशोः प्रचण्डं ताण्डवं प्रारब्धम्' इति प्रत्यभात् ।

२. श्मशान-शून्ये समरस्थले पदे-पदे परेतानां परिक्षतानां च सैनिकानामङ्गानि प्रत्यङ्गानि च परितः प्रसृतान्यासन् । यत्र तत्र पतिताभिः रुधिरधाराभिः पांसुपूराः पङ्कतां प्रापुः । शुष्कस्य शोणितस्य शीर्णानां च शरीराणां दौर्गन्ध्यं दूरदेशावधि दिशासु परितस्तार । इहासीत् कालस्याट्टहासः, कालिकायाः विलासः, महाकालस्य च लासः । इयमासीत् जातोन्मादानां क्रव्यादानां काप्येका लोहितसेका भैरवी होली ।

एवं तेषु दिवसेषु यत्र तत्र सत्स्वपि साध्वस-सञ्चारिषु सम्परायेषु, सामान्येन सत्त्वसम्पन्ने सद्वृत्ते च समाजे सर्वत्र स्नेहस्य सत्यस्य साधुतायाश्च साम्राज्यमजायत । दिवा रौद्रो रणोऽभूत् परं जन्यावसाने रजन्यां सैन्यानां विश्रान्तेरुपचारस्य च व्यवस्थावर्तिष्ट । क्षपायां परस्परं प्रहरणं वा कपटेनाक्रमणं वा सर्वथा न विधेयमिति विषये उभयोः प्रयुयुत्सु-पक्षयोरैकमत्यं बभूव ।

३. अथैकदाऽस्तमस्ताद् ध्वस्ते गभस्तिहस्ते, प्रधनपरिसमाप्ति-पिशुनाः पर्यश्रूयन्त प्रोच्चैः प्रहतानां पटहानां प्रणादाः । प्रतिनिवृत्ताः कौरव-पाण्डवीयाः पृतनाः पृथक्-पृथक् परिकल्पितान् प्रदेशान् प्रति प्रात्यहिक-प्रहरण-प्रयोग-परिश्रान्ति-परिहाराय । क्रमेण विसृमरेण

तिमिरेण परितो भरिता हरितः । उलूकानां जम्बूकानां च भैरवैः रवैरभज्यत मूकिमा त्रियामायाः । इतस्ततः पतितैः विहतैः, परिलुठत्पाणि-पादैः विहित-विषादनादैः तालद्वयसैः विक्षतैश्च सैन्यसङ्घैः सङ्कुलासीत् समरस्थली ।

४. प्रलेप-परिमर्दनप्रयोगैः, पट्टिकापरिवेष्टनैः, प्रतप्तपयः-प्रभृतिपदार्थ-पायनैः, पानीय-प्रसेक-प्रस्वेदन-प्रक्रियाभिश्च प्रारभ्यत प्रत्यागतानां परिक्षतानां प्रबलपीडापरिहारः व्रणादि-विरोपणोपचारः । संस्थिताः सैनिकाः समुज्झिताः स्नेह-संविभागिभिरपि सखिभिः सङ्गरस्थले । क्वचित् क्वचिद् वीराशंसने श्रूयन्ते स्म मुमूर्षूणामाह्वायकानाम्—'हा मातः! आः भ्रातः! अहं यातः, पेयं देयम्' इत्याद्याः कदर्थित-कर्णा विच्छिन्नवर्णा व्यञ्जित-वेदना हृदयभेदना मन्दतरा आर्त्तस्वराः । परं तत्र तेषां प्रबलां पीडां प्रष्टा, दूनं देहं द्रष्टा, पानीयप्रदानैः पिपासा-परिहर्त्ता, सुखैः स्पर्शैः सुकुमार-सान्त्वनैश्च कल्याणकर्त्ता कोऽपि नाभूत् । स्निग्धान् स्वकान् सम्बन्धिनः संस्मरन्तः, प्रमुखे प्राप्तं प्रलयं पश्यन्तस्ते सहसा संज्ञाहीनाः स्वःसुन्दरी-सङ्गता इव बाहुवलयितं विदधाना उत्स्वप्नायन्ते स्म ।

५. दैवसिके सम्पराये परिसमाप्तेऽपि न प्रत्यावृत्तो भ्रात्रीयः कालवर्मा, प्रत्यावृत्तास्तस्य सहयुध्वान इति चिन्तयाक्रान्त-स्वान्तो 'वीरवर्मा' नाम कश्चिद् व्यतिक्रान्तयौवनो विरल-धवल-श्यामलकपाल-कुन्तलः, श्मश्रु-कुण्डल-वलयित-कपोलस्थलः, पाण्डवपक्षीयो वीरधुरीयः आयुधीयः, एकस्मिन् पाणौ पानीय-पूरितं पानपात्रं परस्मिंश्च द्योतमानां काचदीपिकामादाय, कण्ठाश्रितप्राणेषु, मन्दं-मन्दं म्रियमाणेषु, शिरि-शरादि-शस्त्रास्त्रैः शरीरस्य शसितत्वात् कालाऽजगरेण कवलीक्रियमाणेष्वपि वयःशेषतया ध्रियमाणेषु, परितः पतितेषु सैनिक-सहस्रेषु, पाण्डव पृतनाप्रवीरेषु प्रख्यातं, परमप्रियं स्वभ्रातृजं गवेषयन्, व्याकुल-बुद्धिर्विश्वतो बभ्राम । रणाङ्गने शौनकशीलाः क्रूरलीला अपि सैनिकाः दैनिके व्यवहारे सामान्येन सदयाः सुकुमारहृदयाः स्नेह-सौहार्द-समाकुलाश्च सम्पद्यन्त इति वीरवर्मापि भ्रातुष्पुत्रं कालवर्माणं प्रति प्रादर्भूत प्रभूतप्रीतिः, तज्जीवनविषये च किञ्चित् सातङ्कः किञ्चित् साशङ्कः समजायत ।

६. स दीपिकया सकलानामपि पृथिव्यां पतितानां शूलशरादि-शल्यशीर्णशरीराणां वीराणामेकैकशो वदनान्यवहितं वीक्षमाणः दलित-देहदन्तुरेषून्नतावनतावनीतलेषु पानीयपतनपरित्रासात् स्थायं-स्थायं स्वैरं स्वैरं पादौ प्रणिदधानः पुरस्तात् प्रससार ।

सोऽचिन्तयत्— 'न जाने क्वासौ स्यान्मे भ्रात्रीय: यमभिरिरक्षिषु: दिदृक्षुश्चायातोऽहमत्र । तत्पिपासाप्रशमायेदमानीतं शीतं कामण्डलवं सलिलम् । पीत्वेदं प्रियो मे भ्रातृज: परमं प्रसादं प्रशमं च प्रपत्स्यते । प्रादुष्कृत-प्रेम्णा पाणिपरामर्शेन मे प्रास्तपीडोऽसौ प्रायेण प्रत्यागत-प्राणतां प्राप्स्यति । दैवदुर्विपाकाद् यद्यसौ यशश्शेषतामुपेत: स्यात् तदा 'मरिमा हि समरं समाराधयत: सँन्यस्य सामान्यो धर्म:' इति स्थास्नु सत्यं सञ्जानानस्तस्याग्नि-संस्कार-तर्पणादिकमनुष्ठास्यामि । पश्चाच्च तस्य परमपदप्राप्तये परमेश्वरं प्रार्थयिष्ये' इति ।

७. पुनस्तस्य चेतसि विचारवीचय एवमाविर्बभूवु:— 'मृधे म्रियमाणा मनुष्या: प्रबलया पिपासया पीड्यन्ते । ते पौन:पुन्येन पानीयप्राप्तये प्रार्थयन्ते । कदाचिन्मम भ्रातुष्पुत्रोऽप्युदन्यया जघन्यया जङ्घन्यमानो मा भूत् । तस्यैव तृषातिरस्कारायानीतमेतत्तोयम् । एनेन तं नितरां परितर्प्य पुन: प्रणयपूर्वकं पेशलै: पाणि-परिस्पर्शै: प्रहारपदेषु प्रलेप-प्रयोगं पट्टिका-परिवेष्टनं च विधास्यामि । सुकुमाराभि: सान्त्वनाभि: स्थिरस्वान्तोऽसौ सुतरां स्वस्थ: सम्पत्स्यते' इति । एवं करकलित-कमण्डलुरसौ वीरवर्मा एकस्मिन् शमीर-करीर-सन्ताने असमाने स्थाने कस्यचिद् व्रणित-वपुषो वीरवर्यस्य वदनं विशेषावधानेन वीक्षाञ्चक्रे । तं प्रत्यभिज्ञाय सहसाऽसौ विकसितवदन: समुद्भूत-स्तोकसन्तोष: सप्रत्याशश्च समजायत । संवृत्त: सफल: सकल: समुद्यम: । दिष्ट्यान्विष्ट: स इष्ट: ।

८. वात्सल्य-वशीकृतोऽसौ व्रणवेदना-विह्वलस्य, रुधिररेखारञ्जितस्य, रेणुराशि-रूषितस्य च भ्रात्रीयस्य पार्श्वे समुपविवेश । तेन परिक्षतस्य प्रमुखे प्रदीपिका परतश्च पयसा पूरितं पात्रं प्रणिहितम् ।

विपद्-विभीषणे विग्रहे बलवद् विक्षतो बभूवासौ बलिष्ठो विक्रान्त: । तस्य शात्रवोज्जासनं शरासनमासन्ने सन्निपतितमभूत् । शूल-शिलीमुखादिशस्त्रास्त्रशल्यै: शश्वत् श्च्योतितेन शनकै: शुष्केण च शोणितेन शबलिता तस्य शाटी शरीरेण शिश्लेष । प्रतिनवेभ्य: परिक्षतेभ्य: साम्प्रतमप्यजस्रमस्रं सुस्राव । अधिमर्माहतेन तेन वीरवर्मणा विश्वतोविकीर्ण-केशस्य, विशीर्ण-बलविशेषवेशस्य च तस्य सांशयिकी स्थिति: समालोक्यत ।

९. मुहुर्मुहुर्मुह्यन्नपि कृतनमस्कृतिरसावुदकेच्छया उच्छुष्कौ रदच्छदौ लोलया लिलेह । कृपणोऽसौ क्लेशकृशेन कण्ठेनानुवारं पानीयम्, पानीयम्, पिपासितोऽहम्, पेयं देयम्, चुलुकमेककम्' इत्यभिक्षिष्ट ।

अथ दयामयो वीरवर्मा कालवर्मणस्तादृशीं भृशं वैकल्पिकीं विवशां दशां वीक्ष्य परिक्षतपीडाप्रलापिनस्तस्य शक्ति-शून्यत्वात् श्लथायमानं मूर्धानं शनैः सुकुमाराभ्यां कराभ्यां क्रोडीकृत्य, स्नेहसिक्तया वाचा सुस्थयन् पिपासा-प्रशमाय प्रयत्नं प्रारेभे। यदासौ पानीयपात्रं तस्याधरपुट-पार्श्वे प्रापयितुं प्रायतिष्ट, तदा दूरतो हृदयं विदारयन् व्रणव्यथितेषु वीरेषु कस्यचिदार्त्तनादः साऽवसादः श्रवणयोः प्रविवेश—'हा! आनीयतां पानीयम्, आः! पिपासया प्राणाः प्रसभं प्रयान्ति, अरे! दीयतां गण्डूषमात्रम्, कष्टम्! न कोऽपि कृपते, हा हन्त! हन्ति मां देहदाहः.........' इति।

१०. तदीयं दयनीयं करुणक्रन्दनं कामपि मर्मभेदिनीं वेदनां नितरां गतिहीनतां दीनतां च तनोति स्म।

अहो! तस्यार्त्तस्वरमाकर्ण्य करालव्रणेन कालवर्मणाऽस्पृष्टवैव तत्पयःपात्रं पाणिनाऽपसारितम् समुदाहारि च क्षरदक्षरया गिरा—'सुकृतावदात तात! पूर्वतरं तस्मै प्रदीयतां पानीयम्। कवोष्णं निश्वसन्नम्बुना विना विनाशितोऽसौ सम्पत्स्यते तृषा कृशाशो जीवनं प्रति। नाहमात्मम्भरिः भवामि। मयात्मतृप्तये पयः पीयेत, प्रत्यक्षं पश्यत्येव च मयि परः सैनिकः पिपासया पञ्चत्वं प्राप्नुयादित्यहंक्रिया ह्रियान्विता। इदमनादृत्यं कृत्यं पाशवम्। अधिकतरापेक्षिणः साहाय्यं सम्पादनीयमित्येव परमार्थपवित्रायाः पुरुषतायाः प्रेरणा। तस्मात् पूर्वं तस्मै पानीयं प्रतिपादनीयम्। अवशिष्टं चेत् पयः पश्चात् पास्याम्यहम्। परार्थाय यः स्वार्थत्यागः स एव यथार्थो यागः, तदेव प्राणिनां परमं रक्ष्यं लक्ष्यम्, सैव सेवा देवाधिदेवस्य' इति। तदाह—

११. पशवः पक्षिणो वारि-चारिणश्चापि जन्तवः।
प्रकृत्यैव पटीयांसः, स्वार्थानां त्विह साधने॥ १॥

प्रयतन्ते परार्थाय, स्वार्थमुत्सृज्य ये जनाः।
त एव भूस्थिता देवाः, केवान्ये दिवि कल्पिताः॥ २॥

सङ्गृह्य वस्तूनि जनाः प्रियाणि, समेधयन्तेऽनिशमिन्द्रियाणि।
परं परोपक्रियया महान्तः, परात्परेशं परितर्पयन्ति॥ ३॥ इति।

अथ वीरवर्मा तु तस्य धर्माधर्मवार्तां निशम्य निर्भरं व्यसमेष्ट। इदानीमपि तस्य श्रवणयोः 'परतरा तस्यापेक्षा, तस्मै तोयं वितीर्यताम्, पश्चात् पेयं मया पेयम्, पुरुषताभरणं परोपकरणम्, पापापहरणं प्राणिनां परिचरणम्, पुण्यलोकलाभलक्षणं परप्राणपरिरक्षणम्, स्वार्थनिष्ठा दुष्कृतिः

गरिष्ठा' इत्याद्या गुण्याः पुण्याः प्रदिष्टपापमुक्तयः सयुक्तय उक्तयः प्रतिदध्वनुः।

१२. ततो वीरवर्मणा पयःपात्रं पृथिव्यां प्रण्यधायि। दृढं नीचैर्न्यस्तेन हस्तेन तस्य मस्तकं च सक्तास्त्रङ्गात् स्वोत्सङ्गादवतार्य परेण पाणिना पुञ्जितैः पलाशपल्लवैः पेलवतां प्रापिते पांसुले प्रदेशे-ऽवहितमाहितम्।

तत्पश्चादन्तःकरणकारणाविष्करणं करुणस्वरमभिलक्ष्य प्रतिनत्रं परिक्षतं प्रवीरं प्रति प्रतस्थे। समाहितोऽसौ समरस्थलीं समन्ततः समीक्षमाणः समीहितस्य सैनिकस्य समीपं समुपाययौ। तेन तत्र शोषित-श्वासया पिपासया दूरं दूनो मुहूर्तमात्रे मरिष्यमाण उपजान्वरत्निः यातयौवनो व्रणितः सैन्याधिकारी समालोकि। वारिविरहादसौ बहुलं वैक्लव्यं वावहीति स्म। सोऽधिकं हाकारिणः सैन्याधिकारिणस्तस्यात्यन्तीनां दीनां दशां द्रष्टुं न शशाक। पुनस्तेनेदं चिन्तितम्—'यद्यस्मै तूर्णतरं तोयं न वितरिष्यते तर्हि नूनमेष निमेष एव त्रिदिवातिथितामुपयास्यति' इति। उक्तं च—

१३. **जनाश्चिराय जीवन्ति, प्राणिनोऽलब्धभोजनाः।**
विनश्यन्ति परं नीरं, समीरं च विना क्षणे॥ ४॥

यतो हि— **जीवनं म्रियमाणस्य, जीवनन्दनकारणम्।**
जीवनं जायते लोके, जीवनं चेतनावताम्॥ ५॥ इति।

तदनु चिकीर्षित-पुण्यकर्मणा वीरवर्मणा सलिलकमण्डलुं सेनाधिकारिणः सम्मुखे समुपहरता समुदाहारि— 'शूरशिरोमणे! गृह्यतामिदं पानीयमुपायनीक्रियमाणम्। अनुगृह्यतां चायमकिञ्चनो जनः। तृषा कुण्ठितस्ते कण्ठः। विच्युतवर्णा विचलति वचनावली वदने। शैत्र्येण शैथिल्यं श्रयते शारीरी शक्तिः। व्यपनीयतां पानीय-पानेन दुःखासिका पिपासा। प्रेषितोऽहमपां प्रापणाय पार्श्वे तव। तत्पानीयं सपदि पानीयम्' इति।

१४. पेयपात्रं पुरस्तात् प्राप्तं प्रेक्ष्य प्रतमां प्रीतः पलप्राघुणिकः प्रवयाः पृतनाधिकारी परमात्मानमुपांशु प्रार्थयत—'परात्पर प्रभो! प्रसत्या ते प्रापि पयः प्रेतपुरीप्रतीकाशे प्रदेशे घोरतमे तमोमये त्रियामा-समयेऽस्मिन्। तत्त्वतस्त्वया तोयं न प्रहितम् परन्तु प्रेषितोऽयं सुधारसः। विचित्रास्ते विभो! विभूतयः, वाचामगोचरा च राध्यस्य ते चराचरे समाचरिता काचन कारुणिकता' इति।

ततो वीरवर्मणा बलीयसा स्वेन बाहुना विक्षतस्य बलाधिकारिणो विग्रहं बलयित्वा स्वैरं च तं समुपवेश्याम्भोभाजनमुपनीतं पीतये। प्रथीयस्याः प्रतीक्षायाः पश्चात् प्राप्तस्य पानीयस्य पानाय परिक्षतेन प्रबलयोत्कण्ठयाऽधरपुटं प्रेरितम्।

१५. परं तस्य गण्डूषग्रहणात् प्रागेव रणे कर्णप्रहरणव्रणः सन्निहितमरणेषु विकलकरणेष्वन्यतमस्य तीव्रतृषाक्रान्तस्य विक्रान्तस्य—'हा! दीयतामुदकस्यैकं चुलुकं पिपासिताय। आः! तृष्णा क्लिश्नाति कायम्, मुष्णाति सा मन्दं मन्दं मे प्राणान्। अहह! अस्ति कोऽपि कृपालुः पालकः यः पानीयमानीय पाययेत्! अये साधवः। कुरुतोपकारम्, सञ्चिनुत संसारसारं सुकृतसम्भारम्। आः! शुष्यति तालुः, नैति कश्चिद्दयालुः! हा अम्ब! हा! अम्बुगण्डूषम् मह्यं पीयूषम्' इति हृदयभेदनं वेदना-निवेदनं वदतं समुपाश्रूयत।

१६. सहसा तृषातितरामातुरस्यापि सेनाधिकारिणो हृदये दया समुदयात् पुण्योपार्जनलोभवन्ति भवन्ति हि हृदयानि दयानिधीनाम्। सोऽचिन्तयत्—'परप्रयोजनाय स्वार्थ-सन्त्यागो हि धर्मः परमः पुरुषतायाः। प्राण-प्रयाणपर्यन्तं परोपकारश्चेत् क्रियेत सापायेन कायेन, सफलतां यातु जीवातुः उत्सर्गेणैव जनो जीवनं पुण्य-पात्रतां प्रापयति' इति। यदुच्यते—

परोपकारजन्येन, पुण्येनाढ्यम्भविष्णवः।
साधवोऽमुत्र जायन्ते, नाकलोकस्य जिष्णवः॥ ६॥

किञ्च— **प्रवीणाः सान्त्वने वाचा, धुरीणाः सन्ति सर्वतः।**
स्वार्थ-सन्त्यागिनोऽपापाः, दुरापाः किन्तु सत्तमाः॥ ७॥ इति।

१७. स कृपाकरोऽधिकारी कम्प्रेण करेण करुणस्वरं समुद्दिश्य सङ्केतयन् वीरवर्माणं विनिवेदयामास—'महाशय! मां मुक्त्वा इदमुदकपात्रं व्रणितगात्रं तमुपनय। गरीयसी तस्यापेक्षा, वाधतेतरां तं तर्ष-प्रकर्षः। आदौ त्वसौ सैनिकः सलिलास्वादन-सौभाग्यभाजनं भविष्यति, पश्चान्मे वारः वारः पानस्य। तस्मादमुत्र तोयपात्रं नय दयामय!, भवान् शीघ्रायताम्, दयतां च तस्यायतां प्रतीक्षामवन्ध्यां विधातुम्। परलोकाय प्रवत्स्यत्-प्राणोऽसौ पुष्कलया पिपासया, इति तत्परिदेवनं प्रत्याययति' इति।

१८. विवशो वीरवर्मा पयःपूर्णं करकं करेण कलयन् क्षतातुरस्य चमूचरस्य कातरं स्वरं प्रति चक्राम। नातिदूरे गत्वासौ, शस्त्रैः शकलितशिरसां शवशतानां श्रेणीषु शाद्बले शिथिलं शयानम्, शसितशयम्, शीघ्रं श्वसन्तम्, शुष्कशोणितशरीरम्, पुष्कलया पीडयाऽधीरम्, दुष्करपरित्राणम्,

कण्ठागतप्राणम्, सदैन्यं सैन्यं दुःखायमानया दृशा ददर्श। यदाहुः—

हृदयं द्रूयते दूरं दृष्ट्वा, द्वेषणमप्यहो!।
कालकेसरिणा कण्ठे, पीड्यमानं क्षणेऽन्तिमे ॥ ८ ॥ इति।

१६. अथ जर्जरित-कलेवरं वीरवरं वीरवर्माब्रवीत्—'इदमुदकम् इदंयो! आकण्ठं निपीय निरामयं गमयात्मानम्। प्ररूढया पिपासया परिक्षीणं ते पौरुषम् विकृतश्च वाग्व्यवहारः। पयस्तावत् परमात्म-प्रदत्तः पीयूषप्रतिमः पदार्थः, परिबृंहितायुः जायुः। तस्माच्चमनीयं चपलं जलम्' इति।

यावद् वीरवर्मा क्षतक्षीणं सैन्यधुरीणं पयः पाययितुं प्रायतिष्ट, तावदेव तदुत्सङ्गासीनो दीनोऽसौ 'सैन्याधिकारिणे क्षतक्षीणाय तत्क्षणं प्रदेयं पेयम्' इति गदन् गद्गदगलो गलितग्रीवो निर्जीवो जातः। सोऽचिन्तयत्—'हा हन्त! कफकुण्ठितेऽस्य कण्ठे चुलुकमप्यपां न गतम्। त्रिचतुरा एव त्रिन्दवः प्रविष्टाः स्युः। कामण्डलवं लवमप्यम्बु न ह्रसिमानमानायि। आः! वन्ध्यतामुपेतः कुशलशाली सङ्कल्पः। प्रच्युतो मे पाणेः पुण्यप्राप्तेरसुलभोऽवसरः। किं सम्प्रति सम्प्रतिपद्येत विषमेऽस्मिन् समये मयेह? एष तु तपस्वी अपीत्वैव पानीयं द्युनिवासभूयं गतः। कस्मै दानीयमिदानीं पानीयम्? अस्तु, परत्र पतितं पृतनाधिकारिणमेव पयः पाययित्वा पुण्य-पूगीकरण-पात्रतां प्रयामि। अन्यतमस्य तु हितं विहितं स्यात्' इति।

१६. अथासौ सौहार्दनिधिः सुकृतं सञ्जिघृक्षुः पयः पात्रमादाय पश्चात् प्रत्यावर्तत। तत्रैव च जलालाभात् कुशकाश-पलाशेषु दीनं पाठीनमिव मेदिन्यां प्रलुठन्तम्, शोणिम-शून्य-रदच्छदम्, अरोचमान-विलोचनम्, श्यानशोणित-श्यामलिम-शवलितवदनम्, सव्यापसव्ययोः मूर्धानं धुन्वानम्, विपुलव्रणवेदनया ग्लायन्तं सैन्याधिकारिणमुपाययौ। तत उपविश्य त्वरया तस्य शीर्षमुन्नमय्य च पयःपात्रमधरपुटेन स्पर्शयामास। हा हन्त! पानीयपानात् पूर्वमेव कक्षे कुञ्चितकन्धरोऽसौ सैन्यधुरन्धरो निश्चेष्टतामापद्यत। व्यथाबाहुल्याद् विस्तृतविलोचने वीक्षमाण एव वीरवर्मणि सहसा तस्य प्रहारपीडायाः पिपासायाश्च प्राबल्यात् प्राणपरम्परा प्रच्छेदं प्राप। गतः सोऽपि तपस्वी देवभूयम्।

२०. प्रागेव वन्ध्योपकारकर्मणो वीरवर्मणो मर्मणि द्वितीयोऽपर आघातः सञ्जातः। एवं परोपचारेण सुकृत-सङ्ग्रहणस्यायमप्यवसरो दैवदुर्विपाकात्तस्य करतो निर्गतः।

हन्त ! हन्ता जीवजातस्य क्रूरकर्मा कालो दुर्वारः। नासौ कुरुते प्रतीक्षणं क्षणमपीति विचारयन् भूयः स किङ्कर्त्तव्यविमूढोऽजायत।

'परोपकारस्त्वशक्यक्रियोजात इति परलोकं प्रति प्रस्थास्यमानस्य स्वसम्बन्धिन एव साहाय्यं विधेयमिति कृतनिर्णयोऽसौ पानीयपात्रमादाय, प्रतीय तत्पदात्, त्वरितपदक्रमो भ्रातुष्पुत्रमुपागमत्।

२१. तमुपेत्य चिन्तायत्तेन यत्तेनालोकि तेन तु नितान्तं तस्य स्वान्तं शोकाक्रान्तं समजनि। समञ्जसे समये सलिलालाभादसावपि पूर्वमेव नाकोपारूढः स्तब्धावयवो व्यलोक्यत। तन्निरूप्य—'कष्टम्! नष्टं एतदपि स्वेहितं हितम्' इति पश्चात्तापं विलापं चान्तरेव कुर्वाणो हस्तग्रस्त पेयपात्रो निराशायनाभ्यां नयनाभ्यां च्युत-चूर्णित-चतुरङ्गे रणरङ्गे श्वसितशून्यानां शूरशरीराणां श्रेणीः पर्यद्राक्षीत्।

विलोकयत्येव वीरवर्मणि परप्रयोजनायात्मयाजिनाम्, स्वार्थं समुपेक्ष्य परार्थं परमं जानानानाम् महाजनानां त्रिकं त्रिदिवयात्रिकं प्रातिष्ठत। परं विचित्राणि विधेर्विलसितानि। अस्रस्रावजन्यया तीव्रोदन्यया खिन्नेन भिन्नेन, सुकृताश्रयेण सैन्यत्रयेण स्वतोऽधिकतरप्रयोजनवते कृतः कोऽप्यपूर्वः परित्यागः, परं केनापि नापायि पयः। इदमाहुः परमार्थतः सुख्यं मुख्यं धर्मकर्म।

२२. एवम्प्रकारेण दुर्वारेण कृतान्तेन ग्रस्ता अपि, विपद्वज्रैर्विध्वस्ता अपि, सुहृत्सम्बन्धिसार्थैर्निरस्ता अपि, विश्वजनीनवृत्तयः साद्गुण्यसम्पदा समुल्लसन्तः सन्तः सर्वथा न प्रमाद्यन्ति परोपकार-पुण्यपुञ्ज-प्रचयनात्। विजानन्ति ते विवेकदृश्वानो यन्न लभ्यते मुहुर्मुहुर्मानवं जीवनम्, काचकलशकल्पं नितरां नश्वरं कलेवरम्, नास्ति च परहितानुष्ठानव्यतिरिक्तं किमपि पुण्यतरं पौरुषमिति शरीरलाभं चिकीर्षुणा स्वार्थनिष्ठां निरस्य परानुग्रहाग्रहग्रहिलेन च भाव्यम्।

२३. इदमेवोपदिशन्ति पदे-पदे धर्मप्रमाणेषु पुराणेषु सन्मतीनां शिविप्रभृतीनां सुकृतसरणिदर्शनानि निदर्शनानि। अपि च—स्वस्नेहिनां तु कृते सर्वैरपि प्राणभृद्भिरनुष्ठीयते त्यागः, परार्थं तु विरलैरेव वीरवरैः। तथा चास्वाद्यतां काव्यकरणकौशल्यशीलस्य कस्यचित् कविकण्ठाभरणस्य निर्भर-रसोद्गारम्, मिलितामृतधारम्, सारघसारम् निरवद्यं पद्यम्—

'मध्याह्ने दववह्निनोष्मसमये दन्दह्यमानाद् गिरेः,
कृच्छ्रान्निर्गतमुत्तृषं जलमथो वीक्ष्यैकरक्षाक्षमम्।
प्रेम्णा जीवयितुं मिथः पिब पिबेत्युच्चार्य मिथ्या पिबन्,
निर्मग्नास्यमपीतवारि हरिणद्वन्द्वं विपन्नं वने'॥ इति।

करुणा-वरुणालयः (२६)

१. प्रायः समतीता स्फीता संसारसुखासुखमयी वत्सरसहस्राणां द्वयी। तेषु दिवसेषूदीच्यां प्रवर्तमान-हूणाद्युपद्रव-सङ्घर्षे भारतवर्षे प्राज्यं मौर्यसाम्राज्यं अनुदिनमपचीयमान-सन्मान-समृद्धि-सुखं; अधःपतनोन्मुखमजायत। बौद्धमतावलम्बित्वादहिंसाव्रतशीलस्य, कपोत-पोत-कातरचेतसः, सम्राजो बृहद्रथस्य ससुखं मुखामुखि हस्ताहस्ति अस्यसि सोढानेकजन्याः शूरम्मन्या धन्याः प्रत्यर्थिकुलकालाः कराला अपि प्रजाः शृगाला इव दीनाः क्रमेण पौरुषहीनाः समभूवन्। प्रान्तेषु प्रदेशेषु च प्रबलाः प्रत्यर्थिनः प्रादुरासन्। समन्तात् सामन्ता धूर्त्ता मूर्त्ता इव राक्षसा रक्षावृत्ति-विमुखाः कामचारेण प्रजापीडने प्रासजन्। मात्स्यन्याय-प्रवृत्तेः विश्वतो बलीयांसो विवशान् बहुलं बबाधिरे। स्तेन-लुण्टितसदना विवर्णवदना अत्याचारापारदुःख-दैन्यागाराः विहिततार-हाहाकाराः सदाचाराः सदार-दारिका-कुमारा नराः परित्राणाय प्रतिपलं परमात्मानं प्रार्थयन्त। पारिप्लवत्वात् प्रशासन-परिष्ठितेः पुरीषु पत्तनेषु पल्लीषु च प्रात्यहिक-प्रयोजनीय-पदार्थाऽप्राचुर्यात् करालोऽकालो विष्वग् व्यजृम्भत। तदुक्तं वृद्धैः—

२. **देशस्य राज्ये सति हा! सदोषे, कार्श्यं प्रयातेऽथ च राज्यकोषे।**
उत्पाद्यते सञ्चयिभिः करालः, सर्वत्र राष्ट्रे सधनैरकालः॥ १॥

तथा च—

महीपतौ कातरतानिकेते, विलासितां चालसतामुपेते।
राष्ट्रे प्रजास्तप्तहृदोऽतिदीनाः, भ्राष्ट्रे यथा बीजचया लुठन्ति॥ २॥ इति।

विवर्धमान-बाधाव्रजानां प्रजानां वराकीनामेवम्भूतां विधूतान्तरङ्गां चिन्ता-दरानुषङ्गां विवशां दशां दृष्ट्वा तत्साम्राज्य-सेनापतिः पुष्पमित्रः, प्रतमां परितापमापत्। एकदासौ सकलोपप्लवानां कारणं शासनशिथिलतां परिज्ञाय प्रजापरिरक्षण-पराङ्मुखं, पौरुषहीनप्रकृतिं, पञ्चशर-परवशं, प्रमदाप्रेमपरायणं, पृथिवीपतिं दुर्मतिं कीर्त्यमान-कातर्यकथं, बृहद्रथं पदाति-पृतना-प्रसमीक्षा-प्रसक्तं पङ्क्तिशः प्रतिष्ठितेषु पश्यत्सु पत्ति-प्रवीर-प्रवरेषु, पारेरक-प्रहार-प्रेरणया प्रेतपति-पुरीं प्राहिणोत्। गहन-दहनवत् परितोऽपि प्रसृतः प्रवादः। पृतनापतिना पुष्पमित्रेण पार्थिव-प्राण-प्रमापण-प्रवृत्तिं परिश्रुत्य प्रकृतयः परस्पर-परिरम्भणप्रनर्त्तन-प्रभृतिकाभिः प्रभूताभिः

प्रक्रियाभिः परमां प्रसादपरम्परां प्रादुश्चक्रुः। तदाहुः—

३. पापपोषिणि पञ्चत्वं, प्रापिते पृथिवीपतौ।
प्रसादं प्रतिपद्यन्ते, प्रगाढं पीडिताः प्रजाः॥ ३॥

किं च— कारणं कारणाया यो, राजा लोकस्य जायते।
मारणं तस्य सर्वत्र, परां प्रीतिं प्रतायते॥ ४॥ इति।

सोऽयं प्रकृत्या विचित्रः क्षमया पवित्रः पुष्पमित्रः सद्विप्रवर्ग-वंश-विशेष-विभूषणम्, वेदादि-विविधविद्या-विशारदः, प्रत्यर्थि-प्रधर्षणे परशुरामः, परिपूरितार्थिकामः, नैकानीकनायकः; सौन्दर्ये सुमसायकः, सङ्गरे द्विषद्दल-दमनदरः, विक्रमे वृकोदरः, बले बलारातिः, बुद्धौ बृहस्पतिः, दाने वदान्य-हृदयः, दीने द्राग्-दर्शितदयः, तितिक्षायां हरिश्चन्द्रः, धर्मरक्षायामस्ततन्द्रः, अहिंसायां पुनरवतीर्णो जिनः, तेजसि साक्षात् सञ्चरिष्णुरिनः, सत्ये पृथानन्दनः, सौम्यत्वे चन्दन इति स्वच्छ-सकल-सद्गुण-संस्कृतत्वात् सार्व-जनिक-स्नेह-सभाजन-भाजनमजायत। समेऽपि पुमांसः पूजापात्रं पुष्पमित्रं प्रति प्रभूतं प्रेमाणं प्रथयन्तः परस्परं प्राहुः—'न खलु पृतनापतिना प्रतीति-प्रतिष्ठा-प्रभासनस्य प्रशासनस्य वा पार्थिवासनस्य वा प्राप्तये पञ्चत्वं प्रापितः पृथिवीपतिः, किंतर्हि स्वेतिकर्त्तव्यपरवशेन देशस्य दुर्दशां दृष्ट्वा तादृशं भृशं दारुणमकारुणिकोचितमाचरितम्। अत एवासौ सौम्यस्वभावः सत्त्वसम्पत्तिः सर्वदा स्वं सेनास्वामिनमेव समाख्याति, न तु महीपतिम्' इति। क्रमेणातिक्रामति कियतिचित् काले शासति सति सतितिक्षौदार्ये, कृतलोककल्याणकार्ये चक्राचार्ये तस्मिन्नार्ये, सन्ततं सर्वे सुख-सम्पत्-समृद्धिं समासादयन्।

४. एकदासौ सेनाध्यक्षः अश्वमेधाध्वरदीक्षितो नगरान्नेदीयसि विपिने विहरन्, कुतोऽप्यागतेन, चिक्रंसया द्रुतेन, क्रूराकारेण केसरिकुमारे-णानुद्रुतं दूरदेशादुत्प्लवन-क्रमश्रम-विवृतवदनं बहुवेपनं प्राणपरित्राणाय दीनदृष्टया परितः प्रेक्षमाणमेणशावकं निर्वर्ण्य करुणाकरस्तूर्णं तूणीरा-दाहृतेन विषमयेण विशिखेन विकरालं व्यालं व्यापादयामास। पञ्चतां प्रयान्तं पञ्चास्यं पश्यत्येव पुष्पमित्रे वराको वातायुवत्सः वनराज-विघातक-वरूथिनीनाथ-वाणवेधबाधा-विशङ्का-वैवश्याद्वा वित्रास-बाहुल्य-व्याकुलत्वाद्वा, वपुषोवेगवशाद्वा, पङ्कप्राये प्रक्षीण-पूति-पानीये पल्वले पपात। पतन्नेव च प्रगाढ-पङ्कपूरेण प्रायः पाशितः पलायन-प्रेप्सया पुनः-पुनः प्रयस्यन्नपि पादान् पुरतः पश्चात् पार्श्वयोश्च प्रचोदयितुमपि न प्राभवत्। एवं विहिते बहुविचेष्टिते निर्निमेषाभ्यां निर्भरं निराशाभ्यां

नयननलिनाभ्यां निरर्गलं निर्गलद्-नीरनिर्भररस्य, किञ्चित् कुञ्चितयोः कर्णयोः कम्पनैः कामपि कायिकीं कदर्थनां कथयतः, चिक्कण-चिकिल-चुम्बि-चटुल-चारु-चिबुकस्य, शक्तिशून्यत्वात् श्लथमान-श्लाघनीय-शृङ्गशोभि-शुचि-शीर्षस्य, श्रमशंसिना शूत्कारशब्देन शश्वत् श्वासिनः, श्लिष्ट-शुष्क-शष्पशित-शस्य-शूक-शूलशत-गुच्छं तुच्छं पुच्छं पुनरपि पादप्रसाराय परितः प्रेरयतः, पङ्क-प्रलोठन-प्रलिप्त-पृष्ठप्रदेशस्य, दरोद्रेकात् सन्धुक्षणभस्त्रिकावद् द्रुतं निकुञ्चिताध्मात-सुन्दरोदरस्य, निमेषं-निमेषं निम्ने निगूढ-निचित-नीरे निषद्वरे निरवशेषं निमज्जतस्तस्य पृषतपोतस्य सांशयिकीं स्थितिं समालोक्य 'अहो ! मुधैव मृदु-मञ्जु-मूर्त्तिः मुग्धो मृगजहुरयं म्रियते, किं मे वीर्यवतापि वपुषा, वराकोऽयं न परित्रातश्चेदि'ति त्यक्तान्तकातङ्कः, सहजानुक्रोश-विवशः, सवेश एवासौ सहसा दुर्गाधे जम्बालजालेऽवप्लुत्य, वदनवर्जं विनिमग्न-विश्व-विग्रहं वातायु-वत्सं विशालाभ्यां बाहुभ्यां बलयित्वा वेगेन बहिरानिनाय। प्रतीरे प्रणिहितं च तं पोतं पुनः-पुनः प्रेमपूर्णैः पूत्कारैः प्रत्यागतपराक्रमं प्रोत्साहयन्, प्राक् प्रोञ्छित-पङ्कप्रलेपं, पश्चात् पयसा प्रक्षालितप्रायपिण्डं, पर्यन्ते पुनः प्रियपुत्रप्रतीकाशं, पाणिपुटेन प्रणय-पुरस्सरं प्रदत्त-पेशल-परामर्शं, पितृ-प्रभृति-पृषत-पुञ्ज-पार्श्वं प्रयातुं परिमुमोच। यतोह्युक्तम्—

५. **सन्तोऽप्यसुखिताः सन्तो जना विश्वानुरञ्जनाः।**
प्राणभृत्सु प्रतन्वन्ति परां प्रेम-परम्पराम्॥ ५॥
जपाक्षुपाः प्रयच्छन्ति काये कलित-कण्टकाः।
परेभ्यः सौम्य-सौगन्ध्य-सम्भृतां सुम-संहतिम्॥ ६॥

किं च— **प्रगृह्य प्राणिनां पीडामात्मन्यारोप्य च स्वयम्।**
प्रयान्ति परमां प्रीतिं पुण्य-प्राणाः परार्थिनः॥ ७॥

अपि च— **प्रसीदत्युपकारेण न तावदनुकम्पितः।**
यावन् मोमुद्यते पश्चाद् दयावानुपकारकः॥ ८॥ इति।

एवं प्रियदर्शनस्य प्रियक-पोतस्य प्राण-परित्राण-पुण्य-प्रयासे प्रवृत्तस्य पुष्पमित्रस्य प्रशस्त-पट्ट-प्रकल्पितानि परिधानानि पूर्णतया पङ्किलानि प्राजायन्त। तस्मिन्नेवान्तरे वेलाविशेषविज्ञापकः घण्टानादो न्यशाम्यत। सहसासौ संस्मरन् सैन्यसंसत्-समय-समतिक्रमं, पङ्किना पानीयेन परिच्छद-परिमार्जन-प्रसङ्गं परित्यज्य प्रतूर्णपदः प्रातिष्ठत। जङ्घालजवश्च तथैव मलीमसैः वसनैः संवीतः समय-सामीप्यात् सपदि सत्र-सङ्गमे समन्तात् समाहूतान् सीमान्त-सामन्तान् सचिवान् सेना-सङ्घस्वामिनः सभ्य-समूहांश्च

सम्बोधयितुं संसत्सदनं समुपैषीत्। सभासदास्तु शूर-शिरोमणेः करुणा-वरुणालयस्य तस्य तथाविधानि मलीयांसि वासांसि विलोक्य विस्मय-विस्तीर्ण-विलोचना व्यजायन्त। तेषु विशेषतः प्रधान-पुरोहित-पद-प्रतिष्ठितेन पण्डित-प्रकाण्डेन पतञ्जलिना प्रसभं पृष्टोऽसौ यथावृत्तं विन्यवेदयत्। तदाकर्ण्य पुण्यं मृष्ट-मर्म कारुण्य-कर्म सर्वे सभासीनाः प्रगाढं पुष्पमित्र-प्रशंसने प्रावर्तन्त। कीर्तेःकारणं करुणा।

६. तद्वर्णनैः व्रीडित इव वरूथिनीनाथो विहासिवदनो व्याजहार—'वृथैव मे विपुल-वन्दना-व्याख्यान-व्यापारे व्यापृता भवन्तः। न मया किल कृता कापि कृपा कुरङ्गक-कुमारे। तं कोमल-कायं क्रूरेण केसरिणा-क्रम्यमाणं कर्दम-क्लेशाच्च कालेन कवली-क्रियमाणं वीक्ष्य विपुलया वेदनया व्याकुलं मे हृदयमजायत। अतो मयात्मनो वेदनाया व्यपनोदनाय परिरक्षितः पञ्चास्यात् प्रगाढ-पङ्क-परिप्लवाच्च पृषत-पोतः। अनेन मया मृगस्य मनागपि मङ्गलं न व्यधायि, प्रत्युत आत्मन एव कल्याणमकारि। यतो हि तं प्रगृह्य पङ्कपूरात् प्रतीरं प्रापयत एव मे मनसो व्यथा व्याकुलता च व्यपगता' इति।

उक्तं चाभियुक्तैरपि यत् परमार्थतः परपुरुषस्य वा पशु-पतत्रि-प्रभृतीनां प्राण्यन्तराणां वा पीडया परितप्तचेताः कृपाकरः कोऽपि नरः पूर्वतनत्वादात्मनो यातनायाः शातनार्थं प्रथमं प्रयस्यति, पश्चाच्च यत् पर-पीडा-परिहार-प्रयत्ने प्रवर्तते, स परात्मोपकृति-प्रयास एव 'करुणा' इत्याख्यायते।

७. एवं विलम्बितं विसर्पत्सु वासरेषु वासुरासु वत्सरेषु च विश्व-विश्रुत-वीरवर-वाहिनी-विनायकस्य, शिरि-शक्ति शूलशरैः शत्रु-शत-शिरः-शातनस्य, विचित्र-चरित्रस्य पुष्पमित्रस्य, कृपणेषु कारुण्य-करण-कथाः ककुप्-कूलङ्कषतां प्रापुः। स प्रत्यहं प्रजानां पारमार्थिक-प्रवृत्ति-परिज्ञानाय, प्राकृत-पुरुष-प्रतीकाशं परिच्छदं परिधाय, पुरस्य प्रतोलीषु प्रच्छन्नं परिबभ्राम। एकदासावद्वितीयो यदा पूर्ववत् पर्यायेण विशिखासु विहरन् बभूव तदा सहसा कोऽपि वराको विभव-विहीनो बालकः तमुपस्थाय श्लक्ष्ण-श्लक्ष्णां मधु-मधुरां सुकुमार-स्वरां वाचमवोचत् 'महनीय महोदय! मयि कृपां कृत्वा कतिपयान् पणकान् प्रयच्छ' इति। सुकुमार-सौम्याकारः स कुमारः सर्वथा सुमहत्सेना-साम्राज्य-स्वामिनं तं न समभ्यजानात्। परं सैन्य-स्वामिनः स्वान्त-सौकुमार्य-सूचकं सदयं प्रसाद-सदनं च वदनं विलोक्य पणक-प्राप्तये प्रार्थन-प्रागल्भ्यं प्रादुष्कृतं तेन। अनलम्पुरुषीण-वेशस्य

जटिलालकस्य बालकस्य दैन्यदूनं म्लानं व्यञ्जितवेदनं मुषित-मोदनं वदनं वीक्ष्यानीकनायकस्य अदिम-मित्रं पवित्रं मानसं विपुलया कृपयाप्लावितं समपद्यत। स आह— 'वत्स! अचिरादेव भैक्षचर्य्या त्वयोपक्रान्तेति तव मुग्धमाननं पिशुनयति। प्राथमकल्पिकः प्रतिभासि' इति। तदुक्तम्—

८. **याचना काचनाख्याता, कला लोके विदांवरैः।**
तया हीनोऽतिदीनोऽपि, मार्गणो म्रियते क्षुधा॥ ९॥

वागन्या व्यवहारोऽन्यश्चित्रं किञ्चन चेष्टितम्।
दैन्य-दर्शन-दाक्ष्यं च, स्याद् भिक्षा-व्यवसायिनाम्॥ १०॥

आनने म्लानिमानीय, नेत्रे कृत्वास्र-सम्प्लुते।
पुरः पाणिपुटं बद्ध्वा, प्रणिपातः पुनः पुनः॥ ११॥

उच्चावचैर्वचोव्याजैः, वञ्चनं चान्यकौशलैः।
मार्गणानां गुणा एते, गणिता नीति-पेशलैः॥ १२॥

कच्चरं चायथायोग्यं, परिधाय पटच्चरम्।
धन-नश्वरता-गानैः, गद्गदाक्रन्दनस्वरैः॥ १३॥

हृदयं सदयं कुर्याच्छ्रोतॄणां यः स भिक्षुकः।
द्रव्यमाप्नोत्यलं येन तथा लज्जायितं जितम्॥ १४॥ इति।

तदाकर्ण्य बालेनावादि— 'महानुभाव! मया कदाचनापि याचना नाचरिता। द्राघीयोभ्यो दिवसेभ्यो दारिद्र्य-दशया दूरं दूयमानेन मयाऽद्य प्रयाचनं प्रारम्भि। समतीतानि स्तोकान्यहानि, मम पिता तं लोकं प्रयातो यतो न पुनरावर्तते कोऽपि। आवां द्वौ सहोदरौ स्वः। अस्मद्वस्ते तत् किमपि वस्तु नास्ति येन जठर-पिठर-भरणं जीवन-धरणं विधीयेत। वीतघृणस्य विधेर्वैमुख्याद् अस्मत्साहाय्य-सम्पादकोऽपि कश्चिन्न विद्यते। तीव्रतापेन तापिताऽऽवयोः वयोवृद्धा माता मीलित-म्लान-मुखी मुहुर्मुहुर्मुह्यन्ती मञ्चके मग्न-मूर्त्तिः मन्दं-मन्दं म्रियत' इति वदन् बालो गद्गदिका-गृहीतगलो वाष्प-विप्लुत-विलोचनश्च व्यजायत। पुनःप्रस्खलत्पदं प्राह—

९. **मातरं म्रियमाणां मे नरो नीरोगतां नयेत्।**
यस्तस्याजीवनं कुर्यां कैङ्कर्यं वेतनं विना॥ १५॥ इति।

ततः सेनानीः समदुःखी सन् समप्राक्षीत्— 'बालक! कश्चिकित्सकस्तेऽम्बालिकायाः?' इति।

बालको व्याहार्षीत्— 'महाशय! कुतोऽगदङ्कारः कुतश्चोपचारः प्रचुर-स्वापतेयाऽपहारः। अस्मद्भवने विभवस्यैव विनाभावः। अनयैव

निमित्तभूतया प्रभूतया पीडया प्रसह्य प्रेरितोऽहं पुरस्य प्रतोलीषु पण्यशालासु च पदे-पदे पुरुषान् प्रयाचमानः पर्यटामि' इति ।

व्यथा-विशेष-विमिश्रां बालस्य वाचमाचम्य पुष्पमित्रस्य प्रागेव प्राचुर्येण समदुःखितोदयं सुकुमारं हृदयं सुतरां सदयं समजायत। स बालकं तस्य नाम-धामादिकं पृष्ट्वा कतिपयानि रूप्यकाणि प्रसारिते तस्य पाणौ प्रणिदधानः प्रणय-पुरस्सरं प्रोवाच— 'वत्स! व्रज, विलम्बं विहाय वैद्यव्यवस्थां विधेहि। वर्त्मनि वृथा वेला-व्यतिक्रमो नतरां विधेयः। जीवनीयेन जायुना ज्योग् जीवतु जाड्य-ज्वरिणी जननी ते, द्रवतु दूरं द्राग् दुःखासिका च' इति ।

१०. प्राक् प्रोत्साहन-परपुरुषोदारव्यवहारः, पश्चात् प्राप्त-पर्याप्त-प्रार्थनोपहारः स कुमारः चपलचारः कमप्यगदङ्कारमाकारयितुं प्रायासीत्।

अथो वीथीषु विचिन्वन् वरूथिनीनाथो बालस्य विलुप्तोल्लासं वासमाससाद। तत्र प्रतिवेशिनः पुरुषान् पृच्छता पुष्पमित्रेण पर्यज्ञायि यत् परमार्थतस्तस्य प्रसविनी प्रबलया पीडया पीतपरिशुष्कपिण्डा प्रविरल-प्रश्वासा प्रायः परलोक-प्रस्थान-पलानि पर्यजीगणत्। स स्वयं स्वैरं सदनं सम्प्रविश्य समालुलोके यत् सा तदा पाटित-प्रच्छदपट-प्रच्छादिते पङ्किले प्रतनु-पर्यङ्के पतिता पुनः पुनः पानीयं प्रार्थयत। पर्यङ्क-पादान्त-पार्श्वे पीठोपविष्टः पुटित-पाणि-प्रावृतास्यः पृथुकः प्रारोदीत्।

११. अथ ध्वजिनी-धूर्वह आत्मानं वैद्यं वदन् पूर्वं पानीयं प्रदाय पश्चात् प्रणयपूतया मधुसाद्-भूतया सौकुमार्यानुस्यूतया सान्त्वन-तुषारकिरा गिरा वयोऽधिकां व्याधि-विषयिणीं वार्तां प्रारम्भतः परिपप्रच्छ। वैद्यस्य वाचि कञ्चिदनिर्वचनीयं मधुरिमाणं प्रेमाणं च प्रत्यभिज्ञाय जरण्डा जगाद— 'श्रीमन्! मम व्याधि-बीजं वस्तुतो दुस्सहा दैन्यदशा भवति। अतिक्रान्तानि कियन्तिचिद् दिनानि कान्तो ममान्तकान्तिकं प्रयातः। सद्मस्था समस्ता सम्पत् सामग्री च कुसीदिकैराकलिता। स्वल्प-वयस्कौ मे सुतौ। वैमुख्याद् विधेः मत्सविधे तथाविधं किमपि साधनं वा धनं वा न विद्यते येनाहं तयोः पाठनं परिपोषणं च प्रवर्त्तयितुं प्रभवेयम्। न मे मनागपि मृतिभीतिः, परं प्राप्त-पञ्चत्वायां मयि मातृ-पितृ-विहीनयोः मामकीनयोः पुत्रकयोः परित्राणं क आचरिष्यतीति निरन्तरा चिन्ताऽन्तरात्मानमाचामति मे मन्दं मन्दम्। मां प्रभूत-परिताप-परवशां प्रेक्ष्य पूर्वजः पुत्रो विदितानां व्याधि-विघातकानां वस्तुविशेषाणां क्रयणाय विभक्तव्यवस्थां विधातुं विपणीं वा वीथीं वा व्रजित' इति ।

१२. ततो वित्त-विहीनयोः वराकयोः प्रसवित्री-पुत्रयोः दुर्दशां दृष्ट्वा चलित-चेताः सैन्य-साम्राज्य-स्वामी श्लक्ष्ण-प्रकृत्या विश्व-विलक्षणो बाष्पाविलेक्षणो बभूव। तदुक्तम्—

पितृप्रतीकः पृथिवीपतिर् वै, भवन्ति पुत्र-प्रतिमाः प्रजाश्च।
पिता सुखी स्यात् कथमात्मयाजी, कुतोऽपि पुत्रे परिपीड्यमाने ॥१६॥ इति।

अचिन्तयच्चाचिराय स चेतसि—

रातिर्जनेभ्यो भवतीह यश्च, राध्यो जनानामुदितः स राजा।
स्याच्चेदसौ तद्विपरीतवृत्तिः, न्यगादि धीरैस्तु जरा प्रजानाम् ॥ १७ ॥
उच्चैः स्थितो रक्षति शालिपालीः, हली यथा तद्वदिनः प्रजाः स्वाः।
परन्तु कर्त्तव्य-विवर्जितेन, किं स्वामिना स्फोटवदुन्नतेन ॥ १८ ॥
या स्वामिनः कापि कृपा कृता स्याल्लोकस्य नोक्तः स किलोपकारः।
प्रागादराणां जनता-कृतानां, ऋणस्य तत्तु प्रतिदानमेव ॥ १९ ॥

पुनः स्वगतमाह —

प्रह्वोत्तमाङ्गाः पुरुभक्तिभाजः, श्वःश्रेयसं मेऽनिशमीहमानाः।
वादेषु लोका अभिवादयन्तः, पदे पदे मां निगदन्ति देवम् ॥२०॥
दानी दयालुश्च न चेदिदानीं, भवाम्यहं नाम कथं नु देवः।
उपेक्षमाणश्च तथात्मधर्मं, न निन्दनीयो दनुजः कुतोऽहम् ॥२१॥ इति।

१३. पुनः प्रकाशं पलिक्नीं प्रति प्रावोचत् - 'भगिनी! मास्म भूरुद्वेगिनी। परमेश्वर-प्रसादात् सपदि स्वस्था सम्पत्स्यसे सम्पदं च सम्प्राप्स्यसि। प्रयच्छ मे रिक्तं पत्रम्, यत्र तवामयापहारकं भव्ये सेवितव्यं भव्यमौषधीय-द्रव्यं लिखेयम्' इति।

अथ तया पस्त्ये परस्य पत्रस्य परोक्षत्वात् पुत्र-पठनीय-पुस्तात् पाटितं पश्चिमं प्रावरण-पत्रमेव प्रादायि।

पृतनापतिना परिलिख्य पत्रं पटच्चर-परिधानायाः पीडा-परिम्लानायाः प्रवयसः पाणौ प्रणिधाय प्रावादि—'भद्रे! लिखितोऽत्र पत्रे जायुरायुष्करस्ते। एतेन प्राकृतजनयोग्यं गमिष्यस्यारोग्यम्' इति। एतावदामयघ्नमुपायमभिधाय सोऽह्नाय त्यक्त्वा तद्धाम जगाम सङ्कल्पितं स्थानम्।

कतिपयकालकलाभ्योऽर्वाक् कुमारः पुरस्कृतागदङ्कारः समाययौ। समागत्यैव तेन प्रोत्पतता प्रचुर-प्रमोद-प्रकटन-पुरस्सरं प्रोक्तम्—'मातः! नातः परं भाव्यं चिन्ताचान्तया त्वया। सञ्जातं कौशल्यम्। शीर्णं शोक-शल्यम्। वित्तं बहुलं वित्तम्। प्राप्तमीप्सितं पर्याप्तम्। आनीतो

मयाऽऽमयाविजनोद्धारः, प्राप्त-विद्या-पारावार-पारः, सौजन्यालङ्कारः कोऽप्यगदङ्कारः' इति ।

१४. नन्दनं नितरां नन्दिनं निर्वर्ण्य म्लानिम-मुक्त-मुखी मातापि मोद-महोदधौ ममज्ज । तस्याश्च निष्प्रभाभ्यां नयनाभ्यां नन्दननिमित्तं निर्भरं नीरं निरश्चोतीत् । सा स्वैरं समुत्थाय सुतस्य वारं-वारं वदन-वारिजं चुम्बित्वाचचक्षे—'पुत्र ! प्रभुप्रसादात् ससुखं समानां सहस्रं समतियापयिता स्याः । सम्प्रत्येव समुपागतेन केनचिच्चिकित्सकेन प्रादायि पत्रे परिलिखितः कोऽपि जायुः वायु-पित्त-कफहरः क्षेमङ्करः । वत्स ! देववत्स सुतरां वत्सलोऽभूत्' इति ।

आकर्ण्य चिरं तस्या गिरं कुमारेण साकमुपेतेनागदङ्कारेण पलिक्न्याः प्रबल-पीडा-परितापेन प्रकम्पिनः, प्रसारितात् पाणेः पत्रं परिगृह्य पठितम् । तत्रासौ सर्वजित्-सैन्य-साम्राज्य-स्वामिनः, विश्व-विश्रुत-विक्रम-वैभवस्य, कृपणाकुल-क्लेश-कर्षणे कुशलकरस्य, दया-द्रविणदान-दाक्षिण्य-दीक्षितस्य, पूजापात्रस्य, सुगृहीतनाम्नः पुष्पमित्रस्य हस्ताक्षराणि निरीक्ष्य पत्रं परिचुम्बन्, परामृशंश्च पुनः-पुनः प्रणतेन मौलिना, चमत्कृतचेता आचचक्षे—'देवि ! पौर्विकी परकालीना च लीना ते पीडेति परिजानीहि । सम्प्रति समाप्तः सामयः सङ्कटमयः समयः । मत्तः प्राग् यो रोगहा गेहेऽत्रागतः स कोऽपि साधारणो रोगहारी नाभूत् । तेनेदृशं भेषजमलेखि यादृशं दातुं सर्वथा नाहमीशे । महान् लाभस्ते सम्पत्स्यते भगिनि ! । स एषोऽगदङ्कारवेषो राजराजः सन्तोषितसमाजः पृतनापतिः महामतिः पुष्पमित्रोऽभूत् । पत्रेऽस्मिन् यदादिष्टं दिष्टं ते परिवर्त्य निहत्य चाऽरिष्टमशिष्टमिष्टं साधयिष्यति सद्योऽद्यैव तत् । तत्रेदमलेखि यत् स्वर्णनिष्काणां साहस्री तुभ्यं प्रदीयेते'ति । प्रीतः पार्थिवः कल्पपादपः क्रुद्धश्च कालः ।

१५. उपश्रुत्येदं सुतसहिता सा स्त्री स्मारं-स्मारं विस्मयाधारं तमुपचारं महोपकारभारमपारं सोढुं न शशाक । इत्थं पुत्र-प्रसू-परिवारः प्रमोद-पारावारे प्रमग्नः । क्षणं यावद् वक्तुमप्रभवत्सु तेषु मूकिम-साम्राज्यमजायत । यदा तेषां जिह्वाः वक्तुं शक्तिशालिन्यो जातास्तदा ते परां प्रीतिमुपेताः—'सेनानीः सम्राट् स्वस्ति-सौभाग्य-संस्तुतः समानां सहस्रं संसारे स्मयमानः सुखं संवसेत्' इति पुनः-पुनः परमात्मानं प्रार्थयन्त । ततः परावृत्य पुनः पुष्पमित्रोऽपि पुरं परितः परिभ्रम्य प्रजानां परमार्थां प्रात्यहिकीं परिष्ठितिं परिगृह्णन् पल्वल-पङ्के पतितस्य

प्रियकपोतस्य परित्राण-प्रभृतिना प्रयासेन प्रायः परिश्रान्तः पश्चिमपयोधौ-प्लाविते पिण्डित-प्रभे-पद्मिनी-प्राणेश्वरे पूष्णि, प्रत्यागत्य प्रासादं, परि-समापित-प्रादोषिक-पूजापाठ-प्राशन--प्रकृतिपुरुष-परामर्श-प्रभृति-प्रयोजनीयः, पयोज-पक्ष्म-पराग-पेलव-पट-परिहिते पल्यङ्के पतन्नेव निर्भरनिद्रायां निममज्ज। विश्रममपेक्षते परिश्रमः श्रमश्च।

१६. परेद्यवि प्राक् प्रतिपादित-प्रयोजनेन पुनः प्राकृत-पुरुष-प्रतिमं परिच्छदं परिधाय पुष्यमित्रः पुरपार्श्वे प्रतिष्ठितां पल्लीं प्रापत्। तत्र च प्रहरण-प्रयोग-प्रवीणैः, बाहुविग्रह-धुरीणैः ग्रामीणैः विहिताऽऽयोजनां, विस्मित-मानवमण्डलमध्योपविष्ट-त्रैणिकेन्द्रजालिकजनां, नानाविधान्य-मनोरञ्जनां, महतीं मेलामालुलोके। सत्स्वपि प्रभूतेषु द्रष्टव्येषु नव्येषु द्रव्येषु बाहुयुद्धस्यातितमामभिमतत्वात् पुष्पमित्रोऽक्षवाटमुपैषीत्। प्रोत्साहयन्ति पौरुषं पराक्रमिणः।

तत्र चाबद्धबृहद्वलयानां, प्रोत्साह्यमान-परापरपराजय-विजयानां, पुरुषप्रचयानां प्रमुखे आहन्यमानेषु भूरिषु भेरीभरेषु, करकन्धराटङ्गाद्यनेक-कूटकौशलकराणां, परस्पर-प्रधन-पराणां, व्यायाम-बलोत्फुल्ल बाहूरु-वक्षोगल्लानां, महामल्लानां द्वन्द्वानि बाहूबाहवि विधीयमान-द्वन्द्वानि दर्शं दर्शं स्वयमपि युद्धसमुत्सुकोऽभूत्। रङ्गमवतीर्य च मिलित-मल्ल-यमलेषू-त्सिक्तेन, पुरुप्लवन-गुरुगर्जितेन, आहोपुरुषिकयाह्वानकर्त्रा विश्वविजेत्रा बाहुयोधिना विग्रहं विधाय पल एव पाणि-पाद-पाटवप्रदर्शनेन पराक्रम-प्राचुर्येण च पातयित्वा तं पृथिवी-परिस्पृष्ट-पृष्ठं पराजेष्ट। सममेव च सामोदं साधु साध्विति समुच्चं समुच्चारयद्भिः संयुग-साक्षिभिः समस्तैः सामाजिकैः सुतरां सत्कृतः समजायत। परं प्रतिपक्षि-पाणि-परिहितेन शितशङ्कुकोणेन कङ्कणेनास्य कलाची करालतया परिक्षताभूत्।

१७. सहसा समुत्थाय निर्णायक-मुकुटमणिः ग्रामणीः अपरिचित-त्वात् पुष्पमित्रं सम्मान्यमप्यन्यं सामान्यं मानवं मन्यमानस्तस्य स्वर्ण-स्तम्भ-विभ्रमं भुजं परिगृह्योच्चैःकारमिमां वाणीमभाणीत्—'अये प्रेक्षकाः! एष तिष्ठत्यूर्ज्जितानां धुरन्धरः। पराजित-प्रतिपक्षिसेनं सहस्वन्तमेनं मल्ल-तल्लजं बाहु-विग्रहे यः पराजेतुं प्रभविष्यति स पारितोषिकरूपेण रूपक-पञ्च-शतीं पटकं च प्राप्स्यति, पराजितश्च परः रूपक-शतकद्विकम्' इति।

तद्वाचं श्रवणेन्द्रियेणोपलभ्य दुर्बलदेहो दृढबद्धकौपीनोऽतिदीनो द्विजातिः कोऽपि तेन सह बाहुयुद्धार्थं अक्षवाटमवततार। अपरः कश्चनापि प्राण-प्रणाश-प्रतिष्ठा-प्रलोप-परित्रासात् पदात्पदमपि तत्र न प्रचचाल।

तं तथा भृशं कृशं सञ्चरिष्णुमिव कङ्कालं शूनशिराजालं वीक्ष्य विस्मिता बहुस्मिताश्च द्वन्द्वदर्शिनो दूरादेव मृगेन्द्र-मार्जारयोरिव महसो महदन्तरं मत्त्वा ढोल-ध्वानमप्यवधीरयन्तो दुर्बलं मल्लमभिलक्ष्योच्चावचानि वचनान्युच्चैस्तमामूचुः।

१८. कश्चिदकथयत्—'कुटुम्बक्लेशितः किल कलत्रेण कलहं कृत्वायातः'। अन्यो वार्त्ताहरो ब्रूते स्म—'यमदूताहूतोऽयम्'। परो रजकः प्राह—'विरक्तो विश्वतो वराकः। धावितमेव जानीत'। इतरो वैद्योऽवादीत्—'कण्डूलं मस्तिष्कमूलं तपस्विनः। मेदुरितानि दुरितान्यस्य'। बहुल-व्याकुल-वाग् ब्राह्मणो व्याहरत्—'ब्रह्मबन्धुः पारायणं चिकीर्षति'। अपरो मुरलीकार आचष्टे—'वंशाद् बहिष्कृतो बन्धु-बान्धवैरयं भाति'। पार्श्वे प्रहसन् मृगयुरगादीत्—'कालकुक्कुरेण दष्टः, पितृपति-पाशे पिपतिषति'। अन्यदीयो धीरो धीवरोऽभाषत—'दीनो मीनो विकरालं कालं जालं समुपेतः'। उत्कन्धरः प्रपदस्थः शाकुनिकोऽचकथत्—'काकरतिरनेनालोकिता'। अमुतो व्यतिरिक्तेन वाणिजेनालपितम्—'प्राणान् प्रदाय पणान् परीप्सति प्रष्ठः। केयं तुलना?'। पृष्ठतः केनापि महाब्राह्मणेनोदीरितम्—'प्रेतपटं क्रीत्वागतः, शवशिबिकामानयत'। प्रहरिणा पुरुषान्तरेण प्रोक्तम्—'उन्मत्ताश्रयादुन्मोचयित्वात्मानं पलाय्य प्राप्तः। पचेलिमानि पापफलान्यस्य'। केनापि क्षत्रियेणाख्यायि—'नालं मल्लो मल्लाय। कः कलहः कोदण्डिना दण्डिनः?'। पूर्वपङ्क्तिस्थेन कुलालेन प्रावादि—'कालचक्रं भ्रमत्यस्य मस्तके। मणिमादित्सते लोलुभ आशीविष-शीर्षात्। घटो भग्न एवेति वेदनीयम्'। परतः परिहसता तैलिकेनाभाणि—'स्नेहशून्यः सोऽयं खलु खलः। स्वां स्त्रियं सन्त्यज्य स्वः-सुन्दरीसमागम-सुखं समीहते'। प्रतीच्यां स्थितेन नापितेनाऽपि तेन विज्ञापितम्—'हन्त! भद्रा-करणायास्य सुतस्य मया यातव्यं भविष्यति'। पश्चात् पलितेन प्रवयसा प्रावाचि—'विपरीतविधेः बुद्धिः विकृता। बलभद्राय बलिं वितितीर्षति'। रामायणपाठिना केनापि सकरुणेन तरुणेनाख्यायि—'सुरसामुखं प्रविविक्षति तपस्वी मत्सरः'। पर्यन्ते लम्बमानालक-जालकेन बालकेन केनचिद् व्याहारि—'काचक्रीडनकं प्रस्तरेण प्रतिस्पर्धते' इति।

१९. अत्रान्तरेऽन्तरेजमानो वराको ब्राह्मणो वारण-वरेण्यबलवच्छरीरं महावीरं धन्यं मल्ल-मूर्धन्यं दीन-दुर्बलमित्रं पुष्पमित्रमक्षवाटस्थमुपेत्य निभृतं निजगाद—'महानुभाव! नियतं नाहं मल्लः। तृण-तुल्य-तनुः दरिद्रितो द्विजातिरहम्। पुत्र्याः परिणये वरयात्रिक-वरिवस्या-वसन-

विभूषणादि-व्यवस्था-निमित्तं पञ्चशती रूप्यकाणामपेक्ष्यते। भवनाद् भवनं भिक्षार्थं भ्रमितममितं मुधा मया। कोऽपि कृपालुर्भूत्वा कृपणाय पणमपि न दित्सति। अन्यतो नितरां निराशोऽद्यैव दैवहतोऽहमगमं वाञ्छित-विभव-लाभाय करुणा-वरुणालयस्य दरिद्रायक-दुःख-दलनस्य प्रजामित्रस्य पुष्पमित्रस्य प्रासादम्। परं क आकर्णयत्यकिञ्चनस्य वाचम्। प्रतिहारिभिः प्रहरिभिश्च प्रसभं प्रतिद्रावितोऽहं पश्चात्। प्रोक्तं च तैः—'न विद्यते परमपूज्यः पृतनापतिस्तत्रभवान् भवने। को जानीते कदासौ प्रत्यावर्तिष्यते' इति। आह! दृढं दुःखदायिनी दरिद्रता-दानवी।

२०. 'प्रियवर! परश्वः पुत्र्याः पाणिपीडनम्। सम्प्रति सर्वतो गताशस्य किङ्कर्त्तव्य-विमूढस्य त्वमेव मेऽवनविधाता भव। परिपाहि मां मान-मर्यादा-भङ्गभयाद् भगवन्!' इति वदतो ब्राह्मणस्य वाष्पविमोचने विलोचने वीक्ष्य नियुद्धनिपुणः कृपाकरः पुष्पमित्रः स्वैरमाहस्म—'प्रेयन्! तूष्णीकस्तिष्ठ, पृथिव्यां पतितस्य ममोरस्युपवेष्टव्यं त्वरितं त्वया' इति। मृदुमानसत्वमेव हि महतां महिम्नो मूलम्।

भुजाभुजि प्रारब्धं प्रधनम्। अदिम्ना द्विजस्य दुर्बलं देहं दमयन्नथ गमयन् खेलया वेलां, पञ्चकृत्वः पाणिपादयोः प्रतियत्नपूर्वं पेशलत्वं प्रदर्श्य सहसा स्वयमेवोर्ध्वमुखो रङ्गभूमौ पपात पृतनापतिः। द्रुतं द्विजातिरपि दर्शितदिशा तस्य वक्षस्युपविवेश। तावदेव प्रकृत्या पूर्वंज-प्रतीतेन पतितेनैव पुष्पमित्रेण दरिद्रितस्य द्विजन्मनः पांसु-पूरितौ पादौ परामृश्य प्रोक्तम्—'पूज्यप्रवर! प्रीतः प्रयाहि। प्राप्नुयाः प्रथमं पारितोषिकं पटकं च' इति। पुनः परोपकरण-पुण्येन प्रसन्नास्यः प्रोत्थाय पल्ली-प्रधानपुरुषस्य पार्श्वं प्राप्य प्राह—'ममापि भागो महाभागायास्मै प्रदातव्य' इति। द्विजन्मा तु तस्य तादृशेनार्यावदानेन तथौदार्यदानेन भृशमुपकृतो-ऽनिर्वचनीयेनामन्दानन्देन सम्भृतो धन्यवादाक्षराण्यप्युच्चारयितुं नाशकत्।

२१. ततः परं प्रयाते विश्वविख्याते दमितामित्रे पुष्पमित्रे, विस्मयापन्नो ग्रामणीः पूर्णं पारितोषिकं प्रदाय पश्चाद् ब्राह्मणं परिपप्रच्छ—'महानुभाव! कथङ्कारं चारुचमत्कारं वृत्तमिदं वृत्तम्? कश्चासौ करिकराकार-भीम-भुजो मल्लमतल्लोऽभूत्?' इति। अग्रजन्मना प्रत्यवादि—'पल्लीपते! नाहं जाने किमीयः कुतस्त्यश्चासौ। इदं तु विचिकित्सां विना वेद्मि यद् दयादानादिदिव्य-सम्पत्सम्पन्नस्वान्तत्वात् स साक्षाद् देव एव। पुरातन-पुण्यपुञ्ज-परिणत्या प्राप्तो मया पावनस्य तत्पिण्डस्य परामर्श' इति।

२२. तदनूपकृतज्ञता-प्रसाद-प्रसूतं वाष्पबिन्दुवृन्दं विकिरता ब्रह्मणा-मूलचूलं यथावृत्तोऽक्षवाट-वाद-वृत्तान्तो विन्यवेदि। पुनरसौ 'हा! प्रधनस्य प्रारम्भे पर्यवसाने चापि प्रफुल्ल-प्रसून-प्रसन्न-मुग्धमुखमुद्रेण महितात्मना महामल्लेन ममाकिञ्चनस्य कृते कीर्त्तिः काञ्चनं चेत्युभयं सपराजयभयं तृणप्रायं, मत्त्वा धीरतयाऽवधीरितम्। नासौ पराजितो जातः, दैन्यं मे पराजितम्' इति विविधां वचनवीथीं व्याहरन्, सुमनः-स्तवकैः समर्चयंश्च तं स प्रचुरां पश्चात्ताप-परम्परां पुञ्जितानां पुंसां प्रमुखे प्रादुश्चकार। एवंस्थिते पल्लीपतिरादरोदरया गिरा पार्श्वोपविष्टान् प्रेक्षकान्—'पूजापात्रभूतः कोऽसौ देवदूतः?' इति प्रत्यभिज्ञातुं पुनः-पुनः प्रश्नयाञ्चकार। तत् परिश्रुत्य पश्चात् पीठस्थेन पुराणेन प्रणिधिना प्रत्यवाचि—'रे सौभाग्यभाजः। निःसंशयं देव एव दृष्टो भवद्भिः। एवम्भूतः कोऽन्योऽधन्यानां बन्धुः कृपासिन्धुः ऋते राजराजेश्वरात् पृतनापतेस्तत्रभवतः पुष्पमित्रात् सम्भवत्यस्मिन् स्वार्थसारे कलिकाले। किं न निरूपिता युष्माभिरनामिकायां महाराजस्य महारजतमयी महामूल्याऽक्षुद्रा मुद्रा?' इति।

२३. तन्निशम्याग्रजन्मा तादृशेनादृष्टाश्रुतपूर्वेण तदुपकारेण पारितोषिक-भारेण च नामितमौलिः प्रतिपदमाशीराशीन् वितरन्, वरूथिनीनाथस्य गरिमाणं च गायन् स्वेष्टं स्थानं समयासीत्।

परत्र प्रधने प्राप्तेऽपि पराजये, पुत्रीपरिणये प्राघुणपूजा-प्रभृति-प्रयोजनेन परिप्रेप्सवे पूज्यपुरुषाय पारितोषिक-प्रदापनेन परमप्रीतः, परिक्षत-प्रवेष्टः पुष्पमित्रः पाटलिपुत्रं पत्तनं प्रत्यावर्त्तमानः पथि महामाया-मन्दिरे मिलितं बहुविध-व्याधिव्याकुलं जनसङ्कुलं समालुलोके, पप्रच्छ च—'कुतो नु समस्ता गदग्रस्ता एव समवेता एते'? इति। तत्रैकेन प्रत्यवाचि यद् यः कोऽप्यत्रोपोषितः प्रदोषात् प्रत्यूषपर्यन्तं मङ्गलमयीं महामायामुपास्ते परमार्थ-प्रत्ययपूरितः प्रार्थयते च, स ध्रुवं प्रातः प्रागेव पूष्णः प्रकाशस्य प्रसारात् प्रशान्तपीडः परं प्रसादं प्रपद्यते' इति।

२४. प्राप्तप्राये प्रदोषे पुष्पमित्रोऽपि परिक्षत-पीडा-परिहार-प्रयोजनेन पीडितानां पुंसां पङ्क्तावुपविष्टः पार्श्ववर्तिनं पुरुषं पप्रच्छ—'कस्तवामयः'? इति। वेदनया दूनो दीनवदनोऽसौ विनिवेदनं व्यधात्—'महाशय! किमनिष्टेन पृष्टेन। केनाप्यसाध्येन कालेनेव करालेन चिरकालेन प्रतिक्षणं प्रक्षरत्-पूयपूरेण गूढेन रीढकरूढेन विद्रधिना शूलाक्रियमाण इव तोतुद्यमानो न म्रिये न ध्रिये। सम्प्रति दैन्यविपन्नस्य

मरणासन्नस्य मे प्राण-परित्राणाय भगवत्या भवान्या बहिष्कृत-विषादयोः पादयोः सर्वभावेन स्वस्य समर्पणमेव परमश्चरम उपचारः' इति। सेवा देवानां वाञ्छितं वितरति ।

तच्छ्रुत्वा तस्य तथा वर्णनेन व्रण-निर्वर्णनेन च सञ्जातकम्पः सानुकम्पः पुष्पमित्रः सुचिरं चेतस्यचिन्तयत्—'हन्त! एतद्विकारापेक्षया तु नितान्तं तनिष्ठो द्वित्रदिनोपचारसाध्यो मे व्याधिः। केनोपायेनास्यामयोपशमः कल्पेत ? सज्जोऽहमेतदर्थं देहदानाय वा वपुर्विनिमयाय वा सकल-सम्पत्-समर्पण-समयाय वा' इति ।

२५. स्व-स्वविकारापहारायैव सर्वरात्रं संहतैः समस्तैः व्याधितैराराधिता शोधित-कलुषकदम्बा जगदम्बा दयामयी महामाया। परन्त्वात्मनो व्याधिबाधां विधूय प्रबलतमया पीडया प्रतिपलं प्रेतपति-पाश-पार्श्वे प्रयास्यतः तस्य सन्निकृष्टोपविष्टस्य विद्रधिविकारिणो दुःखद्रावणाय क्रियासमभिहारेण प्रार्थयामास पार्थिवसार्थपराजेता, परार्थ-पूरण-परायणः पुष्पमित्रः —'दुःखदलनदक्षे! जनित-जीवजातरक्षे! नाहं नामात्मार्थं कामये कामपि निरामयताम्। अयि करुणामयि! मयि प्रीतासि चेत् तुष्यत्वेष तीव्रं तोदितस्तपस्वी। मत्स्थाने एनमेनस्विनं प्रसादपात्रतां प्रापय। नष्टं जायतामस्य कष्टम् । हे दुर्विध-दुरित-दलनोदितदये! अदिम-मिलित-स्निग्धहृदये! मया वीतजन्मसु कृतानां सुकृतानाम् अविकलं फलं व्ययीकृत्यापि वितराजीवनभोग्यम् आरोग्यम् अनुग्रहयोग्यायास्मै। मत्प्रार्थनायाः सकलं फलं मह्यमेव दित्सितम्, न चास्मै इति चेद्, देहि देहस्थमस्य कृत्स्नं सपापम् असह्यमुपतापं मह्यम्। विद्रधि-व्याधिमस्य विग्रहाद् बहिष्कृत्य, निवेशय मुधात्मपुषि मे वपुषि। मातः! प्रातः सुस्थः स्यादयं वराकः प्राप्तपुण्यपरिपाकः' इति। अबन्ध्याः प्रार्थनाः किल सकललोक-कल्याण-कराणां नरवराणाम् ।

२६. तत्पश्चात् क्रमेण पश्चिमाचलचूडाचुम्बिनि, किरणकूर्चिकया मृदु-मार्जित-मन्दिरे, शुचिरोचिषि चन्दिरे, प्राच्यां प्रत्युद्गते च शीत-शङ्का-शङ्कु-शकलन-शोचिःशालिनि, मुद्रित-मुख-मृणालिनी-मौन-मोचन-मरीचि-मालिनि, तिमिर-स्तोम-तिरस्कारिणि, भूतल-भूत-भ्रम-भीति-भञ्जन-किरणहारिणि तपताम्पतौ, देव्या दुर्गाया दयया पृतनापतिः पुष्पमित्रः पार्श्वोपविष्टः पीडितः पुरुषश्च पूर्णतया परिहृतपीडौ प्राजायेताम् । यतो हि—

परपीडा-प्रलोपाय, परमेश्वर-पूजनम् ।
कुरुते परकल्याणं, परित्राणं तथात्मनः ॥ २२ ॥

यावत् परोपकाराय, सङ्कल्पः सम्प्रजायते।
तावदेव सपापानां, स्वतापानां क्षयो यतः ॥ २३ ॥ इति।

२७. एवम्प्रकारेण विजित-संसारेण, बलविक्रमवैभवसारेण, सम्भृता अपि करुणैकपक्षपातिनः, सौजन्य-संस्कृताः, प्रसाद-प्रकृतयः साधवः स्वं संहननसुखं सम्मानं समाख्यां स्वस्थतां चानपेक्षमाणाः, प्राणप्रहाणेनापि प्राणभृतां परित्राणाय प्रतिक्षणं प्रयतन्ते। तेषां दिव्य-दया-दानानि महावदानानि केवलं श्रवण-शष्कुली-श्रितानि ग्रसन्ति गर्हितं गुह्य-गर्ध-गौरव-गर्वंगदम्, मथ्नन्ति मिथ्या-मरीचिकायमानं काय-मानम्, प्रक्षालयन्ति पातकपङ्कपूरम्, दूरं द्रावयन्ति दोषदारुणं दुर्वृत्तम्, प्रथयन्ति प्रतिष्ठितं परमार्थ-प्राप्तिपथम्, दर्शयन्ति दिव्योद्देशदिशम्, प्रकाशयन्ति प्रपञ्च-प्रतिकूलां पावनीं पुण्य-पद्धतिम्, पुनः प्रापयन्ति प्राणत्प्रेप्सितं परमं पदमिति परिशीलनीया तितिक्षाऽकूपारस्य, परोपकारैकव्यापारस्य, कृपा-कृपाणाभ्यां जगज्जैत्रस्य, जनोत्तर-चरित्रस्य पुष्पमित्रस्य वर्या जीवनचर्या कल्याण-काङ्क्षिभिरिति।

परसम्प्रदाय-सहिष्णुता (२७)

१. इह महीयोमहीधरमाला-निर्यन्नदनदीसमुन्नादिते, विपज्जनक-विपथ-व्याप्त-विपिन-वीथी-वेष्टिते, समर-समीहन-सैन्य-सन्निपात-सञ्जननायेव स्रष्ट्रा सृष्टे महाराष्ट्रे, विद्यतेऽद्यापि पुण्याभिजनं पुण्याभिधानं पावनं पत्तनम्।

२. पुरा तत्रैकदा कस्मिंश्चित् परिष्कृत-पीतपाण्डु-पाटल-पाषाण-पालि-प्रकल्पित-प्रांशुप्राकारे, प्रतिपल-प्रेक्षण-प्रतीयमान-पेशल-प्रतिनवाकारे, विष्वग्-विग्रह-वार्त्ता-व्यग्र-वीर-व्रजे, भास्वद्-भानु-भासमान-भूयो-भव्य-भगवद्ध्वजे, शाणित-शिताग्र-शूल-शङ्कु-शलाका-शल्य-शत-जडित-कपाटे, प्रफुल्ल-पृथु-पद्म-पत्र-प्रतिरूप-पाटे, पदे पदे परिभ्रमत्-प्रहरि-पदाति-पुञ्ज-परिपाल्यमान-परिसरे, प्रायः-परिग्रहाय-प्रयतमान-परिपन्थि-पृतना-पराजय-परिणत-प्रसरे, शैल-शिखर-विशाल-शिला-शकल-श्रेणि-प्रतिबद्ध-मुख्यमार्गे, पौर-प्राघुण-प्रभृति-पुरुष-पुर-प्रवेशपत्र-परीक्षण-प्रवण-प्रणिधिवर्गे, द्वेषण-दल-दुर्गमे दुर्गे, सन्निहित-सम्मान्य-सैन्य-समाजः श्रीशिवो महाराजः, राजमान-राजकेतने पटनिकेतने, तूष्णीम्भूतः किञ्चिच्चिन्तानुस्यूतः सिंहा-

कारत्वाद् वित्रासनं वेत्रासनमध्यासीनोऽन्तरान्तरा पुनः-पुनः समुत्थायेतस्ततः पर्यक्रामत्। सञ्जातः सन्ध्या-समयः। सत्वरमस्तमयनाय सरति सकल-संसार-सदसद्-व्यापार-साक्षी सहस्रांशुः। नाद्यापि परावृत्तः शस्त्रि-शत्रु-शूर-शत-शातन-कृपाण-करः श्रीमाधव-भामलेकरः ससादिततिः महामतिः सेनापतिः। तमेव तीव्रतमोत्कण्ठया प्रत्यैक्षिष्ट रूढ-कोट-प्राचीरः श्रीशिववीरः।

३. अत्रान्तरे हस्त-न्यस्त-पुस्तः पृतनापतिः प्राप्तः। तमनु दूरतर-देशाद् दृश्यमान-दीप्र-दिव्यद्युति दोलिकां दधद् योध-युगलमाययौ दोलां तत्र निधायाऽभिवाद्य च शिववीरं धीरं योद्धृ-युगमपाक्रामत्।

कृतप्रणतिः सेनापतिः मुदितमुखः सम्पृष्ट-कुशल-सुखः प्रकाशं प्राह 'दीन-दुर्बल-गते! छत्रपते! अद्य सद्यः प्रबलाक्रमणेच्छानां म्लेच्छानां बलावलेप-विह्वला विपुला वाहिनी मध्येमार्गं मारिता अपसारिताश्चाव-शिष्टाः दुष्टाः द्विष्टाः दूरदेशावधि। वराको विपुष्ट-वध-विध्वंसविधौ बहुल-विलोलः स बहलोलः प्राण-परित्राण-परायणः प्रियां प्राणेशामप्य-पाश्रयां परित्यज्य प्रधनपराङ्मुखः पलायिष्ट। विषमेऽप्यविषादिभिः, सङ्गरे सिंहनादिभिः, भवत्सादिभिः आहवायाहूताः भीत्यभिभूताः प्रभूताः परि-पन्थियोधाः, उत्सृष्टविरोधाः संरम्भारम्भ एव तथा चपलं पलायिताः यथा तेषां पाद-प्रहतः पांसुपूर एव दूरं यावद् देश-दिशासु दृष्टः शिष्टः। सर्वथा न सम्भवति सम्प्रति सामर्थ्यं साहसं वा सपत्न--पृतनायाः पुनः प्रदेशमिमं प्रवेष्टुम्' इति।

४. दोलिकामुद्दिश्य धीरतयाप्राक्षीत् शिववीरः—

'किमिदम्?' इति।

प्रोच्चैः प्रहसन् पृतना-पतिः प्राह—'अस्यां म्लेच्छ-महिला-मण्डली-महनीया, महीयो-मञ्जिम-मण्डिता, बहलोलस्य वधू-वृन्द-वृन्दिष्ठा विद्यते। सेयं सौन्दर्य-सीमानमतीता भवद्भ्य उपायनीकर्त्तुमानीता। उक्तं च यतः—

प्रायः प्रियप्राणतया परेषु, पराजयं प्राप्य पलायितेषु।
प्राप्ताः प्रकामं प्रधने पदार्थाः, प्रयान्ति पार्श्वे पृथिवीपतीनाम्॥ १॥

अतः—**ऊर्जितेनार्जिता जन्ये, जयनैर्ध्वजिनी-जनैः।**
जनीयं जायतां जाया, श्रीमच्छुद्धान्त-शोभिनी॥ २॥ इति।

५. अयमपरो मत्पाणिधृतः पट्टपटप्रावृतः, यवनानां पावन-पुण्य-पुस्त-प्रधानः कुरानः प्रतिगृह्यताम्। हिन्दुधर्म-घातिभिः अरातिभिः पुरातन-मधुनातनं च स्वैरं वैरं निर्यातितं विधीयताम्। पुनः पुनः पाद-पातैः

पादत्रैः प्रस्तर-प्रहारैश्च प्रहतं पिष्टप्रायं पूति-प्रणाल-पांसुपूरे प्रक्षिपन्त्विमं पूज्य-प्रवराः'।

अथ शिववीरः स-सम्मानं कुरानं शय-कुशेशय-द्वयेनादाय चुचुम्ब। पुनः प्रवहण-पार्श्वे प्राप्य प्रावरणपटं पराकृत्य, नीलनिचोलां बहलोल-वल्लभां अदिम-मिलितया मधु-मधुरया वाचा बहिराव्रजितुं व्याजहार। विरह-विलुप्त-चञ्चलतया, दुःखोद्रेक-म्लायन्मञ्जुलतया, वेपमान-तनुलतया तया तथैव व्यधायि। सहसंवासः संत्रासः स्त्रीणाम्।

६. ततः चन्द्रिकयेवालिङ्गितां, चान्दनेनेव रसेनोपलिप्तां चन्द्र-चूर्णेनेव विरचितां प्रशस्त-समस्ताङ्गां तामङ्गनां आपादमस्तकमालोक्य शिववीर उदीरयामास— 'तत्त्वतः त्वत्तः सुतरां काप्यभिरामा रामा नतरामालोकि मया लोके। अहो प्रशस्यं पैशल्यं प्रजापतेः।' पुनः सहसा गम्भीरया गिराऽगादीत्— 'हन्त! नाहन्तव जठराज्जातः, अन्यथा ममापि काल-कलेवरे कियती कान्तिरभविष्यत्' इति। अचिन्तनीयं खलु चरितं महताम्।

७. ततस्तत्र तदानीमेवानभिमानी दयादानी देवः पार्श्व-पटकुटीरे सदाऽऽसीनां दासीनामुत्तमामाहूय भूयसा प्रेम-प्रमोद-प्रदर्शन-पुरस्सरं बहलोल-बध्वाः पयःपानादिभिः प्राघुणपूजामकारयत्, वियोग-व्यथा-विहस्तां चाश्वस्तां व्यधात्। परस्तात् परमधिकारिणमादिदेश—'सम्प्रत्येव सादरं सम्यक् सुरक्षिता बहलोल-बल्लभा, नियत-यवनधर्म-विधानः कुरानश्चेति द्वितयं बहलोलखानस्यैव पार्श्वे प्रापणीयम्' इति। नास्थाने कुर्वन्ति कोपं कुलीनाः।

८. ततः परं परमोदारः सदाचारः सुधीरः श्रीशिववीरः ईषत् त्रपितं पृतनापतिं निर्भरं निर्भर्त्सयन् निजगाद—'सेनापते! एतावान् सुख-दुःखमयः समयो मया सह विहरतो व्यवहरतो वसतः सततश्च तवातियातः, न तु व्यक्तं मे व्यक्तित्वं प्रत्यभिज्ञायि त्वया। वीरब्रुवा वयम्। नेदं विक्रम-चक्षणं वीराणां लक्षणम् यत् तेऽबलासु प्रहरेयुः, तासां पातिव्रत्यं प्रसभमपहरेयुः, पावनानि पर-सम्प्रदाय-पुस्तानि च प्रदहेयुः। कस्यापि संस्कृतेः समुन्मूलनं वितण्डोद्धूलनं च कस्यचनापि कर्त्तुः कातरतां व्यनक्ति।

९. अथ च—

एवम्प्रकारा इह कूटकाराः, स्वधर्मणः स्युर्न कृतोपकाराः।
परस्य पुत्रस्य वधेन जातः, स्थास्नुः स्थवीयांश्च किमात्मजातः?॥ ३॥

अपि स्वधर्मस्य विघातको भवेत्. कृतः प्रहारोऽन्यमते जिघांसया ।
दृषद्धतः कोऽप्युपलो द्रढीयान्, स्वघातनायैव कदापि कल्पते ॥ ४ ॥
तेनैतादृशामदूरदृशां कातराणामनिष्पन्नाऽऽशो नाशोऽपि तत्त्वतः त्वरितं परिणमति । अनुदित-द्रोह-दहनः परधर्म-सहनः विक्रम-वहनः वास्तवो वीरः । तदाहुः—

कुसूत्रं परधर्मस्य, यो विघाताय तायते ।
तेन तेनात्मधर्मस्य, तन्यते क्षोदिमाऽतनुः ॥ ५ ॥

मानसे मर्त्यमात्रस्य, मैत्री-बीजानि संवपन् ।
धर्मः पुष्यति किन्त्वन्यः प्लुष्यति स्वाङ्कुरानपि ॥ ६ ॥

सत्यो धर्मस्त्वभेदेन, सर्वेषामेव सम्मतः ।
अतो य उच्यते धर्मः स पारक्यः कथं भवेत् ॥ ७ ॥

जनिता जनतैकेन, स्वामिना सर्वगामिना ।
पुंसां तेनैक-मूलानां, सापत्न्यं किं परस्परम् ॥ ८ ॥

युग्मकम्

सूपेषु सैन्धवादीनां, संयोगे सम्प्रजायते ।
स्वादास्वाद-विसंवादः, सदा सोदरयोरपि ॥ ९ ॥

वैमत्यमेवमेकस्मिन्, स्वधर्मेऽपि स्वभावतः ।
सम्भाव्यते ततो लोके, कारणं कलहस्य किम् ॥ १० ॥

विशेषो नियमो धर्मः, जीविताभ्युदयाय यः ।
विद्वेष-विष-बीजानि, वपन्त्यत्रात्मबुद्धयः ॥ ११ ॥

स एव परमो धर्मो, हानं द्रोहस्य यद् हृदः ।
यो द्रोहं शिक्षते धर्मो दानवः स न मानवः ॥ १२ ॥

सतां समेषामपि सम्मतानि, मतानि पूतानि हि तानि तानि ।
मनुष्यमात्राय तथा हितानि, भवन्ति भूयो महितानि भूमौ ॥ १३ ॥ इति ।

एतादृशीं सौशील्योन्मीलनीं वाचमाचम्यानीकनायकः सुतरां त्रपितः समपद्यत ।

१०. अमुत्र च प्राणसमां समानं कुरानं च प्रतिपक्षिणा प्रत्यावर्तितं प्रेक्ष्य क्रूरकर्मणो दुर्मतेरपि यवन-वाहिनीपतेः बहलोलखानस्यामानमानं निर्दयं हृदयं नवनीतवद् द्रुतं विद्रुतं समजायत । हरिरपि हरिणायते सद् व्यवहारेण ।

दोलिका-यवनिकामपनीय निकामं शिववीर-सद्वृत्त-व्यवहारोपकार-भार-विनता वनिता बहलोलस्य बहिरागत्य प्राणेशं प्रत्यभणत्— 'प्राणाधिनाथ! प्रेक्षितो मया परमात्म-प्रतिनिधिः प्रीति-प्रतिमूर्त्तिः प्रेष्ठः पुरुषः। नित्यदा नृशंसनिकृष्ट-नर-निरीक्षणैनसा नीचीनतां नीते अलक्ष्मीक्षेत्रे नेत्रे मे सुशीते प्रीते च सञ्जाते। निपीता सदाचार-सुधा-मधु-परीता विनीता तदीया सत्त्वसारा वैबुधी वाग्धारा। पावितौ पुरस्तात् पापोपताप-भावितौ श्रुत-दुर्वृत्त-दुष्ट-दुरित-दुर्जन-दुर्वचनावर्णौ कर्णौ। यं भवन्तो मुगल-महीप-मुखाश्च परिपन्थिनं प्राहुः स साधुः सच्चरितः परमार्थतः परमोदारः पुण्योदयो दयामयो देही देव एव। क्षमन्तां भवन्तः, क्वासौ शील-शाली पुण्य-धर्मपाली महात्मा, क्व च कश्मल-कुलमालः कपटालीकजालः कदाचारः प्रचुरपरापकारः स्वात्मा। भाग्यभाजस्ते जना ये प्राप्नुवन्ति पूरुष-प्रवरस्य तस्य पावन-पाद-पांसु-परामर्शम्, दर्शं दर्शं दिने दिने कृतार्थयन्त्यात्मानम्, समासादयन्ति च सुख-सन्तानम्। भवन्तश्चैतादृशा यत्तस्यैव दैवतस्य प्रजाः पीडयन्तोऽप्यव्रीडिताः साभिमानं पुण्यमात्मानं मन्यमानाः त्यक्तासवः स्वर्लोकं यियासवः। नित्यमकृत्यं विदधानेभ्यः तादृश-पुरुष-प्रवरापकारपरेभ्यो नरेभ्यो निरयोऽपि दूरं दुरापः' इति।

११. इत्थं निरन्तरं स्मरन्ती शिववीरस्य प्रगुणान् गुणान् बाला बहलोल-वल्लभा निर्भरं निस्सरता नयननीरेण स-कपोल-कोलं निचोलमसिञ्चत्। ततस्तादृशं भृशं विस्मापनं दृश्यं निरूप्य नितान्तं निष्करुणान्तःकरणोऽप्यनुशयानो बहलोलखानो दिल्लीं प्रत्यावर्त्तनाय प्रहितं पत्तिभिः प्राक् प्रदत्तं शिववीरस्य पत्रं पुनः-पुनरपाठीत्। परं प्रत्युपचिकीर्षुरपि परवशत्वात् किञ्चित् कर्त्तुमनीशः स यवनीशः दिल्लीं प्रति परावर्त्तनात् प्राङ् निरणैषीद् यदमूदृशस्य पूजनीय-जननी-प्रसूतस्य सद्वृत्त-सुकृत-पूतस्य देवदूतस्य दिव्य-दर्शनेन पाद-स्पर्शनेन चात्मानं कृतार्थयिष्यामीति। आकर्षन्ति हि गुणाः जडानपि।

१२. एवं समुच्छलद्-बहुल-मिलनोत्कलिकाकल्लोलः स बहलोलः सदैन्यं कञ्चित् सैन्यं निकटे प्रतिपक्षि-कटके सम्प्रेष्य शिववीर-शुभदर्शन-प्रार्थनामकार्षीत्, तद्द्वारैव च साक्षात्कारकाले दूरस्थ-परापर-सेनान्तराले उभाभ्यां च निरायुधाभ्यां भाव्यमित्यपि सहैव विनयमयो नयवेदी नायको न्यवेदीत्। स्वीकृतं च स्नेहसंस्कृतं भूरि-भाव-सम्भृतं तदगर्वं सर्वं धीरेण शिववीरेण।

१३. निर्णीतेऽहनि, नियते काले, निर्धारिते स्थाने, दुष्टदुर्दम-द्विषत्कालः प्रतिश्रुत-प्रणय-पालः, निर्धूत-दीन-दून-दलिताशिवः शिवः पुरस्तादेव बहलोत्कं बहलोलं प्रतिपालयन् तस्थौ। अत्रान्तरे निरस्तसैन्य-सन्तानो बहलोलखानोऽप्येकलः प्रहरणापेतः तत्रोपेतः। स च भावोद्रेक-परिपूर्णस्तूर्णं 'ओ देवदूत!' इत्युदीर्य शिववीरमधीरं परिषष्वजे। पुनः शिववीरस्य पादयोः पातकीव पतित्वा प्रावोचत्—'महात्मन्! क्षमस्व दत्त-दोषहीन-दीनजनबाधान् असाधारणान् मेऽपराधान्। तटस्थ-तापस-कुटीष्वप्यारोपितालातव्रातो वृथा विहित-बाल-वृद्धाबलावृन्द-विघातो मुषित-मुग्ध-मानव-शम-शातो दुर्जातः खलः खल्वहं भ्रातः!। देवदेवः परमेशोऽपि मर्षिता यदि दया-दाक्षिण्यौदार्य-पुण्यपरिपूतो देवदूतो मृष्यति। साम्प्रतं सत्पुरुषाधिक्षिप्तस्य, सन्तत-सन्तापित-शाप-पापपङ्कोपलिप्तस्य, सर्वतोऽशुचेः परपीडनैकरुचेः, मत्समानस्य जातुधानस्य जघन्यस्य जाङ्गलस्य च जगति जीवितुं जातुचिन् नाधिकारः। दुरित-हरणयोः दुर्विध-भरणयोः शङ्कित-शरणयोः कल्याण-करणयोः श्रीमच्चरणयोश्चुचुम्बिषाऽन्तःकरणे मरणेहा ततो मेऽवशिष्यते। एष विदायाञ्जलिः' इति।

१४. ततो बहलोलः प्राणापहरण-निष्कृपां कृपाणीं पाणावादाय यदात्मानं जिघांसुरजायत तावदेव शिवदेव आत्म-प्रद्वेष-पूरितस्य तस्य पाणि परिगृह्य प्रसह्य प्रखरं प्रहरणं प्राध्वं प्रक्षिप्य पौनःपुन्येन प्रगाढं पर्यष्वजत पश्चात्ताप-पावक-परिपावितं तम्। उच्यते चानूचानैः--

साधुना व्यवहारेण ग्रावद्रावोऽपि जायते।
नवनीतायते तेन मानसं मानसङ्गिनाम्॥ १४॥

अपि च— **सच्चरित्रमरित्रं स्यात् तरणाय भवाम्बुधेः।**
स्वात्मा तु पूयते तेन द्वेषणोऽप्यभिभूयते॥ १५॥ इति।

१५. अनया रीत्या अनयातीतचरिताः मृदुल-मनस्काः पृथुलयशस्काः दुर्बल-दुर्विधेषु दयारतयः परिपन्थि-पत्नीष्वपि मातृमतयः, निःशेषितद्वेषलेशाः परमार्थतः परापर-हृदयेशाः, जीवजातेऽपि जातानुरागाः बलवद्-विधृत-विषयि-वागाः, महाभागाः संसार-सरणि-सम्बलेन केवलेन बुद्धिबलेन, सदाचारेण व्यवहारेण वा विद्वेषिणोऽपि वशंवदान् विदधतीति वीरवराग्रेसरो महाराष्ट्रकेसरी श्री-शिवाजीह परमं प्रमाणम् इति।

सहिष्णुता (२८)

१. कस्मिंश्चित् स्वल्पायामे ग्रामे बहुधा बुभुक्षया विहस्तौ दैन्य-ग्रस्तौ दम्पती अवसताम्। पण्डित-दीनदयालु-नामा पतिः परमेश्वरपूजकः, प्राणिमात्र-प्रणयी, परमोदारः, सदाचारः, सदाऽक्रोधी, न विरोधी, सत्यसन्धो विश्वबन्धुरजायत, परं पत्नी प्रकृत्यैवात्मपोषिणी, पतिशोषिणी, रोषिणी चाभूत्। दरिद्रौ गृहचिन्तयाऽनिद्रौ तौ निरन्तरं निशा निन्यतुः। आसीत्तयोः स्वल्पाकारः केवलः केदारः। जायानियोजितेन जितात्माभि-लाषेण बीजितास्तत्रेक्षवस्तत्स्वामिना दीनदयालुना।

२. एकदासौ पत्न्या प्रेरितो लवित्र-लूनमूलं इक्षुपूलं दृढबन्धे स्कन्धे निधायानैषीत्। मार्गे मृगयमाणेभ्यो माणवेभ्यो मानवेभ्य-श्चैकैकमिक्षुं प्रयच्छन् यदासौ गहेमुपागतस्तदा तस्य पार्श्वे एकैवेक्षुयष्टिर-वशिष्टा। नितरां दीने सदनेऽदनौदनादिकं सर्वथा नाविद्यत। दुष्टा दारा सदा रुष्टा, निसर्गतोऽतिकठोरा घोराकारा चासीत्। भर्त्तुः करे केवलमेकं गुडदण्डं निरूप्योत्कटभ्रकुटितटा सा तद्धस्तादाच्छिद्याघूर्णितेन तेन तं तथा पृष्ठे ताडयामास यथास्य मधुतृणस्य खण्डद्वयमजायत। तितिक्षुरिक्षुणा-हतोऽपि विहासी वराको दीनदयालुराह—'आवयोः चूषणाय मयापीक्षुदण्डो द्विखण्डो विधित्सित आसीत्, तच्च कर्म कृपालुशीलया त्वया लीलया सम्पादितमिति भृशमुपकारिण्यर्धांशिन्यसि' इति। यदुक्तम्—

३. साधुर्न केवलं दुष्टस्यात्याचारं तितिक्षते।
क्षमामपि स्मितं कुर्वन्, तञ्च प्रत्युत भिक्षते ॥ १ ॥ इति।

यद्यपि स्वभावतस्तस्य स्वान्तं नितान्तं क्षान्त्या शान्त्या चाप्लावित-मासीत् तथाप्यंशतो लुप्तोऽप्यमर्षस्तत्र कोणे गुप्तः सुप्त इव चावर्तत। यदाहुः—

ब्रह्मज्ञानोदितं तेजो यावदन्तर्न तायते।
अमर्षादिस्तमो गुप्तं सुप्तं तावत्प्रजायते ॥ २ ॥ इति।

व्यतीतेषु बहुतरेषु वत्सरेषु स एव ब्राह्मणवरेण्यो दीनदयालुरर्धवृद्ध-वयसि वर्तमानोऽपि विश्वविलासविरतवृत्तिः संन्यस्य सर्वम् आत्मसाक्षात्कारो-पायं निर्मायं जिज्ञासुः कञ्चिद् ब्रह्मवेदिनं संन्यासिनमुपगम्य प्रार्थयत—'ब्रूहि मे ब्रह्मविद्यां भगवन्!' इति।

४. स आह—'रहसि विमुक्त-वाग्व्यापारः, पवित्राचारः स्वल्पाहारः सन् 'ओम्' इत्येकाक्षरं निरन्तरं परिवत्सर-पर्यन्तं जप। संवत्सर-समाप्ति-दिवसे स्नात्वा मत्सविध आगन्तव्यम्' इति। जपो हि बृहत्तमो यागः।

सुतरां संयमिना शमिना च दीनदयालुनाऽऽचार्यवचनं श्रद्धधानेनाक्षरशोऽनुपालितम्। साधन-संवत्सरावसान-वासरावसरे संन्यासी स्थविरां मलापकर्षिणीमाहूय रहसि हसित्वा मन्त्रयामास—'यदासौ सज्जनः कृतमज्जनः स्वैरं मामुपजिगमिषुः स्यात्तदा तदासन्ने स्थाने स्थितया त्वया सम्मार्जन्या धूलिरुद्धूलनीया' इति। परिव्राजा प्रेरितया तया तथैव तदन्वस्थायि।

५. दीनदयालुस्तु संवत्सरावसायस्य तपस्याध्यवसायस्य प्रत्यवायरूपामनिष्टां तच्चेष्टामाकलय्य रोष-रूषितस्तां ताडयितुं प्रवृत्तः, परं पलायिता तपस्विनी मलापकर्षिणी। दीनदयालुः पुनः सम्पादित-सचैलस्नानः परिव्राजकमुपेयाय। परिव्राट् प्रोवाच—'भद्र! साम्प्रतं यावदनिरोधस्ते क्रोधः, कथं सम्भाव्यते ब्रह्मबोधः। फुल्लगल्लः फणीव फूत्करोषि रुषा परुषाकृतिः। तस्मादश्रान्तं वर्षान्तं यावद् भूयो यथोदितमनुतिष्ठ। उत्तरत्र पुनरत्र यथापूर्वमुपस्थानीयम्' इति। अपवर्गमार्गनिरोधः खलु क्रोधः।

तदुपश्रुत्य दीनदयालुः लेशतः क्लेशितः सन्नपि 'सदाऽविचार्या शिरोधार्या चाचार्यानुज्ञे'ति सम्प्रधार्यात्मनि पुनः प्रणवपाठं प्रारेभे।

६. परस्य परिवत्सरस्य पर्यवसाने प्राप्ते पुनः परिव्राजकेन प्रवर्तिता सैव पलिक्नी मलाकर्षिणी, प्रोक्ता च—'कल्याणिनि! अद्य यर्हि मध्यन्दिने दीनदयालुः स्नात्वा मामुपायियासुः स्यात् तदासौ त्वया मार्जन्या मनाक् टङ्के स्प्रष्टव्यः' इति।

तयाख्यायि—'मां कुट्टयिष्यति चेदसौ किं करिष्यामि कृपणा कृशाहम् ?' इति। संन्यासिनावाचि—'नाद्यासौ ताडयिष्यति, केवलमवाच्यवादान् वदन् वाचंयमतामुपष्यति' इति।

७. मलापकर्षिण्या तथा कृते किञ्चित् कुपितो दीनदयालुः-पञ्चषाणि कर्कशानि वचनान्युच्चार्य पुनः कृतस्नानः परिव्राजकस्य पार्श्वे प्राप्तः। परिव्राजा प्रावादि—'अरे! दग्धं दोरकम्, न वृत्तम्। विद्यते सम्प्रति प्रतिरोधी क्रोधस्त्वयि। भद्र! कोपः किल कर्कशः कृशानुः, ब्रह्मसाक्षात्कारश्च सुकुमारः तुषारः, कथमुभयोरेकत्रावस्थानम्। तस्माद् भूयो वर्षावधि विधेहि यथापूर्वं परास्तपापं प्रणवजापम्' इति। यदुक्तं

योगरहस्यविद्भिः—

यथा जले नीलमले चलाचले, न बिम्बिता स्यात् प्रतिमांशुमालिनः।
ज्योतिः परं कोपमलाविले तथा, न भासते योगिजनान्तरात्मनि ।।३।। इति।

८. सम्प्रति रोषं स्वदोषं विदित्वा दीनदयालुः नितरां लज्जितो जातः। इदमप्यपारं गुरोः कृपासारं मन्यमानेन तेन पुनः प्रारम्भि तदेव तपः स एव जपः।

तृतीये वत्सरे पर्यवसिते परिव्राजा मलाकर्षिणीमाहूय भूयोऽभाणि—'अद्य यदा स आयातुकामः स्यात् तदा मलपेटकस्तस्योपरि प्रक्षेप्तव्यः। नेदानीं दीनोऽसौ रुष्टो वा दुष्टोक्तिपरो वा भविष्यति' इति। सर्वज्ञा वै ब्रह्मज्ञाः।

९. कृतं तथैव मलाकर्षिण्या। तपसा निर्मूलितारिषड्वर्गे दीनदयालोरन्तःकरणे स्तोकोऽपि कोपो नाङ्कुरितः, प्रत्युत तस्मिन् मलाकर्षिणीं प्रति कृतज्ञता-विपुलता पल्लविताऽभूत्। स पुटीकृतपाणिः विनयविमिश्रां वाचं व्याजहार—'मातः! अपारस्य तवोपकारस्य निर्यातनं वास्तवेन दुष्करं सांसारिकैर्वस्तुभिः। प्राक् कोपाक्षर-क्षारयाऽसारया गिरा कथमपि कथयितुमुद्यतो धन्यवादान्, द्विःकृतापराधो निर्भरं जिह्रेमि। त्वया-ममान्तस्तिरोहितमरातिं दवयितुं वर्षत्रयपर्यन्तं निरन्तरं विहितो बहुलो-व्यायामः। त्वदनुक्रोशेन मे मनसि मनागपि दुर्दमो दोषो रोषो नाद्य विद्यते। निर्वापितः सत्त्वविनाशः हुताशः, समापितो रोगः स्थास्नुभोगः। अवश्यमद्य दयामयो गुरुर्मां ब्रह्मविद्यारहस्यमुपदेक्ष्यति'। इत्यभिधाय कृतमज्जनः स सज्जनः परिव्राजकमुपेत्य तस्य पादयोः पपात। प्रमुदितः परिव्राडपि तमुत्थाप्य वक्षसा पीडयन् परिषस्वजे। पुनस्तस्य मूर्धानं मृदुपाणिना परामृश्य ब्राह्मं रहस्यमुपदिदेश। तावदेव तिरोहितं तस्य तीव्रमज्ञान-तिमिरम्, उन्मुद्रिता दिव्या दृष्टिः, करतलामलकतुल्यतामिता च समस्ता सृष्टिः। उक्तं च—

१०. क्षेत्रे समुन्मूलित-घासजाले, शस्यं यथोप्तं फलितामुपैति।
निरस्तदोषे सति साधकस्य, तथा हृदि स्यात् फलिनी तपस्या ।।४।।
इति।

ततोऽसौ गुरुणानुज्ञातः क्वचित् कानने काशपलाशैः कल्पितकुटीरोऽविरतं तपोनिरतोऽभूत्। तत्र विजने वनेऽपि वसतः सततस्तस्यालोभाक्षोभ-क्षमा-शमादीनां गुणानां कीर्तिः प्रतिदिशं प्रदेशेषु प्रससार। पुमांसः प्रायेण प्रकृत्यैव परगुणप्रतिष्ठाऽसहिष्णवो जायन्ते। केऽपि चञ्चलचेतसस्तस्य

तपस्विनः तितिक्षां परीक्षितु-मनसस्तत्कुटीरनिकटमुपजग्मुः । तस्मिन् मनुज-मण्डले मुख्यो मूर्खिम-मण्डितो मलिनमना महामुनिं दीनदयालुं निकषा समुपगम्याभणत्— 'महात्मन्! गञ्जा दीयताम्, पिपासाम्यहम्' इति । दीनदयालुराह— 'भक्त! नाहं पिबामि भवदीहितां गञ्जाम्' इति। स पुनराह— 'नैषा सुलभा चेत्. ताम्रकूटमानय' इति। दीनदयालुरवोचत्— 'भद्र! न सोऽपि प्रयुज्यते मया' इति। स भूयोऽकथयत्— 'तर्हि किङ्कृते कापट्यं कुर्वाणः कानन-कुटीरे कायं कनयसि कालं च क्षपयसि ? धूर्तोऽसि, मूर्त्तोऽसाधिमाऽसि' इति ।

११. एतस्मिन्नेवान्तरे पूर्वनिर्णीत-योजनानुसारं समायाः गहन-गुल्म-गोपायितकायाः तत्सहायाः जनसमुदाया अपि तत्र समुपेताः। स एव धूर्त-धूर्वहस्तान् सर्वान् सम्बोध्य समुदाजहार— 'चतुरश्चौरोऽयम् चतुर्वारं कारागारं गतः' इति ।

जनसमवायस्यान्यो जघन्यो जगाद— 'अरे भ्रातरः! छद्मवेषः स एव ह्येषः, एनं स्तेनं निश्चयेन परिचिनोमि। अहमपि सममेवासम्। बन्धनालयेऽपि बन्दि-बन्धुभिरयं वृथा वैरं विदधानो बहून् वारं-वारं वाग्बाणैर्विव्याध। एकदाऽनेन कृतगालिदानेन दुष्टेन द्विष्टेन दृढ-दारु-दारुण-दण्डद्वारा दूरं दलितं मे दोर्द्वयम्। दृश्यताम्, एतानि तानि शुष्कक्षतानि। रजनीः वारजनीभिः रममाणोऽतिवाहयति, वासरे च विलासोदासी, वनवासी संन्यासी सञ्जायते' इति ।

१२. इत्थं ताभ्यां धूर्त्ताभ्यां तथा व्यवसितं यथासौ महात्मा कृतमिथ्यारोपः प्रादुर्भूत-प्रभूतकोपः स्यात्। पर्यन्ते परिश्रान्ताभ्यां ताभ्यां मुखराभ्यां महात्मनो गुरुजनादिविषयेऽपि प्रयुक्ताः प्रचुरप्रकाराः परुषोक्तयः। शश्वत् कृतप्रलापयोः पापयोस्तयोरवसितः समस्तस्तिरस्कार-दुर्व्यवहार-सम्भारः ।

यदा तूष्णीम्भूतौ भूतलभूतौ तौ, तदा मृदुहासी संन्यासी मुख्यं मुखरं स्वैरं समुदीरयामास—'महाशय! मन्ये नितान्तं श्रान्तो धन्यो भवान्। इयमस्ति केनाप्यनुरक्तेन भक्तेनोपायनीकृता श्वेता शर्करा, गृह्यताम्, पीयतां च तुषारतोयेनैकीकृताया अस्याः पानकम्' इति ।

१३. तदाकर्ण्यासौ परुष-प्रकृतिः पुरुषः परिव्राजकस्य पादयोः पतित्वा प्रोवाच—'महाराज! क्षन्तव्यो मे मन्तुः शान्तात्मना श्रीमता। अस्माभिः क्रियासमभिहारेण कृतेनापि दुर्व्यवहारेण कुतो न लेशतोऽपि कोपितो भवान् ?' इति ।

स्थिरचेताः समदर्शी संन्यासी समुदाजहार—'भ्रातः! पण्यकस्य पार्श्वे यादृशं गुण्यं वाऽगण्यं वा पण्यं जायते तदेवासौ प्रदर्शयति, यथाकामं गृह्णातु वा ग्राहकस्तद् न वा। त्वत्पार्श्वे यद् द्रष्टव्यं वा श्रव्यं वा द्रव्यमासीत् तदेव त्वया प्रतिदर्शितम्। कस्तवात्र दोषः कश्च मम रोषः' इति। अत एवाहुः—

१४. **कर्त्तारमीश्वरं मत्वा प्राणिनः पुत्तलीप्रभान्।**
महात्मान उपेक्षन्तेऽनिष्टं दुष्टस्य चेष्टितम्॥ ५॥ इति।

तन्निशम्य परिव्राजक-परीक्षणाय सज्जिताः सर्वे लज्जिताः जाताः। कुण्ठयति तीक्ष्णधारं कुठारं चापि सहनशीलता। पुनः प्रावादीत् परिव्राट्—'मोहादन्यो मानवः स्खलितमाचरेद् वयं चान्तःकरणे दारुणं दहनं दीपयेमेति न समीचीनं स्तुत्यञ्च। उपदिष्टोऽस्मि चार्येणाचार्येण—'क्रोधकरणं किल स्वकीये काये क्रियमाणं प्राण-हरणं प्रहरणम्। मात्सर्यमशुभपर्यवसानम् हेलया हालाहलपानम्। परेण कृतो गालिव्यापारः, तीव्रस्तिरस्कारः, कुव्यवहारश्च नो कामपि नो ज्यानिं जनयति' इति।

१५. एषोऽक्रोध एव सहिष्णुता-तितिक्षा-क्षान्त्यादि-व्यपदेशैः व्यवह्रियते वाग्योगवेदिभिः विदग्ध-बुद्धिभिः। सहिष्णुता--सम्पन्नानां सज्जनानामेव समाख्यानैः संस्कृतं संसारस्य सकलं साहित्यम्। प्राचीनं महाभारतकालीनं तु विचित्राचरणं समुदाहरणं सहिष्णुतायाः समाकर्ण्यते' इति। त आहुः 'कथं तत्?' इति।

पुनः प्रत्युवाच परिव्राट्—'महाभारतसङ्गरावसानवासरे वासुदेवो भगवान् पाण्डवैः साकं वारं वारं श्रूयमाण-तार-जय-शब्दोच्चारं तेषां स्कन्धावारं न प्रययौ, परं सात्यकि-समेतानेतान् पाण्डवानादाय शिविरादविदूरे विद्यमानं तत्स्थानं जगाम यत्र प्रतिभये समरसमये सैरन्ध्री-सहिताः समस्ता नरनाथनार्यो न्यूषुः। तस्यामेव जन्यान्त-रजन्यां द्रौणिनाश्वत्थाम्ना पाण्डव-कटक-पटकुटीषु दीपितो दारुणो दहनः, शातिताः शश्वत् शूल-शरासनादीनां शस्त्राणां शीलनश्रमेण श्लथ-शरीराः शयानाः शेषाः शूराः, प्रापिताः पञ्चतां पाञ्चाल्याः पञ्चापि पुत्राः।

१६. प्रातः प्रातः प्रतिपक्षिपराजयप्रमोदेन, प्रत्यायातः पाण्डुपुत्रानुयातः परमः प्रभुः श्रीकृष्णः। कटकस्य दशां दर्शं-दर्शं कुलपालिकानां वधूनां सशापान् विलापान् श्रावं-श्रावं च यद् दुःखं तैरन्वभावि दुःशकं तद् वाचा वर्णयितुम्। पञ्चानामपि पाण्डव-पुत्राणां शिरश्शून्यानि शरीराणि प्रमुखे पतितान्यभूवन्। विकीर्णकेशा, मलिनिम-मिलितवेशा, अनवरत-

रुदितोच्छूननयना, भूशयना, दीनातिदूना देवी द्रुपद-दारिका दण्डदीर्घानुच्छ्वासानुदवमत् ।

१७. तां तथा मर्मभेदिनीं वेदनामनुभवन्तीं सैरन्ध्रीं सुतरां सान्त्वयन् सव्यथः सव्यसाची समभ्यधात्— 'मास्म रोदीः, अहं द्रुतं दुष्टं द्रोणदारकं दण्डयिष्यामि । छुरिकयाच्छिन्नम् शोणितविलन्नम् तस्य मूर्धानमालोक्यापनेयस्त्वयाऽस्तोकः शोकः' इति ।

एवं स्थिते कृतद्रौणिदण्डनाध्यवसायः श्रीकृष्णसहायः, पार्थः कार्मुकसार्थः स्यन्दनेन सम्प्रतस्थे । किं नाम तस्य दुष्करं संसारे येन परमार्थतः परमेश्वरपाणौ प्रत्यर्पिताः प्रग्रहा जीवनरथस्य । समर-समाराधनाय समाहूतः प्राणापहारीणि प्रहरणानि प्रयुञ्जानोऽपि द्रौणिः शौर्य-मानमात्मानं रक्षितुं नाक्षमत । परिगृहीतोऽसौ प्रबलतरेण पार्थेन, परं गुरुपुत्र इति न परलोक-पथिकतां प्रापितः । दृढैः दामभिः वस्त्रास्तरणवद् बद्धं तं स्यन्दने निधायाऽह्नाय निकायमानिनाय, सैरन्ध्र्याः सम्मुखे च समुपास्थापयत् ।

१८. मुषितमानं पापात्मानं तमश्वत्थामानं विलोकमानः कोपेन किटकिटायमानदन्तो द्विषदन्तो वृकोदर उदीरयामास—'सुप्तसुतघातकः, कृतमहापातकः, कदर्यः सौनिकसोदर्यः कुतो नायं प्राणैर्वियोजितो भोजितो गृध्रगोमायुगणम् । नायं प्राणरक्षणं क्षणमप्यर्हति गर्हित-गुरु-गौरवः' इति ।

१९. एवममर्षोत्कर्षेण कृतकरतलसङ्घर्षे, जनितारिदरे वृकोदरे, सत्यपि दारकविदारणेन दूरं दुःखितापि दयामयी देहिनी देवी द्रुपददुहिता हृदये किमप्यन्यदेव व्यचारयत् । पञ्चानन-प्रतिमानां पञ्चानामपि पुत्राणां प्रमीतानि शीतानि शरीराणि पुरतः पतितान्यासन्, तेषां प्राणहन्तापि पार्श्वतः एवातिष्ठत्, परं सा करुणामयी विसस्मार कुमार-मारण-कारणम् । पशुमिव पाशित-पाणिपादम् , त्रपया नितरां नामितनेत्रं द्रौणिं दृष्ट्वा साचष्ट—'हा हन्त ! किमिदमकार्यमकार्यद्य भवद्भिः । यस्यानुकम्पया सकलैः भवद्भिः प्रापि प्रहरण-प्रयोग-पटिमा, स गुरुर्द्रोण एवात्र पुत्ररूपेण पुरतः स्थितः । सम्पत्स्यन्ते किमेतद् घातनेन चेतना मे तनयाः ? तस्मादविलम्बं विधीयतामस्य बन्धविमोक्षः । जननीरूपेण जानेऽहं कियद्भृशः कीदृशश्च सञ्जायते पुत्रप्रयाणप्रभवः परितापः । अस्य पूज्यतमा माता कृपणा कृपी नैवं विधां मर्माविधं बाधामनुभवेत्, न चाहमिवाजस्रमस्र-सहस्रासारं स्रावयेत् । तस्मादधुनैव बन्धनादुन्मुच्य स्वाधीनं विधानीयं रुधिर-रोधात् पीतिमपात्रमस्य गात्रम्' इति ।

तदुक्तं सहृदयैः—

२०. जीवोत्सर्गेण जातस्य, जातां मर्म्मणि यातनाम् ।
जीवजातेषु जानीते, जनन्येव जगत्यहो ॥ ६ ॥

किञ्च— पूर्णं परागपेशल्यं, सौभाग्यं स्नेहसम्भवम् ।
माङ्गल्यं तच्च माधुर्यं, मिलितं मातृ-मानसे ॥ ७ ॥

अपि च— पशवस्तु प्रजायन्ते प्रतिद्वेषे परायणाः ।
तत्प्रतीपे प्रवर्तन्ते परमात्मप्रियाः परम् ॥ ८ ॥ इति ।

पर्यन्ते प्राप्तविजयाजायत द्रुपददुहितुरौदार्योदया दयामयी दृष्टिः । मस्तकमणिमुद्धृत्य मुक्तो मन्दाक्षमुद्रित-मलीमसमुखो महापातकी द्रौणिः धनञ्जयेन' इति ।

२१. श्रुत्वेदं दुराचरणोदितखेदं सनिर्वेदं हृदयं वहन् पुरातनैः पुण्यपुञ्जैः प्राप्येण ब्रह्मविदो दर्शनेन दूरीकृतदुरितोऽसौ धूर्त्तग्रामो मूर्धानं नामं-नामं प्रतिन्यवर्तत ।

एवं परैर्विप्रकृता अपि सागर-स्थावर-स्वान्ताः, सहिष्णुता-कवचित-कायाः, सुकुमार-स्वभावाः साधवो विजित्येदं विश्वं प्राण-परित्यागात् परं ब्रह्मसायुज्यमृच्छन्तीति दीनदयालोः स्मरणीयमनुकरणीयं च कथानक-मानकनिनादेन विघोषयति । तस्माद् रोषजिष्णुना, परकृतापकार-सहिष्णुना च भाव्यं भाविनि काले कल्याणाभिनिवेशिना । गात्रमात्रत्राणा-याऽलं ढालम्, क्षमा त्वात्मानं रक्षितुं क्षमा इति ।

आत्मविक्रयः (२६)

१. आसीद् भारतस्य पश्चिमदिशि मरुदेशेति व्यपदेशभाक् प्राज्यं राज्यम् । तत्रत्यो रणेऽरातिततिभिरनवरुद्धगतिः, रङ्करञ्जनरतिः, मानवमात्रमाङ्गल्यमतिः, जगतीपतिः 'वीरवर्मा' पुत्रनिर्विशेषं प्रजाः पालयामास । विधिविलासाद् विपन्नदारेण तेनोदारेण परस्मिन् परिणय प्राप्तं पर्याप्तं कृतलोककौतुकं यौतुकम् । तस्मिन् कन्यका-जनकेन नाना-प्रकारैः रत्नालङ्कारैः वसनसम्भारैः तुरङ्गैः तुङ्गैः मतङ्गैः शताङ्गैः परैश्च प्रयोक्तव्यैः नव्यैः भव्यैः द्रव्यैः सह गुणातिरेको विवेकोदयोऽनुकम्पारतिरेको दासोऽप्यदायि ।

स दासः सदान्तरोल्लासहासमुखविकासः, दुष्करकर्मस्वप्यनवाप्तायासः समजायत। अवसितायां विवाह-व्यस्ततायां वीरवर्मा 'प्रातः सायं भूयसाऽयं युक्तचेताः भगवन्तं भजते' इत्यालोच्य सात्मीभूत-सौम्यत्वं तं हर्षोत्कर्षवर्षपुरस्सरं रहसि पप्रच्छ— 'सुमुख! किं तेऽभिधानम्?' इति।

२. मूर्धानमवनम्यासौ बद्धाञ्जलिः प्रत्यवोचत्—'येनाप्यभिधानेन सम्बोधयिष्यति स्वामी सेवकम्' इति। पुनः पृथ्वीपालोऽप्राक्षीत्— 'किं कर्म करिष्यसि?' इति। सहसाऽऽहस्मासौ दासः— 'यत् कथयिष्यन्ति कर्तुं श्रीमन्तः। वचने स्थितो नाज्ञामवज्ञास्यामि' इति।

भूयो भूपोऽभाणीत्—'भो! किं भोक्ष्यसे?' इति।

तेनातिविनतेन प्रत्यवादि— 'यदपि स्वामिना दासाय दास्यते' इति।

नरनाथो निजगाद—'किं परिधास्यसि?' इति।

तेन प्रत्यवादि—'यत् परिधापयिष्यति महाराजः' इति।

पुनः प्रजापोऽपृच्छत्—'किं ते रोचिष्यते?' इति।

प्रेष्यः प्रत्युवाद—'यत् स्वामिने रोचिष्यते' इति।

नरनाथो न्यगादीत्—'भद्र! का ते कामना?' इति।

परिचारकः प्रत्यवोचत्—'स्वामिन्! सर्वदास्य दास्यभाजः सैव कामना या भवतो भविष्यति। परं प्रभो! का नाम मनागपि कामना किङ्करस्यात्मीया' इति। उक्तं च नयनिष्णातैः—

३. **स्वीकृतं येन कैङ्कर्यं, तन्निघ्नं स्वं न जायते।**
दैहिकं चात्मिकं प्रायः, ऐहिकं चौर्ध्वदेहिकम्॥ १॥

किं च— **सेव्यसेवकयोस्तावद्, जायते बृहदन्तरम्।**
शासनं कुरुते पूर्वो, जघन्योऽन्य उपासनम्॥ २॥ इति।

प्रेष्यस्य तादृशं भृशं भक्तिभावभरितम्, सत्त्वसंस्कृतस्वभावस्फुरितम्, कृतात्मसमर्पणं स्वान्तसन्तर्पणम्, सर्वथा स्वार्थविवर्जितं रोचनं वचनमाचम्यात्मानमधिक्षिपन् क्षोणीरक्षणदक्षिणः क्षितिपश्चेतस्यचिन्तयत्—'अहो! लोकोत्तरं माहात्म्यं मुक्तमानस्यास्य सत्त्ववृत्तेरादृत्यस्य भृत्यस्य। अहमपि तु सर्वगामिनः सृष्टिस्वामिनः सेवक एवास्मि। अद्यावधि मयका तत्कामनानुकूलं मङ्गलमूलं कियत् कर्मकृतम्? निस्संशयं मदपेक्षया पूततरान्तःकरणः सत्त्वाभरणः पथप्रदर्शकश्च स एष प्रेष्यः' इति। ततोऽसौ विनयविमिश्रं वचोऽवोचत्— 'सदात्मन्! अद्य प्रभृति सामस्त्येन स्वायत्तोऽसि, नेदानीं मे दासो भवसि, न चाहं ते स्वामी। भगवांस्ते स्वामी त्वं च तस्य दास इति 'भगवद्दास'-नाम्ना विश्रुतो यथाकामं विश्वतो विहर आत्मरुचि

च समाचर' इति। यदाहुः—

४. **कर्त्तव्यपालनं नाम, पुण्यं येनार्जितं धनम्।**
प्रसन्नेनेश्वरेणैव, च्छिद्यते तस्य बन्धनम्॥ ३॥

किं च— **सर्वं सर्वात्मना येन, स्वामिने स्वं समर्पितम्।**
तर्पितं सदयं तेन, हृदयं पारमेश्वरम्॥ ४॥ इति।

अथ सोऽपि विमुक्तबन्धः सत्यसन्धः, त्रिकाले परमेश्वर-पूजननित्यकृत्यो भृत्यो जटाधारी लोककल्याणकारी, करुणागारोऽजगर-वृत्ति-लब्धाहारो नगरनेदीयसि नदीतीरे कुशकाशकुटीरे ससुखं समयं गमयन् 'भगवद्दासः सिद्धः' इति प्रसिद्धः समजायत।

५. एकदा सायंसमये नितान्तसन्तापितः भृशं कृशं कङ्कालमात्रं कृपापात्रं गात्रं वहन्, मक्षिकामालानुयातः शीघ्रश्वसितशूत्कारवातः, जीर्णवेशः, प्रकीर्णकेशः, कोऽपि कम्पमानः पुमान् तस्य तापसभृत्यस्य पर्णशाला-मुपागात्। तस्यास्थिरबुद्धेः वृद्धस्य वपुषि कृमिकुलाकुला बहुला व्रणा बभूवुः, येभ्यो भूयः पूयमजस्रमस्रं च सुस्राव। तं तथा व्यथाभिरनूनं दूनं दृष्ट्वा प्राणवतां प्रियङ्करस्य तस्य तापसभृत्यस्य सहजदयोदयं हृदयं द्रुतं द्रुतमजायत। स हा! हेति करुणं क्रन्दन्तं मन्दं तं व्रणितमतिथिं प्रणय-पेशलैः विनयवचनैरभिनन्दयन् मन्दयंश्च तस्य मर्मवेधिनीं वेदनाम्, कोमले कुशकाशघासकल्पिते कटे स्वैरं स्वापयामास। स्वयं च सद्यः सज्जीकृतेन निम्बक्वाथेन तस्य व्रणविशोधनं विधाय कृत्स्नान् कीटकानप्यपचकर्ष। पुनश्चोपधानाभावात् कृतोत्सङ्गनिधानं तस्य मूर्धानं सुकुमारकरसंस्पर्शैः संवाहयामास। एवं कृते प्रशमितपीडः परिक्षतः प्राघुणः पर्णशालायाः पार्श्वे प्रस्यन्दमानायाः पयस्विन्याः पानीयं परिस्पृश्य परितः प्रसरन्तीभिः धीरसमीरोर्मिभिः मन्दं मन्दमान्दोलितचेतनः सन् मृदुमुद्रितनयनो निद्रानद्यां निममज्ज। प्राघुणपरिचरणेन परितुष्टो भगवद्दासो नितरां निश्चेष्टश्चेष्ट-देवसेवनफलमिदमिति मेने। तदाह—

६. **अतन्द्रिताः खादतमोदतायां, कुर्वन्ति सर्वे ननु देवनानि।**
एकेऽनुष्ठितठन्ति परन्तु गुण्याः, पुण्या जनाः प्राघुण-सेवनानि॥ ५॥ इति।

अत्रान्तरेऽस्तमितस्तपताम्पतिः। सञ्जातः समयः सन्ध्यासम्बन्धिन्याः परमेश्वरपूजायाः। प्रभुपूजायां प्रबलनिष्ठावान् 'मा भूदतिथेर्निद्राभङ्गः' इति निरुद्धनिःश्वासो भगवद्दासो व्रणिताभ्यागतोत्तमाङ्गस्योत्सङ्गे संस्थापित-त्वात् सांशयिकीं स्थितिं सम्प्राप्तः स्वगतं समचिन्तयत्—'जानुदेशादतिथेः शिरोऽपसारयामि चेद्, अस्य निद्रा विद्राविता, व्रणवेदनाविकलता च

विवर्धिता वर्तिष्यते। अन्यथा चेद् वेलाविलङ्घनात् प्रात्यहिक्यां परमेश्वर-पूजायां प्रत्यूहः प्रपत्स्यते, भूयो वृजिनभाजनं च भविष्यामि' इति।

७. इत्थङ्कारं किं क्रियेत, किं च न क्रियेत' इति वैकल्पिकीमवस्थामुपागतस्य तस्य भगवद्भक्तस्य पुरतः काचनानिर्वचनीयरोचनरूपा स्तूपाकारा प्रभामयी मूर्त्तिः प्रादुर्भूय प्रोवाद—'महात्मन्! तदानीमेव दीनदूनदयादानिनस्ते परमेश्वरप्रार्थना तु पूर्णतां प्राप्ता, यर्हि तस्याः प्रशान्ते ते स्वान्ते सङ्कल्पः सम्प्रवृत्तः। आमयाकलितस्य दारिद्र्यदुःख-दलितस्य च पलितस्य प्रेमपुरस्सरं परिचरणेन पीडाप्रशमनप्रयतनात्, प्रचुराणां परमप्रभोः! प्रार्थनानां पुण्यपात्रतां प्राप्य प्राणपर्यन्ते परमं पदं प्रति प्रस्थातासि। व्याधितानां दैन्यबाधितानाम्, अशरणानां विकलकरणानां च परिचरणम्, तेभ्यः प्रयोजनीयवितरणमेव च परमार्थं परमात्मपूजनम्' इति।

८. परस्तात् पवनपदव्यां प्रालीयतासौ पारमेश्वरी प्रकाशपुञ्ज-प्रतिमा। विगतवेदनोऽप्यवाप्तवेदनो भगवद्दासस्य गुणग्रामगरिमाणं गायंश्च गतोऽसौ गदग्रस्तो गन्तव्यं ग्रामगेहम्।

परेद्यवि 'पुण्यलाभलोभवान् भवानपि यातु मद्दत्तेनार्थेन तीर्थयात्रार्थम्' इति स्वयं प्राप्तेन पार्थिवेन प्रार्थितो भगवद्दासः पौरसार्थेन सार्धं व्रजवसुधायां वृन्दावनविहारिणो वासुदेवस्य वृषभानुजायाश्च तरणितनयातीरेषु, तटाक-तटेषु, पुरप्रतोलीषु पल्लीपदवीषु च प्रतिष्ठापितानां प्रतिमानां प्रेक्षण-पुण्येनात्मानं पावयितुं मथुराभिमुखः प्रतस्थे।

९. आसीद् विकरालो निदाघकालः। प्राभाकरेण परितापेन प्रादुर्भूताः परितः प्रभूताः मृगतृष्णाः, कृष्णा अजायन्ताध्वन्यानामनावृताः मुखपाणिपादाद्याः, सिक्ताः स्रवता स्वेदसलिलेन सर्वेषां सिचयाः, निटिलनिःसृता नासाग्रतो नीचैः निपेतुः निदाघनीरनिचयाः। शोषित-द्रुलताघासाः, पोषितप्राणिपिपासाः, पांसुपूरितनासाः, अन्धयन्त इव नेत्राणि, रन्धयन्त इव पङ्किल-पल्वलक्षेत्राणि, धयन्त इव शूत्कारैः प्राणभृतां प्राणान्, निस्त्राणान् कुर्वाणा मीनानिव दीनानध्वनीनान्, विपर्यस्तातपत्राः विघट्टितविहगपतत्राः, प्रसारिततृणपत्रसङ्घाता विश्वतो ववुः वाताः।

१०. अस्यां विकटायां वेलायां नैकयोजनप्रसारा परोक्षपानीयाधारा, सच्छायद्रुमशून्या ऊषरा धरणिः विषमा च सरणिः आतपपांसुभयादिव मुद्रितदृशः तीर्थयात्रिसार्थस्य पदे-पदे विविधा वाधा विवर्धयामास। पिपासा-पीडया पुनः-पुनः प्रार्थयमानेभ्यः पथिकेभ्यः पानीयं प्रयच्छतो भगवद्दासस्य कमण्डलुरपि रिक्तोऽजायत।

इत्थं क्रमेण क्रामता तेन पान्थसार्थेन पदवीपार्श्वतः पृथिव्यां पतिताऽचिरप्रसूता पिपासाभिभूता, काचित् कृपणा कृशाङ्गी कुरङ्गी समालोकि। तामभितो मन्दतया धावकौ तच्छावकौ पुनः-पुनः प्रत्यावृत्य क्षीरविरहात् सङ्कुचितयोः तस्याः स्तनयोः पानमकुरुताम्। वदनाद् बहिर्निष्क्रान्ता तस्या आयता गतरसा रसना तृषातिशयमिव विवृणोति स्म। विचेष्टनात् क्षुरैः क्षुण्णा क्षोणी तस्याः सम्भावितमरणवेदनाया-श्चित्रमिव प्रादुश्चकार।

११. तां तादृश्यां दयनीयदशायां शयानां दर्शं-दर्शं विषादविक्लववदनाः सर्वेऽपि सहृदयाः सार्थिकाः समवोचन्—'हा हन्त! हन्तीमां वराकीं हरिणीं तीव्रा तृषा। मृतायां मातरि इमौ सुकुमारौ शावकावपि अनाथौ स्तन्यालाभजन्येन दौर्बल्येन मातरमेवानुगमिष्यतः। जीवन्तावपि कदा-चिदचिरेण श्वापदैः शकुन्तैश्च तिलशः शकलित-शरीरौ तेषां कवलता-मेष्यतः। का गतिरनयोरलब्धदुग्धयोः मुग्धयोः? अहो! विचित्राणि खल्व-वार्यवीर्यस्य विधेर्विचेष्टितानि। आः! विरूपकरणामिमां हरिणीं मरणं शरणं यान्तीं कस्तावत् त्रातुमलङ्कर्मीणः। सम्प्रति तु नापरः कोऽपि, परं यो जगतोऽभिगोपी गोपीवल्लभो वसुदेवबालकः स एवास्याः पालकः प्राणानाम्। मरणं मूर्त्तेर्धर्मं इति महर्षयो मुनीन्द्रा महायोगिनश्चाप्यात्मानं मन्दं-मन्दं मृत्युमुखमहोदधौ मज्जन्तं रक्षितुं नाक्षमन्त। गत्यन्तराभावाद् गतार्थमत्रावस्थानम्। परितापेन पिपासाजातेन, रविरश्मिसङ्घातेन, घुरघुरायमाणेन घर्मवातेन, पादन-खम्पचेन पांसुव्रातेन च यस्य कस्यापि स्वास्थ्यहरणं वा मरणं वा सम्भवति। विशेषतोऽत्र मरुमण्डले तीक्ष्णा तृष्णा सम्भाव्या कृष्णा रजोवात्या चेति द्वौ भूतानां भीतिभूतौ प्रकृतिप्रसूतौ मृत्युदूतौ मन्येते। यद्यपि सरणि-सकाशे सा कापि कूपी इतोऽविदूरे दरीदृश्यते, परं जीर्णप्रायायां तस्यां केवला भ्रामणी भवति, नोदञ्चनं नो दामनी। तस्माच्चपलचरणमितो-ऽपसरणं भद्रङ्करणम्' इति।

१२. ततो हरिणीपरिचरणपरायणत्वाद् न यियासन्तं सन्तं करुणावासं भगवद्दासं निस्सम्बलं केवलं, दूरशून्ये दुर्लभोदकाहारे कान्तारे विहाय, श्वोभाविनि पर्वदिवसे मुरमर्दनमूर्त्तिदर्शनोत्सुकः पथिकसङ्घातः वृन्दावनमुपयातः। प्रायो वाङ्मात्रेण हि प्रपञ्चयन्ति करुणां लोकाः।

पश्चाद् याते यात्रिव्रातेऽसावात्मगतमाह—'परेद्युः प्रत्यूषे शय्योत्थाय भगवतो व्रजविहारिणो वासुदेवस्य विग्रहस्य विलोकनेन मयापि स्वात्मा

क्लेशग्रहितां नेय आसीत् परं पिपासाऽवसन्नां मरणासन्नां च तपस्विनीं हरिणरमणीमशरणां परित्यज्य नतरामितोऽपयास्यामि। अतएव मामपि प्रस्थानाय परिबाधमाना: सार्थिका मया प्रत्युक्ता:—'कामं यान्तु भवन्त:, अस्वस्थायामवस्थायां नेमां क्षामक्षेमां गतिहीनां दैवाधीनां कृत्वा रहयितुमहमलन्तराम्' इति। मास्तु परेद्यवि प्रभाते, किन्तु सायंसमये मयेयं चक्षुष्मत्ता वृन्दावनविलासिनो वल्लवीवल्लभस्य पावनेन दर्शनेन नूनं चरितार्थयिष्यते। विलम्बनविषये च भक्तवत्सलं भगवन्तं भूय: क्षमां भिक्षमाण: पादयो: पतित्वा पुन: प्रार्थयितास्मि, कथयितास्मि च—'कृपालो! तावकीनाया: एव दीनाया: पुत्रिकाया: प्रियकप्रियाया: परिचरणे परायणस्य वेलाविलम्बो जात:, नात: कोऽपि मे मन्तु: मन्तव्य:। नाथ! सर्वथा तदपि तावत् तावकमेव कार्यमजायत, न तु मम। तस्याश्चापि हरिणरमण्या: प्रतिरोम पापपावकं तावकमेव निकाममभिरामं प्रतिबिम्बं प्रत्यभासत। यदि श्व: प्रातरेव दर्शनदानेनाहमनुग्राह्य आसं, तर्हि कुतो नु मुमूर्षु: मृगी मम मार्गे निपातिता' इति। उक्तं च धर्मज्ञधुरीणै:—

१३. **व्यपोह्य परपीडां चेन्नार्जिता: पुण्यराशय:।**
नरके पात्यमानं त्वां, नर! के रक्षितुं क्षमा:॥ ६॥ इति।

ततोऽसौ सहजकृपावान् कृपणाया: कुरङ्गकान्ताया: कोमल-कुन्तलकलापां तीव्रोत्तापां मुग्धां मूर्त्तिं मुहु: मन्दं-मन्दं मृदनन् करकुड्मलै:, पूत्कार-गर्भया वात्सल्य-वैपुल्यविप्लुतया वाचा च विश्वासं वर्धयन्, कमण्डलुतलशेषं जललेशं तस्या वदनाद् बहिर्नि:सृतायां रसनायां निपातयामास। सा तु पीयूषप्रतीकाशस्य पानीयस्य परामर्शं प्राप्यैव दच्छदद्वयीं लोलया लेलिहाना, कज्जलिते ललिते लोचने च चटुलयन्ती किञ्चिच्चेतनताचमत्कारं प्रकटीचकार।

१४. तन्निरूप्य तस्या जीवनं प्रति अङ्कुरिताश: स सपदि वारिव्यवस्था-विधानाय करकलितकमण्डलु: कूपकान्तिकमुपेत:। तत्र च रज्जुमनालोक्य क्षणं यावद् हताशश्चेतस्येव किञ्चिन्निरणैषीत्। तदनु तेन कमण्डलुं नीचैर्निधाय कौपीनातिरिक्तानि समस्तान्युत्तरीयान्तरीयशाटिकादीनि वसनानि वपुषोऽवतारितानि। पाणिभ्यां पाटितानां चैतेषां पटानां पट्टिकाभि: व्यावर्तनपटिम्ना रज्जुनिर्माणं चकार, तया च रज्ज्वा क्षुद्रं कमण्डलुं दृढं बद्ध्वा उदकादित्सया शनैस्तरां कूपे लम्बयामास। हा हन्त! दण्डेऽपि संयोजितेऽपर्याप्तां रज्जुं कूपकान्निष्कास्य प्रत्युत्पन्नमतिना तेनान्तरेव रीत्यन्तरं निरणायि।

१५. स कूपोपकण्ठ उपविश्य 'कदाचित् प्रतमां पिपासिता सती मृगी मा म्रियताम्' इति दूरं दरितः त्वरितं कराग्रैरकृतसीत्कारं स्वकचलुञ्चनं चकार। ततस्तेषां कचानामपि व्यावर्तनविधिना रज्जुरचनां विधाय शीर्षादजस्रं स्रवदस्रोऽपि स सुखेनोदकोदञ्चनं व्यधात्। तदानीं तस्य महात्मनो विलोचने विपुलैः वाष्पबिन्दुभिः व्याप्ते बभूवतुः। न वै वालविकर्षण-विजनितया व्रणवेदनया, अपि तु 'सम्प्रति हरिणीप्राण-रक्षणमसंशयं सम्पत्स्यते' इति प्रकृत्यैवान्तः पुनः-पुनः प्रस्फुरितया पुष्कलया प्रह्लादपरम्परया। परपीडापनोदः खलु परमात्मप्रियाणां परमः प्रमोदः।

१६. तदनु तूर्णचरणो हरिणरमणीमुपस्थायासौ सावधानं मूर्धानं तस्या विगतवेशे जानुदेशे निदधे। पश्चाच्च पुनः-पूत्कारैः प्रणयप्राचुर्य-प्रदर्शनपूर्वकं पर्याप्तं पयः पाययामास। साऽधुना साधुना तेन साधु सेविता पानीयपान-समकालमेव सम्प्राप्तसंज्ञा द्रुतमुत्थाय, दयितदूनदारकद्वयदत्त-दुग्धा दूरं दुद्राव। परमुत्पुच्छया वेगेन व्रजन्त्यापि च तया द्वित्रवारं पश्चात् परावृत्य प्रेक्षणेन भगवद्दासं प्रति कृतज्ञता प्रादर्शि। यदुक्तं नीतिनिपुणैः—

अप्रज्ञा अपि तिर्यञ्चः, कृतज्ञाः स्युः, परं नराः।
ते धिग्वादास्पदीभूताः, ये प्रायोऽकृतवेदिनः॥ ७॥

१७. एतस्मिन्नेवान्तरे सहसा वन्दारुमन्दारस्य वृन्दावनविहारिण आनन्दकन्दस्य नन्दनन्दनस्य दिव्यस्फूर्तिः मूर्तिः भगवद्दासस्य पुरतः प्रादुरासीत्, अश्रूयत चैषाऽमृतधारासारामपारामनुकम्पां किरन्ती वैबुधी वाणी—'सत्त्वसंवास! भगवद्दास! त्वया हरिणीपरिचरणेन करुणा-विष्करणेन परां प्रीतिं प्रापितोऽहम्। अत्रैव संजाता सफला ते तीर्थयात्रा। एतेन ते दयादानेन महावदानेन समाकृष्टहृष्टचेताः वृन्दावनमन्दिरमपहाय स्वयमहं त्वत्सकाशमुपेतः। प्रत्यूषपर्यन्तं च तव प्रमुखे स्थास्यामि। नेदानीम-पेक्ष्यते वृन्दावनं प्रति प्रयाणम्। आत्मानमुपेक्ष्य परस्य पीडितस्य प्राणिनः परिचरणेन पुण्यानि पिण्डीकुर्वता परमार्थप्रवणप्रकृतिना त्वया प्राप्तोऽयं प्रमोदप्रदः परिणामः' इति। तदुक्तम्—

१८. **येन साक्षात्कृतं ब्रह्म, स स्वयं ब्रह्म जायते।**
न शङ्का तस्य पादाङ्का अपङ्कास्तीर्थरूपिणः॥ ८॥ इति।

अहो! परत्र भगवद्दासस्य सार्थिकाः परमोत्कण्ठया वृन्दावन-विहारिणो मन्दिरमुपेता अपि मुरमथनमूर्त्तिं न ददृशुः।

इत्थं भगवद्वचनं श्रोत्रस्वस्त्ययनं कृतवान् भगवद्दासः प्रभातप्राप्ति-पर्यन्तं परमेश्वरप्रार्थनपरायणः 'मा भूद् वासुदेवविलोकने विघ्नः' इति निमेषवर्जं तां प्रतिमां प्रेक्षमाणोऽपि नतरां ततर्प ।

१९. ततः परम् आत्मानं धन्यम्मन्यः सार्थतीर्थयात्रायासो भगवद्दासो निवृत्तो नैजीं नगरीम् । परं मनोहराया माधवमूर्त्तेः दर्शनदिनात् प्रभृति विक्षिप्तवृत्तिरिव, विरहविह्वल इव विस्मृतबाह्यविश्वव्यापारः समुज्झित-शौचाचारोपचारः स निर्बाधं राधाधवं मधुमथनमाराधयामास । यदि को ऽप्यदनायाऽददात् तदाऽखादत्, नो चेद् उपोषणं तच्छरीरशोषणं नाजायत : कासारकूले वटविटपि-मूले विष्ठितस्य तस्य नोष्मविशालात् करालाद् ग्रीष्मकालाद्, नो स्फीतशीताद् दुरन्ताद्, हेमन्ताद्, न च स्फूर्जद्विद्युन्मालात् कालाद् जलदकालाद् भीतिः प्रादुरभूत् । ब्रुवते च ब्रह्मविद्याविशारदाः—

२०. **ब्रह्मैव वीक्षमाणस्य, विश्वं व्याप्य व्यवस्थितम् ।**
न कुतोऽपि परित्रासो नाभासोऽप्यसुखस्य च ॥ ९ ॥ इति ।

तस्यामेव नगर्यामुपासक-सहस्रैः सेव्यमानः कोऽप्यपरः परिव्राड् देवानन्दो नाम न्यवसत् । एकदासौ उपासकेष्वन्यतमेन पुत्रकाम्यता गद्-गदायमानगलेन केनापि महेश्वरनाम्ना पौरेण रोदं-रोदं नामं-नामं मूर्धानम्, पातं-पातं पादयोः मिथः प्रार्थितः— 'महाराज! अपुत्रोऽहम्, कृपां कृत्वाशिषं देहि येन मे वंशोद्धारको दारको जायायां जायताम् । न पोषधैः नाप्यौषधैः कोऽपि लाभोऽलाभि' इति । पुत्रीयन्ति प्रायः पुमांसः ।

उद्ग्रीविणा विलोचने साचि सञ्चारयता देवानन्देनोदितम्— 'महोदय! कल्य आगन्तव्यम् । रजन्यां समाधिमास्थाय परमेश्वरं पृष्ट्वा प्रतिवक्ष्यामि' इति ।

२१. तदुपश्रुत्य गृहं प्रत्यागतस्य विष्टरे च विचेष्टमानस्य महेश्वरस्य कथमप्यतियाता प्रतीक्षाऽऽयामिनी यामिनी ।

परेद्युः प्राप्ते महेश्वरे देवानन्दो हारिणीं हारिणीं त्वचमध्यासमानः रूक्षैरक्षरैः क्षते क्षारं क्षिपन्निवोदैरयत्— 'भक्त! पृष्टो मया परमेश्वरः, न भवति भवतो भाग्ये पुत्रः । तस्मान्नाहं किमपि विधिविपरीतं विधातुं बलाढ्यः' इति । दुःशकं दैव-परिवर्त्तनम् ।

एवं तद्वाणीकृपाणीव्रणित इव गतिहीनो दीनो महेश्वरः म्लान-मुखमण्डलः गृहं प्रत्यावर्तमानः पदवीपार्श्वतः स्थलस्थितं भगवद्रूपं भगवद्दास-मपि साष्टाङ्गपातं प्राणंसीत्, सज्जनेष्टया चेष्टया च वैवश्यं व्यञ्जयामास । प्रणामावसरे नैराश्यावेशविवशस्य तस्य निरन्तरेण नयननीरेण भगवद्दासस्य

पादौ प्रक्लिन्नौ। तन्निरूप्य निसर्गत एवानुकम्पाशीलः, सर्वसत्त्वमैत्रमनाः भगवद्दासस्तं नासिकन्धमं प्रेमपुरस्सरं पप्रच्छ— 'प्रिय! कुतो नु सञ्जात-सर्वस्वविनाश इव, विश्वतो निराश इव चायतं निःश्वसन् वाष्पबिन्दून् विकिरसि? किं व्याधितो वाऽऽधितो वा बाधितोऽसि?' इति।

२२. महेश्वरोऽप्यामूलचूलं पुत्रैषणा-शोषणीं देवानन्दघोषणां निखिलेन निवेदयामास। तदुपलभ्य तं मृदुमुद्रितयोः नेत्रयोः पात्रीकुर्वन् साधुस्वभावो भगवद्दासः सान्त्वयन् प्रोवाद – 'श्रद्धाशील! प्रादायि ते पुत्रः' इति। एवं मधुसाद्भूतस्य श्रुतिशुक्तिलेह्यस्य तद्वरस्य प्राप्त्या परं प्रीतः प्रसूतपुत्रः, महेश्वरः कालान्तरे पुनः परिव्राजं देवानन्दमुपेत्याप्राक्षीत्— 'महात्मन्! 'नास्ति त्वद्भाग्ये पुत्रः' इति प्रोक्तपूर्वस्य मे गृहे कथं जातः सञ्जातः?' इति।

स आह— 'प्रियवर! अन्यतरेद्युः परमात्मानं पृष्ट्वा प्रतिवचनं प्रदातास्मि' इति। रजन्यामन्तर्ध्यानं विदधानेन तेन पौरपुत्रप्रसवविषये पृष्टः परमेश्वरः प्रत्यवादीत्—'परेद्यवि वदिष्यामि' इति।

२३. उत्तरेद्युः प्रजाते प्रभाते परमेश्वरः पौर-पणिकप्रतिरूपो भूत्वा देवानन्दमुपागमत्, प्राञ्जलिः स्थितो हृदयोदयं वेदनामयं सविनयमनुनय-मुपनयंश्च तं परिव्राजकं प्रार्थयत—'तपोनिधे! एक एव मे सूनुः सोऽपि बालो विकरालया विस्फोटव्रणव्यथया विचेष्टमानो वेगवता कालेन कवली-क्रियते। द्वित्राणामेव घटीनां प्राघुणोऽसौ प्रतिभाति। विज्ञप्तोऽस्मि शल्यशास्त्रकौशल्यभाजा विश्रुतेन वैद्यवरिष्ठेन – 'चषकार्धपरिमितं पौरुषं लोहितमपेक्ष्यते। तावदेव ते तनूजः सर्वथा स्वस्थः सन् चिरं जीविष्यति। अन्यथा नियतमस्य मरणं शरणम्' इति। कृपालो! प्रेष्ठस्य पुत्रस्य प्राणानां परित्राणाय पुरप्रतोलीषु परिभ्रमता परितः, पीडापराकाष्ठाप्रकटनपूर्वकं प्रभूतानां पुंसां पादयोः पतित्वा पुनः-पुनः प्रयाचमानेनापि नापि मया शोणितम्। शोणितं तरुणस्यापेक्ष्यते। साधुर्भवान् दैवदयया युवा परि-पुष्टश्च। किञ्च सहृदयाः संन्यासिनस्तु स्वभावत एव करुणामया जायन्ते। तस्मादुदाराशयो भूत्वा परोपक्रियया पुण्यपुञ्जपात्रतां प्रापयात्मानम्, शीतलय तूलदाहं दह्यमानं मे मानसम्, परित्रायस्व च पश्चिमावस्थां प्राप्तस्य मे पुत्रस्य प्राणान्' इति। तदुक्तम्—

२४. **प्रियाः प्राणाः प्रिया पत्नी, पिता प्रीतः प्रिया प्रसूः।**
प्रोक्तः पुत्रः परं प्रेष्ठः, प्रायः पिण्डप्रदायकः॥ ९०॥ इति।

इत्थं गद्गदिकाकलितानि अदिममिलितानि, विपुलानि विनयबहुलानि वणिग्वचनानि विनिशम्य 'शरावार्धशोणित-विश्राणनेन देहदौर्बल्यं अनपेक्षितं प्राणप्रयाणं चापि सम्भवती'ति चाचिराय चेतसि विचार्य तं वणिजं विविधैः वाणीव्याजैः विवर्जयन् व्याजहार परिव्राजकः— 'अशक्य-विधानं रक्तदानम्, प्रत्यवायः प्रजायते परमात्मपूजायां मम, न मेऽवकाशः, कर्मान्तरं किमपि कर्त्तुं कथय' इति। वल्लभं वै वपुः विश्वेषाम्।

पुत्रप्राणानां परिपालनस्य प्रयोजनीयतां प्रस्तुवन्, पूर्वाऽपेक्षयापि प्रबलतरैः प्रमाणप्रवचनैश्च वेदनाविनिवेदनं विदधानः प्रोवाद पौरः पण्याजीवः —'करुणावतार! परमप्रियोऽसि परमेश्वरस्येति परमेश्वरस्यैव-कृते प्रयच्छ, शरावार्धं शोणितस्य। कुरु प्रसादम्, व्यपनयावसादम्' इति।

२५. परं देवानन्देन तथैवाम्रेडितं प्रतिवचनमाकर्ण्य हताशोऽसौ भगवद्दासमभ्युपेत्य यथापूर्वं व्यथा-कथां विनिवेद्य पर्यन्ते पुटितपाणिः प्रार्थयत— 'भगवन्! परित्रायस्व सन्निहितप्रयाणान् प्राणान् मे पुत्रस्य। परमेश्वरार्थं प्रयच्छ शरावार्धं शोणितस्य' इति।

स तु सुतरां सज्ज इव सहसासनात् समुत्थाय सावधानः सन् समुदाजहार—'अरे! किमिति कालक्षेपं कुरुषे, मम कुटीरस्य कोणे पतितां कृपाणीमानय। कामतो मम गात्राद् रुधिरमात्रया पूरय पात्रम्। कालोचितमालोचितं त्वया मामुपागच्छता। परोपकाराय परमेश्वराय च परया प्रीत्या प्राणानपि प्रदातुं प्रभवामि' इति।

सोऽपि पौरस्तथानुष्ठाय पाणिपरामृष्टां पाषाणशाणे घृष्टां कृपाणीमुद्यम्य पादकनिष्ठिकाया रक्तमादातुं सज्जः समजायत।

२६. तच्चिकीर्षितं निरूप्य दयादानदमदाक्ष्यदाक्षिण्याभरणेन-परदुःखकातरेण भगवद्दासेनाभाणि—'रे! किं विधातुं व्यवसितोऽसि? पादप्रस्नुतमसृगपवित्रत्वात् प्रयोगानर्हमिति प्राग्भिस्तन्न प्रशस्यते। तस्मात् त्वरया मे गलशिरां छित्त्वा यथासमीहितं लोहितं गृहाण। समयं मा गमय, स्वस्ति स्तात् ते सुताय' इति।

किञ्चित् सङ्कोचमञ्चन् पौरो मन्दं मन्त्रयामास— 'महामहिम-मण्डित! महात्मन्! एवं कृते नियतं ते जीवनं शङ्कनीयं सम्पत्स्यते। मर्मस्थानमित्यामनन्ति गलशिरां किल शल्यशास्त्रशिक्षकाः' इति।

२७. तदाकर्ण्य सात्मीकृतकरुणः मैत्र्यस्निग्धया सौकुमार्यदिग्धया दृशा पश्यन् मोदं-मोदं भगवद्दासोऽभाणीत्—'अये! मुग्ध इव मे प्रतिभासि। भस्मी-भावं यायिनाऽस्थायिना सापायेन कायेन किं मया करणीयम्। एतेनेतरस्य

जीवितं चेदवितं स्यात्, किमतः परं वरं कल्याणकरम्। कदर्थया भूत्या सुखप्रसूतिः भूतिः क्रीयेत चेत् का क्षतिः। नेदं दानं दैनन्दिनम्, दुर्लभोऽयं दैवयोगः, परमात्मप्रसादप्रसूतानि पुण्यपूगपरिणति-भूतानि च भवन्त्येवं-विधानि धर्मकर्माणि। प्रिय! दोषानुषक्तं पादरक्तं जिघृक्षुर्मा भूः, हृदयसन्निध्यात् स्वच्छं गलशिराशोणितम्, येन शैघ्र्येण शरावोऽपि परिपूरितः सम्भविष्यति। मा मन्दायस्व। ममैषा भीतिर्जायते यत् कदाचिदकथनीयं किमप्यप्रीतिकरं ते नापतेत्' इति। तदुक्तम्—

२८. **चिकीर्षता स्वकर्त्तव्यं, द्रव्यं सर्वेण दीयते।**
सुखेन दीयते भक्तं, रक्तं दुःखेन दीयते॥ ११॥

किं च— **उदितं जीवितं वैद्यैः द्रुतमङ्गेषु लोहितम्।**
महात्मैव तु तद् यच्छन्नाचरत्यात्मनोऽहितम्॥ १२॥ इति।

पश्चात् पौरः प्रोवाच— 'प्रियंवद महामुने! सद्यो वैद्यमुपसद्य 'चरणगलयोः कतरस्याङ्गस्य रुधिरं ग्राह्यम्' इति मन्त्रयित्वाऽऽयामि' इति।

२९. नासौ पौरवेशः परमेशः प्रत्यागतः। पश्चात् परदिवसे परमेश्वरः पुनः परिव्राजं स्वप्ने समबोधयत्—'देवानन्द! हन्त! न तवान्तःकरणे करुणा, नापि चोपकाराशयः प्राणिनः प्रति प्रणयः। परमार्थतो न मयि भक्ति-मयी काप्यनुरक्तिरासक्तिश्चालोच्यते ते। यदाहं दिवा नागरिकरूपः सविनया-नुनयं 'परमेश्वरस्य कृते प्रयच्छ शरावार्धं शोणितस्य' इति त्वामयाचिषम् तदाप्यात्मदेहस्नेहभाजा व्याजाश्रयेण त्वयावधीरितोऽहम्। अरे! त्वं तु परमेश्वराय किमपि वलिदानं विधातुं नेशः। त्वत्तस्त्यक्ताशोऽहं पश्चात् प्रयातः पञ्चास्यप्रतीकाशं पुरुषप्रवरं श्रीभगवद्दासम्। स तु हेलयैव प्राण-प्रदानायापि सपदि सज्जितो जातः। यः प्राणिनां परित्राणाय करुणा-मातनोति, यस्य परमात्मनि परमा प्रीतिः, यश्च परमेश्वर-परिचरणकारणं देहधारणं मन्यते, भगवद्भूतोऽसावेव वाक्सिद्धो विश्वबन्धुः संसारिणां विधेरपि विधाता। तद्वचनमनुपालयन्नहं स्वयमजन्मापि जगति जाये। मा भूत्तस्य वचनमन्यथेति सर्वदाहं तत्सान्निध्यं भजामि। किं च नाद्यावधि किमपि भिक्षितं श्रीभगवद्दासेन। तस्याशिषा महेश्वरगृहे पुत्रः प्रसूतः। तादृशस्य महापुरुषस्य वचनेन तु पुत्रशतमपि लभ्यते का कथा एकस्य पुत्रस्य। येनेश्वरायात्मा दत्तः तस्मायेव ईश्वर आत्मानमर्पयति। तद्वचन-मनुधावन्त्यर्थाः। अरे! त्वं तु नित्यं वरशापप्रदानैः स्वसम्मानं प्रथयसि मम चात्मानं कदर्थयसि। स्वल्प उदयः, भूयान् व्ययः। तस्मान्मा स्म विस्मार्षीः यत् केवलं परमात्मनिमित्तमात्मदानं शक्ति-मुक्तिनिदानम्' इति।

३०. प्रभातायां रजन्यां जिज्ञासया समुपागतं महेश्वरं देवानन्दोऽमन्दं नन्दन् निजगाद—'सुभग ! कथय क्वासौ परमात्मनः प्रेयान् श्रीभगवद्दासः। तस्य पतितपावनौ पादौ परिमृश्यात्मानं कृतार्थयितुं कामये। स भगवद्दासः स्वयं भगवान्, अहं तु तस्य दासः' इति।

३१. एवम्प्रकारेण पीडितानां प्राणवतां परिचर्यया जीवितं चरितार्थयन्तश्चारुचरिताः अतिगणितसुखाऽऽयतयो यतयो हि साधवः प्राकृतजनदुर्लभान् पुण्यान् पारत्रिकान् लोकान् स्वायत्तीकृत्य परे ब्रह्मणि सायुज्यं भजन्ते। गीताऽतीतगुणगरिमाणस्ते कर्मणान्येषां व्यथां श्लथयन्ति, कृपामूलं परानुकूलं कथयन्ति, न च मनसापि कञ्चन व्यथयन्ति। जानन्ति ते यज्जीवानां सेवनायैव जीवनम्, सेवा च दयामूला। सदन्तःकरणेन सदुच्चरणेन सदाचरणेन च करुणासारं प्रसारयन् पुमान् रागद्वेष-वयस्य-विद्वेषि-विशेषविरहितो भौतिकेन प्रपञ्चेन न लिप्यते। यतो हि एकत्र कृते रागे परत्र द्वेषस्याप्यसंशयं सद्भावादसाक्षाद् दयाव्रतभङ्गः स्यात्, द्वेषे कृते तु साक्षादेव। एवं रोषोपक्रोशापरितोष-हिंसाऽसत्य-स्तेयादिविषयेऽपि वेदनीयम्। यदुक्तं धार्मिकैः—

३२. **हेतुः पुण्यस्य कारुण्यं, सेतुः संसारसागरे।**
केतुः शीलस्य साधूनां, नेतुश्चेतसि जायते ॥ १३ ॥ इति।

तस्मात् सौम्य ! शुचिशीलशाली यावद् दयावान् भवान् भविष्यति तावद् भगवान् हृष्ट आकृष्ट इव च सन्निकृष्टः सम्पत्स्यत इति परापकार-रूपस्य पापस्य परिहारेणात्मन्यपि कृपां कुरु। उक्तश्च सुकृतसारः शास्त्रकारैः—

परोपकारोऽनुक्रोशः, सदा दास्यस्य चाश्रयः।
त्रयः साधुगुणाः, येषु, क्रियते स्वात्मविक्रयः ॥ १४ ॥ इति।

एकतानता (३०)

१. इतः प्रायश्चत्वारि शरदां शतानि व्यतिगतानि, भारते विश्रुतनामाऽकबरः क्षितीश्वरः प्रवादानुसारं प्रशस्तः शास्ताऽऽसीत्।

एकदा स कीर्त्यमान-गौरवकथं, पृथु-प्रथं विश्वविलाससर्वस्वं स्वं दिल्लीत्यभिधानं पत्तनप्रधानं राजधानं व्यापारविशेषविवशतयाऽह्नाय विहाय विहाराय बहिरयासीत्।

बहुकृत्वोऽसौ प्रस्तुत-प्रचुर-परिचर-योधजनं, विहित-बहु-वैजयन्ती-वीजनं, मिथ्यायोजनं विनैव, त्रिचतुरान् चतुरान् सदाचारान् चारान्, प्रणय-परीक्षा-पवित्राणि द्वित्राणि मित्राणि च सत्रादाय देश-दशा-दिदृक्षया, प्रजा-राजानुराग-जिज्ञासया च परितः पर्यटन-प्रकृतिरजायत ।

२. स्मेर-सुम-सौरभ-संवासित-सकल स्थल-सरणि-सदने, मधुपान-प्रवृत्त-मधुप-मिथुन-मञ्जु-गुञ्ज-मिषाऽऽमन्त्र्यमाणमदने, कोकिल-कुल-काकली-क्रियमाण-दीनाऽध्वनीन-कदने, मधुमास-मधुरिमोल्लास-मज्जन्मानवोन्मदने, मृदुमन्दस्फुरदिने कस्मिंश्चिद्दिने वर्त्मनि व्रजत एव तस्य समुपस्थितः समुपासन-समयः । प्रत्यहं पञ्चकृत्वः प्रभु-प्रार्थन-प्रतिज्ञेन पृथिवी-पतिना पथं परित्यज्य पार्श्वयोः पवित्र-प्रदेशस्य परोक्षत्वाद् विस्तृतायां वर्तन्यामेव वास्त्रो विष्टरो व्यस्तारि ।

पूतेन पानीयेन प्राक् प्रक्षाल्य पाणिपादं पृथ्वी-पालेन पश्चात् परमेश्वर-प्रार्थना प्रारम्भि । सहचराश्चाराः सुखासुखभागिनोऽनुरागिणश्च, मा भूत् पार्थिव-प्रार्थना-प्रवणतायां परस्परालाप-प्रभवः प्रत्यूह इति पार्श्वस्थ-पादप-पुञ्जं मञ्जु-वञ्जुल-कुञ्जं प्रति प्रयाताः ।

३. एतस्मिन्नेवान्तरेऽनतिदूरायना निर्निमेषनयनाऽनल्प-सङ्कल्प-विकल्पोत्कलिकासु लीना कुलीनाऽध्वनीनाङ्गना काचित् तत्रोपेत्य पदव्यां प्रसारिते पार्थिवास्तरणे चरणे निदधानाऽभीष्टस्थानाभिमुखी त्वरितं ततो निरगात् । तस्यास्तादृशीं अशिष्ठां धृष्टतामशिष्टतां च दृष्ट्वा गीयमान-गुणगाथो नरनाथो नितान्तं क्रोधाक्रान्तः समपद्यत । परं काक्षेण पश्यन्नप्यसौ परमेश-प्रार्थना-परायणत्वात् किमपि कथयितुं न शशाक । तदाहुः—

४. **एकतान-मनस्केन मानवेन च मौनिना ।**
भोजने भजने चैव भाव्यं भव्याऽभिलाषिणा ।। १ ।।
सम्बलं भक्तिमार्गे तदलं मौनावलम्बनम् ।
तेनोपचीयमानं स्यान्नित्यदा मानसम्बलम् ।। २ ।। इति ।

अथ नातिचिराच्चिरण्टी सा तेनैव पथा यथा गता तथा प्रत्यावर्तिष्ट । तदानीं भूमिभृतो भगवद्भजनं पर्यवसितमासीत् । सत्कर्त्ता सतां स तामुपागतां वनितां परिपप्रच्छ— 'अयि मुग्धे ! त्वमधुनाऽनेनाध्वना कुतो गतासीः ?' इति ।

५. प्रमदा प्रत्यवादीत्— 'महाभाग ! इतो मे जीवितेशो विदेशमितो विद्यते । स आव्रजन् वर्तत इति वार्ता मयाऽलम्भि । तस्यैव सुचिरं

हविरं रूपं निरूप्याऽद्यात्मानमानन्दयितुं शीतलयितुं चागमम्, परन्तु वितथोऽभूदसौ वृत्तान्त' इति ।

तन्निशम्य नरनाथो नारीं निर्भरं निर्भर्त्सयन्निजगाद— 'बालिशे बाले ! किं हीनसत्त्वया त्वया व्रजन्त्या नालोकि यदहं नमस्या-निरतोऽस्मि ? त्वं मे विष्टरमशिष्टरंहसा प्रलिप्त-पांसु-चयेन पदद्वयेन मरीमृद्यमाना मानान्धेव गताऽभूः' इति ।

६. सा जोषिता जोषमिता महीपसमीपं, लक्षणविशेषैस्तं 'नृपतिरेष' इति प्रत्यभिज्ञाय प्रत्यभाषत—'भद्रङ्करणचरण ! लोकशरण ! विवेकहीनमन्याधीनमिव च मामकीनं तु दीनं चेतः कस्मिंश्चित् प्रापञ्चिके पुरुषे रक्तमासक्तं चाभूत्, येनाहं प्रभवन्तं भवन्तं, सरणि-विस्तीर्णं भवदास्तरणं च निर्वर्णयितुं न प्राभूवम्, परं भवतस्तु हृदयं तदा सर्वगामिनि त्रिभुवनस्वामिनि सर्वतः समाहितमभूत् । कथं नामेतो व्रजन्तीं स्तब्धाक्षीं मां त्वमद्राक्षीः ? उक्तमुपयुक्तम्—

'यो लोकं लोकते नासौ लोकेशालोकलोकनः ।
न लोकं लोकते योऽसौ लोकेशालोकलोकनः ॥ ३ ॥
नो मनो यौगपद्येन बहिरन्तश्च वीक्षते ।
कथं काश्यां स्थितो बालः काश्मीरेष्वपि सम्भवेत्' ॥ ४ ॥ इति ।

७. तन्निशम्य नारीनयं नितान्तं नामित-मौलिः शिक्षितः क्षितीशस्तां तितिक्षामभिक्षत । अतिमात्रं त्रपितं महीपमालोक्य महिला मुहुराह स्म—'परात्पर-प्रभुप्रियपूजक ! स एव परमार्थतः परमेश-प्रार्थना-प्रकारो यद् विस्मृत्य बाह्य-विषय-व्यापार-व्यासङ्गं चिदात्मनि चेतनाया एकतानत्वम् । श्रूयतां चात्र चित्रं परम-पवित्रं परम्परा-प्राप्तं गुरुभिर्गीयमानं पुराणमुपाख्यानम्—

८. ग्राह्य-गुह्य-गुरु-गुण-गौरव-गर्व-गेहेषु, सर्वत्र सस्य-सम्पत्-सम्भूत-सुख-समृद्धि-सन्दर्शित-सकल-संसार-स्नेहेषु, दैनिक-दान-दान्ति-दाक्षिण्य-दया-दीक्षा-दीप्तदेहेषु, विदेहेषु सङ्कलित-सुकृत-कनको जनको नाम नरेशः शिथिलाऽपुण्याधानां मिथिलाभिधानां राजधानीमलञ्चकार । स हि ब्रह्मविद्या-विचक्षणः, चक्षणः सत्य-सत्त्व-रहस्यानामिति तत्कीर्त्तिः सकलदिक्कूलङ्कषतामशिश्रियत् । देश-देशान्तरेभ्योऽपि बहवो ब्रह्मविद्यां बुभुत्सवो बहु-शस्तं बहुशस्तमुपातिष्ठन् । यशस्विनो वीतरागाः, महस्विनो महाभागाः, तपस्विनस्त्यागयागाः तस्माद् ब्रह्मविद्यायाः प्रशस्यानि रहस्यानि समुपलभ्य नितान्तममोमुद्यन्त । यतो हि—

९. विभिन्ना ब्रह्मविद्याया 'विद्या' कापि न विद्यते।
विद्यते शश्वदानन्दो यया नाऽपि च खिद्यते॥ ५॥
आशंसमानाश्च जनाः सुखानि, प्रवर्तयन्तो विषयेषु खानि।
हालाहलं हा! ऽलमिहालिहन्तोऽप्यनामयं ते किमु कामयन्ते॥ ६॥ इति।

एकदा कदाचारवर्जितो जितो विविधैः क्लेशैः शुको नाम मुनिः केनापि तापसेन प्रेरितो मुक्ति मार्गदेशकं कमप्युपदेशकं मृगयमाणो महात्मनो महायतेः मेध्यमतेः विदेहाधिपतेः प्रासादमाससाद।

१०. तत्रासकौ मौग्ध्य-मधुरिम-मण्डिताभिः, प्रेम-प्रकाशन-पण्डिताभिः, कामकलोल्लासिनीभिः, मञ्जुहासिनीभिः शुद्धान्त-विलासिनीभिः परिवेष्टितं चाप्यविशिष्ट-चेष्टितम् महार्हं-स्थूल-तूलोपबर्हं कक्षे निक्षिप्य विराजन्तं महाराजं तं ददर्श। तत्र सङ्कलित-सकल-संसार-सौन्दर्य-सम्पत्-स्वामिनी काचित् कामिनी कोमल-करकुड्मल-कङ्कतिकया तस्य कुण्डलित-काल-कुन्तल-कलापममार्जीत्, काचिदासेचनकरूपा सकपोल-कूपा मृदु-मुकुलिताक्षेण काक्षेण तमैक्षिष्ट, काचिन्मञ्जुल-मुक्ता-मणिमाला, नितम्ब-बिम्ब-चुम्बि-वाल-जाला, बाला प्रस्वेद-प्रोञ्छन-प्रलम्भेन तस्य वाचंयमत्वादलोलं कपोलमस्प्राक्षीत्, काचिद् रजनीकर-कर-निकर-कल्पितेनेव पारदर्शकेन पट्ट-पट-प्रावरणेन जनित-जनमोहा वरारोहा मुहुर्मृदु-मन्द-मुचुटीभिस्तं सामोदं व्यनोदयत्, काचित् स्फटिकमयीव शम्बूक-धवलाऽबलाऽभिमुखताकाङ्क्षिणी क्रिया-समभिहारेण कृतक-कास-कूटमकार्षीत्, काचिच्च प्रणय-प्राचुर्याभिलाषिणी सुभाषिणी मत्तकाशिनी पेलवाभ्यां पाणिपल्लवाभ्यां पादपद्म-पीडन-परायणा परामर्श-प्रकारैस्तं प्रामूमुदत्। एवमवयव-विशेष-प्रदर्शनैः, उच्चावचाभिश्चेष्टाभिश्चेष्टाभिस्ताः प्रमदास्तदा प्रणय-प्रसाद-परम्परां प्रादुष्कुर्वाणाः प्राणाधिनाथं पार्थिवं पर्यचरन्। यतो हि—

११. समन्दहासैर्विविधैर्विलासैः शुश्रूषया देहविभूषया च।
अव्याज-लीला महिलाः सुशीलाः, जयन्ति भर्तॄनथ रञ्जयन्ति॥ ७॥
इति।

मुनिस्तु विप्रकृष्टादेव दृष्ट्वा वरवर्णिनीनां समन्दहासान् विलासान् किमेष ब्रह्मवादी वा मदनोन्मादी वे'ति ससन्देहं विदेहं वीक्षमाणस्तं प्रत्युद्बुद्धयाऽश्रद्धया विशेषेण च विद्वेषेण चलित-चेता विवर्णवदनः प्राप्ताऽऽशा-प्रणाशः पृथ्वीपति-प्रासादात् प्रत्यावर्तत व्यचीचरच्चेदम्—

— युग्मकम् —

१२. माया-महामोह-निमज्जनानि, खलीकृतानल्प-सुहृज्जनानि ।
प्रेम-प्रपञ्चैः परिवेष्टितानि, क्व कामिनीनां किल चेष्टितानि ॥ ८ ॥
विसृष्ट-विष्वग्-विषय-प्रसङ्गैः, प्रशान्त-रागादि-मनस्तरङ्गैः ।
क्व वेदनीयं च परं प्रशस्यं, ब्रह्माभिधेयं परमं रहस्यम् ॥ ९ ॥

अपि च—

अहो प्रमादो मृगतृष्णिका वा, विक्षिप्तता वा सवितर्कभावा ।
गङ्गाभिलाषी गमितोऽद्य मोहं, पूति-प्रणालं समुपस्थितोऽहम् ॥१०॥ इति ।

१३. ततः पुनरसौ तमेव तापसमुपेत्य यथावृत्तं विस्तरेण व्याचख्यौ । तदाकर्ण्य स तापसस्तं मुनिमुद्‌बोधयन्नाह—'रे नैराश्यारूढ ! मूढ ! विदेह-समकक्षो जिताऽक्षो ब्रह्मोपदेशदक्षो नाक्षिलक्षीक्रियते कोऽप्यपरोऽपारेऽस्मिन् संसारे । अपरं च विद्यादायिनो मायिनोऽपि प्रगुणा गुणा एव द्रष्टव्याः स्रष्टव्याश्च भवन्ति न परं पुरस्कृतापरितोषा दोषाः । उक्तं चाभियुक्तैः युक्तियुक्तम्—

ग्राह्या गुणा एव सदा गुरूणां, दोषाश्च दूरात् परिवर्जनीयाः ।
प्राप्य पुष्पाणि जडो जपायाः, काष्ठानि कः काङ्क्षति कण्टकांश्च ॥११॥
इति ।

१४. तस्मात् स एव कृती निष्कृतिस्तव भव-भय-भञ्जनायेति नानाप्रकारैः ससारैरुपदेशविशेषलेशैः सान्त्वयित्वा स तं पुनस्तत्रैव प्रयाणाय प्रैरयत् ।

पुनः स तपस्वी तेन प्रोत्साहितो विदेहराजगेहमाससाद । तत्र चासौ यथापूर्वं लवणिम्ना लसन्तीनां लोल-ललनानां ललित-लीला लुलोके । परमासीत्तत्र विशेष एष यत्—

हसन्त्या पीड्यमानोऽभूदेकोऽङ्घ्रिस्तस्य कान्तया ।
हसन्त्या ज्वलदङ्गारेष्वाहितः कामतः परः ॥ १२ ॥ इति ।

एवं चमत्कार-जनकं जनकं निरूप्यापि मनाक् सन्देहमान-मानसो मुहुरसौ प्रतिन्यवर्तत तापसाश्रमं न्यवेदयच्च यथादृष्टम् । ततो दूरं दोलायमानं मुनेर्मानसं स्थेमानमानयता तेन तापसेन पुनर्व्यज्ञापि—'रे द्वैधविधेय ! धेय ! किमद्यापि नावगतवानसि यद् विदेहस्त्वनवरतं विरतो सर्व-व्यापार-बन्धनेभ्यः परे ब्रह्मणि विलीनः तिष्ठतीति तत्कृते कमनीय-कामिनीनां केलि-कलाक्रीडायां पीडायां च प्रोद्दीप्त-पावक-प्रदाह-प्रभवायां

न तनीयस्यपि भिन्नता। तस्मात्तमेव मोहतमोहरणं शरणमुपाश्रय। स एव ते वतेह कान्दिशीकस्य दिग्दर्शक' इति।

१५. तद्वाचमाचम्य शुको मुनिः पुनर्मिथिलामुपजगाम। तत्र च पूर्ववदेव विदेहस्याननुभूतावसाद-प्रसादौ पादौ पुनः-पुनः प्रणिपत्य स्वान्त-सन्ताप-प्रदर्शन-पुरस्सरमसकृत् क्षमामयाचत। भूयः सकपोतपाणिः भक्ति-स्फीतां श्रद्धोपनीतां विनीतां वाचमाचचक्षे— 'महाराज! व्यपोहितोऽहितो मे समोहोपक्रमः स भ्रमः, प्रास्तः प्रसूत-पुष्कल-प्रयासाऽनुशयः संशयः। सम्प्रति रक्षण-सक्षणयोः भवच्चरणयोरयमात्मा सर्वथा समर्पितः। व्यतीतः स्फीतः समयो यतः प्रभृति मृग्यते मया मुक्ति-मार्गः। तदुपदिशतु मे भवान् सत्य-सुख-सन्निधानं ब्रह्मोपासन-विधानमिति'।

१६. मधुरिमाणं म्रदिमानं च दधानेन वाचि जनकेनावाचि—'तात! पुरस्तात् साकल्येन समीक्षितं सत्पात्रमेवात्र च्छात्रमात्मीयत्वेन प्रतिपद्यते किलाचार्यः। ब्रह्मविद्यामर्हत्तमस्त्वमसि न वेति दीक्षातः प्राक् परीक्षाऽतः समपेक्ष्यते। निरणायि हि नीति-निष्णातैः—

पात्राय दत्ता सुपरीक्षिताय, छात्राय विद्या कृतवेदिने चेत्।
शोकाय पश्चान्न भवेद् गुरूणां, लोकाय कल्पेत हिता च साऽलम्॥ १३॥

'सर्वथा सर्वदा सज्जोऽहं भगवन्! इति सपदि प्रह्वोत्तमाङ्गः प्रत्यवोचन्मुनिः, न्यवेदयच्च निर्भरं नामित-निटिल एव—

१७. भृशं कृशं स्वं तपसाद्य कायं, मनस्तथा देव! निरस्तमायम्।
समर्पये पादपयोजयोस्ते, प्राणा अपीमे च तवैव हस्ते॥ १४॥
आचार्य! किञ्चार्य! विचार्यतेऽन्तः, शीघ्रायतां स्यात् किमु कालयापः।
कौतूहलं मेदुरयन्मदीयं, जिज्ञासितं ब्रह्म सुखाकरोति। १५॥ इति।

नास्ति ब्रह्मविद्या-व्यतिरिक्तं भद्रतरं किमपि काङ्क्षणीयं लोके।

परेद्यवि मादकामोद-मन्द-मृदु-वाते, चीचीकूची-कल-कूजित-विहग-व्राते, सञ्जाते प्रभाते, त्रैकालिक-वेदित्वादुदितस्नेहो विदेहो मुनिमादाय मधु-मत्त-मिलिन्द-माला-मञ्जु-गुञ्जितैः मोमुष्यमाण-मानव-मात्रमानसम्, मरन्द-बिन्दु-तुन्दिल-मन्द-मारुतान्दोल्यमान-वकुलावली-वलयितम्, सुम-सारलेहन-लीला-लालायितालि-पालि-लोलित-मालती-लता-ललितम्, कूजत्-कृतक-कलि-केलि-कुशल-कपोत-कुल-कम्पित-चम्पकम्, चञ्चु-चुम्बन-चाटु-चतुर-चटुल-चटक-चय-चरण-चिह्न-चित्रित-चारु-चत्वरम्, तरु-तल-तृण-तति-तिरोहित-तान्त-तित्तिरी-तिग्म-तुण्ड-तनूरुह-तीव्र-ताडन-तर्ज्यमान-तरुण-तित्तिरम्, केलि-कुञ्ज-कूर्दमान-कुरङ्ग-मृग्यमाण-मृगी-ग्राम-गमनमार्गम्,

मधुमासोन्मील्यमान-मञ्जिमायामम्, माकन्द-कन्दली-कवलन-कषाय-कण्ठ-कोकिल-कुल-काकली-कीर्त्यमान-कामम्, निकाममभिरामं स्वारामं प्राविक्षत् ।

१९. तस्यान्तराले विशाले समतले वेल्लि-विटपि-विष्कम्भ-विवर्जिते, वलय-वर्तुले, विलास-विहार-वर्त्मनि मुनिं संस्तभ्य, तस्यैकतरस्मिन् पाणौ प्रान्त-पर्यन्त-पूरित-पानीयं परिणाहवत् पात्रम् परस्मिंश्च पृथु पायस-पिण्डं प्रणिदधे। आश्चर्यस्याश्चर्या परीक्षा।

पुनः प्रेरणां प्रतिपालयन्तं सन्तं तं पार्थिवः प्रायुङ्क्त—'मुने! प्रणिहितं पयः-पूर्णं पात्रं ते पाणौ। इदमादाय तावदवधि क्षणमपि गत्यवरोधमविदधानेन त्वया मार्गेऽस्मिन् यथास्वं क्रमणं भ्रमणं चानुष्ठानीयं यावन्निम्लोचति भगवान् विरोचनः। परमेकोऽपि चेत् पानीय-पृषतः पात्रात् पतति, परीक्षा-परिणामः प्रतिकूलस्ते प्रपत्स्यते। गभस्तिहस्तास्त-समये मयेदं परीक्षा-परिणाम-प्रदर्शकं पयःपूर्णं पात्रं पुनरेत्य प्रेक्षिष्यते। अपरं च सत्यां बुभुक्षायामपरपाणि-प्रणिहितः पायस-पिण्डः प्राशितव्यः। पुनरवधेहि—'प्रतिषिद्ध-परपुरुषप्रचारे चक्राकारे मार्गेऽस्मिन् क्षणमपि विश्रामहेतोः नावस्थानीयम्। यदि च कटोराद् वारि-बिन्दु-विनिपातः सम्पत्स्यते, न ते मोक्ष-मार्गोपदेश' इति।

२०. एवं निर्भरं निर्दिश्य पुनर्विदेहः समप्रसादावसादः स्वप्रासाद-माससाद। अथ प्राप्त-प्राक्तन-पुण्यपरम्परा-परिपाको वराको मुनिरपि 'मुक्ति-मार्गोपदेशो मया नियतमधिगन्तव्य' इति दृढाध्यवसायः स्तब्धकायः, शिरोऽवनम्य प्राणानायम्य, कठोर-कर-कलित-कटोरः कृतत्राटक इव तत्रैव निहित-निष्पन्द-निश्चल-नयनः, मा भूद् भाजनाम्भोभ्रंश इति भूयो भूयो भीतो भवन्, कण्डूति-कास-छिक्का-जृम्भा-प्रभृति परिवर्जयन्, प्रतिपल-प्ररूढ-प्रस्खलनाशङ्कः, पत्रपुष्पादावपि परिहृत-पाद-प्रणिधानो विचक्षुरिव, वधिर इव वाग्विकल इव, शिङ्घन-शक्ति-शून्य इव, मृन्मय-मूर्तिरिव, किञ्चिदप्य-पश्यन्नशृण्वन्नवदन्ननास्वादयन्नशिङ्घन्नस्पृशंश्च यूकावच्चङ्क्रमपरो राजानु-युक्त-लतालुप्त-गुप्तपुरुषावेक्ष्यमाण-कर्त्तव्यक्रियाकलापः, कालकलायितं याम-चतुष्कमत्यवाहयत्। यतो हि—

२१. परीक्षायां प्रविष्टानां कालः कुञ्चितकायताम्।
याति मुक्त्वा स्थितिं तावदायतां स्वां विहाय ताम् ॥१६॥ इति।

सति सायन्तने समये मलिनिम-मिलिते मरीचिमालि-महसि मन्दं-मन्दं महाराजो जनकः समुपेत्य स्मेरमुखमण्डलस्तं पप्रच्छ—'प्रियमुने! अपि नाम पतितं पात्रात् पयः ?' इति।

'महाराज ! नाल्पीयोऽपी'ति स प्रत्युदतीतरत् ।

तत्र पात्रं परीक्ष्य प्रतमां प्रीतः पृथिवी-पालः पुष्कलं प्रश्नयाञ्चकार—

२२. 'अयि सोम्य ! अपि नाम प्राशितः पायसपिण्डः ? संसार-सम्मोहनायेव सृष्टानि दृष्टानि किमामोदामोदित-मनांसि सुमना-सुमनांसि ? किंस्विदपनीत-क्लमामयानि सुधामयानि, मादक-मन्त्र-मेलित-मारुतानि, कलकण्ठ-कोकिल-रुतानि श्रुतानि ? कच्चिन् मधु-मधुरिम-मिश्रितानि मादकताश्रितानि पुष्पन्धय-पुञ्ज-गुञ्जितानि कर्णाभ्यामाचान्तानि ? स्वैर-सम्पातेन वकुल-वीथी-वातेन समुपानीतानि सौरभ-वीचि-व्रातानि किमुपाघ्रातानि ? किमुत सुखमासेवितः परामृष्ट-पुष्करिणी-प्रतीरः, शीतिम-शीलन-शुभोशीरशरीरः सोऽयं धीरः सुमोपवन-समीरः ?' इति ।

२३. मुनिराह—'भगवन् ! न प्राशितम् नास्वादितम् न प्रेक्षितम् न श्रुतम् न शिङ्घितम् न वा स्पृष्टं किञ्चिन्मया । सर्वथा भवदाख्यातं वस्तुजातं नात्र वर्तमानमासीत् । एकतानमानसेन मया तु विस्मृतेयं समस्ता संसृतिः । पानीय-पात्रात् पृथक् किञ्चिदपीह नाभासत । परमार्थतोऽहमपि नासम् । पयःपात्रत्वे परिणतः परितः पूर्णः प्रत्यक्ष-प्रपञ्च' इति ।

तदुपश्रुत्य पुलकितदेहेन प्रोद्भिन्न-स्नेहेन च विदेहेन स्वपाणिं मुनेर्मूर्ध्नि निधायावाचि—'जैवातृक ! प्रपन्नोऽसि परीक्षा-पारावार-पारम् । उपदिष्टो भवदिष्टोऽपवर्गमार्गोऽपि गोपितोऽपरैः । यथा सौभाग्यभाजा त्वया बहिर्वर्तिनो विविधान् विषयान् विसृज्यात्रैकत्र पयः-पात्र-मात्रे समाकुञ्चितं चेतः तथैव यो बाह्य-व्यापार-विगत-स्पृहः एकतान-मानसो विष्वग् ब्रह्मैव विद्यमानं वीक्षमाणस्तदुपासते स कृत्स्न-भीति-परित्राणं निर्वाणमुपार्जयति, जयति च जन्यमिव क्लेशाऽऽश्लेषकरालम् महामोह-व्यालमालम् जगज्जालम् । तदाहुः—

२४. **येषां संयमिनां सम्यग्, विलुप्ता विश्ववासनाः ।**
तेषां ब्रह्मैकनिष्ठानां, सफलाः स्युरुपासनाः ॥१७॥

साध्यं प्रयासैरपि कर्म्मजातं, तदेव तावच्छुभदं प्रजातम् ।
सम्पाद्य यन्मानसमेकतानं, विवेक-बुद्ध्यास्ति विधीयमानम् ॥१८॥

आदौ मध्ये तथान्ते च यत्र स्यादेकतानता ।
तत्रैव साध्यसिद्धिश्च सञ्जाता जनता नता ॥१९॥

किं च— असाफल्याभिभूतस्य, भूतस्य भूतिमिच्छतः।
शरणं करणानां स्यात्, न चैकीकरणं विना ॥२०॥
बाह्यं तथान्तरं कृत्यं, पूर्णतां न प्रपद्यते।
विहायानन्यवृत्तित्वं, कः श्रमः कः किल क्रमः ॥२१॥ इति।

सत्यं संसार-स्वरूपम् (३१)

१. अस्ति पञ्चाम्बुप्रदेशे प्रथितात् पट्टपुरप्रख्यात् पत्तनात् प्राच्यां, पदे - पदे प्रावृषिक-पयस्विनी-प्रचय-प्रबल-प्रवाह-परिवापित-पार्श्वप्रदेशस्य, जम्बुकादि-जीवजात-जुष्ट-जङ्गल-जालकस्य, पाषाण-पादप-प्रभृति-प्रचुर-प्राकृतिक-पदार्थ-प्रदानेन प्राकृत-पुरुष-परिवार-पालकस्य, शिवालकस्य शुभशैलस्य, समुच्छलदुत्ताल-स्वर्णभद्रासरित्तरङ्गे शाद्वल-शीतलोत्सङ्गे 'ऊर्णा' इति नाम्ना मानिता पृथुप्रथा मनोहारिणी नगरी।

२. तत्र वर्तते विद्यावितरणेनान्तस्तमोमुषाम्, अविरतं तीव्रतपोजुषाम्, परमविदुषाम्, वैराग्यवृत्तीनां द्विजातीनां निस्तुलं कुलम्। तस्मिन्नेव समुत्पन्नः सहज-सत्त्व-सम्पन्नः, सकरुणः तरुणः श्रीकान्तो नाम महात्मनां परिव्राजकानां परमोपासकोऽजायत। आशैशवादसौ सन्ततं स्वर्णभद्रा-सरित्-समीप-संवासिनः संन्यासिनः संसेवनार्थं सन्ध्या-समये समयासीत्। एवं सुचिरात् सत्सङ्गहेतोः तन्मनसि विरक्तिर्विषयवासनायां तथासक्तिरीश्वरोपासनायां यौगपद्येनाविरभूत्। अथातिक्रामति काले ब्रह्मविदा परिव्राजकेन चेतसि चिरायेदं व्यचारि यदेष युवा सदाचारी सर्वथाऽधिकारी मे रहस्यविद्यायाः। केवलं विद्या-वैधुर्यात् पितृ-प्रसू-पत्नी-प्रभृति-परिवार-प्रेम-पङ्के प्रलीन इति। विश्वजनीनवृत्तिरसौ सत्त्वप्रधानं तं युवानं भूरिभयकरात् संसार-सागरात् समुद्दिधीर्षति स्म—

३. यदुक्तम्—

आत्मम्भरिभिरापाराद्, भूरियं भूरिभिर्भृता।
उदारताजुषः केचिद्, हितेऽन्येषां मुदा रताः ॥ १ ॥
प्रतरन्तः प्रदृश्यन्ते, पयः - पुरेषु पूरुषाः।
तरितारस्तु ते तथ्याः, येऽन्येषामपि तारकाः ॥ २ ॥
कौशलं किं नु केनापि, कृतं चेदात्मकौशलम्।
केवलं तत् प्रशंसन्ति, यत् स्वत्राणाय केवलम् ॥ ३ ॥ इति।

एकदा प्राप्तावसरेण करुणाकरेण बुबोधयिषुणा तेनाभाणीयं कल्याणी वाणी—'सौम्य ! पित्रोः परिचरणम्, पत्नी-प्रमुखाणां पालनं पोषणं च पुंसां परमं कर्त्तव्यम् । तत्तु धर्म इति मत्त्वा विधातव्यम् । परमज्ञानवशात् तत्रासक्तिररुचिताऽनुचिता चोदिता मेधिरैः धीरधूर्धरैः । परमार्थतः परमात्मैवात्मीयः । सकले संसारे कोऽपीतरो नरो न कस्यापि बन्धुः । तदुच्यते—

४. सर्वेऽपि केवला लोकाः, कोऽपि नास्तीह बान्धवः ।
न बापो नाम्बिका भ्राता, न वधूर्वा न वा धवः ॥ ४ ॥ इति ।

तत्त्वार्थस्त्वयं यद् जीवस्य न केनापि कश्चित् सम्बन्धः । न तस्य कोऽपि प्रसविता न सवित्री न सोदर्यो न सम्बन्धी । अनेकशो जननान्तरेषु स एवैतेषां जनक आसीत् । बहुकृत्वश्चैते तस्य बापा बभूवुः । बहुश इमे तस्य सपत्ना वा सुहृदो वासन् । समेऽपीमे सम्बन्धाः वस्तुतो वपुष एव वर्तन्ते । यावदेव वपुषो विच्छेदो जायते तावदेव बन्धु-बान्धव-सम्बन्धोऽपि विच्छिद्यते । एकल आगतः एकलो यास्यति । परस्तात् सर्वोऽपि स्वकर्मानुसारेण फलमश्नुते । अत एवाहु—

५. यदेह देह-सम्बन्धो, जीवजातस्य जायते ।
स्यात्तदैवास्य सम्पर्कः, स्वकैः स्निग्धैश्च सान्वयैः ॥ ५ ॥

काये चाधिगतापाये, भवेच्छिष्टं नु किं भवे ।
इमके के तके के वा, न त्वकं नापि चाहकम् ॥ ६ ॥

पुंसां स्वकर्मणामेव, संसारान्ते सुनिश्चितम् ।
नरको वाऽथवा नाकः, परिपाकः प्रजायते ॥ ७ ॥ इति ।

त्वरया तरुणेनोदतारि—'भगवन् ! भव्यं भवद्भणितं न मनागपि मे मन्दां मतिमुपारोहति । मम मातापितरौ प्राणेभ्योऽपि प्रियतरे मयि पुष्कलं प्रेम प्रथयतः । अहं चेदेकस्मिन्नपि दिवसे वसितं न व्रजामि तदा तयोरशनाया पिपासा शायिका चेति कृत्स्नमेकपद एव विलीयते । पतिप्राणायाः पत्न्या विषये किमुच्येत । तस्यास्तु मामन्तरेण केवलं मरणं शरणम् । क्षणायापि मामनीक्षमाणा साध्वी सा द्राघिष्ठा उच्छ्वासपरम्परा विमुञ्चति । अमायाः भिन्नकाया अप्यात्मतुल्याः कुल्याः, सौजन्यशस्याः वयस्याः, सद्व्यवहारोल्लासिनः समीपवासिनः, साधुत्वसौम्यत्व-संयुताः संस्तुताश्च अप्रमाणं प्रेमाणं प्रकटयन्ति' इति । सर्वथा स्नेहसूत्रेण सम्बद्धः सकलः संसारः ।

६. संन्यासिना समुदीरितम्—'प्रिय ! परिवासं प्राप्य परीक्षणीयं पितृ-पत्न्यादि-परिजनानां परमार्थं प्रेमप्राचुर्यम्' इति। एतत्कथनेन सहैव तेन तरुणाय विशिष्टा योग-युक्तिरप्युपदिष्टा। तस्मिन् दिवसे युवासौ संवासं समुपेत्य स्वैरं मुद्रितमुखः पर्यङ्कमध्यशेत। तेन कस्यचिदपि कुटुम्बिनो वचनस्योत्तरं नादायि। कतिचित्-कालकलानन्तरमसौ पाणिपादं स्तब्धी-कृत्य, प्राणपवनं च दशमद्वारे दृढं निरुध्य नितरां निश्चेष्टोऽलेट्यत्। तथा निर्वर्ण्य तरुणं करुणं हा हेति क्रन्दनं प्रारभ्यत। मृतोऽयमिति मत्त्वा कान्तया कर्बुरिम-कान्तानि काशिष्णूनि कलाची-कल-क्वणितानि काचकङ्कणानि शकलीकृतानि। सपदि सम्मार्जितं सौभाग्य-सूचकं सीमन्त-सिन्दूर-सौन्दर्यम्। वाष्पबिन्दु-विलुप्तौ कपोलौ कुट्टयन्त्या जनन्या कृतं कचनिचयोल्लुञ्चनम्। पुत्रोपरि पतितेन प्रोच्चैः प्रचुर-परिदेवितेन, पुनः-पुनः परमेश्वर-पितृपति-परिवादपरेण पित्रा, पुञ्जिताः प्रतिवेशिनोऽपि प्ररुदिते प्रवर्तिताः। श्रुत्वा तथा तेषां तारं हाहाकारं तदागारं नैके नागरा आगमन्। सगोत्राः सुहृदः संस्तुताश्च स्नेह-सम्बन्ध-सादृश्येन अनिष्टं दिष्टं करालं कालं च निर्भरं निन्दन्तः सनिर्वेदं खेदं प्रादुश्चक्रुः। अत एव समर्यते—

७. **अकारणं वैरिणि चापि दारुणे, कुतोऽप्यकस्मान् मरणं समाश्रिते।**
स कः स्वकश्चान्यतरः सचेतनो, मर्माविधं याति न वेदनां यकः ॥८॥

किं च—

स्याद् यस्य येन प्रणयोऽत्र यावान्, तावत् स दुःखं लभते तदर्त्या।
लोकान्तरं हन्त ! गते तु लोकाः, स्तोकं न तन्वन्ति समेऽपि शोकम् ॥९॥

इति।

तस्मिन्नेव दारुण-दुःखमये समये समायासीत् स संन्यासी। समीपं समुपेत्य सन्तप्त-स्वान्तान् समवेतान् समस्तान् सम्बोधयन् स स्वैरं समुदैर-यत्—'अहमिमं प्रत्यागत-प्राणं प्रवर्त्तयितुं प्रभवामि। प्रदीयतां पानीयपूरितं पात्रमेकम्' इति।

८. तदाश्रुत्याश्वस्ता अविहस्ताः समस्ता, रुद्धरोदनाः मनाङ्-मोदनाः गृहजनाः श्वःश्रेयस-शरणयोः श्रमण-चरणयोरलोठिषुः। पार्श्वे प्रसङ्गं प्रेक्षमाणेन प्रतिवेशि-पुरुषेण पलाय्य प्रादायि पयःपूर्णा कांस्य-कटोरा। तत्पात्रपानीयमानीय पाणिना परिव्राजा मौनभाजा मनसि स्नाता मृत्युमोचनी मन्त्रमाला। पुनः तरुणं परितः पयःपात्रं पर्यावर्त्त्य प्रोवाच—'इदं पानीयमाचमनीयं केनापि। यः पास्यति स पञ्चत्वं प्राप्स्यति, युवा च प्रत्यापन्नजीवनः सम्पत्स्यत' इति।

९. परं कः प्राणधारी संसारी यो मुमूर्षति। सर्वेऽपि परस्परं मुखानि प्रेक्षितुं प्रारेभिरे। प्रतिवेशिनः प्रणयिनः परिचिताश्च निभृतं निकेतनान्निर्गतास्तस्मात्। ततो यदा श्रमणेन तरुणस्य वापमुद्दिश्य जिज्ञासादृष्टिः प्रेरिता तदासौ स्पष्टमकष्टमाचष्ट— 'महाराज! प्रचुरया प्रीत्याहं पानीयं पातुं प्रभवामि। परं साम्प्रतं यावद् अत्यावश्यकानि कानिचिदिष्टानि कर्माण्यवशिष्टानि विद्यन्ते। न चेत् तानि साधु साधितानि, प्रतमां पीडां प्राप्ता पत्नी मे पुनः प्रगाढेन प्रविश्लेषेण प्रत्यहं परितप्स्यति' इति।

किन्तु मध्य एव तद्वचनं विघ्नयन्त्या वृद्धया विलोचने वक्रं विस्फार्याऽवादि—'स्थविर! किं मामन्तरा त्वं प्राणितुं प्रभविष्यसि? अथ च न वीक्षसे वराकीं बालां वधूम्? किमियमलं विषमां वेश्मव्यवस्थां विधातुं विना माम्?' इति।

१०. तदनु स्वगतं स्मयमानः साधुः संन्यासी शोकोन्मृष्टमुखच्छायां जायां तरुणस्याभिलक्ष्याचख्यौ— 'देवि! त्वं तु पतिप्राणा निस्त्राणा सम्प्रति संवृत्तासि। नाऽथ च नाथहीनं पराधीनं दीनं जीवनं ते रोचिष्यते। तत् तीव्रस्तर्षश्चेत् त्वं त्वरितं तोयमाचम' इति।

सा स्त्री समवदत्— 'महामहिममण्डित! महात्मन्! मत्तः पृथक्कृतः प्राप्तप्राणोऽप्येष परां पीडां प्रतिपत्स्यते। तथा च मातापितरौ तु मे मरण-सन्देशोपलम्भसमकालमेव कालमेष्यतः। एकलाहं तयोः सन्ततिः। तदावासे विरह-विपद्-बहुविसरान् विकटान् वासरान् व्यतियापयिष्यामि चेत्, तयोरप्याधिहानं धैर्याधानं च सम्पत्स्यते' इति। प्रायः प्रतारकाः स्वार्थिनः सांसारिकाः।

तस्या अपि तादृशं भृशं नैराश्यनिष्पादकं निर्भरनैष्ठुर्यं प्रतिवचनं निशम्य श्रमणोऽप्राक्षीत्—'तर्हि पानीयमिदमहं पिबानि?' इति।

११. तदाकर्ण्य सपदि समकाले सकलैरगादि— 'धन्याः साधु-महात्म-मूर्धन्याः करुणाभरणाः श्रीचरणाः। ब्रह्मचर्य-बलविभ्राजां परिव्राजां जीवनं तु परोपकृतय एव जायते। कृपा कार्या। महामहिमानः मुक्तात्मानः श्रीमन्तस्तु। भवत्कृते तुल्यं वरणम्, मरणं प्राणधरणं च' इति। यतो हि युक्तमुक्तं स्वलाभनिष्ठानां साधूनां च विषये—

स्वार्थसाधन - साकाङ्क्षाः, चपलाश्चाटुचञ्चवः।
कोटीः कुर्वन्ति कूटानां, विद्वद्-वञ्चनवाञ्छया ॥ १० ॥ इति।

अथ च—मृतिः ब्रह्मविदः केयं, धृतिः का जीवनस्य च।
भृतिः का विश्वबाधानां, वृतिः का सौख्यसम्पदाम् ॥११॥ इति।

१२. इतोऽधिकतरं तरुणेन किमपि नाकर्णनीयमासीत्। समापितस्तेनाविरामः प्राणायामः। प्राह चासौ परिव्राजं प्रति— 'भगवन्! नापेक्ष्यते पानीयपानमिदानीं भवता। प्रापि मयाऽद्य समीचीनं जीवनम्' इति। स परित्यज्य पितृ-प्रसू-पत्नी-प्रभृति-परिवारं ससम्पदागारं, श्रमणेन सह तदाश्रममुपैषीत्। उक्तं चापि याथातथ्यम्—

वाप-बन्धु-वयस्यादेः, वनितायाः विशेषतः।
विदित्वा वैभवानां च, वास्तवत्वविहीनताम् ॥ १२ ॥
वैतथ्येन वृतो विष्वग्, वञ्चितो बहुविभ्रमैः।
वराको विवशो वीरो, विश्वतो वै विरज्यते ॥ १३ ॥ इति।

१३. तत्र मनागुन्मुद्रितज्ञानं तं युवानं प्रबुबोधयिषुः परिव्राजकः प्रोवाच— 'स्वस्तिमन्! सर्वथा सत्य-स्थास्नुता-सार-समुज्झितः संसारे सकलैः स्त्री-सुताद्यैः सम्बन्धिभिः संसर्गः। सर्वः स्वार्थं सुखं समीहते। सुनिश्चितं स्वल्पसमयस्थायी, सुरधनुः-सौन्दर्य-सङ्काशः, सन्दर्शन-स्वरूपः सखीनां स्नेहः। सापायः सम्पदां समवायः। सारणिक-श्रायः शुष्कसारः संसारः। इहत्यः सत्यः केवल आत्मा। तथा चानुश्रूयतेऽवितथा कथा पुराणी—

१४. पुरा प्राच्यप्रदेशे मिथिला-मही-महेन्द्रो महाराजो जनको बभूव। स तीक्ष्णातपे तपे विभावरी-वेलायां विष्वग् विविध-वल्लीवीथी-वलयित-वकुलोपवने, पुष्पपुञ्जपरिमलित-परागपूर-परिमिलित-पेशल-पवने राजभवने निर्भर-निद्रा-निमग्नोऽभूत्। शायिका-सुखमास्वादयता तेनैकः विस्मापकः सुखसमापकः स्वप्नः समालोकि— शिथिलानुशासना मिथिला महानगरी केनापि विक्रान्तेन पार्थिवेनाक्रान्ता। तस्य विपुलेन प्रबलेन बलेन वलयिता पुरी परितः। प्रतिषिद्धाः प्रवेशपथाः। उभयपक्षीय-पृतनयोः प्रयुक्तोच्चावचप्रहरणो दारुणो रणः प्रावर्तत। मिथिलापुरी-प्राचीर-परिरक्षितं निर्भीकमप्यनीकं जनकस्य पराजीयत प्रभविष्णु-प्रहरण-पाणिभिः परिपन्थिनोऽदैन्यैः सैन्यैः। विजयिना वैरिणा वन्दीकृतो विवशो विदेहः। जयतुष्टेन दुष्टेन द्विष्टेनावघुष्टम्— 'रे सुकृतस्नेह! विदेह! न त्वां व्यापादयामि दयामिदानीमुपेतः परं त्वमिहैवाविलम्बं विश्वं वसन-विभूषण-विन्यासं विसृज्य विदेह-वसुधावलयाद् वहिर्व्रज' इति। प्रत्यर्थि-पार्थिवेन सडिण्डिमनादमिदमपि व्यज्ञापि यद् 'यः कोऽपि जनो जनकाय भोजनं प्रदास्यति, भरण-शरण-वितरणेन सरण्यपसरणधारण-व्यवस्थया च तस्य

साहाय्यं विधास्यति, तस्य दण्डः प्रचण्डः सर्वस्वहरणं मरणं चे'ति। मनुते च मुनिर्मनुः—

१५. दार्ढ्येन दमयन् द्रोहं, दयालुः दम्भविद् द्रुतम्।
द्वेषणं द्रावयेद् दूरं, देशतो दीर्घदर्शनः॥ १४॥
दुर्दान्तं दारुणं द्विष्टं, द्वन्द्व-दम्भेषु दक्षिणम्।
दीक्षितो दण्डदानेषु, दात्रेण द्राग् दितं दहेत्॥ १५॥ इति।

अथ जनकेन न केनचिदप्येवं प्रागवधीरितेन अवतारितानि रत्नराजि-खचितानि वराणि कौशेयाम्बराणि, हारादीनि हिरणाभरणानि च। केवलं क्षीणं कौपीनं, कणीकं कटी-कर्पटं च परिदधानो व्याप्तावसादात् स्व-प्रासादात् स मनस्ताप-मलीमसमुखो नितान्तं निःश्वसन् निरगात्। पद्भ्यामेव देवरूपोऽसावमानमवमानं मानसे मन्यमानः स्वराज्यसीमानं व्यतिचक्राम। परं प्रचण्ड-दण्ड-दराद् दूरादेव दर्शितादरोदरदयोऽपि कोऽपि तेन सह सम्भाषणमपि न संव्यधात्। दुर्लङ्घ्या हि राजाज्ञा।

एवं परिसीमा-पारप्रयाणाय प्रबन्धेन प्रान्तर-पदवीषु प्रचलतः परिश्रान्तस्य प्रवासितस्य पृथिवीपालस्य पादपयोजयोः प्रभूताः पिटिकाः प्रादुर्भूताः। पथ-पार्श्व-प्ररूढानां पादपानामधस्ताद् बुभुक्षया क्षयाभिमुखोऽसौ नैका निशा अनैषीत्। द्वारोपान्ते तदुपस्थित्यापि परवशाः प्रजापुरुषाः प्राबिभयुः। विपर्यस्तविधेः वराकस्य तस्यैवं बहवो वासरा बुभुक्षोरेव व्यतीताः। नान्नकणिकापि जठरपिठरं प्राविशत्।

१६. मिथिलेशः सम्प्रति महीपालो नासीत्। चिरकालादकृतवापः कीर्ण-केश-कलापः, धूलि-धूसर-शरीरः क्षुधाऽधीरः, नष्टनिद्रः क्षुद्रः स कश्चिद् दरिद्र आसीत्। सीमां समुल्लङ्घ्य स काञ्चित् पुरीं प्रापत्। पृच्छापरेण पृथ्वीपतिना पथिकेभ्यः पर्यज्ञायि यत् पान्थ-श्रायस्य पार्श्वे एवैकमन्नक्षेत्रं वर्तते। तत्र च क्षुधातुरेभ्यः कृशरा वितीर्यते। स्पृहयालुः विदेहो महत्याशया तत्रागमत्। परं खिच्चा तु प्रागेव बुभुक्षितेषु वण्टिता समभूत्। वण्टकश्च प्रवेश-कपाटं पिदधान आसीत्: अशनायाऽतिशयात् प्रचुर-परिभ्रान्त-प्रज्ञः पार्थिवः पृथिव्यां पपात। कार्पण्यक्षेत्राभ्यां तन्नेत्राभ्यां निरन्तरं नीरं निरगलत्। दुर्विधस्य तस्य दीनदशा-दृश्वा वण्टनकृद् दूरं दया-दृष्टिः समपद्यत। स आह— 'भ्रातः! कृशरा तु समस्ताऽवसिता। केवलं कडच्छकेन चमसेन चापनेयः पात्रतले संश्लिष्टः खिच्चायाः प्लुष्टः स्वल्पांशः परिशिष्टः। काङ्क्षसि चेत् स तुभ्यं प्रदीयेत। तस्मिन् दाह-दौर्गन्ध्यं तु विद्यत एव' इति।

१७. विदेहो वण्टकस्य वचनं विधिवितीर्णं वरमिव विवेद। प्रसारितः पाणिपुटकः प्रकामं प्रीतेन तेन। यतो ह्युच्यते—

कान्दिशीकैः क्षुधा क्षामैः, कृपणैः कल्मषाकुलैः।
कण्ठ-कुण्ठ-कथैः किं नो, कुत्सितं क्रियते क्वचित्?॥ १६॥ इति।

अथ वण्टनकृता दग्धा कृशरानीय मिथिला-महीपस्य करकोषे निभृतं न्यधायि। परं तस्मिन्नेव कराले काले केनचिच्चञ्चलेन चिल्लेन झटित्याकस्मिकमाक्रमणमकारि। तस्य प्रबलेन पादप्रहारेण प्रगाढं प्रकम्पितात् पृथिवीपाल-पाणिपुटात् प्रचुर-प्रयास-प्राप्तः प्लुष्टोऽपि प्राशन-पदार्थः पङ्किले पूति-प्रणाली-पानीये पतितः। प्रथीयसीं पीडापरम्परां प्राप्तः पार्थिवः प्रोच्चैः परिदेवनं प्रारभत। पीडायाः परमावधिः प्रलापः।

१८. सैषा तु सर्वथा स्वप्नसृष्टिः समभूत्। परं पर्यङ्के प्रसुप्तः पार्थिवः परमार्थतः प्रलपितुं प्राक्रमत। स पुष्कल-प्रवेपनपरः पुनः-पुनः पाणिपादं परितः पातयामास। उच्चैःकारं क्रन्दनात् न तस्यैव निद्राभङ्गोऽभूत् किं तर्हि किं भूर्नमिति बुभुत्सया भूभर्त्तुः भूयस्यो भुजिष्याः, भीता भृतिभुजो भट्टिन्यश्च जङ्गाल-जवास्तत्काले तत्रोपेताः। मिथिला-महीपो बहुलं व्याकुलो विवर्णवदनो विस्फारितविलोचनो विष्वग् व्यलोकयत्। स कृतालङ्कारे शयनागारे, पुष्कर-पराग-पेशलेन, पयः-पराञ्ज-पाण्डुरेण, परिणाहिना प्रच्छद-पटेन प्रावृते, प्रतनु-तन्तु-प्रकल्पितैः पुष्प-पत्र-पक्षि-पादप-प्रभृतिभिः प्रसाधित-परिधाने, महामूल्य-मञ्जु-मणिमण्डिते मञ्चेऽशयिष्ट। स मनागपि बुभुक्षितो नाभूत्। परितः पर्यङ्कं पृथ्वीपतेः प्रियाः पत्न्योऽतिष्ठन्। परिचरणार्थं प्रतीहार्यः प्रभूनाः परिजनाश्च प्रत्यक्षाः प्रस्तुता अजायन्त। सम्प्रत्यपि स मिथिला-महीपाल आसीत्। निरवशेषमिदं निरीक्ष्य विदेहेनावादि—'किमिदं सत्यम् आहोस्वित् तत्?' इति।

१९. महनीयस्य महाराजस्य महिष्यः चिन्ता-चुम्बित-चित्ताः समपद्यन्त। विदेह-व्यामोहं वीक्ष्य वेपमान-गात्राणां महामात्राणां व्याकुलता बहु ववृधे। महीयसा मदेन महीपस्य मतिः मारितेति मेनिरे मानवाः। जनको न कञ्चित् किञ्चिदप्यकथयत् न च कस्यचिदपि प्रश्नं प्रत्यवोचत्। तन्निकटे यः कोऽप्यायासीत् तमसावेकमेव प्रश्नं पर्यपृच्छत्— इदं सत्यम्— अथवा तत् सत्यम्?' इति।

प्राप्ताः पीडा-प्रतिक्रिया-पटवः प्रचुराः प्राणाचार्याः, यत्तं युगपद् यथायुक्ति यायजूकैः, मुहुर्मुहुः मण्डलितो मङ्गल्यैः महामृत्युञ्जय-मनुभिः महीप-मञ्चो मान्त्रिकैः, ततः ततः तन्तुभिः तल्पः तुलिततिलतण्डुलैः त्वरितैः

तान्त्रिकैः, कृता कल्याणकरी क्रिया कृत्यादि-क्रूर-कार्मण-कुशलैः कीर्तितैः कर्मकाण्डिभिः। तत्र कश्चिदागत्य विकत्थमानोऽब्रवीत्—'दीप्यतां दिव्योऽयं दीपः, स्वस्थः सम्प्रत्येव महीपः' इति। अन्यो वदति—'एष धुक्ष्यतां धीधारणो धूर्धरो धूपः, कुशली भूपः' इति। परः प्राह—'सोऽयं सौवस्तिकः सिद्धार्थः, प्रसत्स्यति पार्थः' इति न जाने के के तत्र विविध-विद्या-विधान-विख्याताः, नितरां निरामयत्वनिष्पादन-निष्णाताः समायाताः। परं पृथिवीपतेः प्रज्ञापीडापरिष्ठितिः प्रतनु-परिमाणापि परिवर्तनं नतरां प्राप्ता। सहसा दिष्टादिष्टः ऋषिरष्टावक्रो मिथिलामुपागमत्। स स्मेरास्यः समन्ततः समवेतान् सामन्तान् सचिवान् स्त्री-सेवक-सैरन्ध्री-समाजं च सुतरां सान्त्वयित्वा सम्राजः समीपं समुपेतः। जनकस्तमपि प्रागुक्तमेव प्रश्नं 'इदं सत्यम् उत तत् सत्यम् ?' इति पप्रच्छ। ब्रह्मविद्याविशारदेनाष्टावक्रेण ध्यानद्वारा प्रागेव पार्थिव-प्रश्नस्य प्रयोजनं पर्यज्ञायि। किं तिरोहितं ब्रह्मविदाम्।

२०. अथाष्टावक्रः पृथिवीपालं पर्यप्राक्षीत्—'भो भूभर्त्तः! यदा कम्पमान-कलुषित-कायः, कटिकलित-कर्पटकौपीनः, कुण्ठितकण्ठः, बुभुक्षुर्भिक्षुर्भूत्वा भोजनार्थं भ्रमन् भवानन्नक्षेत्रस्य प्रवेशप्रतिहारे पाणिपुटकं प्रसार्य परिकल्पकं प्रार्थयमान आसीत् तथा तेन ज्वलिता खजाका-खाता खिच्चा भवतः करकोषे न्यधायि, तदानीमिदं भवतो भूतिभूषितं भव्यं भवनम्, कोऽपि कौशेय एष नरेशवेषः, इमा मृगाङ्कमुख्यो महिष्यः, इमे मानवमात्र-महिता महामतयो मन्त्रिणः, परितः प्रासादं परिभ्रमन्तः पद-प्रतिष्ठा-प्रतिपालकाः परिजनाः, परिचरणपटीयस्यः पेशलप्रकृतयः प्रतिहार्यश्च किमासन् ?' इति।

साम्प्रतं सम्राट् समवोचत्—'भगवन्! दुःखमये समये समेऽपीमे नासन्। बुभुक्षुः भिक्षुः विपर्यस्त-विधि-विप्लुत-बुद्धिः, विपद्-व्यग्रा-व्याकुलः किलैकलोऽहमेवाभूवम्' इति।

अष्टावक्रः पुनः पप्रच्छ—'अथ च पृथिवीपते! यदा भवान् प्रबुद्धः परिष्कृतं पार्थिव-परिच्छदं परिदधानः प्रासाद-प्रसारिते पल्यङ्के समुपविष्टोऽभूत् तदा विचित्रं तदन्नक्षेत्रं, तत्रत्यः करुणाकरः कर्मकरः, तद् भवतो निर्धनं परिधानम्, सा भवताऽजग्धा दग्धा खिच्चा, साऽन्तरुदिता मुधा क्षुधा किमविद्यत ?' इति।

२१. पृथ्वीपालेन प्रत्यभाणि—'पूज्यपाद! ब्रह्मवेदिन्! सर्वथा न, तत् किञ्चिदपि नावर्तिष्ट' इति।

अष्टावक्रेणावादि—'राजन् ! यदेकस्मिन् काले स्याद् अपरस्मिन् काले च न स्यात् तन्नैयत्येन सत्यं न जायते। भवतो जाग्रदवस्थायां सा स्वप्नावस्था नाविद्यत, तस्मान्न सा सत्या। तथा च स्वप्नावस्थायामियमवस्था नावर्तत, अतः एषापि न सत्या। स्वप्नदृष्टं जाग्रद्दृष्टं चेत्युभयं मिथ्या। नेदं सत्यं न तत् सत्यम्' इति।

विदेहेनावादि—'भगवन् ! तर्हि किं सत्यम् ? इति।

अष्टावक्रेण प्रत्यगादि—'राजन् ! यदा यात्रा-खेद-स्वेदमलाविलः, क्षुत्तृड्भ्यां वाधितगलविलः, भृशं कृशं करुणास्पृशं देहं वहन् अन्नक्षेत्र-कपाटोपकण्ठे क्षुत्क्षामकण्ठो विहस्तो हस्तौ प्रसार्य भवान् स्थितोऽभूत्, किं तदा भवांस्तु तत्रोपस्थित आसीत् ?' इति।

२२. विदेहेन व्याहारि—'महर्षे ! तत्त्वतोऽहं तत्रातिष्ठम्' इति। अष्ठावक्रः पुनः प्रश्नयाञ्चकार— 'नरनाथ ! अथास्मिन् काले विशालेऽत्र प्रासादे किमस्ति भवान् ?' इति।

पार्थिवेन प्रत्यवाचि— 'प्रभो ! इहाहं वर्ते, नात्र स्वल्पोऽपि विकल्पः' इति।

परस्तादष्टावक्रः परमार्थं प्रथयन् प्रावोचत्—'राजन् ! एतेनेदं प्रकटीकृतं यद् जाग्रत्-स्वप्न-सुषुप्तिषु सर्वत्रापि साक्षिरूपेण भवान् वर्तते। केवलमवस्था विपर्यस्यति। परं तास्ववस्थासु सर्वथा वर्तमानो द्रष्टा भवान् विक्रियां न व्रजति। भवान् समस्तासु तासु सुनिश्चितं वर्तते। अतो भवानेव सत्यः। भवांश्चात्मा। तेनात्मैव सत्यस्वरूपः। तथा वितथा परितः प्रसृता प्रपञ्चसृष्टिः' इति।

२३. परिव्राजा पुनः प्रावाचि—'वत्स ! बाह्य-विश्वाडम्बरोन्मुखः, पराचीन-पथे प्रवर्तमानः पुमान् प्रायेण पूर्वं पितृ-पत्न्यादि-प्रेमपरायणः, पश्चात् पुत्रप्रभृति-प्रणयप्रसक्तः, परस्तात् पौत्र-प्रमुख-प्रीति-पङ्क प्रलिप्तः प्रपद्यते। प्रियतरा हि मूलादपि कुसीदवृद्धिः। एवं प्रतिपलं प्रबल-प्रपञ्च-पाश-प्रतिबद्धस्य पञ्चत्व-प्राप्तिपर्यन्तं प्रलम्भपरिपूरितस्य परमार्थ-परिवर्जितस्य प्राणिनः पारस्परिक-प्रेम्णः परम्परा न परिच्छिद्यते प्रत्युत परिपक्वतां प्रयाति। सैषा दशा 'देहबुद्धिः' इत्याख्यायते। देहबुद्धिः मनुजो मोहात् कञ्चिद् जनकं वा जामिं वा जातं वा जामातरं वा पौत्रं वा मित्रं वा, काञ्चिद् जननीं वा जामीं वा जातां वा आलीं वा श्यालीं वा इतरं वा सम्बन्धिनं जानीते। स एव जीवबुद्धिः सन् ब्रह्मपदवाच्यस्य परमेश्वरस्यांशभूतमात्मानं मनुते। आत्मबुद्धिर्भवंस्त्वसौ ब्रह्मरूपमेव स्वं मन्यते' इति। तदुक्तं सङ्ग्रहेण—

२४. विलास-वस्तूनि मनोहराणि, भवन्ति भूयो भयदानि भव्ये ।
कट्टारिका काञ्चनकल्पितापि, कृपावती कन्धरकर्त्तने किम् ? ।।१७।।
इदं धनं वै निधनं जगत्यां, सम्बन्ध एष स्वजनैश्च बन्धः ।
सोऽयं प्रमोदः प्रखरः प्रतोदः, सम्पत्तयः सन्ति विपत्तयश्च ।।१८।।
रामा इमाः क्षेमपथे विरामाः, प्रिया प्रसिद्धिश्च पिशाचसिद्धिः ।
तारुण्यमेला च सुरूपवेला, कालस्य खेला सकला सहेला ।।१९।।

इति ।

इत्थं वैराग्यबुद्धिः यमनियमादिभिः कृतात्मशुद्धिः, एकाक्षरं परितः प्रततं जपन्, सततमात्मानं तपन्, 'सर्वं खल्विदं ब्रह्मे'ति य एकस्मिन् सर्वम्, सर्वस्मिंश्चैकं पश्यति, स एव चक्षुष्मान् कल्पते ब्रह्मभूयायेति ।

× × ×

शङ्काशतं शाश्वत-शोकशूलं,
दग्ध्वा दृढं द्राग् दुरितस्य मूलम् ।
काव्यं तदेतत् सकलानुकूलं,
नेनीयतां नून् भवसिन्धुकूलम् ।।

कौशल्यमेक तनुतां समृद्धिं,
कौशल्य-शाखी भजतां न वृद्धिम् ।
हिंसामयाः स्युः कुहचिन् न यज्ञाः
सद्बुद्धयः सन्तु समे नयज्ञाः ।।

इति कविरत्न-श्रीश्यामदेव-पाराशर-विरचिता
'चारु-चरित-चर्चा' पर्यवसिता ।

।। इत्योम् ।।

* प्रबन्धप्रणेतुः पूर्वपुरुष-परम्परा-परिचयः *

आसीत् परात्पर-पराशरवंशजातो, विद्वद्वरः 'सहजराम'-पवित्रनामा ।
चक्रेऽनिशं विसृमरैः स्वयशः-प्रसारैर्,यो वासितानथ सितान् ककुभां कपोलान् ॥१॥
जज्ञे सुतोऽतिविनतस्य 'कृपा'ऽभिधानो, नाम्नैव नैव, किमु ? तस्य कृपावतारः ।
प्रायो गुणाः स्वपितुरुच्चपदाधिकारे, यस्मिन् समे परिणताः सहजा इवासन् ॥२॥

'कर्त्ता'ऽऽख्यस्य सुतस्य तस्य तनुजा जाताश्चतुस्सङ्ख्यकाः,
ते कर्त्तुर्वदनैः समा बलभरे वैकुण्ठ-बाहूपमाः ।
आसन् ब्राह्मणवर्य-कार्यकरणाद् धर्मावतारा इव,
चत्वारश्चतुराश्चतुर्दिगधिपैस्तुल्याः समस्तैर्गुणैः ॥३॥

वंशमञ्चकपादेषु यविष्ठस्तेषु साधुषु ।
सौजन्यधन्यजन्माभूज्, जङ्गीरामाभिधः सुधीः ॥४॥
गुरवो ग्रामगोष्ठीषु, गायन्तो गुणगौरवम् ।
श्राम्यन्ति यस्य नाद्यापि, स मेऽभूत् प्रपितामहः ॥५॥

भृशानुकम्पासहितेन तेन, परोपकाराविरतव्रतेन ।
आनन्दिता हन्त ! महत्यकाले, दैन्येम दूना धनधान्यदानैः ॥६॥
आस्तां पवित्रहृदयौ तनुजौ तदीयौ, नासत्यतुल्यचरितौ नितरां विनीतौ ।
यन्नाम सद्गुणकथासु मुहुर्महद्भिरुत्कीर्त्यते शुभनिदर्शनतामुपेतम् ॥७॥
माङ्गल्यमूर्त्तिस्तकयोः कनीयान्, श्रीमूलराजः स्मरणीयनामा ।
कृतस्मितो विस्मितमानसोऽभून्मन्ये स्वयं यद्विषये स्मयोऽपि ॥८॥
सौशील्यसत्त्व-प्रकृतेश्च तस्माद् मूलादिव स्कन्धयुगं प्रजातम् ।
सूनुद्वयं साहससत्यरूपं साद्गुण्य-सङ्घे बल-कृष्ण-कल्पम् ॥९॥

उदारप्रकृतेः स्पष्टवक्तुस्तत्र यवीयसः ।
सत्य-सौहार्द-सारल्य-सौमुख्यैः संस्कृतात्मनः ॥१०॥
श्रीमद्-वसन्तरामस्य पुण्यारामस्य सूनुना ।
'सतनौर'-ग्रामवास्तव्येनास्तव्येनाल्पमेधसा ॥११॥
'प्रसन्ना'-गर्भजातेन, पाराशर्याणुरेणुना ।
प्रियसंस्कृतसेवेन श्यामदेवेन निर्मिता ॥१२॥
समस्तैः सत्त्वसम्पन्नैः सम्प्रदायैः समर्थिता ।
संसारे सौख्य-सौजन्य-सौहित्य-सम्प्रसारिणी ॥१३॥
'चारुचरितचर्चा' स्याद् गुणता-पक्षपातिनाम् ।
काव्यकौशल्यशीलानां प्रसादाय सचेतसाम् ॥१४॥

॥ इति ॥

* ग्रन्थ-कर्ता की रचनाएं *

(1) अन्योक्ति-शतकम्
(2) शृङ्गार-शतकम्
(3) ऋतुचक्रम्
(4) पञ्जाबी अते संस्कृत दे संबन्ध भाग I
(5) ,, ,, ,, भाग II (अप्रकाशित, कोश)
(6) चारु-चरित-चर्चा
(7) राजसिंह-चरितम् (खण्डकाव्य)
(8) संस्कृत-वाग्विलासः
(9) ताजिकनीलकण्ठी (संस्कृत-हिंदी टीका)
(10) काश्मीरं कामनीयकम्
(11) परमाण्वस्त्रम्
(12) साध्वाश्रमः
(13) कादम्बिनी
(14) गुरुनानकदेवः
(15) गान्धिस्तवनम्
(16) गुरुस्तेगबहादुरः
(17) भक्तसिंहः
(18) पञ्चनदस्य वीराः
(19) बल्लभभाई-पटेलः
(20) अम्बेदकरः
(21) महामना मदनमोहन-मालवीयः
(22) कवीन्द्रो रवीन्द्रः
(23) सुभाष-संस्मरणम्
(24) छन्दोमीमांसा
(25) दयामयो दयानन्दः
(26) वङ्गसङ्गरः
(27) गतवान् पञ्चाम्बुपञ्चाननः
(28) गीयतां गणनायकः
(29) शारदा-स्तवः
(30) हे श्रीकालिदास !
(31) आत्मयाजिनः
(32) बाल-विलासः
(33) पञ्चनदप्रदेशः
(34) पिपासुश्चातकः
(35) मधुमासः
(36) सोपालम्भसरस्वत्युपासनम्
(37) आद्यः स्वातन्त्र्य-सङ्गरः
(38) काव्यदोषाः (अप्रकाशित शोध-प्रबन्ध)
(39) पञ्जाबी तथा संस्कृत के सम्बन्ध (शीघ्र प्रकाशित होने वाला संस्करण) आदि आदि ।